VOLUME VII. PART I. NO. XVIII.

NOTICES

OF

SANSKRIT MSS.

BY

RA'JENDRALA'LA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German and of the American Oriental Societies, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

For the year 1882-83.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

1883.

INDEX TO VOL. VII.

PART I.

NOTICES OF SANSKRIT MSS.

No. 2246. प्रायश्चित्तौघसारः । Substance, country-made yellow paper, 16 × 4 inches. Folia, 41. Lines, 8 on a page. Extent 1,782 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇí-kuṇḍá, Zillá Rañgapur, Bhavendranátha Bhaṭṭácbárya. Appearance, fresh. Prose and verse. Correct.

Práyaśchittaughasára. A treatise on expiations—a religious penal code—compiled principally from the original Smṛitis. By Ánanda-chandra Viprendra. Offences are classed under four heads, heinous, gross, venial, and slight, and all the principal offences under each head are noticed in order.

Contents. Nature of expiations. Character of sins. Procedure for obtaining legal opinion in cases involving expiations. Merit of bathing in the river Ganges for the expiation of sins. Character of the guilty. Heinous sins. Expiation for the murder of a Bráhmaṇ. Murder defined. When murder is not sinful, especially with reference to the rules of the Tantras. Expiation for drinking ardent spirit, arrack. Arrack and other spirits defined. Different expiations ordained for different kinds of ardent spirits. Expiation for theft of gold, &c. Theft defined. Expiation for incest with the wife of a spiritual guide. Wife of a spiritual guide defined. Expiation for association with sinful persons. Association defined. Expiations for gross offences. Expiation for slaughter of kine. Obligations for the day preceding that of performing an expiation. Expiation for murdering a wife guilty of adultery. Ditto for killing horses, elephants, &c. Ditto ditto cats, &c. Ditto ditto certain kinds of birds. Ditto ditto aquatic animals. Ditto for felling particular trees. Ditto for destroying maṇḍapas, gardens, tanks, &c. Ditto for eating forbidden food. Ditto for eating garlic, &c.

Ditto for eating unconsecrated meat. Ditto for eating beef. Ditto for eating duck meat. Ditto for eating fish, &c. Expiations for venial offences. Ditto for association with public women. Ditto for association with women in their season. Ditto for cohabition on the day when a person has to perform a S'ráddha. Ditto for sexual intercourse with beasts. Expiations for slight offences resulting from neglect of duty. Ditto for omission of diurnal prayers. Ditto for officiating as a priest to a S'údra. Ditto for accepting as presents articles given at an expiatory rite. Ditto for wearing blue cloth, &c. Ditto for going to a vile country. Ditto for falsehood. Ditto for attending calls of nature after rubbing oil on the person. Ditto for falling from a height. Ditto for bites from dogs, &c. Ditto for touching prohibited articles.

Beginning. प्रणम्य पार्व्वतीनाथं प्रायश्चित्तौघसारकं ।
आनन्दचन्द्रोविप्रेन्द्रः कुरुते बालबोधकं ॥

तत्र पापक्षयमात्रसाधनं कर्म्म प्रायश्चित्तं । तथा च निश्चितपापक्षयेतरसाधनत्वाप्रयोज्यत्वे सति पापक्षयसाधनताप्रयोज्या या कृतिस्तद्विषयत्वं । अथवा निश्चितपापक्षयेतरविषयकेच्छाजन्यप्रवृत्त्यविषयत्वे सति पापविषयकेच्छाजन्यप्रवृत्तिजन्यत्वं प्रायश्चित्तं । इत्यादि ।

End. पञ्चोपवासव्रतं सार्द्धसप्तधेनुसमं ।
सर्व्वत्र प्रमाणन्तु प्रायश्चित्तविवेकादौ द्रष्टव्यं ॥

Colophon. इति श्रीआनन्दचन्द्रविरचितं प्रायश्चित्तौघसारनामकोग्रन्थः समाप्तः ॥

विषयः । प्रायश्चित्तस्वरूपविवेचनं । तत्र पापलक्षणादिकथनं । व्यवस्थाग्रहणादिविधिकथनं । गङ्गास्नानस्य सर्व्वपापप्रायश्चित्तत्वकथनं । पातित्यादिलक्षणकथनं । अतिपातकादिलक्षणकथनं । ब्रह्मबधप्रायश्चित्तनिरूपणं । तत्र बधित्वादिस्वरूपविवेचनं । आततायिबधादिविवेचनं । तन्त्रप्रसङ्गयोः स्वरूपादिविवेचनं । सुरापानप्रायश्चित्तकथनं । सुरादिलक्षणकथनं । सुरापानविशेषे प्रायश्चित्तविशेषकथनं । सुवर्णस्तेयादिप्रायश्चित्तकथनं । स्तेयत्वादिस्वरूपकथनं । गुर्व्वङ्गनागमनप्रायश्चित्तकथनं । गुर्व्वङ्गनानिरूपणं । पतितसंसर्गप्रायश्चित्तकथनं । संसर्गनिरूपणं । अनपातकादिप्रायश्चित्तकथनं । गोबधायाज्ययाजनदुष्टप्रतिग्रहाध्यापनपरदारगमनादिप्रायश्चित्तकथनं । प्रायश्चित्तपूर्व्वाहकृत्यनिरूपणं । व्यभिचारिण्यादिस्त्रीबधप्रायश्चित्तकथनं । गजाश्वादिबधप्रायश्चित्तं । मार्ज्जारादिबधप्रायश्चित्तं । पक्षिविशेषबधप्रायश्चित्तं । मत्स्यादिजलचरबधप्रायश्चित्तं । वृक्षच्छेदनप्रायश्चित्तं । मण्डपोद्यानतड़ागादिभेदनप्रायश्चित्तं । अभक्ष्यभक्षणप्रायश्चित्तं । लशुनादिभक्षणप्रायश्चित्तं । वृथापाक-वृथामांसादिभक्षणप्रायश्चित्तं । गोमांसभक्षणादिप्रायश्चित्तं । हंसादिपक्षिभक्षणप्रायश्चित्तं । मत्स्यादिभक्षणप्रायश्चित्तं । उपपातकप्रायश्चितं । व्यभिचारप्रायश्चित्तं । रजस्वलागमनादिप्रायश्चित्तं । श्राद्धदिने मैथुनादिप्रायश्चित्तं । तिर्य्यग्योनिगमनादिप्रायश्चित्तं । अवकीर्णिप्राय-

श्चित्तं। सन्ध्यादीनामतिक्रमप्रायश्चित्तं। शूद्रयाजनादिप्रायश्चित्तं। प्रायश्चित्तद्रव्यग्रहणप्रायश्चित्तं। नीलीवस्त्रादिपरिधानप्रायश्चित्तं। निन्दितदेशगमनप्रायश्चित्तं। मिथ्याकथनादिप्रायश्चित्तं। तैलाभ्यङ्गादौ मूत्रपुरीषाद्युत्सर्गप्रायश्चित्तं। अधिरूढ़पतितप्रायश्चित्तं। श्वादिदंशनप्रायश्चित्तकथनं। अस्पृश्यस्पर्शनादिप्रायश्चित्तकथनञ्च।

No. 2247. **आगमसङ्ग्रहः, वा एकजटाकल्पः।** Substance, country-made paper, 18 × 3¼ inches. Folia, 148. Lines, 6 on a page. Extent, 4,961 ślokas. Character, Bengali. Date, Sk. 1287. Place of deposit, Bráhmaṇíkuṇḍá, Zillá Rañgapur, Bhavendranátha Bhaṭṭáchárya. Appearance, new. Prose and verse. Incorrect.

A'gama-sañgraha. A digest of the leading rites and ceremonies enjoined in the Tantras, for the worship of Ekajaṭá. By Kátyáyanes'vara, son of Rámakánta.

Contents. Identity of Ekajaṭá with Tárá and other forms of the Deví. Especial mantras. Morning duties. The nature of the thousand radii of the heart. Location of the kuṇḍalis or plexuses. Worship without performing the morning duties condemned. Differences in the morning duties of persons of the Paśu and Víra classes. Bathing. Resolution to perform the worship. Religious washing of the mouth. Prayers at stated periods of the day. Offering of *arghya*. Repetition of the Gáyatri, Tántric duties not prohibited on account of impurities resulting from a birth in the family. Offering of water to the manes according to the Tantras. The size of the dress of the worshipper regulated according to the objects of a rite. Worship defined. Regulation of the fingers. Reflection on píṭhas. Tying of the hair. Consecration of the dress. Purification of the place where the worship is to be made. Merits of different kinds of seats. Rules for drinking hemp emulsion. Purification of the body. Purification of flowers. Drawing of diagrams. Selection of mantras. Purification of the elements. Navel defined. Steadification of the vital airs. Mental worship. The form in which Ekajaṭá should be meditated. Regulation of breath. Dedication of the different parts of the body (*Nyása*). Gesticulation. Dedication of life. Ritual of worship. Flowers and essences. Worship of Yoginís. Sacrifices of animals. Repetition of mantras. Rosaries. Ritual slaughter. Offering of blood. Daily homas. Consigning of the image into water. Putting on sectarial marks. A summary mode of worship. Rules regard-

ing Vámáchára. Three kinds of nocturnal worship. The dead of night (mahánisá) defined. Drinking by Bráhmaṇs. Purification of liquor by expiation. Rules for drinking. Yoni-kavacha defined. Sacrifices. Discussion about mantras. Special diagrams. Characteristics of Gurus. The rite of Puras'charaṇa. A rite at a burning ground. Burning ground defined. A rite performed with a corpse. Pañchamuṇḍa and other rites. Rite for making mantras fruitful. Amulets bearing the name of S'akti. A rite with a creeper (Latásádhana.) Women fit for the rite. Rules for initiation. Various kinds of yantras or symbols of S'akti. Purification of Vajra and other flowers. Hymns and amulets of Ekajaṭá. Amulets of Ugratárá, Nílasarasvatí, &c. Amulet of Ugratárá. Ontology. Expiations for Kaulas. Consecrations.

Beginning. प्रणम्यैकजटां भक्त्या मातृकात्यायनीं तथा ।
करोम्येकजटाकल्पं तेन विघ्नोविहन्यतां ॥

अथ यद्यपि तारोग्रतारा नीलैकजटा चैकरूपा, तथापि खल्विह तासामाख्याभेदवशतः भेदोयुक्त एव । तदुक्तं यथा तारातन्त्रे ।
एकैव हि महादेवी नामभेदात्त्रिधा भवेत् ।
प्रणवव्यतिरेकेण तृतीयैकजटा भवेत् ॥ इत्यादि ।

End. विषहर्य्यपि सम्प्रदायः ।
कात्यायनीनखरचन्द्रचकोरचित्तः
श्रीरामकान्ततनयोव्यतनोत् शिवस्य ।
तन्त्रं विलोक्य वङ्धैकजटाख्यकल्पं
श्रीतारिणीविषयसंशयनाशकं वै ॥

Colophon. इति श्रीकात्यायन्यात्मजविरचिते आगमसङ्ग्रहे एकजटाकल्पे कलौ ताराविद्याचैतन्यप्रमाणं नाम षोड़शः पटलः । इत्येकजटाकल्पः समाप्तः । १२८७ साल ।

विषयः । तारोग्रतारानीलैकजटादीनामेकरूपत्वेऽपि समाख्याभेदाद्भेद इति निरूपणं । तत्र मन्त्रभेदकथनं । एकजटाधिकारे प्रातःकृत्यादिनिरूपणं । सहस्रारविवेचनं । कुण्डलिन्या अवस्थानादिनिरूपणं । प्रातःकृत्यं विना पूजादौ दोषश्रुतिकथनं । पशुवीरयोः प्रातःकृत्ये विशेषकथनं । तत्र स्नानविधिकथनं । संकल्पकथनं । आचमनविधिः । सन्ध्याविधिः । अर्घ्यदानविधिः । गायत्रीजपविधिः । पतितसन्ध्याव्यवस्थाकथनं । संक्रान्त्यादौ वैदिकसन्ध्यानिषेधेऽपि तान्त्रिकसन्ध्याया आवश्यकत्वकथनं । सूतकादावपि तन्त्रोक्तसन्ध्यापूजादीनां कर्त्तव्यताकथनं । तान्त्रिकतर्पणविधिः । कामनाविशेषे वस्त्रपरिमाणकथनं । यागभूमिनिर्णयः । पूजादिनिरूपणं । अङ्गलि-

नियमः। पीठचिन्तनविधिः। शिखाबन्धनविधिः। वस्त्रादिपूजाविधिः। भूमिशोधनविघ्नोत्सारणादिविधिः। आसनविशेषे फलविशेषकथनं। विजयाविधिः। तत्पानकालादिनिरूपणं। कायादिशोधनविधिः। पुष्पादिशोधनविधिः। गुरुपूजाविधिः। यन्त्रलेखनादिविधिः। मन्त्रादिनिरूपणं। भूतशुद्ध्यादिविधिः। षट्चक्रभेदप्रस्तावेन नाभिनिरूपणं। प्राणप्रतिष्ठाविधिः। मानसपूजाविधिः। एकजटायाः ध्यानकथनं तदर्थनिरूपणञ्च। प्राणायामादिविधिः। षोढ़ागुह्यषोढ़ाव्यापकादिन्यासविधिः। मुद्राविधिः। जीवन्यासादिविधिः। पूजाक्रमकथनं। गन्धपुष्पादिविवेचनं। मद्यदानविधिः। तत्र मन्त्रपात्रादिविवेचनं। परिवारपूजाविधिः। अङ्गपूजादिविधिः। योगिनीपूजादिविधिः। बलिदानविधिः। जपविधिः। करमालादिनिरूपणं। वैधहिंसाविवेचनं। रुधिरदानविधिः। नित्यहोमविधिः। विसर्ज्जनादिविधिः। लेपधारणादिविधिः। संक्षेपपूजाविधिः। वामाचारकथनं। त्रिविधरात्रिपूजाविधिः। महानिशादिनिरूपणं। ब्राह्मणस्य मद्यपानादिविधिविवेचनं। प्रायश्चित्तादिशोधनविधिः। पानक्रमकथनं। योनिकवचकथनं। बलिदानविधिः। सुमुखीमन्त्रादिकथनं। मन्त्रविवेचनप्रकारकथनं। ऋणिधन्यादिचक्रकथनं। गुरुलक्षणादिकथनं। पुरश्चरणविधिः। चितासाधनविधिः। चितालक्षणादिकथनं। शवसाधनादिविधिकथनं। पञ्चमुण्डादिसाधनविधिः। मन्त्रसिद्ध्युपायकथनं। शक्तिकवचादिनिरूपणं। लतासाधनादिविधिः। शक्तिगमनागमनविवेककथनं। संस्कारप्रयोगकथनं। महाशङ्खयन्त्रादिविधिः। वज्रपुष्पादिशोधनविधिः। एकजटायाः स्तवकवचादिभेदकथनं। उग्रतारानीलसरस्वत्यादिकवचकथनं। उग्रताराप्रत्यङ्गिराकथनं। आत्मतत्त्वनिरूपणं। कौलप्रायश्चित्तकथनं पूर्णाभिषेकादिविधिकथनञ्च।

No. 2248. प्रवराध्यायः। Substance, country-made paper, 13 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 65 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇí-kuṇḍá, Zillá Rañgapur, Bhavendranátha Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Correct.

Pravarádhyáya. Enumeration of the septs or Pravaras of the different Gotras. By Pashupati, a minister of Lakshmaṇa Sena, king of Bengal, in the early part of the 12th century.

Begininng. श्रुतिस्मृतिपुराणानि विचार्य्य बहुयत्नतः।
लिखति प्रवराध्यायं श्रीमान् पशुपतिः सुधीः॥

काश्यपगोत्रे काश्यपाप्सारनैध्रुवा इति त्रयः प्रवराः। इत्यादि।

End. मधुकुल्यगोत्रे,—मधुकुल्य-शाकुल्य-शाकटायन-आमहत-आशया इति पञ्चप्रवराः॥

Colophon. इति प्रवराध्यायः।

विषयः। सर्व्वत्र गोत्रेषु प्रवरसंख्यादिकथनं।

No. 2249. वैष्णवी । Substance, country-made paper, 16 × 4 inches. Folia, 6. Lines, 7 on a page. Extent, 215 ślokas. Character, Bengali. Date, ? Place of deposit, I'ṭákumárí, Zillá Rañgapur, Jayagovinda Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Vaishṇaví. A commentary on the Mahimnastava of Puspadanta, showing that the hymn is addressed to Vishṇu. It is usually intrepreted to refer to S'iva. By Haragovinda S'armá.

Beginning. पुरा चित्ररथनामा गन्धर्व्वः कस्यचित् पुष्पोद्याने गतवान् अभूत् । तैरपि परास्य विष्णुनिर्म्माल्येन उद्यानमाच्छादितं तत्पङ्क्तां स्पृष्ट्वा स्वर्गं गन्तुं न समर्थः । इत्यवसरे स्तुतिश्चक्रे महिम्न इत्यादि । हे हर हे विष्णो इति बोध्यं । संहारकर्त्तृत्वं विष्णोरेव तथा च गीतायां । अहमेवाक्षयः कालो धाताहं विश्वतोमुखः । मृत्युः सर्व्वहरश्चाहमुद्भवश्च भविष्यतामिति ॥

End. नामान्तरेण सम्बोधनं कृतं तथा च गीतायां रुद्राणां शङ्करश्चास्मि । इत्यादि ।

Colophon. इति श्रीहरगोविन्दशर्म्मणः कृतिर्महिम्नः स्तोत्रस्य वैष्णवी टीका समाप्ता ।

विषयः । पुष्पदन्तकृतशिवमहिमस्तोत्रस्य केवलं विष्णुपरतया व्याख्यानं ।

No. 2250. कर्म्मलोचनम् । Substance, country-made paper, 18 × 4 inches. Folia, 6. Lines, 7 on a page. Extent, 199 ślokas. Character, Bengali. Date, ? Place of deposit, I'ṭákumárí, Zillá Rañgapur, Jayagovinda Bhaṭṭáchárya. Appearance, old. Verse. Correct.

Karmalochana. One hundred and eight stanzas giving a summary of the duties appropriate for householders. Anonymous.

Beginning. भूरिशास्त्रं समालोक्य बालानां ज्ञानहेतवे ।
अष्टोत्तरशतश्लोकं वक्ष्यते कर्म्मलोचनं ॥
उदिते जगतां नाथे न कुर्य्याद्दन्तधावनं ।
स पापिष्ठः कथं ब्रूते पूजयामि जनार्द्दनं ॥
दक्षिणाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा ।
न दन्तधावनं कुर्य्यात् कुर्य्याच्चेन्नारकी भवेत् ॥ इत्यादि ।

End. पादुकां चोत्तरीयञ्च तर्ज्जन्यां रूप्यधारणं ।
न जीवत्पितृकः कुर्य्याज्ज्येष्ठे भ्रातरि जीवति ॥

Colophon. इति कर्म्मलोचनप्रकरणं समाप्तं ।

विषयः । गृहस्थस्य सर्व्वेष्वपि कर्म्मसु प्रायः कर्त्तव्याकर्त्तव्ययोर्विधिनिषेधकथनं ।

No. 2251. दुर्गोत्सवनिर्णयः। Substance, country-made paper, 14 × 3 inches. Folia, 11. Lines, 6 on a page. Extent, 214 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇí-kuṇḍá, Zillá Rañgapur, Hariśchandra Bhaṭṭáchárya. Appearance, old. Prose and verse. Correct.

Durgotsava-nirṇaya. A digest of the rules regarding the performance of the Dúrgápújá ceremony. By Nyápanchánana : this name is a title, the personal name of the author is not given.

Beginning. नत्वा रामं घनश्यामं निकामं विदुषां मुदे।
न्यायपञ्चाननोद्भूते दुर्गोत्सवविनिर्णयं॥
अथ दुर्गोत्सवनिर्णयः। तत्र शरत्कालीनदुर्गापूजा नित्या तथा च कालिकापुराणं। येमोहादथवालस्याद्देवीं दुर्गां महोत्सवे॥ इत्यादि।

End. अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनं।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः॥

Colophon. इति न्यायपञ्चाननकृतदुर्गोत्सवनिर्णयः समाप्तः।

विषयः। दुर्गापूजायाः काम्यत्वं नित्यत्वञ्चेतिनिरूपणं। नानादिनसाध्या एकैव पूजेति-निरूपणं। अङ्गाधिकारितानिरूपणं। नवम्यादिकल्पव्यवस्थाकथनं। एवं प्रतिपदादिषष्ठ्यादिकल्प-व्यवस्थाकथनञ्च। बोधनादिकालविवेचनं। प्रतिमाया अभावे शिवलिङ्गादावपि पूजनावश्यकता-कथनं। बलिदाननिरूपणं। तत्र पशुमुखादिनियमकथनं। दक्षिणादिनिरूपणञ्च।

No. 2252. प्रायश्चित्तमार्त्तण्डः। Substance, palm leaf 14 × 2½ inches. Folia, 88. Lines, 4 on a page. Extent, 1,363 ślokas. Character, Maithilí. Date, Sk 1544. Place of deposit, Bháñrorá, Post Betiyá, Zillá Champáraṇa, Purushottama Deva. Appearance, decayed. Prose and verse. Correct.

Práyaśchitta-mártaṇḍa. A summary of the rules for expiations of different kinds. By Mis'ra-mártaṇḍa.

Beginning नत्वा सरस्वतीं देवीं शङ्खकुन्देन्दुसुन्दरीं।
प्रायश्चित्तस्य मार्त्तण्डोमार्त्तण्डेन विरच्यते॥
अथादौ प्रायश्चित्तस्वरूपं निरूप्यते। तत्र हारीतः। प्रयतत्वाद्दोपचितं पापं नाशयतीति। इत्यादि।

End. प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफलेति। एतद्वचनन्तु शाक्तेतराणां हृदयं रञ्जयतीति शं।

Colophon. इति श्रीमन्मिश्रमार्त्तण्डेन विरचितः प्रायश्चित्तमार्त्तण्डः परिपूर्णः। शकाब्दाः १५४४।

विषयः। प्रायश्चित्तलक्षणं। धर्म्माधर्म्मस्वरूपादिविवेचनं। अदृष्टनिरूपणं। महापातकादिलक्षणं। बालवृद्धादिभेदेन प्रायश्चित्तस्य लाघवादिकथनं। महापातकादिषु प्रत्येकं प्रायश्चित्तनिरूपणं। गोहत्यादिप्रायश्चित्तकथनं। अगम्यागमनादिप्रायश्चित्तं। अभोज्यादिभोजनप्रायश्चित्तं। तत्र भक्ष्याभक्ष्यादिकथनञ्च। वैधहिंसाविचारः। मांसादिभक्षणविधिविवेचनञ्च।

No. 2253. स्वच्छन्दपद्धतिः। Substance, country-made paper, 16 × 7 inches. Folia, 28. Lines, 12 on a page. Extent, 990 ślokas. Character, Nágara. Date, ? Place of deposit, Sítámáḍhí, Zillá Mujahpharapur, Paṇḍit Yogadatta Upádhyáya. Appearance, new. Prose and verse. Incorrect.

Sachchhanda-paddhati. A manual of S'ákta duties. By Sachchidánanda Yogíndra, disciple of Vimalánanda Yogíndra.

Beginning. नमोनाराय ते शुण्डां विषाणेन स्वणालिने। (?)
प्रत्यक्कमलकन्दाय कर्णाभ्यां पर्णशालिने॥
कुलधर्म्मस्य शास्त्राणि विचार्य्य परया धिया।
साधकानां हितार्थाय चिदानन्देन लिख्यते॥

अथ श्रीमत्साधकेन्द्रः सन्ध्यादिपूर्व्वदण्डद्वयात्मके रात्रौ तुरीययामे ब्राह्मे मुहूर्त्ते च उत्थाय शुद्धः सन् स्वशिरसि श्वेतसहस्रारकमलकर्णिकामध्ये निजगुरुं ध्यायेत्। इत्यादि।

End. निर्म्माल्यपुष्पं शिरसि धृत्वा सामयिकेभ्यो नैवेद्यादिकं दत्त्वा स्वयं भूत्वा (भुक्त्वा) विश्वातीतं विभाव्य यथासुखं विहरेत्॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्विमलानन्दयोगीन्द्रभगवत्पूज्यपादशिष्यश्रीसच्चिदानन्दयोगीन्द्रकृतस्वच्छन्दपद्धतिः समाप्ता।

विषयः। कौलिकानां प्रातःकृत्यादिविधिकथनं। दन्तधावनादिमन्त्रकथनं। यागगृहनिर्म्माणादिविधिकथनं। महाकलसस्थापनादिविधिकथनं। अन्तर्य्यागविधिकथनं। वहिर्य्यागविधिकथनं। त्रिपुरासुन्दरी-अन्नपूर्णामन्त्रपूजादिकथनञ्च।

No. 2254. **शिवानन्दलहरी ।** Substance, country-made yellow paper, 13 × 4 inches. Folia, 19. Lines, 7 on a page. Extent, 249 ṣlokas. Character, Nágara. Date, Sᴍ. 1923. Place of deposit, Sítámoḍhí, Zillá Mujahpharpur, Paṇḍit Yogadatta Upádhyáya; another copy at Sántipur, Kṛishṇamaya Gośvámí. Appearance, new. Verse. Incorrect.

S'ivánandalaharí. A hymn in praise of Mahádeva. By S'añkara A'chárya.

Beginning. कपालाभ्यां चूड़ालङ्कृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम् ॥ १ ॥
गलन्ती शम्भो त्वद्विभवसरितः किल्बिषरजो-
दलन्ती धीकुल्यासर + + + + पतन्ती विजयतां ।
दिशन्ती संसारभ्रमणपरितापोपशमनं
वसन्ती मच्चित्ते चिरमयि शिवानन्दलहरी ॥ २ ॥ इत्यादि ।

End. प्रचरत्यभितः प्रगल्भवृत्त्या मदवानेष + + कथं गरीयः ।
परिगृह्य + + + भक्तिरज्ज्वा परमस्थाणुपद + + यामि ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्कराचार्य्यविरचिता शिवानन्दलहरी समाप्ता । संवत् १९२३ ।

विषयः । स्तोत्रव्याजेन शिवस्य माहात्म्यरूपादिवर्णनं ।

No. 2255. **शल्यतन्त्रम् ।** Substance, country-made paper, 17 × 4 inches. Folia, 22. Lines, 6 on a page. Extent, 387 ślokas. Character, Nágara. Date, ? Place of deposit, Sítámoḍhí, Zillá Mujahpharpur, Paṇḍit Yogadatta Upádhyáya. Appearance, new. Prose and verse. Incorrect.

S'alya-tantra. Incantations, &c., for the neutralization of poisons and for curing persons suffering from hysteria, epilepsy, &c. The work professes to be a Tantra disclosed by S'iva himself.

Beginning. भानुवारे समादाय ख(श)रकोषञ्च साधकः ।
निशासर्षपचूर्णेन लेपयेत्तत् प्रयत्नतः ॥

छायामुष्कं ततः कृत्वा सङ्गृहीतं विचक्षणः(णैः)।
यत्र यत्र व्रजत्येष साधकोभूतमन्दिरं ॥
विलोक्य तं ग्रहाः सर्व्वे पलायन्ते दिशोदश। इत्यादि।

End. एतत्सर्व्वं प्रयत्नेन कथितं तव भैरवि ॥
गुणान्विताय दातव्यं न देयं यस्य कस्यचित् ॥

Colophon इति श्रीउमामहेश्वरसंवादे भूल्यतन्त्रं समाप्तम्।

विषयः। विषापस्माराद्युपशमनविविधप्रयोगकथनं।

No. 2256. श्रुत्यन्तसुरद्रुमः। Substance, country-made paper, 16 × 6 inches. Folia, 339. Lines 7 on a page. Extent, 4,301 ślokas. Character, Nágara. Date, ? Place of deposit, Sítámoḍhí, Zillá Mujahpharpur, Paṇḍit Yogadatta Upádhyáya. Appearance, new. Prose and verse. Correct.

S'rutyanta-suradruma. A commentary on a hymn in praise of Kṛishṇa as both defined and undefined, in course of which the author enquires into the bearings of the Vedánta doctrine in order to prove the duality of souls and the divinity of Kṛishṇa. By Purushottamaprasáda.

Beginning. नतोऽस्मि सर्व्वेश्वरमादिदेवं प्रपन्नसंरक्षणबद्धकक्षं।
कारुण्यवात्सल्यदयादिसिन्धुं जगद्गुरुं ब्रह्मशिवादिवन्द्यं ॥
योब्रह्मेशशिवादिपूज्यचरणः श्रीश्रीनिवासाभिधः
कारुण्यादिव+वतीर्य्य+वनावालोड़यत् तोयधिं।
वेदाख्यञ्च निरूप्य भाष्यममृतं चापाययत् स्वाश्रितान्
सत्त+श्च्रियं स्ववक्षसि दधौ तन्नाश्रये सद्गुरुम् ॥
दृश्यते योऽनिशं नित्यैर्मुक्तैर्योगम्यते हरिः।
धीयते योगिभिश्चित्ते तं श्रीकृष्णं समाश्रये ॥

इह खलु मन्दबुद्धिजनताबाहुल्यं निरीक्ष्य तद्धितं परिम्दृश्यमानोभगवान् ग्रन्थकारस्तद्दुद्धिधीर्षुः पूर्व्वाचार्य्यप्रणीतशारीरकमीमांसादिवेदान्तशास्त्रार्थमल्पबुद्धिभ्योऽपि कार्त्स्न्येन जिग्राहयिषुः स्तोत्ररूपेण संजग्राह। तस्य मिताक्षरैः समासतोव्याख्यानं समारभ्यते। तत्र तावद्ब्रह्मस्वरूपादिकं निर्द्दिशन् स्तौति शान्तोत्यादिना। इत्यादि।

End. अस्पृष्टदोषमाहात्म्यं कल्याणगुणसागरं।
नमामि श्रीहयग्रीवं परविद्याप्रदं प्रभुं ॥

श्रीकृष्णं रुक्मिणीकान्तं गोपिकाकण्ठभूषणं।
मुकुन्दं ब्रह्मरुद्रादिवन्द्यं वन्दे व्रजोत्सवं ॥
श्रीहयग्रीव ज्ञानाब्धे वात्सल्यादिगुणाकर।
प्रपन्नजनसन्त्राणबद्धकक्ष+मां गुरो ॥
श्रीश्रीनिवासपादाब्जं मङ्गलं मङ्गलायनं।
स्वाश्रितार्त्तिहरं पुण्यं व्रजामि शरणं शुभम् ॥

Colophon. इति श्रीहयग्रीवानुग्रहैकसेवकेन श्रीनियमानन्दानुयायिना श्रीपुरुषोत्तमप्रसादाख्येन वैष्णवेन विरचिते श्रुत्यन्तसुरद्रुमे चरमा शाखा २० ॥ हरये नमः।

विषयः। प्रबन्धेऽस्मिन् सविशेषनिर्विशेषश्रीकृष्णस्तवराजव्याख्यानव्यपदेशेन द्वैताद्वैतविशिष्टाद्वैतादिवादखण्डनपूर्व्वकं विष्णुस्वामिमतानुसारेण शुद्धाद्वैतवादनिरूपणं। तत्र प्रथमशाखायां,--भगवान् नन्दनन्दन एव परब्रह्मशब्दवाच्य इति तत्स्वरूपादिनिरूपणं। २ शाखायां,—सविशेषवेदान्तवाक्यानामेकवाक्यताप्रदर्शनपूर्व्वकं सगुणनिर्गुणवाक्याविरोधनिरूपणं। ३ शाखायां,—भगवत्प्राप्तिसाधनेषु शरणापत्तिरेव मुख्योपाय इतिसप्रपञ्चप्रपञ्चनं। ४ शाखायां,—पुरुषोत्तमात् वस्तुजातस्य पृथकसिद्धतानिराकरणमुखेन तस्य सर्व्वतोवैलक्षण्यनिरूपणं। ५ शाखायां,—विविधवादखण्डनपूर्व्वकं तत्त्वमस्यादिवाक्यार्थनिरूपणं। ६ शाखायां,—भगवदवतारकर्म्मगुणादीनामप्राकृतत्वनिरूपणं। ७ शाखायां,—सर्व्वजीवनिकायस्य बन्धमोक्षाद्यवस्थासु सर्व्वास्वपि भगवानेव गतिरितिनिरूपणमुखेन प्रत्यक्तत्त्वनिर्णयः। अत्र सांख्यतार्किकबौद्धादिमतखण्डनपूर्व्वकं जीवस्य भगवदंशत्वमणुत्वञ्चेतिनिरूपणं। ८,—९ शाखायां,—मुमुक्षूणां भगवत्प्राप्तिहेतुनिरूपणमुखेन ज्ञानभक्तिप्रपत्त्यादिषु यथाधिकारमेकतमेनापि प्रसादितः श्रीकृष्णः स्वानुग्रहेण स्वात्मानं दर्शयित्वा आत्मभावापत्तिलक्षणां मुक्तिं प्रापयतीतिनिरूपणं। १० ; ११,—शाखायां,– वेदान्तसूत्रसमन्वयाधिकरणार्थनिरूपणमुखेन विधिनिषेधार्थवादादिस्वरूपविवेचनं। अत्र परपक्षाभीष्टमतनिरसनञ्च। १२ शाखायां,—भगवन्नामनिरूपणं। १३ शाखायां,—भक्तेरुत्कर्षकथनपूर्व्वकं तत्स्वरूपादिकीर्त्तनं। १४ शाखायां,– ब्रह्मणि प्रमाणकथनं। तत्र प्रत्यक्षानुमानशब्दभेदेन प्रमाणत्रैविध्यकथनपूर्व्वकं तत्स्वरूपभेदादिनिरूपणं। १५ शाखायां,—भगवद्ध्याननिष्ठानामौत्कर्षकथनपूर्व्वकं उपमासूर्य्यकादिवदित्यधिकरणव्याख्यानं। १६,१७ शाखायां,—अहमर्थस्य प्रकृतिकार्य्याहङ्कारवादनिरसनपूर्व्वकं प्रत्यगात्मस्वरूपत्वनिरूपणमुखेन दृष्टिसृष्टिवादखण्डनं। १८ शाखायां, ब्रह्मणः अज्ञानाश्रयत्वं तद्विषयत्वञ्चेतिमतखण्डनपूर्व्वकं तस्य परमानन्दसन्दोहज्ञानाद्याश्रयत्वनिरूपणं। १९ शाखायां,—ध्यानस्य भगवत्साक्षात्कारान्तरङ्गत्वनिरूपणं। २० शाखायां,—जीवानां गतिनिरूप.पूर्व्वकं सर्व्वैः श्रीकृष्णचरणारविन्दमकरन्दपानमेव कर्त्तव्यमितिनिष्कर्षकथनं।

No. 2257. कुरुक्षेत्रप्रदीपः। Substance, country-made paper, 16 × 5 inches. Folia, 94. Lines, 10—11 on a page. Extent, 2,635 ślokas Character, Nágara. Date, Sm. 1925. Place of deposit, Sítámoḍhí, Zillá Mujahpharpur, Paṇḍit Yogadatta Upádhyáya. Appearance, new. Prose and verse. Generally correct.

Kurukshetra-pradípa. A guide to the sacred places in the holy land of Kurukshetra. By Vanamáli Mis'ra, son of Mahes'a Mis'ra, an inhabitant of Kurukshetra, and disciple of Bhaṭṭojí Díkshita.

Contents. Pre-eminence of Kurukshetra as a place of sanctity. Merit of pilgrimage thereto. Its seven Vanas or forests including Aditivana, Kámyavana, Súryavana, &c. Praise of the river Saras'vatí. Praise of Gañgá. Extent and boundary of Kurukshetra. Its synonyms. The lake called Rámahrada. Origin of Kurukshetra. Its merits during eclipses and on particular months. The merit of shaving off the hair of the head there. Topography of the different sacred spots. Persons fit to make a pilgrimage thereto. Rules for pilgrimage. Religious duties to be performed there. Special accounts of the following sacred pools: Aujasavaruṇa, Stháṇu, Paṇchavaṭí, Agni, Brahámyoni, Rudrakara, Práchíkúla, Devíkúpa, Svargadvára, S'ukra, Kalas'a, Kuvera, Chakra, Badarapráchí, Indra, Ráma, Ekarátra, Mártaṇḍa, Soma, Dadhíchi, Sárasvata, Kanyá, Gañgáhrada, Sarodadakshiṇa, Anaraka, Sarvadeva, Kuru, Koṭi, Vimalavíshṇusthána, Páriplava, Pṛithiví, Dakshes'vara, Das'ás'vamedha, As'vinau, Várábati, Ekahañsa, Pushkara, Panchahrada, Vañs'amúlaka, Káyas'odhana, Lokoddhára, Kapíláhrada, S'rí, Súrya, S'añkhiní, Brahmávarta, Añs'umatí, Kames'vara-kás'ís'vara, Mátri, Mánusa, Vṛiddhakedára, Durgákshetra, Vaṭes'varavindhya, Puṇḍaríkanága, Dṛishadvatí, Parvata, Amṛitasthána, Káraṇḍavádi, Vyásahrada, Naimísha, Manas, Dugdhaśrava, &c. Most of those places are connected with incidents of the great fratricidal war of the Kurus and the Páṇḍus, but a good many are recent creations.

Beginning. परं ब्रह्म नमस्कृत्य सर्व्वमङ्गलमङ्गलं।
अव्ययं शाश्वतं पूर्णं सच्चिदानन्दलक्षणं॥
निर्गुणं सगुणं विष्णुं शङ्करं सिद्धिदायकं।
गणेशं विघ्नहन्तारं पितरञ्च दिवाकरं॥
वामनादिपुराणेभ्य इतिहासादितस्तथा।

कुरुक्षेत्रस्य माहात्म्यसङ्ग्रहः शिष्टसम्मतः ॥
कृष्णदत्तेन मिश्रेण यथाबुद्ध्यनुसारतः ।
क्रियतेऽत्यल्पविस्तारोभूषणीयोद्विजातिभिः ।
क्षमा कार्य्या च विद्वद्भिर्यदि किञ्चित् प्रमादतः ।
शोधनीयं प्रयत्नेन सर्व्वज्ञोऽस्ति महेश्वरः ॥
लोकत्रय (त्रिलोकी) वर्त्तितीर्थेभ्यः कुरुक्षेत्रं विशिष्यते,--

तथाहि महाभारते,--इत्यादि ।

End. वाचकं पूजयेन्नित्यं वस्त्रालङ्कारधेनुभिः ।
वशीकृतोऽस्मि तेनाहं सत्या च सत्पतिर्यथा ॥

Colophon. इति श्रीकुरुक्षेत्रनिवासमहेशमिश्रपुत्रेण श्रीभट्टोजिदीक्षितशिष्येण श्रीमद्रत्नमालिमिश्रेण संरचितः कुरुक्षेत्रप्रदीपः समाप्तः । संवत् १९२५ ।

विषयः । सर्व्वेभ्यस्तीर्थेभ्यः कुरुक्षेत्रस्य विशेषकथनं । कुरुक्षेत्रगमनाभिलाषमाहात्म्यकीर्त्तनं । कुरुक्षेत्रस्य माहात्म्यादिकथनं । तत्र काम्यकवन-अदितिवन-सूर्य्यवनादिसप्तवनवर्णनं । सरस्वत्या माहात्म्यादिकथनं । गङ्गादिमाहात्म्यकीर्त्तनं । कुरुक्षेत्रभूमिनिरूपणञ्च । कुरुक्षेत्रस्य नामानि । रामह्रदमाहात्म्यकथनं । कुरुक्षेत्रोत्पत्तिनिरूपणं । चैत्रमासादिषु सूर्य्यादिग्रहणे कुरुक्षेत्रमाहात्म्यकथनं । तत्र मुण्डनादिनिरूपणं । कुरुक्षेत्रस्थवननद्यादीनां स्नाननिरूपणं । तीर्थयात्राधिकारिनिरूपणं । कुरुक्षेत्रयात्राक्रमकथनं । तत्र स्नानादिविधिकथनं । स्कन्दाभिषेकविवरणकथनञ्च । श्रीजसवरणतीर्थादिनिरूपणं । पञ्चवटनिर्णयः । पञ्चवटीतीर्थकथनं । अग्नितीर्थकथनं । ब्रह्मयोनितीर्थनिरूपणं । स्थाणुतीर्थकथनप्रसङ्गेन लिङ्गोत्पत्तिविवरणकथनं । वेणुमुनेस्तु वृत्तान्तकीर्त्तनं । रुद्रकरमाहात्म्यकीर्तनं । प्राचीकूलतीर्थकथनं । देवीकूपतीर्थकथनं । स्वर्गद्वारतीर्थकथनं । शुक्रतीर्थकथनं । कलशतीर्थकथनं । कुवेरतीर्थादिकथनं । चक्रतीर्थादिकथनं । वदरप्राचीतीर्थनिरूपणं । इन्द्रतीर्थनिर्णयः । रामतीर्थनिरूपणं । एकरात्रतीर्थनिर्णयः । मार्तण्डतीर्थनिर्णयः । सोमतीर्थनिर्णयः । दधीचितीर्थनिर्णयः । सारस्वततीर्थनिर्णयः । कन्यातीर्थनिर्णयः । गङ्गाह्रदकूपनिर्णयः । सरोदक्षिणतीर्थनिर्णयः । अनरकतीर्थनिर्णयः । सर्व्वदेवतीर्थनिरूपणं । कुरुतीर्थनिर्णयः । कोटितीर्थनिरूपणं । विमलविष्णुस्थाननिर्णयः । पारिप्लवतीर्थनिर्णयः । पृथिवीतीर्थनिर्णयः । दक्षेश्वरनिर्णयः । दशाश्वमेधनिर्णयः । अश्विनोस्तीर्थनिर्णयः । वाराहतीर्थनिर्णयः । एकहंसतीर्थनिर्णयः । पुष्करतीर्थनिर्णयः । पञ्चह्रदतीर्थनिरूपणं । वंशमूलकतीर्थकथनं । कायशोधनतीर्थनिर्णयः । लोकोद्धारतीर्थकथनं । कपिलाह्रदतीर्थकथनं । श्रीतीर्थकथनं । सूर्य्यतीर्थकथनं । शङ्खिनीतीर्थकथनं । ब्रह्मावर्ततीर्थनिर्णयः । अंशुमतीसङ्गमतीर्थकथनं । कामेश्वरकाशीश्वरतीर्थकथनं । मातृतीर्थनिर्णयः । मानुषतीर्थनिर्णयः । वृद्धकेदारतीर्थकथनं । दुर्गाक्षेत्रनिरूपणं । वटेश्वरविन्ध्यतीर्थनिर्णयः । पुण्डरीकनागतीर्थकथनं । दृषद्वतीतीर्थनिर्णयः । पूर्व्वोक्तकाम्यवनादि-

तीर्थनिरूपणं। पवनतीर्थनिरूपणं। अमृतस्थाननिरूपणं। कारण्डवादितीर्थकथनं। व्यासह्रद-निर्णयः। नैमिषतीर्थनिर्णयः। मनस्तीर्थादिनिरूपणं। दुग्धस्रवमधुस्रवादितीर्थनिरूपनञ्च। फल-श्रुतिकीर्तनं।

No. 2258. कुण्डनिर्म्माणश्लोकवृत्तिः। Substance, country-made paper, 12 × 3 inches. Folia, 45. Lines, 10—7 on a page. Extent, 910 ślokas. Character, Nágara. Date, ? Place of deposit, Sítámoḍhí, Zillá Mujahpharapur, Paṇḍit Yogadatta Upádhyáya. Appearance, old. Prose and verse. Generally correct.

Kuṇḍa-nirmáṇa-śloka-vṛitti. A commentary on the author's own metrical work on the construction of fire altars. By Ráma Vájapeya, an inhabitant of Naimíshúraṇya. The original is a paraphrase of a Súlva-sútra.

टीकायां,—

Beginning. सूनोः श्रीधरमालवस्य शिवदासाख्याद्गुरुख्यातितः
सम्राड़ग्निचिदा + यस्य जनकः श्रीसूर्य्यदासोऽजनि।
यन्मातुर्यशसा दिशोदश विशालाख्या वलचाः सृज-
त्येष स्वाद्दितकुण्डलक्षविद्दतिं रामोवसन् नैमिषे॥

शिष्यबुद्ध्यनुकूलनाय प्रयोजनं वर्णयंश्चिकीर्षितं प्रतिजानीते,—

मूलस्य।—इष्टापूर्तेस्वङ्गमाद्यं यदाङ्ग-
र्यस्योनलाधिक्यतोभूरिदोषाः।
कुण्डं साङ्गं भूरिभेदं तदत्र
ब्रूते रामोनैमिषस्थोविचार्य्य॥ इत्यादि।

End. मूलस्य।—रसगगनतिथिप्रमाणवर्षे (१५०६)
गतवति विक्रमभूमिपस्य कालात्।
क्रतुविधिफलदायके मखेज्ये
कृतिरियमस्तु समर्पिता सुरेशे॥

टीकायाः।—विक्रमभूमिपार्ककालात् पञ्चदशशतेषु षड्वर्षाधिकेषु गतेष्वयं ग्रन्थो-ऽभूत्। — — — — — — — —

Colophon. इति नैमिषारण्यवासिरामवाजपेयकृता स्वकृतकुण्डनिर्म्माणश्लोकवृत्तिः समाप्ता।

विषयः । स्वकृतस्य कुण्डनिर्म्माणश्लोकस्य शुल्वसूत्ररीत्या भूमिपरिमाणविज्ञानं प्रदश्य व्याख्यानम् ।

No. 2259. **सांख्यायनतन्त्रम् ।** Substance, country-made paper, 15 × 4 inches. Folia, 32. Lines, 12 on a page. Extent, 1,176 ślokas. Character, Nágara. Date, ? Place of deposit, Sítámoḍhí, Zillá Mujahpharpur, Paṇḍit Yogadatta Upádhyáya. Appearance, new. Verse. Incorrect.

Sáṅkhyáyana Tantra. A Tantric compilation, containing directions for various kinds of incantations for securing supernatural arms, securing success in warfare, and injuring enemies. Anonymous.

Beginning. मध्ये सुधाब्धिमणिमण्डपरत्नवेद्यां
सिंहासनोपरिगतां परिपीतवर्णां ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं स्मरामि धृतमुद्गरवैरिजिह्वां ॥
कैलासशिखरासीनं गौर्य्या वामाङ्गसङ्गतं ।
भारतीपतिवाल्मीकिः शिष्यसंनुत + + रः ॥
अष्टदिक्पालसंयुक्तं विघ्नेशाद्यकसेवितं ।
भैरवाद्यवृतं देवं + + मण्डलवेष्टितं ॥
महापाशुपताक्रान्तं प्रमथैरावृतं प्रभुं ।
नत्वा स्तुत्वा कुमारश्च इदं वचनमब्रवीत् ।
+ + चर्य्यासुनिपुणैर्युद्धचर्य्याभयङ्करैः ।
नानामायाविभिश्चैव योद्धुमिच्छामि राक्षसैः ।
तस्योपायञ्च सम्यग् वै वद मे करुणाकर ।
पुत्रोऽहं तव शिष्योऽहं कृपापात्रोऽहमेव च ॥
ईश्वर उवाच ।
साधु साधु महाप्राज्ञ क्रौञ्चभेदनकोविद । इत्यादि ।

End. इति संक्षेपतः प्रोक्तान्तोषयेद्दक्षिणादिना ।
प्रयोगस्योपसंहारः कर्त्तव्यः सिद्धिमिच्छता ॥

Colophon. इति सांख्यायनतन्त्रे चतुस्त्रिंशः पटलः ।

विषयः । शिवेन सह षण्मुखस्य संवादेन ब्रह्मास्त्रविद्याकथनं । तत्राभिषेकादिनिरूपणं । एकाक्षरीविधिकथनं । महापाशुपतास्त्रप्रसङ्गेन वगलामुख्यादिप्रयोगकथनं । यन्त्रप्रयोगकथनं ।

शताच्चर्य्यादिप्रयोगकथनं। दूर्व्वाहोमादिविधिकथनं। परविद्याभक्षणादिविधिकथनं। बगलास्त्र-विधिकथनं। अस्त्रविद्याप्रयोगकीर्त्तनं। स्तम्भिनीविद्यादिप्रयोगविधिकथनं।

No. 2260. कृष्णचरणपरिचर्य्याविवृतिः। Substance, country-made paper, 15 × 5 inches. Folia, 54. Lines, 7 on a page. Extent, 594 ślokas. Character, Nágara. Date, ? Place of deposit, Sítámoḍhi, Zillá Mujahpharapur, Paṇḍit Yogadatta Upádhyáya. Appearance, new. Prose and verse. Incorrect.

Kṛishṇacharaṇa-paricharyá-vivṛiti. A Vaishṇavite work on the worship and adoration of the foot-prints of Kṛishṇa, Ráma and other Vaishṇava divinities, and supplying rules and directions for such worship. By Vidyáraṇya Tírtha.

Beginning. येषां नामनि विलसति नित्यमहत्त्वञ्च देवत्वं।
आश्रमिणां ते मुख्या जयन्ति पादा जगद्वन्द्याः॥
भगवद्बाणागमतस्तदङ्कितं नाम यस्यास्ति।
आचार्य्यसिद्धपीठं जयति श्रीमान् सतोदाद्रिः॥
ॐ नमोवासुदेवाय रामचन्द्राय ते नमः।
नमः शुकाय गुरवे वाल्मीकिमुनये नमः॥
विद्यागुरवः शुक्लाः श्रीमदुमारामपण्डिता गर्गाः।
मुख्यास्तेऽत्राधारा विमले यशसि प्रताप इव॥
श्रीरामकृष्णपदयोः परिचर्य्ये ये शुभे विदिते।
वङ्गलार्थप्रतिपत्त्यै व्याख्यायेते यथाशास्त्रं॥
— — — — — गुरुभ्य इति।

End. श्रीराधामाधवपदपरिचर्य्या च तद्विवृतिः।
विद्यारण्यविरचिता + तितान्तेवासिमोदाय॥

Colophon. इति श्रीविद्यारण्यतीर्थविरचिता श्रीकृष्णचरणपरिचर्य्याविवृतिः समाप्ता।

विषयः। श्रीकृष्णचरणपरिचर्य्याधिसन्दर्भस्य लघुतरस्य व्याख्यानमुखेन तद्विस्तारकथनं। तत्र गुरुशब्दार्थनिरूपणं। राधाशब्दार्थनिरूपणं। पिकवचनं सामयिकमधुरं शुकवचनन्तु सदैव मधुरमितिकथनं। भगवच्छब्दार्थकथनं। भगवच्छब्दोविष्णौ मुख्योऽन्यत्र तु गौण इति निरूपणं। कर्म्मोपासकज्ञानिनां वादकथनं। वृन्दापदार्थकथनं। गुञ्जाहारधारणहृदयनिरूपणं। मुरलीहृदयनिरूपणं। मयूरपुच्छधारणहृदयकथनं। श्रीवत्सकौस्तुभादिशब्दार्थनिरूपणं। द्वादशवननिरू-

पणं। मथुराशब्दार्थादिकथनं। वृन्दावनस्वरूपकथनं। भागवतस्य भगवच्छरीरत्वकथनं। द्वादश-वनानां द्वादशस्कन्धानाञ्च द्वादशमूर्त्तित्वनिरूपणं। भागवते भक्तिप्राधान्यनिरूपणं। कलियुगे ज्ञानस्य दुर्व्वलत्वप्रतिपादनं। भागवतप्रथमश्लोकेन द्वादशस्कन्धकथासूचनं। रामायणीयमानिषा-देतिश्लोकेन सप्तकाण्डकथासूचनं। प्रसङ्गात् रामचरणपरिचर्य्याव्याख्यानं। षड्तुस्वरूपनिरू-पणं। भगवद्ध्यानव्याख्या। यन्त्रपूजादिनिरूपणं। स्वाराज्यसिद्धिकथनं। आयुर्व्वेदकामशास्त्रधर्म्म-शास्त्रराजनीतीनां तत्त्वनिरूपणं। सर्व्वैर्भगवानेवोपास्य इतिनिरूपणं। भगवद्भक्तिनिरूपणं। स्वधर्म्मनिरूपणञ्च।

No. 2261. गद्यवल्लरी, प्रथमखण्डः। Substance, country-made paper, 12 × 3½ inches. Folia, 145. Lines, 7 on a page. Extent, 2,016 ślokas. Character, Nágara. Date, Sm. 1793. Place of deposit, Sítámoḍhí, Zillá Muzahpharpur, Paṇḍit Yogadatta Upádhyáya. Appearance, old. Prose and verse. Generally corect.

Gadyavallarí. Tántric rituals for the worship of various forms of S'akti. By Nijátmá-prakás'ánandanátha Mallikárjuna Yogíndra. The work opens with a list of the teachers of the Sañkara sect of Yatis. After naming some of the earliest teachers such as S'iva, Vishṇu, Vas'ishṭha, Parásara, &c., the line of succession from S'añkara A'charya runs thus: 1, S'añkara; 2, Bodhana A'chárya; 3, Jnánaghana; 4, Jnán-ottamas'iva; 5, Jnánagiri; 6, Siñhagiri; 7, I's'vara Tírtha; 8, Nṛisiñha Tírtha; 9, Vidyá-tírthas'iva; 10, Bharati Tírtha; 11, Vidyáraṇyaguru; 12, Malayánandadeva Tírtha-sarasvatí; 13, Yádavendra Sarasvatí; 14, ——— sarasvatí; 15, S'rínrisiñha Sarasvatí; 16, Mádhavendra Sarasvatí; 17, Mallikárjuna Yogíndra; 18, Rámadeva; 19, Dáyadeva Yati; 20, Gananánanda; 21, Chidghanánanda; 22, A'nanda-chitprati-vimba. I know not the date of the author of the work, but the codex is dated Samvat, 1793 = A. D. 1736, and, reckoning at the rate of three generations to a century, the names would take us seven and a half centuries behind 1736 to go to the date of Sañkara; but hermits live much longer than ordinary people, and their succession takes place at an early age, as generally the youngest disciple is selected to succeed, and the evidence of the codex cannot be accepted as conclusive. It is enough, however, to show that the age usually assigned to S'añkara by orientalists is fairly correct.

Beginning. शिव आदौ गुरुः प्रोक्तः पश्चाद्विष्णुः प्रकीर्तितः ।
ततोब्रह्मा वसिष्ठश्च ततः शक्तिः पराशरः ॥
व्यासः शुकोगौड़पादोगोविन्दाख्योगुरुस्ततः ।
ततः श्रीशङ्कराचार्य्योविश्वरूपार्य्य एव च ॥
ततोबोधघनाचार्य्यस्ततोज्ञानघनाह्वयः ।
ज्ञानोत्तमशिवः पश्चात्ततोज्ञानगिरिः स्मृतः ॥
ततः सिंहगिरिः पश्चादीश्वरस्तीर्थसंज्ञकः ॥
ततोन्टसिंहतीर्थश्च विद्यातीर्थशिवस्ततः ॥
भारतीतीर्थनामा च विद्यारण्यगुरुः परः ।
ततः श्रीमलयानन्दोदेवतीर्थसरस्वती ॥
सरस्वती यादवेन्द्रः परः + + सरस्वती ।
ततस्तु श्रीगुरुवरः श्रीन्टसिंहसरस्वती ॥
ततस्तु श्रीगुरुश्रेष्ठोमाधवेन्द्रसरस्वती ।
मल्लिकार्ज्जुनयोगीन्द्रस्तत्शुश्रूषाप्तवैभवः ॥
ततः श्रीरामदेवाख्यः शिवः श्रीगुरुरूपधृक् ।
दायदेवयतिः पश्चाद्गणनानन्दसंज्ञकः ॥
ततः श्रीचिद्घनानन्दः सम्प्रदायप्रवर्तकः ।
ततोमहेश्वरानन्दोगुरुः श्रीशिवरूपधृक् ॥
श्रीचिदानन्दनाथाख्योमहानन्दैकविग्रहः ।
ततश्चित्प्रतिविम्बाख्योदेव आनन्दपूर्व्वकः ॥
एवे वै गुरवः प्रोक्ताः शिवादिस्वगुरुक्रमात् ।
गुरुक्रमं पठेद्यस्तु प्रातर्नित्यमतन्द्रितः ॥
न्यासार्चनजपादीनामनन्तं फलमश्नुते ।
श्रीन्टसिंहगुरुं वन्दे साक्षान्नारायणात्मकं ।
चिदानन्दघनं पूर्व्वं कारुण्यामृतसागरं ॥
-- — -- -- ब्राह्मे मुहूर्त्ते उत्थाय ब्रह्मरन्ध्रे सिताम्बुजे । इत्यादि ।

End. एवं ध्यात्वा माहात्म्यमपि संस्मृत्य योन्यादिमुद्रादशकं दर्शयित्वा जपं कुर्व्वीत ।
श्रीमुखाब्दे शके वाणचिवेदशशिसम्मिते ।
याम्यायने सिते मार्गे गुरावेकादशीदीने ॥
गुरुदेवात्मनामैक्यं सञ्चिन्त्यातिविशारदः ।
शरीरवह्निजानन्दः श्रीप्रसादपराक्रमं ॥

Colophon. इति श्रीनिजात्मप्रकाशानन्दनाथमल्लिकार्ज्जुनयोगीन्द्रविरचितायां गद्यवल्लर्य्यां अनुक्रमोत्तमायां श्रीविद्यापद्धतौ प्रथमखण्डः परिपूर्णः। सवत् १७९२। ज्यैष्ठमास।

विषयः। ग्रन्थकारस्य गुरुपरम्पराकथनप्रसङ्गेन सम्प्रदायप्रवृत्तिकथनं। दैशिकस्य प्रातःकृत्यनिरूपणं। तान्त्रिकसन्ध्यादिकथनं। अर्द्धरात्रे तुरीयसन्ध्याविधिकथनं। तर्पणादिविधिकथनं। श्रीविद्यायाः पूजाविधिकथनं। प्राणप्रतिष्ठादिविधिकथनं। प्रपञ्चयागविधिकथनं। बालासम्पुटितादिमातृकान्यासादिकथनं। एवं लक्ष्मीसम्पुटित-कामसम्पुटित-श्रीविद्यासम्पुटितादिन्यासकथनं। श्रीकण्ठ-केशवादि-कामरतिप्रणवोत्थानकलादिमातृकान्यासनिरूपणं। मालिनी-कालसङ्कर्षिण्यादिन्यासकथनं। परा-वैखरी-सूर्य्यकला-योगपीठ-ग्रह-नक्षत्रादिन्यासकथनं। जपविधिकथनं। मण्डपध्यानादिकथनं। स्तोत्रादिकथनं। श्रीविद्यामाहात्म्यकथनञ्च।

No. 2262. दानपारिजातः। Substance, country-made paper, 11 × 4 inches. Folia, 300. Lines, 10 on a page. Extent, 7,475 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, old. Prose and verse. Correct.

Dána-párijáta. A summary of the rules and rituals for the consecration of religious gifts. By Ananta A'chárya, son of Náges'a Bhaṭṭa, grandson of Jahnu Bhaṭṭa, and nephew of Vishṇupadás'rita Bhaṭṭa. The author wrote several works on Smṛiti topics under the generic name of Párijáta.

Beginning. वन्दे श्रीमदनन्तसंज्ञ + + + लक्ष्मीनिवासं हरिं
विघ्नध्वान्तदिवाकरं सुरगुरुं सर्व्वार्थसिद्धिप्रदं।
ब्रह्मेशार्कसुरेन्द्रपूर्व्वकसुरा यस्य प्रसादात् सदा
सर्व्वारम्भसमाप्तिमीयुरमलं मद्वंशदेवं परं॥
— — — — — — — — — —।
श्रुतिसकलरहस्यं विम्बितं यस्य चित्ते
मुकुर इव मुखाब्जे दोषमालिन्यशून्ये।
स्वपदविमलभक्त्या यस्य तुष्टोरमेशो-
जनकजनकजह्नुं भट्टमेनं नतोऽस्मि॥
जातोऽहमग्रेण मनोरथेन
यस्यानुकम्पामृतदृष्टिपुष्टः।
पारङ्गतस्याखिलदर्शनानां
नागेशभट्टं जनकं नतोऽस्मि॥

श्रीमत्काण्वकुलाब्धिशीतकिरणो विद्याकलानां निधिः ।
श्रीमद्विष्णुपदाश्रितः सरसगुर्व्विद्वच्चकोरप्रियः ॥
भट्टश्चन्द्र इमं पितृव्यमभिनम्यानन्तभट्टः सुधी-
र्नानादानविधानसत्सुरतरुं व्यारोपयद्भूतले ॥

अथ दानप्रशंसा तैत्तिरीयश्रुतौ । दानेन द्विषन्तो मित्रा भवन्ति । इत्यादि ।

End. तस्माल्लक्षणसम्पन्नां प्रतिमां सर्व्वदार्पयेत् ।
महदैश्वर्य्यमाप्नोति स्वर्गलोके महीयते इति ॥

Colophon. इति श्रीमदनन्ताचार्य्यविरचिते दानपारिजाताभिधाने निबन्धे मूर्त्तिदानविधानानि ।

विषयः । दानमाहात्म्यकीर्त्तनं । दानस्वरूपनिरूपणं । दानदोषकथनं । दानाङ्गनिरूपणं । दानपात्रनिरूपणं । देयद्रव्यनिरूपणं । ग्राह्याग्राह्यद्रव्यनिरूपणं । दानदेशनिरूपणं । कालादिनिरूपणञ्च । दानेतिकर्त्तव्यताकथनं । दक्षिणानिरूपणं । अधिकारिनिरूपणं । द्रव्यमानकथनं । कलशादिमानकथनं । दर्भादिलक्षणकथनं । धान्यादिमानकथनं । भूमिमानादिकथनं । अङ्गुल्यादिभेदमानादिनिरूपणं । वास्तुनिरूपणं । प्राचीदिक्साधनविधिः । तोरणपताकामण्डपादिलक्षणं । कुण्डनिरूपणं । मेखलायोनिकुण्डादिनिरूपणं । तुलापुरुष-हिरण्यगर्भ-ब्रह्माण्ड-कल्पपादप—गोसहस्र-हिरण्यकामधेनु-हिरण्याश्व-हिरण्याश्वरथप्रभृतिषोड़शमहादानविधानादिकीर्त्तनं । अत्र प्रत्येकं प्रयोगकथनञ्च । अथ धान्यमेरुदानविधानं । धान्यादिमेरुदानदशकप्रायोगकथनं । लवणाचलतिलाचलादिदानविधानं । कनकाश्वादिदशविधान्यतममहादानविधानं । स्वर्णदानविधिः । आनन्दनिधिदानविधिः । भद्रनिधिदानविधिः । शतमानदानविधिः । रजतदानविधिः । श्वेताश्वादिदानविधिः । तिलदानविधिः । तिलस्नग-तिलकांस्यपात्र-तिलराशि–तिलपद्म–तिलगर्भादिदानविधिकथनं । रुद्रैकादशदानविधिः । गजदानविधिः । दासीदानविधिः । रथदानविधिः । शिविकादानविधिः । भूमिदानविधिः । गृहदानविधिः । मठदानविधिः । कन्यादानविधिः । द्विजस्थापनविधिः । राजस्थापनविधिः । कपिलाधेनुदानविधिः । अथ अतिदानविधानकथनं । गोदानविधिः । उभयतोमुखीदानविधिः । वैतरणीदानविधिः । वृषभदानविधिः । गुड़धेन्वादिदानविधिः । विद्यादानविधिः । वेदवेदाङ्गादिदानविधिः । त्रिपुरुषदानविधिः । नवग्रहदानविधिः । दशावतारदानविधिः । द्वादशादित्यदानविधिः । चन्द्रमूर्त्तिदानविधिः । सूर्य्यमूर्त्तिदानविधिः । कालपुरुषदानविधिः । आत्मप्रतिकृतिदानविधिः । उदकुम्भदानविधिः । यमप्रतिमादानविधिः । लोकपालाष्टकदानविधिः । मेषाजमहिषादिदानविधिः । कृष्णाजिनादिदानविधिः । तिथिवारनक्षत्रयोगादिषु दानविधिः । प्रकीर्णकदानविधिः । जलाशयदानविधिः । आरामवापीकूपादिदानविधिः । अत्र प्रतिष्ठाविधिकथनं । प्रत्येकं सर्व्वत्र प्रयोगकथनञ्च । इति श० ।

No. 2263. शिवसंहिता । Substance, country-made paper, 13 × 6 inches. Folia, 362. Lines, 12 on a page. Extent, 11,913 slokas. Character, Nágara. Date, SM. 1909. Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Correct.

Siva-sañhita. A work of this name has already been noticed under No. 424, (Vol. I, p. 270), but that is a Tantra. The present work professes to be a part of the Váyu Puráṇa, but the MS. noticed under No. 1678, Vol. VI, p. 252, and a number of others which have been examined by me do not include this work. According to the most ancient and authentic accounts the Váyu Puráṇa extends to 24,000 s lokas, whereas the work now under examination professes to comprise 24,000 s'lokas, just as much as the whole of the Váyu Puráṇa. It is obvious, therefore, that the affliation is unwarrantable, and that the work is distinct. The codex under examination is limited to 12,000 and its colophon shows that it is incomplete. A complete copy I am told is contained in the Library of his Highness the Mahárájá of Benares, but I have not seen it. Professor Wilson, in the Preface to his translation of the Vishṇu Puráṇa, remarks :

"The Puráṇa in which Váyu has declared the laws of duty, in connexion with the S weta kalpa, and which comprises the Máhátmya of Rudra, is the Váyaviya Puráṇa : it contains twenty-four thousand verses." (श्वेतकल्पप्रसङ्गेन धर्म्मान्वायुरिहा ब्रवीत् । यत्तेतद्वायवीयं स्याद्रुद्रमाहात्म्य संततम्॥ चतुर्विंशत् सहस्राणि पुराणं तदिहोच्यते ।) The S'iva or S'aiva Puráṇa is, as above remarked, omitted in some of the lists; and, in general, when that is the case, it is replaced by the .Váyu or Váyavíya. When the S'iva is specified, as in the Bhágavata, then the Váyu is omitted; (see p. xxiv, *supra*), intimating the possible identity of these two works. (This identity is distinctly asserted in the *Revá·máhátmya*, as follows : चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतं। शिवभक्ति समायोगाच्छैवं तच्चापराख्यया ॥) This, indeed, is confirmed by the Matsya, which describes the Váyaviya Puráṇa as characterised by its account of the greatness of Rudra or S iva : and Bálam Bhaṭṭa (commentary on the Mitákshará, Vyavahára Káṇḍa) mentions, that the Váyavíya is also called the S'aiva, though, according to some, the latter is the name of an Upapuráṇa. (For accounts of works entilted *S'iva-puráṇa* and *Laghus'iva-puráṇa*, see *Catalogue Cod. Manuscript. Sanscrit Postvedic Bodelian*, &c., §§ 113, 127, and 129. Regarding the first, described in § 113, Dr. Aufrecht observes :

'De libro ipso, quem ad celebrandum cultum Laingicum scriptum esse vides, in praesentia nihil temere asseveraverim; exspectandum enim est, dum de Skandapuráṇae parte, quae S'ivamáhátmya appellatur, accuratiora audiamus. Ex quo libellum nostrum desumtum esse, iis quae infra dicta sunt, suspicari possis.' Colonel Vans Kennedy observes that, in the west of India, the Siva is considered to be an Upa or 'minor' Puráṇa. (A. S. Journ., March, 1837, p. 242, note.)

"Another proof that the same work is intended by the authorities here followed, the Bhágavata and Matsya, under different appellations, is their concurrence in the extent of the work; each specifying its verses to be twenty-four thousand. A copy of the S'iva Puráṇa, of which an index analysis has been prepared, does not contain more than about seven thousand. It cannot, therefore, be the S'iva Puráṇa of the Bhágavata: and we may safely consider that to be the same as the Váyavíya of the Mátsya. (Analysis of the Váyu Puráṇa: Journ. As. Soc. of Bengal, December, 1832)."*

The conclusion here arrived at does not seem to be tenable, for the contents of the Váyu as given under No. 1678, and in the first volume of the work published by me are totally different. The second volume now in the press is also quite distinct. Besides the discussion is limited to a S'iva Puráṇa and not to S'iva-saṅhita of the Váyu Puráṇa.

The work comprises notices of all the sacred pools and places of pilgrimages in India, and recites a great number of legends in connection with them. The names of the Tírthas are associated with those of S'iva. For the sake of convenience I have omitted the word Tírtha from the specific name in the following summary. Each Tírtha has a lingam of S'iva close by it.

Contents: Introduction. Puráṇas and Upapuráṇas described. Account of Narmadá. Kalpas. Tortoise incarnation. Kalpas described in detail. Destruction of created beings. Birth of Kapila. Origin of the Vis'alí river, its contact with the Narmadá. Nílagaṅgá. Kalis'vara. Story of Nárada. Do. of S'iva's sports. Káverí. Váráhí. Chaṇḍavegá. Edaṇḍí. Pitṛi. Origin of Koṭitírtha. Kákaprada. Sárasvatá. Hells described. Amares'vara. Mátaṅga. Mṛigavana. Manoratha. Vilvámalaka. As'okes'vara. Vágís vara. Sahasravarṇaka. Saugandhikánana. Brahmoda. S'aṅkara. Soma. Sahasrayajṇa. Agni. Adi-

* Wilson's Vishṇu Puráṇa, Vol. I, pp. xxxv*f*.

tís'vara. Varáha. Devapatha. Diptikes'vara. Vishṇu. Marutes'vara. Yoges'vara. A'ditya. Meghanáda. Dáruka. Deva. Narmades'vara. Kapiles'vara. Karaṇjes'vara. Kuṇdes'vara. Pippaláda. Vimales'vara. S'úlabheda. Story of Andhakes'vara. Merit of bestowing brides. S'ráddhas at the gift of daughters. Story of Kás'íràja and Chitrasena. Do. of Ṛishyas'riṅga. Do. of Dírghatapa. Do. of Bhánumati and Vírasena. Vimales'vara. Ulúka. Pushkaraṇí. A'dityes'vara. Pippales'vara. Karoṭís'vara. S'akres'vara. Kumáres'vara. Agnes'vara. Vyáses'vara. Vaidyanáthes'vara. Kedára. Mátri. Narmadá. Muṇḍes'vara. Ghanada. Jaṭes'vara. Ravi. Kámes'vara. Maṅgales'vara. Gautames'vara. S'aṅkhachúḍes'vara. Kedáres'vara. Chandres'vara. Ambes'vara. Nárades'vara. Pakshinága. Vánares'vara. Kúrmes'vara. Meghes'vara. Dadhiskandes'vara. Nandikes'vara. Varuṇes'vara. Kuveres'vara. Hanumades'vara. Pútikes'vara. Revárisaṅgama. Nandá. Piṅgales'vara. Riṇamochana. Jalasáyichakra. Chaṇḍá. Praise of Chaṇḍi. Mahusásya. Kalpadigaṅges'vara. Nandikes'vara. Naranáráyaṇa. Nales'vara. Vyása. Koṭis'vara. Prabhes'vara. S'ukes'vara. Karanadí. Márkaṇḍyes'vara. Janakes'vara. Manmathes'vara. Anusúyá. Eraṇḍisaṅgama. Ambikes'vara. Karajes'vara. Bharates'vara. Mukules'vara. Vanades'vara. Saubhágya-sundarí. Rauhiṇes'vara. Senápurachakra. Bhages'vara Kedára. Nishphales'vara. Bhútapápes'vara. Aṅgirases'vara. Ajonijes'vara. Aṅgárakes'vara. Skandes'vara. Narmades'vara. Brahmas'ilá. Valmíkes'vara. Páṇḍu. Trilochanes'vara. Kambukes'vara. Chandraprabhása. Kohales'vara. Indres'vara. Yáges'vara. Gotames'vara. Kapardísvara. Ahalyes'vara. Rámes'vara. Ghauráditya. Ajonisambhava. S'ruti. Bhrigvís'vara. Korilápurasthabrahma. A'dityavaráha. A's'ápurí. Váruṇes'vara. Vánavates'vara. Karkaṭes'vara. Nandáhrada. Chakraváráha. Kes'ava. Rukmiṇí. Amohaka. Siddhes'vara. Tapes'vara. Lankes'vara. Párás'ares'vara. Kusumáyudhes'vara. Kalakales'vara. S'vetavaráha. Huṅkárasvámivishṇu. Chánakya. S'ukla. Madhumatisaṅgama. Anarakes'vara. Káverisaṅgama. Sarpes'vara. Gopes'vara. Udambarísaṅgama. Sámbáditya. Siddhes'vara. Vaidyanátha. Piṅgales'vara of Bhrigutírtha. Bhútes'vara. Story of Saindhaváyatana. Gaṅgáváha. Story of Bhrigukachchha. Dhautapápa. Kanakes'vara. S'áles'vara. Sálagráma. Dvádas'áditya. Vis'varúpa. Haṅsa. Kanthes'vara. Aṭṭahása. Bhúrbhuves'vara. S'úles'vara. Dárukes'vara. Sávitrí. Mahes'vara. Deva. S'ikhi. Bháṇḍava. Akrures'vara. Revá

Chaḍchaḍ-sávitrí. Ḍimḍimes'vara. Sṛiṅges'vara. Laṅkes'vara. Merit of bathing at the confluence of a river with the sea. Lunṭhanes'vara. Vásanes'vara. Vimales'vara. Merit of pilgrimage in favour of another. Total number of Tírthas. Merit of reading the work.

Beginning. उभयतटपुण्यतीर्था प्रक्षालितसकललोकदुरितौघा।
देवमुनिजनवन्द्या हरतु सदा नर्म्मदा दुरितं॥
— — — — — — — — — — ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीञ्चैव ततोजय मुदीरयेत्॥
नैमिषे पुण्यनिलये नानाऋषिनिषेविते।
शौनकः सत्रमासीनः सूतं पप्रच्छ विस्तरात्॥
मन्येऽहं धर्म्मनैपुण्यं त्वयि सूत सदर्च्चितं॥
पुराणामृतकथावक्ता व्यासशिष्यस्त्वमेव हि॥
अतस्त्वां परिपृच्छामि धर्म्मतीर्थाश्रयं कवे।
बहूनि सन्ति तीर्थानि वङ्गशोमे श्रुतानि च॥
— — — — — — — — — ।

सूत उवाच।
पुराणं यन्मयोक्तं हि चतुर्थं वायुसंज्ञितं।
चतुर्विंशतिसाहस्रं शिवमाहात्म्यसंयुतं॥
महिमानं शिवस्याह पूर्व्वं पराशर + +।
अपरार्द्धे तु रेवाया माहात्म्यमतुलं मुने॥
पुराणे प्रथमं प्राह्णः पुराणं वायुनोदितं।
यस्य श्रवणमात्रेण शिवलोकमवाप्नुयात्॥
यथा शिवस्तथा शैवं पुराणं वायुनोदितं।
शिवभक्तिसमायोगान्नामद्वयविभूषितं॥ इत्यादि।

End. पठतां शृण्वताञ्चापि सर्व्वकामार्थसिद्धिदं।
यत्प्रदत्तमिदं पुण्यं पुराणं वाच्यते द्विजैः॥
शिवलोके स्थितिस्तस्य पुराणाचर + + +॥
इति निगदितं वै नर्म्मदायाश्चरित्रं
पदनिगदितमग्र्यं सर्व्ववक्त्रादवाप्य।
त्रिभुवनजनवन्द्याव + + दो मुनीनां
कुलपतिपुरतस्तत् सूतमुख्येन साध॥

Colophon. इति श्रीवायूक्तचतुर्विंशतिसाहस्र्यां शिवसंहितायामुत्तरखण्डे श्रीनर्म्मदा-
माहात्म्ये पुराणपरिसमाप्तिनामाध्यायः ॥ श्रावणसुदि संवत् । १९०९ ।

विषयः। सूतेन सह शौनकादीनां संवादेन महापुराणोपपुराणनामकश्लोकसंख्यादि-
कथनं। नर्म्मदामाहात्म्यादिकथनं। तत्र कल्पसमुद्भवविवरणकथनं। कूर्म्मावतारादिकथनं।
कल्पानुकीर्त्तनकीर्त्तनं। तत्र प्रजासंहारादिलक्षणकथनं। कपिलासमुद्भवादिकथनं। विश-
ल्यायाः उत्पत्तिकथनं। विशल्यासङ्गममाहात्म्यकथनञ्च। नीलगङ्गासङ्गममाहात्म्यकीर्त्तनं। का-
लेश्वरमाहात्म्यकथनं। नारदेन सह बाणस्य संवादेन मधूकतृतीयाव्रतविधिकथनं। त्रिपुरक्षो-
भणविवरणकथनं। गिरिजया सार्द्धं गिरिशस्य नर्म्मदायां जलक्रीड़ादिवर्णनं। कावेरीसङ्ग-
ममाहात्म्यकथनं। वाराहीसङ्गममाहात्म्यादिकथनं। चण्डवेगाया माहात्म्यकथनमुखेन चण्डसे-
नस्य राज्ञ उपाख्यानकथनं। एरण्डीसङ्गममाहात्म्यकथनं। पितृतीर्थमाहात्म्यकथनं। ओङ्का-
रोत्पत्तिकथनप्रसङ्गेन शिवसन्तोषणार्थं ब्रह्मणस्तपस्यादिकथनं। कोटितीर्थमाहात्म्यकथनं।
काकह्रदतीर्थकथनं। सारस्वततीर्थकथनं। नरकवर्णनं। शारीरव्यवस्थाकथनं। अमरेश्वर-
क्षेत्रकथनमुखेन गोदानमाहात्म्यादिकथनं। मतङ्गतीर्थोत्पत्तिकथनादिकं। मृगवनतीर्थविवरण-
कथनं। मनोरथतीर्थमाहात्म्यकथनमुखेन अङ्गारगर्त्तासङ्गममाहात्म्यकथनं। बिल्वाम्रकविवर-
णादिकथनं। अशोकेश्वरतीर्थमाहात्म्यकथनं। वागीश्वरतीर्थकथनं। सहस्रवर्णकतीर्थकथनं।
सौगन्धिकावनमाहात्म्यकथनं। ब्रह्मोदतीर्थमाहात्म्यकथनं। शङ्करतीर्थकथनं। सोमतीर्थ-
कथनं। सहस्रयज्ञतीर्थकथनं। अग्नितीर्थकथनं। अदितीश्वरतीर्थकथनं। वराहतीर्थकथनं।
देवपथतीर्थकथनं। दीप्तिकेश्वरतीर्थकथनं। विष्णुतीर्थकथनं। मारुतेश्वरतीर्थकथनं। यो-
गेश्वरतीर्थकथनं। रोहिनीतीर्थकथनं। दारुकेश्वरतीर्थकथनं। ब्रह्मावर्त्ततीर्थकथनं। पात्रे-
श्वरतीर्थकथनं। आदित्यतीर्थकथनं। मेघनादतीर्थकथनं। दारुकतीर्थकथनं। देवतीर्थ-
कथनं। नर्म्मदेश्वरोत्पत्तिकथनं। कपिलेश्वरतीर्थकथनं। करञ्जेश्वरतीर्थकथनं। कुण्डेश्वरतीर्थ-
कथनं। पिप्पलादतीर्थकथनं। विमलेश्वरतीर्थकथनं। विमलेश्वरपुष्करिणीसम्भवकथनं।
शूलभेदतीर्थकथनं। अत्र अन्धकासुराय वरदानविवरणकथनञ्च। अन्धकासुरविप्रकृतानां
देवानां महादेवकृतसमाश्वासनवृत्तान्तकथनं। अन्धकबधविवरणकथनं। महादेवेन सह
उत्तानपादस्य संवादेन कन्यादानादिमाहात्म्यकथनं। श्राद्धविधितत्कालादिकथनं। काशीराज-
चित्रसेनयोरुपाख्यानकथनं। ऋष्यशृङ्गस्य स्वर्गगमनवृत्तान्तकीर्त्तनञ्च। दीर्घतपःस्वर्गगमनवृत्तान्त-
कथनं। भानुमतीवीरसेनयोरुपाख्यानकथनं। तत्र शवरस्य स्वर्गगमनविवरणकथनञ्च।
विमलेश्वरतीर्थकथनं। उलूकतीर्थकथनं। पुष्करिणीतीर्थकथनं। आदित्येश्वरतीर्थकथनं।
पिप्पलेश्वरतीर्थकथनं। करोटीश्वरतीर्थकथनं। शक्रेश्वरतीर्थकथनं। कुमारेश्वरतीर्थकथनं।
अगेश्वरतीर्थकथनं। व्यासेश्वरतीर्थकथनं। वैद्यनाथतीर्थकथनं। केदारतीर्थकथनं। मातृ-
तीर्थकथनं। नर्म्मदातीर्थकथनं। मुण्डेश्वरतीर्थकथनं। अनङ्गाहीसङ्गमकथनं। भीमेश्वर-

तीर्थकथनं। अर्जुनेश्वरतीर्थकथनं। धर्म्मेश्वरतीर्थकथनं। धनदतीर्थवर्णनं। जटेश्वरतीर्थकथनं। रवितीर्थकथनं। कामेश्वरतीर्थकथनं। मङ्गलेश्वरतीर्थकथनं। गौतमेश्वरतीर्थवृत्तान्तकीर्त्तनं। शङ्खचूड़ेश्वरतीर्थकथनं। केदारेश्वरतीर्थकथनं। चन्द्रेश्वरतीर्थकथनं। अम्बेश्वरतीर्थकथनं। नारदेश्वरतीर्थकथनं। पत्तिनागतीर्थवर्णनं। वानरेश्वरतीर्थवर्णनं। कुम्भेश्वरतीर्थकथनं। मेघेश्वरतीर्थकथनं। दधिस्कन्देश्वरतीर्थकथनं। नन्दिकेश्वरतीर्थकथनं। वरुणेश्वरतीर्थकथनं। कुवेरेश्वरतीर्थकथनं। हनूमदीश्वरतीर्थविवरणकथनं। पूतिकेश्वरतीर्थकथनं। सोमतीर्थवृत्तान्तकीर्त्तनमुखेन रेवारिसङ्गममाहात्म्यकथनं। नन्दातीर्थकथनं। पिङ्गलेश्वरतीर्थकथनं। ऋणमोचनतीर्थकथनं। जलशायिचक्रतीर्थकथनं। चण्डादित्यतीर्थकथनं। तत्र चण्डिकामाहात्म्यकथनञ्च। महाशस्यतीर्थकथनं। कङ्काड़िगङ्गेश्वरतीर्थकथनं। नन्दिकेश्वरतीर्थकथनं। बदरिकाश्रमवृत्तान्तकथनप्रसङ्गेन नरनारायणतीर्थकथनं। नलेश्वरतीर्थकथनं। व्यासतीर्थवृत्तान्तकीर्त्तनं। कोटीश्वरतीर्थकथनं। प्रभेश्वरतीर्थकथनं। शुक्रेश्वरतीर्थविवरणकथनं। नागेश्वरवृत्तान्तकथनमुखेन करनदीसङ्गमतीर्थकथनं। मार्कण्डेयेश्वरतीर्थकथनं। तत्र मार्कण्डेयसङ्कर्षणसंवादादिकथनं। जनकेश्वरतीर्थकथनं। मन्मथेश्वरतीर्थकथनादिकं। अनसूयातीर्थवृत्तान्तकथनं। एरण्डीसङ्गमतीर्थवृत्तान्तकथनं। अम्बिकेश्वरतीर्थकथनं। करञ्जेश्वरतीर्थकथनं। भरतेश्वरतीर्थकथनं। मुकुटेश्वरतीर्थकथनं। धनदेश्वरतीर्थकथनं। सौभाग्यसुन्दरीतीर्थविवरणं। रौहिणेश्वरतीर्थकथनं। सेनापुरचक्रतीर्थकथनादिकं। भोगेश्वरतीर्थकथनं। केदारतीर्थकथनं। निष्कलेश्वरतीर्थकथनं। भूतपापेश्वरतीर्थकथनं। आङ्गिरसेश्वरतीर्थकथनादिकं। अयोनिजेश्वरतीर्थकथनं। अङ्गारकेश्वरतीर्थकथनं। स्कन्देश्वरतीर्थमाहात्म्यादिकथनं। नर्म्मदेश्वरदेवतीर्थकथनं। ब्रह्मशिलातीर्थकथनं। वल्मीकेश्वरतीर्थकथनं। पाण्डुतीर्थविवरणं। त्रिलोचनेश्वरतीर्थविवरणं। कम्बुकेश्वरतीर्थविवरणं। चन्द्रप्रभासतीर्थविवरणं। कोहलेश्वरतीर्थविवरणं। इन्द्रेश्वरतीर्थविवरणं। यागेश्वरतीर्थविवरणं। गौतमेश्वरतीर्थकथनं। कपर्द्दीश्वरतीर्थकथनं। अहल्येश्वरतीर्थविवरणं। रामेश्वरतीर्थकथनं। धौरादित्यतीर्थविवरणं। अयोनिसम्भवतीर्थकथनं। श्रुतितीर्थविवरणं। भृग्वीश्वरतीर्थकथनं। कोरिलापुरस्थब्रह्मतीर्थादिविवरणं। आदिवाराहतीर्थविवरणं। आशापुरीतीर्थकथनं। वारुणेशतीर्थविवरणं। वाणवातेश्वरादितीर्थचतुष्टयकथनं। कर्कटेश्वरतीर्थकथनं। नन्दाह्रदतीर्थकथनं। चक्रवाराहतीर्थकथनं। केशवतीर्थविवरणं। रुक्मिणीतीर्थवृत्तान्तकीर्त्तनं। अमोहकतीर्थविवरणं। सिद्धेश्वरतीर्थकथनं। तापेश्वरतीर्थविवरणं। लङ्केश्वरतीर्थविवरणं। पाराशरेश्वरतीर्थविवरणं। कुसुमायुधेश्वरतीर्थविवरणं। कलकलेश्वरतीर्थविवरणं। श्वेतवराहतीर्थविवरणं। हुङ्कारस्वामिविष्णुतीर्थविवरणं। चाणक्यतीर्थविवरणं। अत्र इक्ष्वाकुवंशीयचाणक्यनृपतेरुपाख्यानकथनञ्च। रुद्रदेहमाहात्म्यकथनमुखेन शुक्लतीर्थविवरणकथनं। मधुमतीसङ्गमविवरणं। अनरकेश्वरतीर्थवृत्तान्तकीर्त्तनं। कावेरीसङ्गमविवरणं। सर्पेश्वरतीर्थ-

कथनं। गोपेश्वरतीर्थविवरणं। उदम्बरीसङ्गमविवरणं। शाम्बादित्यतीर्थविवरणं। सिद्धेश्वरकपिलेश्वरतीर्थकथनं। वैद्यनाथतीर्थकथनं। भृगुक्षेत्रस्थपिङ्गलेश्वरतीर्थविवरणं। भूतीश्वरतीर्थकथनं। सैन्धवायतनस्य वृत्तान्तकीर्त्तनं। गङ्गावाहतीर्थविवरणं। भृगुकच्छोत्पत्तिविवरणं। धौतपापतीर्थविवरणं। कनकेश्वरतीर्थविवरणं। शालेश्वरतीर्थविवरणं। शालग्रामतीर्थविवरणं। द्वादशादित्यतीर्थविवरणं। विश्वरूपतीर्थविवरणं। हंसतीर्थविवरणं। कण्ठेश्वरतीर्थविवरणं। अट्टहासतीर्थविवरणं। भूर्भुवेश्वरतीर्थविवरणं। शूलेश्वरीतीर्थविवरणं। दारुकेश्वरतीर्थविवरणं। सावित्रीतीर्थविवरणं। महेश्वरतीर्थविवरणं। देवतीर्थविवरणं। शिखितीर्थविवरणं। माण्डवतीर्थकथनमुखेन माण्डव्यशूलारोपणविवरणकथनं। अक्रूरेश्वरतीर्थविवरणं। रेवन्ततीर्थविवरणं। चड्हड्मातृतीर्थविवरणं। डिण्डिमेश्वरतीर्थविवरणं। शृङ्गीश्वरतीर्थविवरणं। लङ्केश्वरतीर्थविवरणं। सागरसङ्गमस्नानविधिकथनं। तत्र लुण्ठनेश्वरतीर्थविवरणं। वासवेश्वरतीर्थकथनं। विमलेश्वरतीर्थविवरणं। परार्थं तीर्थयात्राफलकीर्त्तनञ्च। तीर्थसंख्यादिकथनं। फलश्रुतिकीर्त्तनञ्च। इति।

No. 2264. स्कान्दपुराणम्, अगस्त्यसंहितायां हालास्यमाहात्म्यम्। Substance, country-made paper, 17 × 8 inches. Folia, 134. Lines, 16 on a page. Extent, 3,192 ślokas. Character, Nágara. Date, Sm. 1802. Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, fresh. Verse. Generally correct.

Hálásya-máhátmya. This work professes to be a part of the Agastya-sañhitá of the Skanda-purána, but it is, like most other Máhátmyas, of doubtful authenticity. It contains a lot of Puránic legends, as also notices of sacred pools presided over by liñgams, in different parts of India, an abstract of which is given in the Sanskrit Contents. The object of the work is to glorify the divinity of S'iva.

Beginning. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत् सर्व्वविघ्नोपशान्तये॥
— — — — — — — — —।
इक्षुकोदण्डपुष्पेषु पाशाङ्कुशकरोज्ज्वलां।
उद्यत्सूर्य्यनिभां देवीं वन्दे हालास्यसुन्दरीं॥
— — — — — — — — —।
ऋषय ऊचुः। वह्निकुण्डसमुद्भूत भगवन् भक्तवत्सल।
समस्तशिवधर्म्मज्ञ सर्व्ववेदान्तपारग॥

शिवक्षेत्राणि सर्व्वाणि भक्तिमुक्तिप्रदानि च ।
मेरुमन्दरकैलासश्रीपर्व्वतमुखानि च ॥
संक्षेपतोविस्तरेण भवता कथितानि च ।
अल्पबुद्धिभिरस्माभिस्तानि नावधृतानि च ॥
तस्माद्विशिष्टं सर्व्वेषां स्थानानां यच्चिरन्तनं ।
शम्भुनाधिष्ठितं नित्यं तदेव वक्तुमर्हसि ॥
इति पृष्टोमुनिवरैः सूतः कारुण्यविग्रहः ।
सर्व्वज्ञं साम्बमीशानं देवदेवं जगद्गुरुं ॥
श्रीमन्तं दक्षिणामूर्त्तिं त्रिनेत्रं चन्द्रशेखरं ।
व्याघ्रचर्म्मपरीधानं शुद्धस्फटिकनिर्म्मलं ॥
मुद्रां विद्याञ्च वह्निञ्च भुजङ्गञ्च भुजैर्धृतं ।
वीरासने समासीनं व्याघ्रचर्म्मावृतं शिवं ॥
सर्व्वाभरणभूषाढ्यं सर्व्वभूषणभूषितं ।
सनकादिमुनीन्द्राणां ज्ञानदं देशिकोत्तमं ॥
योगिभिः सनकाद्यैश्च सेवितं गणपुङ्गवैः ।
ध्यात्वा क्षेत्रोत्तमं शम्भोर्वक्तुमारभते मुनिः ॥
श्रीसूत उवाच ।
— — — — — — — — — ।
अगस्त्यसंहितेत्यासीन्नाम्ना च सार्थसंहिता । इत्यादि ।

End. वन्दे हालास्यनगरीं वन्दे हेमाब्जिनीमपि ।
वन्दे सुमीननयनां वन्दे सुन्दरनायकं ॥
जुष्टं द्विजा भो युष्माभिर्विशिष्टतरमद्भुतं ।
क्षेत्रं तीर्थञ्च लिङ्गञ्च तत्सर्व्वं कथितं मया ॥
सव्वस्तरति दुर्गाणि सर्व्वाभद्राणि पश्यति ।
सर्व्वः सद्गतिमाप्नोति श्रुत्वा हालास्यवैभवं ॥

Colophon. इति स्कान्दे महापुराणे अगस्त्यसंहितायां हालास्यमाहात्म्ये वसिष्ठऋषीश्वराणां काश्यां मुक्तिमण्डपे अगस्त्यप्रोक्तहालास्यलीलाकथनं नाम एकसप्ततितमोऽध्यायः । संवत् १८०९ ।

विषयः । १–२ अध्याय,—सूतेन सह सनकादीनां संवादेन काश्यां ब्रह्मकृतब्रह्मेश-लिङ्गस्थापनदशाश्वमेधानुष्ठानविवरणकथनं । वसिष्ठादीनां पुरतोऽगस्त्येन हालास्यमाहात्म्य-कीर्त्तनं । हालास्येश्वरलिङ्गमाहात्म्यकथनमुखेन काशीक्षेत्रादपि हालास्यतीर्थस्य माहात्म्याधिक्य-

वर्णनं। ४—अध्याये,—महादेवस्य चतुःषष्टिलीलोद्देशकीर्त्तनं। इन्द्रस्य गुरुद्रोहानुष्ठानपूर्व्वकं त्वष्टुः पुत्रस्य विश्वरूपस्य देवपौरोहित्ये वरणकथनं। अथ दैत्यकुलभागिनेयस्य तस्य दैत्येषु पक्षपातवृत्तान्तमवगत्य नितरां मन्युमापन्नः शतमन्युः वज्रेण तच्छिरश्चिच्छेद। तत्र प्रथमेन शिरसा कपिञ्जलः, द्वितीयेन कलविङ्कः, तृतीयेन च तित्तिरिरिति पक्षिणः सम्बभूवुरितिवृत्तान्तकथनं। वृत्रासुरस्य उत्पत्तिकथनं। इन्द्रकृततन्निधनादिवृत्तान्तकथनञ्च। ५—९—अध्याये,—महेन्द्रानुग्रहात्मिका शिवस्य प्रथमा लीला इति कथनं। ऐरावतशापमोचनरूपद्वितीयलीलाकथनं। तृतीयलीलायां वैश्यस्य कदम्बवने नगरीनिर्म्माणादिविवरणकथनं। तुरीयलीलायां मलयध्वजस्य वृत्तान्तकथनमुखेन तटातकोत्पत्तिकथनं। एवं षष्ठादिषु शिवलीलासु क्रमेण शिवस्य तटातकापरिणयकल्याणलीलावर्णणं। १०—१६,—अध्याये,—पतञ्जल्यनुग्रहताण्डवदर्शनलीलाकथनं। कुण्डोदरान्नभोजनलीलाकथनं। नद्यागमनलीलावर्णनं। हालास्यक्षेत्रे सप्तसमुद्रानयनलीलावर्णनं। काञ्चनमालामलयध्वजयोः शिवसारूप्यप्राप्तिलीलावर्णनं। तटातकायाः पुत्रोत्पत्तिलीलावर्णनं। तत्पुत्रस्य उग्राभिधानस्य विवाहपट्टाभिषेकमहोत्सवादिलीलावर्णनं। १७—२२, अध्याये,--सिन्धुताड़नलीलाकथनं। किरीटभेदनलीलाकथनं। सोमवारव्रतविधिकथनं। तन्नियमतदुद्यापनादिकथनञ्च। काञ्चनहरणलीलाकथनं। कन्वादीनृषीनुद्दिश्य श्रीशिवाशिवयोर्वेदवेदान्तार्थोपदेशप्रदर्शनलीलाकथनं। २३, अध्याये,—बलनामकस्य दानवस्य अस्थि-दशन-रक्त-लोम-पिशितादिभ्यः क्रमेण वज्र-मुक्ता-पद्मराग-वैदूर्य्य-प्रवालादीनामुद्भवकथनं। तत्र वज्रलक्षणपरीक्षादिकथनं। मुक्तालक्षणादिकथनं। पद्मरागलक्षणादिकथनं। एवं वैदूर्य्य-प्रवाल-महानील-गारुत्मत-पुष्पराग-गोमेदादिलक्षणकथनं। २४—३२, अध्याये,—मेघकृतसमुद्रपानलीलावर्णनं। हालास्येश्वरस्य वरुणं प्रति अनुग्रहकथनञ्च। सुन्दरेश्वरचरितवर्णनं। शिलामयगजाय इक्षुकाण्डप्रदानलीलावर्णनं। नगहस्तिहननलीलावर्णनं। द्विजकन्याया देवसारूप्यप्रदर्शनलीलावर्णनं। सुन्दरेशस्य नृत्यकरणलीलावर्णनं। विप्रवनिताबधूबधलीलावर्णनं। ब्रह्मघ्नमातृगमनदोषोपशमनलीलावर्णनं। ३३—४०, अध्याये,—अङ्कविजयलीलावर्णनं। सर्पहननलीलावर्णनं। नग्नधेन्वसुरहननलीलावर्णनं। कुलभूषणस्य राज्ञः सेनादर्शनलीलावर्णनं। नीविदानलीलावर्णनं। वैश्यकन्यानां वलयविक्रयलीलावर्णनं। यक्षकन्यानामष्टसिद्ध्युपदेशलीलावर्णनं। कान्तारच्छेदद्वारभेदलीलावर्णनं। ४१—४६, अध्याये,—पाण्ड्यसेनाभ्यः पानीयदानलीलावर्णनं। रसवादकर्म्मप्रदर्शनलीलावर्णनं। चोलसेनाप्रभञ्जनलीलावर्णनं। वृषलस्य अक्षयतण्डुलप्रदर्शनलीलावर्णनं। सुन्दरेशस्य वैश्यमातुलत्वग्रहणलीलावर्णनं। वरगुणस्य नृपतेः शिवलोकदर्शनलीलावर्णनं। ४७—५३, अध्याये—भद्राय भक्तोत्तमाय काष्ठभाराहरणलीलावर्णनं। भद्रस्य कृते चोलभूपालाय पत्रिकाप्रेषणलीलावर्णनं। भद्राय फलकदानलीलावर्णनं। भद्रविजयप्रदानलीलावर्णनञ्च। शूकरशिशुभ्यः स्तन्यप्रदानलीलावर्णनं। शूकरशिशूनां सचिवत्वप्राप्तिलीलावर्णनं। भरद्वाजपक्षिणे मृत्युञ्जयमन्त्रोपदेशलीलावर्णनं।

५४—६१, अध्याये,—कोयष्टये मुक्तिप्रदानलीलावर्णनं। वंशशेखराय हालास्यपुरीसीमाप्रदर्शनलीलावर्णनं। चोलसेनानाशनलीलावर्णनं। संघकवीश्वरवरप्रदानलीलावर्णनं। द्विजस्यार्य्याविकल्पनलीलावर्णनं। कीरानुग्रहलीलावर्णनं। कीरस्य सूत्रोपदेशलीलावर्णनं। प्रबन्धतारतम्यनिरूपणलीलावर्णनं। ६२—६६, अध्याये,—अग्नीश्वराख्यलिङ्गप्रादुर्भावलीलाकथनं। कैवर्तकन्यापाणिग्रहणलीलावर्णनं। वातपुरेश्वरस्य ज्ञानदीक्षाकरणलीलावर्णनं। अश्वविक्रयलीलाकथनमुखेन अश्वलक्षणादिकथनं। भक्तोपशान्त्यर्थं वेगवतीजलाकर्षणलीलावर्णनं। ६७--७१, अध्याये,—बौद्धनिरसनलीलावर्णनं। कुब्जज्वरनाशादिलीलावर्णनं। ज्ञानसम्बन्धेन नग्नानां तरुशूलारोहणलीलावर्णनं। वैश्यकन्यानुग्रहार्थं शम्भुकूपशमीदृक्षानयनलीलावर्णनं। हालास्येश्वरलीलामाहात्म्यश्रवणादिफलकीर्त्तनञ्च।

No. 2265. परानन्दपुराणम्। Substance, country-made paper, 16 × 5½ inches. Folia, 200. Lines, 8 on a page. Extent, 3,990 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Very incorrect.

Paránanda-puráṇa. A collection of Puráṇic legends related by Sauti to Utañka and others. It calls itself a Puráṇa, but its name does not occur in any of the published lists of Puráṇas or Upapuráṇas.

Beginning. नेत्रापाङ्ग+ज्ञाकरणकृतमतिः सृष्टिमिष्टां विधातुं
धाता पाता प्रदी+ङ्गुलिकृतविकृतिं प्राप्य लोकस्य विष्णुः।
+ + + + प्रसङ्गात् क्षयमिदमखिलं याति संसारचक्रं
युष्मांश्चन्द्रार्द्धमूर्द्धा + + + + सरितां भर्त्तुरुद्धर्त्तुमर्हः॥
यदीयपदपङ्कजस्मरणमात्रनिष्कल्मषः
प्रयाति परमां गतिं + + समग्र + + नरः।
सुरासुरशिरोमणिद्युतिसमर्च्चिताङ्घ्रिद्वयः
करोतु दुरितक्षयं + + + महेशः सतां॥
— — — — — — — — —।
सौतिरुवाच।
विगमप + + + मधुव्रतं नवपयोदसहोदरविभ्रमं।
मुनिगणार्च्चितपादसरोरुहं द्विजं नमामि पराशरनन्दनम्॥
उतङ्क द्विजशार्दूल शूलपाणिपदार्चक।
परानन्दमिदं पुण्यं पुराणं कथयाम्यहं॥ इत्यादि।

End. शोकैरग्निप्रतापे जनधन + + + प्रेयसीमोहदुर्गे
मायाजालाहिभीमे विषयरसविषे स्नेहपङ्कप्रचारे ॥
क्लेशानन्दाखुपूरे + वनरकतटे कर्म्मपाशावसानो-
+ + + + + + + + वितरतु करालम्बमापतिर्वः ॥

Colophon इति श्रीमत्परानन्दपुराणे षट्चत्वारिंशोऽध्यायः । ४६ ॥ ॐ ॥

विषयः । सौतिना सह उतङ्कादीनां संवादेन सृष्टेः पूर्व्वं रुद्र एव एक आसीदितिकथनं । रुद्रस्य इच्छामात्रेण महत्तत्वादिप्रकृतिवर्गाणामुत्पत्तिकथनं । ब्रह्मविष्णुप्रभृतीनामुत्पत्तिकथनपूर्व्वकं सृष्ट्यादिकार्य्ये प्रवृत्तिकथनं । भारतयुद्धोत्तरम् अश्वत्थामकृतशिवाराधनविवरणकथनं । शिवमाहात्म्यकीर्त्तनं । गविना सह द्रोणपुत्रस्य संवादेन देवव्रतस्य उपाख्यानकथनं । शान्तवृत्तिचरित्रवर्णनं । राजीवलोचननृपतेरुपाख्यानकथनं । सुश्रुतिसुमुखयोरुपाख्यानकथनं । तत्र संसारतारणोपायकथनमुखेन भगवद्विभूतिवर्णनञ्च । भगवद्गीताकीर्त्तनं । अश्वत्थाम्ना सार्द्धं स्वर्गलोकगतस्य दुर्य्योधनस्य संवादेन ब्रह्मलोकगमनपुरःसरं तयोः धृतराष्ट्रद्रोणादिभिः सह संवादकथनं । अथ तेषां निरतिशयां सद्गतिमवलोक्य नितरां निर्व्विण्णस्य अश्वत्थाम्नः शिवोपदेशेन परशुरामसमीपगमनविवरणकथनं । तत्र धर्म्मव्रताभिधानविप्रस्य वृत्तान्तकीर्त्तनं । परदारगमनमिथ्याभाषणादिनिरतस्य प्रत्यवायादिकथनमुखेन वासुकिनामकविप्रस्य शिवदूतेन सह संवादकथनं । अकृतदारपरिग्रहेण शिलादेन सह पितॄणां संवादकथनं । शिलादकृतशिवस्तोत्रकीर्त्तनं । शिलादपुत्रस्य नन्दिन उत्पत्तिकथनं । तस्य शिवानुचरत्वप्राप्तिकथनञ्च । नन्दिनो गणाधिपत्वे अभिषेकमहोत्सववर्णनञ्च । शिवस्य सतीपरिणयमहोत्सवादिवर्णनं । समुद्रमन्थने गरलपानेन शिवस्य नीलकण्ठत्वप्राप्तिकथनं । त्रिपुरवधवृत्तान्तकीर्त्तनं । कपालमोचनतीर्थस्योत्पत्तिकथनमुखेन महादेवस्य वृषध्वजत्ववृत्तान्तकथनं । काशीमाहात्म्यकीर्त्तनञ्च । शिवपूजाविधिकथनं । दक्षयज्ञविवरणकथनं । सतीदेहत्यागकथनं । हिमालयकुमार्य्या काल्या सह शिवस्य विवाहवर्णनं । सुदेवस्य विवाहवृत्तान्तकथनमुखेन सत्यव्रतकुम्भकर्णयोरुपाख्यानकीर्त्तनं । मदयन्तीपरिणयविवरणकथनं । गिरिजाप्रीतिसम्पादनाय गिरिशकृतपारिजातकुसुमसृष्टिविवरणकथनं । हव्यवाहनशरवनादिषु शैवतेजस आधानेन कार्त्तिकेयस्य उत्पत्तिकथनं । तारकासुरनिधनकथनञ्च । दक्षस्य काश्यां शिवाराधनविवरणं । तत्कृतशिवसहस्रनामस्तोत्रकथनं । दक्षेशलिङ्गोत्पत्तिकथनञ्च । भूतसृष्टिविवरणकथनं । परात्मजीवात्मस्वरूपादिकथनं । धर्म्मनिधेरुपाख्यानकथनं । शिवकृतान्धकासुरनिधनवृत्तान्तकथनं । जम्भकुजम्भयोर्दानवयोरुपाख्यानकथनं । शैवसिद्धान्तकीर्त्तनं । शैवानां कर्त्तव्यादिकथनं । योगकथनञ्च । परानन्दपुराणश्रवणादिमाहात्म्यकीर्त्तनं ।

No. 2266. त्रिकूटारहस्यतन्त्रम्। Substance, country-made paper, 15 × 5 inches. Folia, 33. Lines, 8 on a page. Extent, 585 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Incorrect.

Trikúṭárahasya Tantra. One of the minor Tantras. Its object is to glorify Trikúṭá, a form of Durgá. It treats of all the topics usually included in the Tantras. The contents are given in detail in Sanskrit; it is scarcely worth while to translate them.

श्रीदेव्युवाच।

Beginning. भगवन् सर्व्ववेत्ता त्वं त्रैलोक्यप्रभुरीश्वरः।
त्रिगुणात्मा त्रिलोकेशस्त्रिनेत्रस्त्रिपुरान्तकः॥
त्वमेव सृष्टिहृच्छम्भो त्वं रक्षाप्रलयक्षमः।
त्वमेव तन्त्रसारज्ञस्त्वं मन्त्राम्भोनिधिर्भवः॥
भगवंस्त्वत्प्रसादेन श्रुतस्तन्त्रसमुच्चयः।
इदानीं श्रोतुमिच्छामि रहस्यं तन्निवेदितं॥
+ + + + श्रीविद्या या महाविद्यासमाश्रिता॥
मन्त्रराजं परं तत्त्वं वद शीघ्रं कृपानिधे॥

श्रीभैरव उवाच।

शृणु देवि प्रवक्ष्यामि रहस्यं सर्व्वकामिकं।
श्रीविद्यायाः परं तत्त्वं तन्त्रं मन्त्रैकसागरं।
— — — — — — — — — — —।
श्रीत्रिकूटारहस्याख्यं तन्त्रमन्त्रैकसागरं॥ इत्यादि।

End. इदं रहस्यं परमं भक्त्या तव मयोदितं।
सर्व्वस्वं मे शिवे तत्र गोपनीयं स्वयोनिवत्॥

Colophon. इति श्रीत्रिकूटारहस्यतन्त्रे भक्तिसाधनकवचाख्यानं द्वात्रिंशः पटलः।
समाप्तोऽयं त्रिकूटारहस्याख्यस्तन्त्रराजः॥

विषयः। शिवाशिवयोः संवादेन श्रीविद्यामन्त्रोद्धारविधिकथनं। त्रिकूटानिरूपणं। पुरश्चर्य्याविधिकथनं। कुलाचारविधिकथनं। नित्यकामेश्वरमन्त्रोद्धारादिविधिकथनं। नित्यपूजाविधिकथनं। सूर्य्यग्रहणकाले पूजनविधिकथनं। चन्द्रग्रहणकाले पूजाविधिकथनं। भूकम्पकाले पूजाविधिकथनं। चैत्रमासि नवरात्रपूजाविधिकथनं। आश्विनमासे नवरात्रपूजाविधिकथनं। तत्र कुमारीपूजाविधिकथनञ्च। कन्यासंक्रान्तौ पूजाविधानकथनं। स्तम्भनादिषट्क्रिया-

विधिकथनं। पञ्चरत्नेश्वरीविद्याविधिकथनं। दीपदानविधिकथनं। शक्तिपूजाविधिकथनं। चिन्तामणिकवचकथनं। वज्रपञ्जरकवचकथनं। जगन्मङ्गलकवचकथनं। जगन्मोहनकवचकथनं। जगदीशकवचकथनं। काम्यकवचकथनं। त्रिविक्रमकवचकथनं। त्रैलोक्यभूषणकवचकथनं। विरूपाक्षकवचकथनं। सर्व्वार्थसाधककवचकथनं। सर्व्वसिद्धिप्रदकवचकथनं। व्याघ्रकवचकथनं। वैरिनाशकवचकथनं। विजयकवचकथनं। विघ्नापहकवचकथनं। मुक्तिसाधनकवचकथनं। त्रिकूटारहस्यकथनञ्च।

No. 2267. सेतुबन्धः। Substance, country-made paper, 17 × 4 inches. Folia, 197. Lines, 12 on a page. Extent, 8,126 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Máhárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Prose. Incorrect.

Setubandha. A commentary on that portion of the Vámakes'vara-tantra which describes the goddess Durgá as Nitya soḍas'iká. By Bháskararáya *alias* Bhasuránandanáth Díkshita, son of Gaṁbhirarája Bháratí Díkshita Súri.

Beginning. श्रीगम्भीरविपश्चितः पितुरभूद्यः कोन + वोदरे
विद्याष्टादशकस्य मर्म्मभिदभूद्यः श्रीनृसिंहाद्गुरोः।
यस्य श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत्
स चेतात्रिपुरात्रयीति मनुते तामेव नाथत्रयीम्॥
वामकेश्वरतन्त्रस्थे नित्यषोड़शिकार्णवे।
पूर्व्वोत्तरचतुःशत्यौ व्याचष्टे भास्करः सुधीः॥
नित्यषोड़शिकार्णवनामनि तन्त्रे शिवैकपरतन्त्रे।
अतिगहने फणिपटलैः स्यन्दितुमपि यः क्षमोमनुजः॥
नित्यषोड़शिकाम्भोधेः परं पारं यियासवः।
विश्रामैरष्टभिर्युक्तं सेतुबन्धं भवन्त्विमं॥
— — — — — — — — —।

इह खलु निखिलजनाभिलषितं सुखमेव पुरुषार्थः। तच्च कृत्रिमञ्चाकृत्रिममिति द्विविधं। क्रमेण काममोक्षपदाभ्यामभिलप्यते। इत्यादि।

End. ष्टाद्रेतोकाक्षरं जटावाचकं ताभिः सहितः मन्त्रः शिवोहरिरित्यर्थः॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणनिखिलतन्त्रस्वतन्त्रश्रीमद्गम्भीरराजभारतीदीक्षितसूरिसूनुना भासुरानन्दनाथदीक्षिताभिधानेन भास्कररायेण प्रणीतो नित्यषोड़शिकार्णवव्याख्यात्मा सेतुबन्धः समाप्तः।

विषयः। वामकेश्वरतन्त्रान्तर्गतनित्यषोड़शिकार्णवव्याख्यानम्।

No. 2268. **त्रिस्थलीसेतुः, (काशीप्रकरणम् ।)** Substance, country-made paper, 14 × 4 inches. Folia, 252. Lines, 8 on a page. Extent, 3,898 ślokas. Character, Nágara. Date, Sᴍ. 1852. Place of deposit, Calcutta, Government of India; another copy at Bettiyá, Máhárájá Rájendrakiśora Siñha, Bahádur. Appearance, fresh. Prose and verse. Correct.

Tristhalisetu. A digest of Smṛiti rules regarding pilgrimages to sacred places, and descriptions of, and the duties to be observed at, those places. By Náráyaṇa Bhaṭṭa, son of Bhaṭṭa Rámes'vara Súri. The codex contains only that portion which treats of Kás'í.

Beginning. भवानीशङ्करौ नत्वा भट्टरामेश्वरात्मजः ।
भट्टनारायणः काशीं विविनक्ति सदुक्तिभिः ॥

तत्र माहात्म्यज्ञानस्य प्रवृत्त्यौपयिकत्वेन तत्रावश्यवक्तव्यत्वात् तदेव प्रथमं निरूप्यते । अत-एव पद्मपुराणे पातालखण्डे भृगुं प्रति ऋषिकृतेषु पञ्चप्रश्नेषु प्रथमं माहात्म्यप्रश्नएव कृतः ।
किं माहात्म्यं कथं वेद्यं सेव्यं कैश्च द्विजोत्तम ॥ इत्यादि ।

End. ते मृता हंसयानेन दिव्यं यान्त्यकुतोभयाः ।
इत्यादीनि तु सश्लोकताविषयाणीति सर्व्वमनवद्यम् ॥

Colophon. इति श्रीमद्विद्वन्मुकुटमाणिक्यदाक्षिणात्यालङ्कारश्रीमद्भट्टरामेश्वरसूरि-सूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ काशीप्रकरणे तन्मरणमुक्तिविचारः । समाप्तं काशी-प्रकरणम् । इत्यतोगयाप्रकरणं भविष्यति । संवत १८५२ ।

विषयः । काशीमाहात्म्यसूचकपुराणवाक्यानां मूलभूतश्रुतिवाक्यप्रदर्शनं । काशीमाहा-त्म्यश्रवणादिमहिमा । काशीस्वरूपनिरूपणं । काशीध्यानकथनं । प्रार्थना । काशीकथामहिमा । काशीनाममहिमा । काश्यादिशब्दनिर्व्वचनं । काशीस्मरणमहिमा । काशीस्तुतिमहिमा । का-शीगमनमहिमा । काशीदर्शनमहिमा । काशीप्रवेशमहिमा । काश्यादिक्षेत्रपरिमाणनिरूपणं । काशीक्षेत्रनिरूपणं । कियत्कालं काशीवासफलं । क्षेत्रसन्न्यासमाहात्म्यकथनं । काशीवासिनो-विहितनिषिद्धानि । क्षेत्रसन्न्यासविधिकथनं । काश्यां विविधकाम्यकर्म्माणि । कालविशेषे काश्या-मनेकतीर्थागमनकथनं । मत्स्योदरीयोगनिरूपणं । मणिकर्णिकाप्रमाणकथनं । मणिकर्णिकोत्प-त्तिकथनं । मणिकर्णिकाध्यानमन्त्रादिकथनं । ज्ञानवापीमाहात्म्यादिकीर्त्तनं । पञ्चनदविन्दुमा-धवयोर्महिमा । गभस्तीश्वरादिमाहात्म्यकथनं । वीरेश्वरलिङ्गमहिमा । दशाश्वमेधमहिमा । योगिन्युद्देशकथनं । अम्बरीषेश्वरादिमाहात्म्यकथनं । दुर्गाकुण्डादिमाहात्म्यकथनं । केदारमा-हात्म्यादिकथनं । धर्म्मेशमाहात्म्यादिकथनं । धर्म्मकूपमाहात्म्यं । अविमुक्तेश्वरमाहात्म्यं । ॐका-

रेश्वरमहिमा। त्रिलोचनलिङ्गमहिमा। कालेशमहिमा। कपालमोचनेशमहिमा। वृषभध्वजमहिमा। विष्णुपादोदकतीर्थमहिमा। वृद्धकालेश्वरमहिमा। अल्पमृत्युहरेश्वरमहिमा। समुद्रकूपमहिमा। पिशाचमोचनादितीर्थमाहात्म्यकथनं। अथ विश्वेश्वरप्रादुर्भावकथनं। विश्वेश्वरलिङ्गे अस्पृश्यस्पर्शनिबन्धनो दोषो नास्तीतिनिरूपणं। विश्वनाथप्रसादादिमहिमा। मुक्तिमण्डपादिमहिमा। दण्डपाणिमहिमा। भैरवप्रादुर्भावकथनं। भवानीमहिमा। आदित्येशमहिमादिकथनं। षट्पञ्चाशद्विनायकस्थानमाहात्म्यादिकथनं। विष्णुमूर्त्तयः। आवश्यकतीर्थादिनिरूपणं। तत्र गङ्गादिमाहात्म्यकथनञ्च। काश्यामवश्यपूज्यदेवाः। काश्यां नित्ययात्रादिविधानं। तत्र प्रदक्षिणादिविधिकथनं। अथ ऋतुयात्राविधिः। मासयात्राविधिः। तिथिकृत्यनिरूपणं। अथ वासरयात्राविधिः। नक्षत्रयात्राकथनं। प्रकीर्णकयात्राकथनञ्च। काशीकृतपापकर्म्मविपाककथनं। काशीकृतपापप्रायश्चित्तकथनञ्च। काशीवासप्रकारकीर्त्तनं। पञ्चक्रोशयात्रायां नियमकथनं। अन्तर्गृहयात्रा। क्षुद्रपापप्रायश्चित्तं। काशीमरणविवेचनं। मुक्तिनिरूपणञ्च।

No. 2269. अकालभास्करः। Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq. Extra Asst. Commissioner, Goálpárá.

Akála-bháskara. A treatise on intercallary months, how to calculate them, and the duties appropriate or forbidden during their currency. By Sambhúnátha S'iddhántavágís'a. The author completed the work in the S'aka year 1669. He appears to have written several works on Smṛiti topics under the generic title of *Bháskara*. Some of his works have other names. He is apparently a Bengal Bráhmaṇ, who had settled in Assam. The author in one place has the title of Nyáya-chúḍámaṇi. His works are not known in Bengal.

नमो गणेशाय।

Beginning नत्वा श्रीमत्कृष्णपदमनपायपदप्रदं।
अकालभास्करं श्रीमच्छम्भुनाथेन तन्यते॥
अथाधिमासो निरूप्यते। तदुत्पत्तिकालमाह ज्योतिषे।
गते चाब्दद्वये सार्द्धे पञ्चपक्षे दिनत्रये।
दिवसस्याष्टमे भागे पतत्येकोऽधिमा[ ]कः॥
तत्स्वरूपमाह यमः।
अमावास्याद्वयं यत्र प्रतिपत्त्रितयं तथा।
अधिवासः स विज्ञेयः सर्व्वकर्म्मवहिःकृतः॥

एवञ्च । अमावास्याद्वयं यत्र सोऽधिमासोऽविनामकः इति ।
अत्रामावास्याद्वयं सखण्डाखण्डामावास्याद्वयपरं ।

यदा शशी याति गभस्तिमण्डलं दिवाकरः संक्रमणं करोत्यनु ।

तदाधिमासः कथितोविरिञ्चिना विवाहयात्रोत्सवयज्ञदूषकः । इत्यनेन विरोधः ।

ननु माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।

द्विराषाढ़ः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥

इति ज्योतिर्वचनेऽधिमासस्य द्विराषाढ़ादिसंज्ञाश्रुत्या कथं विनामकत्वमितिचेदुच्यते ।
अस्य यत्राधिमासत्वस्य संज्ञाग्राहकार्यकत्वेन संज्ञाविधायकत्वाभावात् ।

अन्यथा, एकराशिस्थिते सूर्य्ये यदिस्यादधिमासकः ।

एक एव हि मासोऽसौ षष्टिभिर्दिवसैर्मतः ॥

षष्टिभिर्दिवसैर्मासः कथितोवादरायणैः ॥

पूर्व्वमर्द्धम्परित्यज्य उत्तरार्द्धं प्रशस्यते ।

इत्यादिवचनबाधापत्तेः ।

End. अथ शास्त्रविशेषे अनध्यायापवादमाह पराशरभाष्ये कूर्म्मपुराणं ।

अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।

न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥

अङ्गेषु शिक्षादिषु । तथा चरणव्यूहे । शिक्षा कल्पोव्याकरणं निरुक्तं छन्दोज्योतिषमिति
षड़ङ्गानि । तथा, छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते ।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतं ।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

कल्पोज्योतिष्टोमपद्धतिरिति वागीशभट्टाचार्य्यः । निरुक्तं वैदिकशब्दग्रन्थः । शिक्षा वेद-
पाठोपयुक्तातालव्यादिनिरूपणग्रन्थः । पर्व्वाण्याह विष्णुपुराणे ।

चतुर्द्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।

पर्व्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥

पर्व्वपदं सन्ध्यागर्ज्जप्रतिपदाद्युपलक्षणं ॥

मनुः, वेदोपकरणे चैव होममन्त्रे च चैव हि ।

नानुरोधोस्त्यनध्यायः स्वाध्याये चैव नैत्तिके ॥

नैत्तिके ब्रह्मयज्ञादिमन्त्रे । इत्यनध्यायनिरूपणकिरणः ।

शाकेङ्गाग्निरसक्षोणीमिते सज्जनतामुदे ।

श्रीमत्सिद्धान्तवागीशश्चकाराकालभास्करं ॥

No 2270. दिनभास्करः। Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq., Extra Asst. Commissioner, Goálpárá.

Dina-bháskara. A digest of the daily religious duties of householders. The topics are the same as are given in the A'hnika Tattva of Raghunandana. By Sambhúnátha S'iddhántavágis'a.

नमोगणेशाय।

Beginning. अथ प्रातःकृत्यं। तत्र ब्रह्मपुराणं।

ब्राह्मे मुहूर्त्ते बुध्येत स्मरेद्देवगणान्दषीन्।

इतिवचनात्तेषां स्मरणं कार्य्यं। तद्यथा,

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतोबुधश्च।
गुरुश्च शुक्रः शनिराहुकेतुः कुर्व्वन्तु सर्व्वे मम सुप्रभातं॥
भृगुर्वशिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः।
वैश्योमरीचिश्च्यवनः दृषद्गुः कुर्व्वन्तु सर्व्वे मम सुप्रभातं॥
सनत्कुमारः सनकः सनन्दः सनातनोप्यासुरिपिङ्गलौ च॥
सप्त स्वराः सप्त रसातलाश्च कुर्व्वन्तु सर्व्वे मम सुप्रभातं॥
पृथ्वी सगन्धा सरसास्तथापः स्पर्शी च वायुः ज्वलितश्च तेजः।
नभः सशब्दं महता सहैव कुर्व्वन्तु सर्व्वे मम सुप्रभातं॥
सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयोद्वीपचराश्च सप्त।
भूरादिकानि भुवनानि सप्त कुर्व्वन्तु सर्व्वे मम सुप्रभातं॥
इत्थं प्रभाते परमं पवित्रं हरोदितं यः शृणुयात् स्मरेद्वा।
दुःस्वप्ननाशोऽनघसुप्रभाते भवेच्च नित्यं भगवत्प्रसादात्॥

महाभारते, कर्क्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनं॥

End. वृद्धशातातपः। ऋतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिनः स्मृतं।
अनृतौ तु सदा कार्य्यं शौचं मूत्रपुरीषवदिति॥

गौतमश्च, मैथुनीभूय शौचमृति न विलम्बेत्।

वृद्धशातातपः। द्वावेवाशुची स्यातां दम्पती मैथुनेन तौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥

स्मृतिः, दिवा तु मैथुनं गत्वा स्नानाद्विप्रोविशुध्यतीति।

एतदृतावपि। कूर्म्मपुराणं।

इत्येतदखिलं प्रोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृत्यजातमपवर्गफलप्रदं ॥
नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः ।
स याति नरकान् घोरान् पशुयोनौ च जायते ।
इत्यभिगमननिरूपणकिरणः ।

Colophon इति श्रीसिद्धान्तवागीशभट्टाचार्य्यविरचितोदिनभास्करः समाप्तः ।

No. 2271. दुर्गोत्सवकृत्यकौमुदी । Place of deposit, Goálpárá. MS. examined by H. C. Clarke, Esq., Extra Asst. Commissioner, Goálpárá.

Durgotsava-kṛitya-kaumudi. A treatise on the worship of Durgá in the month of A's vina, giving excerpts from original texts on the propriety and mode of performing it, the advantage thereof, and the ritual. By Sambhúnátha S'iddhántavágis'a.

नमोगणेशाय ।

Beginning प्रणम्य विश्वेश्वरपादपद्मं स्मृत्यादिशास्त्रं वक्रशोविलोक्य ।
सिद्धान्तवागीशकृती प्रयत्नात् तनोति दुर्गोत्सवकृत्यकौमुदीं ॥
अथ दुर्गोत्सवः । तत्र च शरत्कालीयदुर्गापूजनमावश्यकं ।
योमोहादथवालस्याद्देवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ॥
क्रुद्धा भगवती तस्य कामानिष्टान् निहन्ति वै ।
परत्र च महामायाबलिर्भूत्वा स जायते ॥
इति कालिकापुराणेऽनिष्टश्रुतेः देवीपुराणे वीप्साश्रुतेश्च ।
यथा, चरलग्ने चरांशे वा देव्या नियतमानसः ।
प्रतिसंवत्सरं कुर्य्यात् स्थापनञ्च विसर्ज्जनं ॥
चरलग्ने तुलायां मकरादीनां पूर्व्वाह्नेऽसम्भवात् ॥
तथा, द्विशरीरे चरे चैव लग्ने केन्द्रगते रवौ ।
वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्ज्जनं ॥
द्विशरीरे कन्यायां । अन्यस्य तदानीमसम्भवात् । केन्द्रगते लग्नगते । तथा,
पूजयेत्तत्र कन्यास्थे चर्ण्णं पूजां न लङ्घयेत् ।
वर्षं उत्सवं प्राप्य लङ्घन न कुर्य्यादित्यर्थः । अत्र पूजातिक्रमनिषेधश्रुतेः । संवत्सरे व्यतीते

तु पुनरागमनाय च इति मन्त्रलिङ्गाच। काम्यमपि फलश्रुतेः। यथा, कालिकापुराणं पूर्व्वोदित इत्यादि ॥

End. संवत्सरप्रदीपे। अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनं।
शान्तिं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः।

अशुभमिति अशुभवर्णमशुभचेष्टितमशुभदिने। अशुभाधिकरणत्वञ्च एषामन्यतमं दृष्ट्वेत्यर्थः। मिलितदर्शने चाह वर्षकृत्ये।

कुचेष्टितो यः परदृष्टदेशे निरीक्षितः खञ्जनकः कदाचित्।
द्रष्टा विशेषात् परितोषयेत्तद्विघातयेत् सूचितदुष्कृतेषु ॥
मांसं न भुञ्जीत शयीत भूमौ स्त्रियं न सेवेत दिनानि सप्त।
स्नायात् जपेत् स जुहुयाच्च वह्नौ पैष्टं पुमान् खञ्जनमर्चयेच्च ॥

किं घातयेदितिसूचितपापनाशाय प्रायश्चित्तं कुर्य्यादित्यर्थः। नानामतं स्मृतिपुराणविदां विदित्वा ज्ञात्वागमार्थमखिलं गुरुसम्मतञ्च। श्रीकामरूपपृथिवीपतिपण्डितेन वागीश्वरेण रचितो-रुचिरानुबन्धः ॥

Colophon. इति श्रीमहामहोपाध्यायजगद्गुरुसिद्धान्तवागीशभट्टाचार्य्यविरचिता दुर्गोत्सवकौमुदी समाप्ता ॥

No. 2272. प्रायश्चित्तरत्नाकरः। Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq., Extra Asst. Commissioner of Goálpárá.

Práyaśchitta-ratnákara. A digest of the Smṛiti rules for performing expiatory rites for various offences. By Ratnákara Mis'ra. The work is not known in Bengal.

Beginning. नमो गणेशाय। चतुर्वर्गप्रदानाय चतुर्बाहून् बिभर्त्ति यः।
तस्मै विश्वैकनाथाय नमः कृष्णाय वेधसे ॥
हरिं गुरुं नमस्कृत्य विश्वं चेतयते तु यः।
रत्नाकरेण मिश्रेण क्रियते सारसंग्रहः ॥
नानास्मृतीः समालोक्य संहितागमसंहितान्।
प्रयत्नेन समालोक्य संग्रहोऽयं वितन्यते ॥

तत्र प्रथमं क्रमप्राप्तत्वात् गुरुत्वाच्च ब्रह्मबधप्रायश्चित्तं निरूप्यते। तथा च मनुः।
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्तिपातकान्याहुः संसर्गश्चापि तैः सह, इति ॥

तथा, विश्वामित्रासितस्वायम्भुवाः।
ब्राह्मणोन च हन्तव्यः सुरा पेया न च द्विजैः।

ब्राह्मणस्वर्णहरणं न कर्त्तव्यं कथञ्चन ॥
गुरुपत्नीं न गच्छेत्र संग्रहस्यापि तैः सह ।
महापातकसंज्ञा च निर्द्दिष्टैषा मनीषिभिरिति ॥

तथा च प्रयोजकस्यापि बधभागित्वमाह विष्णुः ।

रागाद्द्वेषात् प्रमादाद्वा स्वतः परत एव वा ।
ब्राह्मणं घातयेद्यस्तु स भवेद्ब्रह्मघातकः इति ॥

अनुग्राहकस्यापि बधभागित्वमाह मनुः ।

बहूनामेककार्य्याणां सर्व्वेषां शस्त्रपाणिनां ।
यद्येकोघातकस्तत्र सर्व्वे ते घातकाः स्मृताः ॥

प्रयोजकस्य बधभागित्वमाहापस्तम्बः । प्रयोजयितानुमन्ता कर्त्ता चेति सर्व्वे ते स्वर्गनरकफलभोक्तारोयोभूय आरभते तस्मिन् फले विशेष इति ।

निमित्तिनोऽपि बधभागित्वे षटत्रिंशन्मतं ।
आक्रोशितस्ताड़ितोवा धनैर्व्वा परिपीड़ितः ॥
यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकं ।

End. अथ रजस्वलापात्रस्थजलपानविषयं । पीतशेषजलपाने तु द्विगुणमिति । यत्तु हहद्यमवचनं रजस्वलापात्रस्थजलपाने कृच्छ्रं चरित्वा पूतोभवतीति । तद्द्वितीयदिवसीय रजस्वलाजलपानविषयं । यत्तु ऋष्यशृङ्गवचनं पीत्वा जलञ्च पात्रस्थमात्रेय्यास्त्र्यहमुपवसेदिति । आत्रेयी रजस्वला । एतच्च तृतीयदिवसीयरजस्वलाविषयं । पीतशेषजलपाने तु षडुपवासाः । यत्तु षट्त्रिंशन्मतं उदक्याजलं पीत्वा आनक्तमुपवसेत् ।

पञ्चगव्यन्ततः कृत्वा शुद्धोभवति तत्क्षणात् ।

उदक्या रजस्वला । एतच्च स्नानात् पूर्व्वं चतुर्थदिवसीयरजस्वलापात्रस्थजलपाने अर्थादानक्तमुपवासः । सर्व्वमेतद्ब्राह्मणविषयं । शूद्रादीनान्तु भागहानिर्द्रष्टव्या ॥

कृष्णपादमहाम्भोजगन्धमाघ्राय निर्वृतः ।
मिश्रोरत्नाकरोधीमानकरोत् सारसंग्रहं ॥

Colophon. इति श्रीरत्नाकरमिश्रविरचितसारसंग्रहोयं समाप्तः ।

No. 2273. प्रयोगरत्नमाला । Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq., Extra Asst. Commissioner, Goálpárá.

Prayoga-ratnamálá. An elementary grammar of the Sanskrit language, founded on the system of Pánini, but greatly simplified. By Purushottama Vidyávágís'a Bhaṭṭáchárya. The work was compiled by order of Rájá Malladeva, a rájá of Manipur. It is not current in Bengal.

Beginning. नमो गणेशाय। नन्दसूनोर्वदनारविन्दमुपास्य यत्र नितान्तमेव।
स्फुरच्छ्रुतीनां परमं रहस्यं स्मितश्रियानन्दमयं विभाति॥ १॥
अमृताधिकमाधुरीधुरीणाधरनिर्य्यासगुणोज्झितेन वेणोः।
रणितेन जगन्ति रञ्जयन्तं भगवन्तं घनकान्तिमन्तमीडे॥ २॥
श्रीमल्लदेवस्य गुणैकसिन्धोर्महीमहेन्द्रस्ययथानिदेशं।
यत्नात् प्रयोगोत्तमरत्नमाला वितन्यते श्रीपुरुषोत्तमेन॥ ३॥
महतामपि हृद्विभावनीयैर्महनीयैर्गुणहृद्भिमत्प्रयोगैः।
रचितां पुरुषोत्तमेन बालाः प्रतिभायै परिधत्त मालां॥ ४॥
दर्भादराङ्कुरधियः सुधियः प्रसाद्य विज्ञापये यदहमत्र मनोनिधत्त।
एतेषु मद्वचनकैरवकोरकेषु युष्मत्प्रसादशरदिन्दुरुचः स्फुरन्तु॥ ५॥
अकारादिह्वकारान्ता वर्णमालानुवर्त्तते।
स्वरादिसंज्ञाविधानार्थं। उक्तः चोवर्णमालायां मन्त्रस्योपचिकीर्षया।
कादिसंयोगसङ्केतविषयं कैश्चिदाहृतं॥
अथ संज्ञाविधानानुपयुक्तोऽपि चवर्णः पाणिनीयवर्णक्रमव्यवच्छेदार्थः॥
तस्यामकारादौकारं यावत् वर्णाः स्वरा अचः स्वरसंज्ञका अच्संज्ञकाश्च भवन्ति। संज्ञासंज्ञिनोरभेदाद्वर्णा इति प्रथमा। एवमग्रेऽपि स्वराच्संज्ञाप्रयोजनं नामिनः स्वरेटाद्यचीत्यादौ।

End. इति पौधातुनिर्द्देशे सिद्ध्यति दुहियुज्जि।
जुहोतिः स्तौतिः आप्नोतिः प्रीणातिरिति सिद्ध्यति।
धात्वनुकारत्वादुवादेशे ब्रुविर्रिति अतएव न ब्रुवोवच्। सानुबन्धसामर्थ्यात् श्तितनौ यद्धातुकार्य्यं तत् सिध्यतीति सिद्धं। सन्ध्यभावः पौनरुक्तं विभक्तीनाञ्च लोपनं। व्याख्येय व्याख्ययोरैक्यं सुखबोधकृते कृतमिति।

Colophon. इति द्विजकुलकमलप्रकाशकमहामहोपाध्यायश्रीविद्यावागीशभट्टाचार्य्यापरनामश्रीपुरुषोत्तमशर्म्मनिर्म्मितायां प्रयोगरत्नमालायां कृत्प्रकरणं षष्ठोविन्यासः सम्पूर्णोऽयं ग्रन्थः।

No. 2274. वर्षभास्करः। Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq., Extra Asst. Commissioner, Goálpárá.

Varsha-bháskara. A dissertation on time meet for religious observances, giving in detail definitions of years, days and their divisions

according to both solar and lunar calculations, and the rites appropriate at particular times. The modes of pacifying adverse planets are also given. By S'ambhunátha Mis'ra, S'iddhántavágís'a, of Coch Behar. The work was compiled by order of Dharmadeva Deva, a rájá.

Beginning. श्रीमन्नारायणं देवं तथा श्रीश्यामसुन्दरं।
नत्वापि वाणीविघ्नेशं शिवौ च शशिशेखरौ॥
नवीनवाक्यतिमिराच्छन्नप्राचीनपद्धतिः।
प्रकाशार्थं स्वमतितः सुधियां सुखहेतवे॥
देवश्रीधर्म्मदेवस्य द्विजानामप्यनुज्ञया।
श्रीशम्भुनाथमिश्रेण तन्यते वर्षभास्करः॥

इति मङ्गलाचरणं। इह खलु निखिलमित्यादिकर्म्मणः कालाङ्गत्वप्रतीतेरतः काल एव प्राङ्निरूप्यते। स चेश्वररूपविशेषः। कालस्वरूपं रूपं तद्विष्णोर्मैत्रेय वर्त्तते इति विष्णुपुराणीयात्। कर्म्माङ्गत्वञ्चास्य, ततः प्रभृति जन्तूनां सदसत्कर्म्मसूचकः। होराख्योवर्त्तते कालोह्यहोरात्रेऽत्र लोपतः॥ इति ज्योतिर्वचनात्। गुरुणापि तदङ्गीकृतं। कालोहि कर्म्म चेष्यते न कर्म्मणि काल इति। ननु कर्म्मणि कालस्याकाङ्क्षत्वमेव नास्ति अतस्तेनैवोक्तं न कालोगुण इति। सत्यमस्य महाकालपरत्वात्। अन्यथा, तिथिनक्षत्रवारादि साधनं पुण्यपापयोः। प्रधानगुणभावेन स्वातन्त्र्येण न ते क्षमाः॥

इत्यादीनि सोपाधिकरणकालस्य कर्म्माङ्गत्वप्रतिपादकानि नानावचनानि विरुध्येरन् इत्यादि।

End. सर्व्वेषां शिल्पभाण्डानां विश्वकर्म्मा च दैवतं।
द्रुमाणां कलिकानाञ्च शाकादीनाञ्च सर्व्वशः॥
फलानामपि सर्व्वेषां तथा ज्ञेयोवनस्पतिः।
मत्स्ये मांसे विनिर्द्दिष्टे प्राजापत्ये तथैव च॥
छत्रं कृष्णाजिनं शय्या रथमासनमेव च।
उपानहौ तथा यानं यच्चान्यत् प्राणवर्ज्जितं॥
उत्तानाङ्गिरसे तद्वत् शय्यादारुमये शृणु।
उत्तानाङ्गिरसे तत्र वस्त्रा चान्यत्र हे द्विजाः॥
महाच्छत्रे भवेत् सूर्य्यः पेयानामथ वारुणं।
रसोपकरणं सर्व्वं कथितं शक्रदैवतं॥
गृहस्य लक्ष्मीर्व्विज्ञेया खड्गस्य चापि कालिका।
छूरिकाया भवेद्दुर्गा कट्टारस्यापि चण्डिका॥

आदर्शस्य भवेच्चन्द्रः घण्टायाश्चापि वासवः ।
कम्बलस्य भवेत् सूर्य्यः सर्व्वं वा विष्णुदैवतमिति ॥
अत्र स्मृतिपुराणयोः सप्रमाणत्वेऽपि शिष्टाचारवशात् व्यवहर्त्तव्यः ।

Colophon. इति समाप्तः ।

No. 2275. देवीपूजनभास्करः । Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq., Extra Asst. Commissioner, Goálpárá.

Devípújana-bháskara. A treatise on the worship of Durga, similar to No. 2271, and by the same author, but apparently more elaborate. The codex, however, breaks off in the middle.

नमो गणेशाय ।

Beginning. नत्वा दुर्गां जगद्धात्रीं तारिणीं दुःखहारिणीं ।
श्रीसिद्धान्तसरस्वत्येतद्देवीपूजनभास्करं ॥
दुर्गापूजाया नित्यतामाह कालिकापुराणं ।
योमोहादथवालस्याद्देवीं दुर्गां महोत्सवे ॥
न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ।
क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै ॥
परत्र च महामायाबलिर्भूत्वा प्रजायते ।
देवीपुराणं ।
द्विशरीरे चरे चैव लग्ने केन्द्रगते रवौ ।
वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्ज्जनं ॥
अत्र द्विशरीरचरपदेन कन्यातुलयोरेव ग्रहणं पूर्व्वाह्णेऽन्येषामतदानीमसत्त्वादिति ।
एवञ्च, पूर्व्वोदितविधानेन पूजामस्यान्दिवौकसः ।
कृत्वैव परमामापुर्निर्वृतिं दुःखहानये ॥
एवं, अन्यैरपि सदा कार्य्यं दुर्गादेव्याः प्रपूजनं ।
विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकं ॥
तथा, भवानीतुष्टये पार्थ संवत्सरसुखाय च ।
भूतप्रेतपिशाचानां नाशाय चोत्सवाय च ॥
इति कालिकाभविष्यपुराणयोः करणे फलश्रुतेश्चास्याः काम्यत्वञ्च ।

चण्डिकामुपहारैश्च पूजयेदिष्टवृद्धये ।

तथा ज्योतिषे, कृत्तत्रये च मूलादौ सप्तम्यादिदिनत्रये॥

इत्यत्रापि तथाप्रतीतेरस्या नित्यत्वं काम्यत्वञ्च । अत्र सर्व्ववर्णाधिकार इत्याह भविष्य-पुराणं ।

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः ।
एवं नानाम्लेच्छगणैः पूज्यते सर्व्वदस्युभिः ॥
अङ्गवङ्गकलिङ्गैश्च किरातैर्व्वर्व्वरैः शकैरिति ।

End. स्मृतिसागरे च मत्स्यसूक्तं ।
ज्येष्ठा वाप्यथवा षष्ठी सायङ्काले न चेद्भवेत् ।
सायमेव तथापि स्याद्विल्वशाखाभिमन्त्रणं ॥
पूर्व्वां षष्ठीं सनक्षत्रां सायम्प्राप्तामपि त्यजेत् ।
यदा तु पत्रिकापूजा न परेद्युर्भविष्यति॥
सन्निकृष्टं तु यत्पूर्व्वं पत्रिकादिवसस्य तु ।
तद्दिने वरणं कृत्वा परे शाखां प्रवेशयेत् ॥

तथा पूर्व्वलिखितयज्ञीया देवता इत्यादि । अत्र सायं पदं सायंसन्ध्यापरं सायंसन्ध्याख्यिति भविष्ये विशिष्याभिधानात् । सायंसन्ध्या च, अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत् तेजःपरिहानिरुषा भानोरर्द्धोदयं यावदितिमिहिरोक्तेः । एतेन यदा तु पूर्व्वदिने सायंषष्ठीलाभः परदिने सायं विनैव तदा पूर्व्वदिने बोधनं परदिने सायं विल्वाभिमन्त्रणमिति स्मार्त्तेन यदुक्तं तन्निरस्तं षष्ठ्या गुणत्वात् अन्यथा तिथिह्रासवशादुभयदिने सायं षष्ठ्यालाभे बोधनबाधापत्तेः । अतएव स्मृतिः, सायं षष्ठ्यान्तु कर्त्तव्यं पार्व्वत्या अधिवासनं । षष्ठ्यभावेऽपि कर्त्तव्यं सप्तम्यामपि मानवेति । तथा, पत्रीप्रवेशात् पूर्व्वेद्युरिति पूर्व्वलिखितभविष्यपुराणीयाच्च । विल्ववासिनीत्यत्र विन्ध्यवासिनीति ब्रह्माण्डनन्दिकेश्वरयोः पाठः आमन्त्रयेद्बोधयेदिति यज्ञीयदेवताया यज्ञदिनाव्यवहितपूर्व्वदिनसायमावाहनस्य सर्व्वयज्ञे दृष्टत्वात् अतोहयशीर्षपञ्चरात्रीये नान्यत्रेतिनिमित्तकादित्यक्तं । निमित्तान्तरसत्त्वेऽपि अन्यत्रावाहनं न कुर्य्यादित्यर्थः । अत एव स्फ्याश्लिष्टहोमोदेवावाहनं विनापि विहित इति । विल्वफलद्वयमुपक्रम्य गवाक्षे । वायव्यस्थं राक्षसस्थं न गृह्णीयात् कदाचन । अथ तद्दिने कुण्डनिर्म्माणं ।

No. 2276. स्मृतिरत्नाकरः । Place of deposit, Goálpárá. MS. seen by H. C. Clarke, Esq. Extra Asst. Commissioner, Goálpárá.

Smṛiti-ratnákara. A digest of the rules regarding expiations. By Vedácharya. The name given is a literary title, and not a personal name. The author follows the digest of Bhavadeva.

ॐ नमो गणेशाय ।

Beginning. त्रिकालोद्भवपापानां स्मरणाद्यस्य नोदयः ।
नमस्तस्मै जगद्धात्रे नमोहरिहरात्मने ॥
निष्कृतौ बहुपापानां स्मृतीनां भेददर्शनात् ।
व्रतस्य निर्णयं कर्त्तुं साध्वसं जायते मम ॥
मन्वादिस्मृतिशास्त्रार्थं भवदेवादिसम्मतं ।
प्रायश्चित्तमहं वक्ष्ये विज्ञाय पापनिष्कृतौ ॥

इदानीं गुरुत्वात् पञ्चमहापातकप्रायश्चित्तनिरूपणपुरःसरमेव प्रायश्चित्तं निरूपयितुं युज्यते । गुरवे प्रणामं कृत्वा । तत्र मनुः, ब्रह्महत्या सुरापाणं स्तेयं गुर्व्वङ्गनागमः महान्ति पातकान्याहुः संसर्गश्चापि तैः सह । तथा च विश्वामित्रासितस्वायम्भुवाः ।

ब्राह्मणेन च हन्तव्यः सुरा पेया न च द्विजैः ।
ब्राह्मणस्वर्णहरणं न कर्त्तव्यं कथञ्चन ॥
गुरुतल्पं न गच्छेच्च संसर्गन्तैश्च वर्ज्जयेत् ।
महापातकसंज्ञा च निर्द्दिष्टैषा मनीषिभिः ॥

अत्र निषेधविषयस्य हननस्यानिरूपणे हनननिमित्तप्रायश्चित्तस्यानिरूपणात् प्रथमं हननमेव निरूप्यते । किमिदं हननं नामेति । तत्र प्राणवियोगफलकव्यापारोहननमिति लोकप्रसिद्धमेव । स च प्राणवियोगफलकव्यापारोयथा साक्षात्कर्त्तुः परम्पराकर्त्तुरपि तेषामपि हन्तृत्वात् तेन साक्षाद्धन्तृवत् प्रयोजकानुग्राहकानुमन्तृनिमित्तिनामपि हन्तृत्वात् पञ्चानामेव निषेधविषयत्वं ।

End. हरिवंशे श्लोकशते सुवर्णार्द्धं प्रचक्षते ।
आगमानां सहस्रेण स्वर्णमेकं प्रकीर्त्तितं ॥
धर्म्मशास्त्रसहस्रेण रजतत्रयमीरितं ।
कपिलायाः सुवर्णार्द्धं धेनुमात्रे पुराणकं ॥
प्रायश्चित्तविधौ यत्र पणाधिकपुराणकं ।
पुराणत्रितयं चान्ये वीर्य्यहीने द्वयं भवेत् ॥
कृष्णे वृषे षट्पुराणं श्वेते नवपुराणकं ।
द्वात्रिंशच्च पुराणं स्यात् वृषे नीले तथैव च ॥
नमेरोः प्रतिवक्त्रे च द्वादश स्वर्णरत्तिकाः ।

मूले श्रीफलमात्रे तु पुराणं त्रितयं भवेत् ॥
एकोऽपि तूर्य्यकं विद्यात् कलौ पण्यव्यवस्थया ।
धात्रीफलस्य प्रत्येके भवेद्व्रजकमासकं ॥
एतान्याहुः प्रशस्तानि मुनयो ये पुराविदः ।
यज्ञं कृत्वा यजमानः कुर्य्यान्नामिषभोजनं ॥
वास्तुयागादिकविधौ विशेषस्यापि दृश्यते ।
ज्ञातिभिः सह भुञ्जीत दधिक्षीरामिषं विना ॥
न क्षारस्य कषायस्य पूतिगन्धादिकस्य यत् ।
न शाकं न च काण्डस्य न पुष्पस्य कदाचन ॥
शाम्बपुराणे ।
कूपार्घे च तड़ागे वा वाप्यादेर्नलिन्यान्तथा ।
दीक्षायां सूर्य्ययागे च गर्भाधाने तथैव च ॥
निरामिषेण भोक्तव्यं गव्यवर्ज्यं जलाशयं ।
मूलस्य सोमधान्यान्नं शृङ्गवेरस्य शर्करां ॥
सैन्धवं मातुलाङ्गस्य भोजने शस्तकं विदुः ।

Colophon. इति श्रीवेदाचार्य्यकृतौ स्मृतिरत्नाकराख्ये अष्टादशपरिच्छेदः सम्पूर्णः ।

No. 2277. लक्षणसारसमुच्चयः । Substance, country-made paper, 11 × 6 inches. Folia, 158. Lines, 12—13 on a page. Extent, 3,924 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Incorrect.

Lakshaṇa-sára-samuchchaya. A treatise on the worship of the liñgam of S'iva, compiled from various Tantras. Anonymous. CONTENTS: Liñgam praised, its varieties, different advantages desirable from the worship of those varieties. Rules for preparing liñgams of wood, metal &c. The peculiarities thereof. Good and bad characteristics of liñgams. Preparatory duties for establishing a liñgam. Omens, good and bad times. Means of obviating evil omens. Seven rules. Characteristics of a teacher of the S'aiva cult. Trial of teachers. Their education. Trial of woods for making liñgams. Mode of felling trees for making liñgams. Manifest liñgams. Unmanifest liñgams. Images of the nine S'aktis. Do. of the eleven Rudras. Do. of other gods and goddessess. Do. appropriate for the S'ivite cult. Do. of planets, stars, lunations, &c. Do. of Bhútas,

Pretas, Joginís, &c. Characteristics of manifest and unmanifest images. Rules for making seats for images. The symbols of Hara, Hari &c. The vehicles, arms and complements of do. Auspicious times. Appropriate months for the consecration of images. Rules for making Maṇḍapas for do. Implements of worship. Rules for collecting earth for fire altars. Do. for the bathing of liñgams. Do. for setting up columns, gateways &c. Do. for Vánaliñgas. Do. for setting up flags. Rules for repairs of old liñgams. Do. for consecration of houses. Sacrifices when commencing to build. Removal of dead bodies from the ground intended to be built upon. Worship of houses. Rules for building palaces. General rules for houses, gateways, &c. Rules for making tanks, wells, orchards, gardens &c. Do. for putting on the Brahmanical thread.

Beginning. तत्त्वत्रयत्रिदहनत्रिगुणत्रिलिङ्ग-
कालत्रयत्रिभुवनत्रि + रिशरीरं ।
नेत्रत्रयत्रिपथगात्रिपवित्रगोत्र-
+ + त्रिशूलभृतमीशमहं प्रणम्य ॥
आगमेभ्यः समाकृष्य कुर्य्यां लक्षणसङ्ग्रहं ।
ऋजुसंक्षेपसम्पूर्णं सर्व्वथा + + नाकुलं ॥
असन्दिग्धं स्फुटार्थञ्च धर्म्मकामार्थमोक्षदं ।
हिताय मन्दबुद्धीनां स्मरणाय मनीषिणां ॥
किञ्चित् क्वचित् स्फुटञ्चाङ्गं नैकस्मिन् सर्व्वमङ्गकं ।
बहुतन्त्राण्यथो वीक्ष्य क्रमेणैकत्र लिख्यते ॥
सिद्धिलिङ्गाश्रितेत्येवं शिवप्रोक्तं शिवागमे। इत्यादि ।

End. यावत्क्ष्मीमाननन्तोधरति वसुमतीमूर्द्ध + प्रादियुक्तां
यावत् सप्तार्णवीयार्ण + ष्टतपृथिवीमध्यगोमेरुरस्ति ।
यावच्चन्द्रार्कतारागणमणिभिरिद + + + + + + +
तावद्वै रोचणीया जगति चिरमियं पुस्तरूपास्तु कीर्त्तिः ॥

Colophon. इति लक्षणसारसमुच्चये द्वात्रिंशत्तमोविधिः समाप्तः । शुभम् ।

विषयः। शिवलिङ्गमाहात्म्यकीर्त्तनं । व्यक्ताव्यक्तमिश्रभेदात् तस्य त्रिविधत्वनिरूपणं । तत्र फलभेदकथनञ्च । मृत्का8धातुरत्नमयादिलिङ्गनिर्म्माणविधिकथन । तत्र प्रत्येकं माहात्म्यकीर्त्तनञ्च । शुभाशुभलिङ्गलक्षणकथनं । विविधफलमयलिङ्गनिरूपणं । मङ्गलाचरणनिरूपणं । शुभाशुभशकुनकथनं । शुभाशुभनिमित्तनिरूपणं । अशुभनाशनोपायकथनं ।

सद्गुरुलक्षणादिकथनं। शैवाचार्य्यलक्षणादिकथनं। आचार्य्यपरीक्षाविधिः। तत्र अध्ययनादिविधिकथनञ्च। शिलाराजादिनामभेदेन वृक्षाणां परीक्षाविधिकथनं। वृक्षच्छेदनादिविधिकथनञ्च। अव्यक्तलिङ्गप्रमाणलक्षणादिकथनं। व्यक्तलिङ्गप्रमाणलक्षणादिनिरूपणं। तत्र नवशक्तीनां प्रतिमालक्षणं। एकादशरुद्राणां प्रतिमालक्षणं। एवं प्रसिद्धानां सर्व्वेषां देवानां देवीनाञ्च लक्षणकथनं। एवं शिक्षाकल्पव्याकरणादीनां प्रतिमालक्षणं। ग्रहलक्षत्रतिथ्यादीनां प्रतिमालक्षणकथनञ्च। तथा, भूतप्रेतकिन्नरप्रभृतीनां योगिन्यादीनाञ्च प्रतिमालक्षणकथनं। व्यक्ताव्यक्तप्रतिमालक्षणकथनं। प्रतिमास्थापनयोग्यपीठनिर्म्माणविधिकथनं। अथ हरिहरादीनां सर्व्वेषां देवानां चक्रत्रिशूलाद्यष्टलक्षणकथनं। तथा प्रत्येकं वाहनायुधादिकथनञ्च। क्षणमुहूर्त्तादिमानकथनं ऋत्वादिनिरूपणं। तत्र तत्र प्रतिष्ठायां मासादिनिरूपणञ्च। मण्डपनिर्म्माणविधिकथनं। कुण्डस्रुक्स्रुवादिविधिकथनं। प्रतिष्ठायै उद्धारादिविधिकथनं। त्रिविधलिङ्गस्नानविधिकथनं। अधिवासनविधिकथनं। लिङ्गारोपणविधिकथनं। ईश्वरस्थापनविधिकथनं। तोरणस्तम्भग्रहपूजाजरायुजादिस्थापनविधिकथनं। वाणलिङ्गादिस्थापनविधिकथनं। ध्वजादिनिवेशनविधिकथनं। पुरातनलिङ्गाद्युद्धारविधिकथनं। गृहादिलक्षणस्थापनादिविधिकथणं। तत्र स्थानयागलक्षणनिर्णयविधिनिरूपणञ्च। शल्योद्धारविधिकथनं। वास्तुपूजापदसंस्थापनविधिकथनं। प्रासादनिर्म्माणविधिकथनं। साधारणप्रासादविधिकथनं। द्वारस्थापनविधिकथनं। पुष्करिणी-कूप-वृक्षोद्यानारामस्थापनविधिकथनं। पवित्रारोहणविधिकथनञ्च। इति शम्।

No. 2278. राजनीतिमयूखः। Substance, country-made paper, 12 × 6 inches. Folia, 40. Lines, 15 on a page. Extent, 2,250 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakis'ora Siñha, Bahádur. Appearance, fresh. Prose and verse. Correct.

Rájaníti-mayúka. On kings and their duties. By Nílakaṇṭha Bhaṭṭa, son of Ramánátha Dámodara Nṛisiñha, and grandson of Bhaṭṭa S'añkara. CONTENTS: The word *rája* applicable to all Kshatriyas. Coronation, its varieties and rituals. The seven accessories of kings (ministers &c.). The attributes of kings. Duty of keeping subjects in happiness. Merits and demerits of ministers. Royal benefactions. Royal table. Aquatic excursions. Hunting. Daily duties. Rules regarding negotiations, war &c. Princes, their duties. Good, bad and indifferent ministers &c. Priests, courtiers &c. Royal treasury. Kingdom defined. Metropolis. Fortresses. Rewards and Honors. Army. Elephants, horses. Disputes of kings. Embassies. Omens. Encampments. Inimical conduct or *casus belli*. Warfare. Sin of running away from the battlefield. Encouragement of heroes. Chess play.

Beginning. देवर्षिरक्षःसंघानामवाङ्मनसगोचरं ।
प्रत्यक्षमपि तद्धाम सर्व्वदा समुपास्महे ॥
विरोधिमार्गद्वयदर्शनार्थे द्वेधा बभूवात्र परः पुमान् यः ।
श्रीशङ्करोभट्ट इहैकरूपोमीमांसकाद्वै तमुरीचकार ॥
पितृसौहित्यसंसिद्धिर्हेतुमुक्ताथ तत्सुतः ।
नीलकण्ठः प्रकुरुते राजनीतिं नृपादृतां ॥

तत्र राजशब्दः क्षत्रियमात्रे शक्तोन राज्ये योगिनि अभिषेकोत्तरभाविराज्ययोगात् प्रागपि राजानमभिषिञ्चेदिति——इत्यादि ।

अथ मामकः प्रकारः ।

End. आद्यं वस्वेकमष्टद्विशिखिविधुपदं वह्निजं नन्दिसंज्ञं
नन्देकं पञ्च युग्मं शरहरनयनं खाग्निगं त्रित्रियुक्तं ।
अश्वद्विव्योम चेन्द्रं युगमितमुडुराड्चिषट्त्रित्रिपञ्चो-
पान्ते+++भूमिज्वलनमुदधिकुद्वैरदं त्रिद्विषष्ठं ॥
षट्चन्द्रं नेत्रयुग्मं मुनिजमुदधिद+दवक्राग्निगाधि-
+मले+षुवे+पुनरनयदितोवाजिनं नीलकण्ठः ॥

Colophon. इति श्रीजगद्गुरुनारायणभट्टसूनुपण्डितशिरोरत्नमीमांसाद्वैतसाम्राज्य-धुरन्धरभट्टशङ्करात्मजरघुनाथदामोदरन्टसिंहानुजभट्टनीलकण्ठेन कृते भास्करे राजनीति-मयूखः ॥

विषयः । राजशब्दस्य क्षत्रियमात्रे शक्तिरितिनिरूपणं । राज्याभिषेकविधिकथनं । तत्प्रकारकथनं । प्रयोगकथनञ्च । अथ स्वाम्यमात्यादिसप्ताङ्गप्रयोगविधिकथनं । राजगुणकथनं । प्रजारञ्जनविधिकथनं । अमात्यादिलक्षणं । निषिद्धानि । दानविधिकथनं । आहारादिविधि । जलमृगयाविधिकथनं । सामान्यतोमृगयाविधिकथनं । नृपतेराह्निककृत्यनिरूपणं । प्रत्येकं सन्धिविग्रहादीनां प्रयोगविधिकीर्त्तनं । राजपुत्रनिरूपणं । तत्कृत्यनिरूपणञ्च । उत्तममध्यमाधमभेदेन त्रिविधामात्यलक्षणादिकथनं । पुरोहितसुहृदादिलक्षणादिकथनं । कोषादिनिरूपणं । राष्ट्रनिरूपणं । राजधानीनिरूपणं । दुर्गनिर्म्माणादिविधिकथनं । पुरुषकार एव राज्ञा कर्त्तव्य इतिनिरूपणं । बलनिरूपणं । गजलक्षणादिनिरूपणं । गजबन्धनयोगद्वत्तनिरूपणं । अश्वलक्षणादिनिरूपणं । अभियोग्यनृपनिरूपणं । दूतप्रेरणविधिकथनं । तद्गणादिनिरूपणं । शकुनशास्त्रकथनं । स्कन्धावारशिविरादिविधिकथनं । आततायिलक्षणादिनिरूपणं । धर्म्मयुद्धविधिकथनं । रणात् पलायने दोषकथनं । वीरोत्साहविधिकथनं । चतुरङ्गक्रीड़ा विधिकथनञ्च । इति शम् ।

No. 2279. जलाशयारामोत्सर्गविधिः । Substance, country-made paper 9 × 4 inches. Folia, 103. Lines, 10 on a page. Extent, 2,178 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, fresh. Prose and verse. Correct.

Jalásayárámotsarga-vidhi. Rules and rituals for the consecration of tanks, wells, orchards, &c., for public use. By Náráyaṇa Bhaṭṭa, son of Rámeśvara Bhaṭṭa Súri.

Beginning. सरस्वतीं नमस्यामः प्रत्यूहव्यूहहानये ।
यदेकतानचित्तानां चित्ते संवित्तिरुत्तमा ॥
विघ्नाधिप नमस्तुभ्यं विघ्नं सर्व्वं विघातय ।
प्रचयं रचया+त्वं बुद्धिं शुद्धिं विधेहि च ॥
उन्निद्रशतपत्रसगोत्रनेत्रं
सुग्रीवमित्रमतिचित्रचरित्रपात्रं ।
उन्मीलनीलमणिवर्णसवर्णगात्रं
रामं भजे कुलपतिं कमलाकलत्रं ॥
विश्वामित्रकुलोदधौ विधुरिवाखण्डः कुलानां निधि-
र्वाग्गुम्फे निखिलेऽपि यस्य वसुधा शिष्यप्रशिष्यैस्थिता ।
विद्यापद्मविकाशनैकतरणिः श्रीभट्टगोविन्दजः
संख्यावद्गणनाग्रणीर्विजयते श्रीभट्टरामेश्वरः ॥
शास्त्रेष्वधीती पितुरेव यः श्रुतीः
स्मृतीः समालोच्य च देशरीतीः ।
नारायणस्तत्तनयोऽविमुक्ते
जलाशयोत्सर्गविधिं विधत्ते ॥
यद्यपीह बुधोन्नीता ग्रन्थाः सन्ति परःशताः ।
तथापीह विशेषोयः पण्डितैः स विविच्यतां
तत्रादौ+++त्राधिका श्रुते तु विप्रौ
तत् कार्य्यं । इत्यादि ।

End. ग्रन्थेऽस्मिन् गुणगणवत्त्वमुच्यते चेत्
स्वं ग्रन्थं गुणगणवन्तमाह कोन ।
तत् सन्तः शिरसि कृताञ्जलिस्तु याचे
शोध्यं तत्सदसदिहोदितं मया यत् ॥

Colophon इति श्रीरामेश्वरभट्टसूरिसूनुनारायणभट्टकृतौ जलाशयारामोत्सर्गविधिः समाप्तः।

विषयः। जलाशयादिकरणप्रशंसाकीर्त्तनं। जलाशययोग्यदेशनिरूपणं। कूपादिपरिमानकथनं। जलाशयारम्भकालकथनं। उत्सर्गकालकथनञ्च। कृतजलाशयस्य उत्सर्गकरणावश्यकता। उदपानशुद्धिनिरूपणं। तड़ागादिविक्रयप्रायश्चित्तं। वाप्यादिभेदनप्रायश्चित्तं। धर्म्मार्थनिखातकूपादौ गवादिपाते दोषाभावनिरूपणं। जलाशयादिप्रतिष्ठाविधिकथनं। मण्डपकुण्डादिरचनाप्रकारकीर्त्तनं। जलाशयोत्सर्गप्रयोगकथनं। नागयष्ट्यारोपणविधिः। जलाशयोत्सर्गस्य चतुर्थीकर्म्मकथनं। पञ्चगव्यस्नानविधिकथनं। वापीकूपोत्सर्गे विशेषकथनं। आरामोत्सर्गपद्धतिकथनं। इति शम्।

No. 2280. वैधहिंसाघतिमिरमार्त्तण्डोदयः। Substance, country-made paper, 16 × 5 inches. Folia, 23. Lines, 8 on a page. Extent, 503 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Prose and verse. Incorrect.

Vaidhahiñságha-timira-mártaṇḍodaya. A treatise on the propriety and sinlessness of the sacrifices enjoined in the S'ástras. By Ambikáprasád Miśra, son of Gayádatta, and grandson of Vahoraṇa Miśra. The work was compiled under the auspices of Mahárájá Rájendrakiśora Siñha, Bahádur, of Bettiyá, in the Samvat year 1911, *i. e.*, 28 years ago.

Beginning. जगद्भिन्नाभिन्नोजननभरणध्वंसकरणै-
स्त्रिधाप्येकोयस्मिन्नपरिमितदिव्योगुणगणः।
प्रकृत्या यस्तावत् प्रदिशतु चतुर्व्यूहनिलयः
परब्रह्माख्य + + सगुणपरमानन्दपुरुषः॥
चम्पारण्याधिराजः श्रुतिविहितकृती राजराजाधिराजो-
यद्राजद्राजधानी विलसति विदिता वेतियाख्यातिभव्या।
श्रीराजेन्द्रः किशोरोन्तपमुकुटमणिः सर्व्वशास्त्राधिकारी
तस्याज्ञामाधिगत्य श्रुतिवचनपरं तत्त्वमुद्घाटयामि॥
— — — — — — — — — — — —।
न हिंस्यादितिवाक्यस्य वाक्यार्थपरिशीलनात्।
पापदृष्टि + मञ्जूषा प्रबोधाय विचार्य्यते॥

मा हिंस्यात् सर्व्वा भूतानीति श्रूयते। तत्र संशयः। इत्यादि।

End. तस्मात्, यागीयहिंसायाः पापाभावस्य निर्णयात्।
वैधहिंसाघतिमिरमार्त्तण्डोदयनामकः।
प्रबन्धोरचितः स + चन्द्रभू + + भूमिते।
माघवलक्षसप्तम्यां वेदतात्पर्य्यनिर्णयः॥

Colophon. इति श्रीमन्महाराजाधिराजश्रीराजेन्द्रकिशोरसिंहाज्ञया श्रीमन्मिश्रवहोरणात्मजमिश्रगयादत्तसूनुमिश्राम्बिकाप्रसादकृतो वैधहिंसाघतिमिरमार्त्तण्डोदयः समाप्तः।

विषयः। हिंसादिलक्षणनिरूपणपूर्व्वकं श्रुतिस्मृत्यादिवाक्यसंवादेन वैधहिंसायाः प्रत्यवायाजनकत्वनिर्णयः।

No. 2281. कालनिर्णयदीपिका। Substance, country-made paper, 13 × 4 inches. Folia, 40. Lines, 6 on a page. Extent, 510 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, old. Verse. Correct.

Kálanirṇaya-dípiká. A digest of the rules regarding proper times for the performance of religious rites. Both solar and lunar times are treated of, and rules for the calculation of eclipses are also given. By Rámachandra A'chárya, son of Kṛishṇa A'chárya.

Beginning. कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरुं।
धर्म्मज्ञानार्थमातन्मः कालनिर्णयदीपिकां॥
यद्यप्यर्थवशात् प्राप्तं स्पष्टतायै क्वचित् क्वचित्।
प्रपद्यते स्वशब्देन मूलग्रन्थानुसारतः॥
प्रथमः सावनोमासोद्वितीयश्चान्द्र उच्यते। इत्यादि।

End. मुख्यकाले हि सम्प्राप्ते गौणमप्यस्तु साधनं।
मुख्येऽपि साधने तस्य समयस्य न गौणता॥
दुर्बोधग्रन्थसिद्धान्तध्वान्तसंघातभञ्जिका।
सुस्पष्टाकारि रामार्य्यैः कालनिर्णयदीपिका॥
समाप्तोऽयं ग्रन्थः।

विषयः। मास तिथि-नक्षत्र-संक्रान्ति-ग्रहणादिकालनिरूपणपूर्व्वकं तत्र प्रत्येकं कर्त्तव्यकर्म्मणां पद्येन व्यवस्थाकथनम्।

No. 2282. कालनिर्णयदीपिकाविवरणम्। Substance, country-made paper, 13 × 4 inches. Folia, 144. Lines, 10 on a page. Extent, 4,036 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, old. Prose and verse. Generally correct.

Kála-nirṇaya-dípiká-vivaraṇa. A commentary on the work described under the next preceding (No. 2281). Anonymous.

Beginning. श्रीविट्ठलं श्रुतिगिरः प्रथितप्रभावं
भावार्द्रमानससरोवरराजहंसं।
श्रीरामचन्द्रगुरुमेकमनेकशास्त्र-
पारीणकोविदधुरीणमहं नमामि॥
येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी
वेदान्तानुमता च वैष्णवमहासिद्धान्तसन्दीपिका।
कालज्ञानविधौ व्यधायि विबुधानन्दिप्रबन्धत्रयं
कृष्णाचार्य्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः॥
श्रीरामचन्द्रकृतिना निधिना कलाना-
मानीतमेतदधुना वसुधासुधायाः।
श्रीकालनिर्णयकृदुक्तिसुधाब्धिसार-
मापीयमाकर्णपुटकैः कलयन्तु कालं॥
तत्सूनुना समयनिर्णयदीपिकायां
गाम्भीर्य्यगर्भपदपद्यगुणान्वितायां।
निर्णीयते विवरणं कणशः प्रवीणै-
राचूड़मूलमवलोक्य विवेचनीयं॥
न्यायामृतास्वादनलम्पटा ये ते तर्कसूक्तैरसयन्तु सूक्तिं।
तन्न्यायनिर्नीतमिहास्ति सम्यक् शिष्टैरनुष्ठेयमिति प्रतीमः॥

तत्र तावत् कालनिर्णयदीपिकां चिकीर्षवः— — — — — — — — — — प्रतिज्ञानीते,-कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरुं। इत्यादि।

End. इति विवरणमेतद्दीपिकाया मया यत्
कृतमनुगतवाक्यं न्यायविन्यासगर्भं।
स्वमतिसदृशमेतद्दर्शितानेकभावं
सुजनजनमनस्तद्वीक्ष्य तुष्टिं प्रयातु॥

विषयः। रामचन्द्राचार्य्यकृतकालनिर्णयदीपिकायाः व्याख्यानं।

No. 2283. कालमार्त्तण्डः। Substance, country-made paper, 8 × 3 inches. Folia, 29. Lines, 10 on a page. Extent, 420 ślokas. Character, Nágara. Date, Sm. 1862. Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, fresh. Prose and verse. Correct.

Kálamártaṇḍa. A treatise on lunar times meet for the performance of religious rites. By Krishṇamitra A'chárya, son of Rámasevaka, and grandson of Devídatta Bhaṭṭa.

Beginning. शोकोद्रेकाकरः कालोलोकानामवधीरितः।
खेदं छिनत्ति यद्बोधोयदात्मामं श्रये हरिं॥

अथादौ प्रतिपन्निर्णयः। सा च यदि सूर्य्योदयमारभ्य पुनरुदयपर्य्यन्तं भवति तदा सा पूर्णा। इत्यादि।

End. अध्यतोऽजघटसंक्रमणे तान् शेषराशिषु परास्त्वतिपुण्याः॥

Colophon. इति श्रीमद्देवीदत्तात्मजरामसेवकतनूद्भवाचार्य्यकृष्णमित्रकृतौ कालमार्त्तण्डाभिधेयोनिबन्धः समाप्तः। संवत् १८६२।

विषयः। प्रतिपदादितिथिद्वैधविवेचनम्। कालनिरूपणं। नवरात्रकालादिनिरूपणं। प्रतिपदादितिथिकृत्यकथनं। विशेषेण जन्माष्टमीमहाष्टम्यादितिथिकृत्यविवेचनं। संक्रान्तिग्रहणादिकृत्यनिरूपणञ्च।

No. 2284. सुदर्शनसंहिता, (उत्तरखण्डम्।) Substance, country-made paper, 12 × 4 inches. Folia, 142. Lines, 8 on a page. Extent, 2,689 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Incorrect.

Sudars'ana-sañhitá. A Tantra treating of mantras, charms, amulets, mystic diagrams, and rituals for malevolent and other rites. The codex under examination contains only the second part of the work.

देव्युवाच।

Beginning. पञ्चराज्यं तथा यन्त्रं कथं प्राप्तं सुरेश्वर।
मन्त्रभेदा न्यासभेदा होमभेदाः कथं पुनः॥
दत्तात्रेयमुनेर्मन्त्रः कथं प्रोक्तस्त्रिलोचन।
पुरश्चर्य्या कथं तस्य कथं वा मन्त्रसाधनं॥

दीपदानप्रकारस्य सरहस्यः कथं पुनः ।
चक्रन्यासस्य कवचन्यासोवा तस्य कीदृशः ॥ इत्यादि ।

End. इति परमरहस्यमुत्तमार्थं
वसुधामङ्गलमण्डनस्य विष्णोः ।
निजमनसि निरुध्य रक्षणीयं
निजवरगात्रवदिन्दुसुन्दरास्ये ॥

Colophon. इति श्रीसुदर्शनसंहितायामुत्तरखण्डे सहस्रार्ज्जुनकल्पे द्वादशः पटलः समाप्तः । शुभम् ।

विषयः । १,२, पटले शिवाशिवयोः संवादेन राज्यप्राप्ति-विजय-वशीकरणादिषु मन्त्रोद्धारादिनिरूपणं । ३ ये पटले, दत्तात्रेयमन्त्रादिनिरूपणं । हनूमन्मन्त्रादिनिरूपणं । सुदर्शनमन्त्रादिनिरूपणञ्च । ४ र्थे पटले, पूजाविधिकथनं । मन्त्रसन्ध्यादिकथनं । विशेषेण अन्तर्यागविधिकीर्त्तनञ्च । ५ मे पटले,-विशेषतोवहिर्यागविधिप्रपञ्चनं । ६ ष्ठे पटले,-वर्णचक्रादिन्यासादिनिरूपणं । ७ मे पटले,-कवचन्यासनिरूपणं । ८ मे पटले,-नानाविधमन्त्रभेदनिरूपणं । मन्त्रसिद्धिलक्षणतदुपायादिकथनञ्च । ९ मे पटले,-जप-होम-तर्पण-मार्ज्जन-ब्राह्मणभोजनात्मकपञ्चाङ्गपुरश्चरणप्रपञ्चप्रपञ्चनं । १० मे पटले,-परचक्रनिवारणोपायकथनं । ११ शे पटले,-विजयपताकायन्त्रनिरूपणपूर्व्वकं कवचपरिमाणादिनिरूपणं । १२ शे पटले,-दीपदानविधिकथनं । रक्षान्यासादिनिरूपणं । महादीपदानविधिकीर्त्तनञ्च । इति शम् ।

No. 2285. कलादीक्षारहस्यचर्य्या । Substance, country-made paper, 14 × 5 inches. Folia, 128. Lines, 14 on a page. Extent, 6,889 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, fresh. Prose and verse. Generally correct.

Kaládíkshá-rahasyacharyá. A manual for the performance of the rite of initiation into Tántric mantras. Anonymous.

Beginning. ——————करणानि शुभान्येव सर्व्वं तन्त्रेषु पार्व्वति ।
अभितस्तिथयोदिष्टाः शुक्लप्रतिपदादितः ।
एकोनसप्तविह्नताः करणं स्याद्बवादिकं ।

अथ लग्ननियमः । इत्यादि ।

End. क्षमस्व मे पुनरागमनाय प्रसीद सर्व्वसिद्धीः प्रयच्छ नमोनमस्तेऽस्तु स्वाहा । इति विसर्ज्जनमन्त्रः ।

Colophon. इति कलादीक्षारहस्यचर्य्या समाप्ता।

विषयः। विशेषेण दीक्षाविधिकीर्त्तनं तत्र प्रयोगकथनञ्च तत्र तान्त्रिकदीक्षाया आवश्यकत्वकथनं। दीक्षाकालादिविवेचनं। विशेषतः समयाशुद्ध्यादिनिरूपणं। कुण्डनिर्म्माणविधिकथनं। शक्त्यामृतादिनिरूपणं। परावस्थानिरूपणं। पात्रत्रयनिरूपणं। तत्त्वपञ्चकनिरूपणं। नीलकण्ठादिमूर्त्तिपूजनविधिः। तत्र षोड़शोपचारमन्त्रादिनिरूपणञ्च। होमविधिः। पूर्णपात्रादिविधिः। कलादीक्षाविधिः। शान्त्यतीताकलाशुद्धिनिरूपणं। आत्मविद्याशिवतत्त्वविभागादिकथनं। इति शम्।

No. 2286. वेदसारसहस्रनामव्याख्या। Substance, country-made paper, 12 × 4 inches. Folia, 126. Lines, 13 on a page. Extent, 3,859 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Prose and verse. Correct.

Vedasára-sahasra-náma-vyákhyá. A commentary on a chapter of the Padma-purána containing a hymn in which a thousand epithets in praise of S'iva are strung together. By Paramas'ivendra Sarasvatí, disciple of Abhinava-náráyanendra Sarasvatí.

Beginning. ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्ज्जितं।
आधारं सर्व्वभूतानामनाधारमविक्रियं॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमं।
अम्बिकापतिमीशानमनीशं प्रणमाम्यहं॥
ऐशमाद्यन्तनिर्मुक्तमतिशोभनमादरात्।
नमामि विग्रहं साम्बं संसारामयभेषजं॥
महदादिविशेषान्तं जगद्यस्याः समुत्थितं।
यस्यामेव लयं याति वन्दे तामम्बिकामहं॥
गुरुमूर्त्तिधरां गुह्यां गुह्यविज्ञानदायिनीं।
गुह्यभक्तजनप्रीतां गुहायां निहितां नुमः॥
नत्वा गणेश्वरं स्कन्दं साम्बं सगुरुमेव च।
वेदसारसहस्रस्य व्याख्या सम्यग्विरच्यते॥

काशीखण्डे विष्णुवचनं। कृत्वापि सुमहापापं त्वां यः स्मरति भावतः। इत्यादि।

End. विष्ण्वादीनां गुणमूर्त्तीनामन्येषामिन्द्रादीनाञ्च परमं पदं भवतीति भावः। सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदमितिश्रुतिः। — — — —।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमदभिनवनारायणेन्द्रसरस्वती-पूज्यपादशिष्यश्रीमत्परमशिवेन्द्रसरस्वतीविरचिता वेदसारसहस्रनामव्याख्या समाप्ता।

विषयः। पद्मपुराणीयवेदसाराभिधानशिवसहस्रनामस्तोत्रस्य विस्तरशो व्याख्यानम्।

No. 2287. सौभाग्यभास्करः। Substance, country-made paper 14 × 10 inches, Folia, 291. Lines, 9—10 on a page. Extent, 6,377 ślokas. Character, Nágara. Date, Sm. 1923. Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Prose. Generally correct.

Saubhágya-bháskara. A gloss on a commentary by Nṛisiñha on the thousand and one names of Lalitá as given in the Brahmáṇḍa-puráṇa. By Bháskara Ráya, a pupil of the commentator.

Beginning. श्रीगम्भीरविपश्चितः पितुरभूद्यः कोन+वोदरे
विद्याष्टादशकस्य मर्म्मभिदभूद्यः श्रीनृसिंहाद्गुरोः
यस्य श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत्
स त्रेतात्रिपुरत्रयीति मनुते तामेव नाथत्रयीम्॥
गुरुचरणसनाथो+सुरानन्दनाथो-
विहतिमतिरहस्यां धीरहृन्दैर्नमस्यां।
रचयति ललिताया नामसाहस्रिकाया
गुरुकृतपरिभाषाः स विदुखन्नशेषाः॥

— — — — — — — — इह खलु निखिलपुरुषार्थसाधने भगवत्याराधनेऽभ्यर्हिततमस्य रहस्यनामसाहस्रकीर्त्तनस्य रहस्यतरसद्गुरुसम्प्रदायैकवेद्यस्वरूपत्वेन तान् सम्प्रदायान् शिष्याननुजिघृक्षया दिदर्शयिषवः श्रीनृसिंहानन्दनामानोऽस्मद्गुरुचरणा निरन्तराया अपि शिष्यशिक्षायै मङ्गलमाचरन्ति त्रिपुरामिति। त्र्यात्मकं पुरं मण्डलकोणरेखामात्रादिसमूहो यस्याः सा त्रिपुरा। इत्यादि।

End. अध्येषमाणानामानन्दाय शिवं मङ्गलरूपमिति सर्व्वं शिवं।

Colophon. इति श्रीभास्कररायेण कृते सौभाग्यभास्करे फलश्रुतिः।
श्रीविश्वामित्रवंश्यः शिवभजनपरोभारतीयोपवीती
काश्यां गम्भीर——रभवद्भास्करस्तस्यसूनुः।
मोदच्छायामितायां शरदि शरदृतावाश्विने कालयुक्ते
शुक्ले सोमे नवम्यामतनुत ललितानामसाहस्रभाष्यम्॥
इति शम्। संवत् १९२२।

विषयः। ब्रह्माण्डपुराणीयललितानामसहस्रस्य नृसिंहानन्दकृतपरिभाषाः विवृत्य व्याख्यानम्।

No. 2288. रामायणसारः। Substance, country-made paper, 15 × 6 inches. Folia, 11. Lines, 10—11 on a page. Extent, 277 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur; also at Benaras, Bábu Hariśchandra. Appearance, fresh. Verse. Generally correct.

Rámáyaṇa-sára. A metrical epitome of the story of the Rámáyaṇa, giving its narrative portion divested of episodes and purely poetical descriptive portions. By Agnivesa, a Ṛishi. The most remarkable peculiarity of the work is the attempt made in it to fix specific dates for all the important occurrences in the history of Ráma. Thus, it says Ráma was 15 years old and Sítá 6 years old, when they were married. At the time of their exile they were 27 and 18 years old respectively. They had sojourned in the wilderness 12 years and 6 months when the nose of Súrpanakhá was cut by Lakshmaṇa. The rape of Sítá took place on the 14th day of the waxing moon in the month of Mágha. Hanumán repaired to Ceylon on the 10th of the waxing moon in the month of Márgas'irs'a. Ráma appears on the shore of the sea on the 3rd of Paus'a. On the 4th Vibhísana seeks his shelter. The fall of Rávaṇa took place on the 18th of Chaitra. On the 1st of Vais'ákha, Ráma arrives at the seashore or his return journey. The fire-ordeal of Sítá took place on the 3rd of that month. On the 7th Ráma returns to Ayodhyá to celebrate his coronation. On the 12th of Chaitra, in the seventh month of her pregnancy, Sítá was expelled from her home, and on the 9th of Áshááḍa she brought forth her twins. It is scarcely necessary to add that there is nothing to shew that the dates are trustworthy.

अथाग्निवेशर्षिकृतं रामचरितं।

Beginning. श्रीशारदाचरणपद्मयुगं निधाय
चित्ते गणेशचरणौ प्रणयेन नत्वा।
रामायणीयमखिलं मुनिभिः प्रणीतम्
आद्यैरहं तदिह सारतरं प्रवक्ष्ये ॥ १ ॥
पर्व्वं योदितिजोनराङ्घवपुषा सिंहेन निस्तारितः

सोऽयं विश्रवसः सुतोऽसुरसुतागर्भाद्भवोरावणः।
तेनातीव सदा जगत्त्रयमिदं दुष्टेन सन्तापितं
जातस्तद्वधहेतवे दशरथाच्छ्रीरामनामा हरिः॥ इत्यादि।

End. इत्येतद्यश्चरित्रं पठति रघुपतेर्यानरोवा शृणोति
सारं रामायणस्य प्रतिदिनमृषिणा चाग्निवेशेन गीतं।
सोऽयं निर्द्धूतपापोजलधरपदमारुह्य यानेन याति
स्वर्गं दिव्येन देवैरभिमुखमखिलैरागतैः सूयमानः॥

Colophon. इति श्रीअग्निवेशमुनिविरचितोरामायणसारः सम्पूर्णः॥

विषयः। संक्षेपेण वाल्मीकिरामायणसारं सङ्कलय्य रामचरित्रवर्णनं। विशेषतश्च विवाहादिकाले श्रीरामादीनां वयआदिकथनं। तत्र विवाहकाले रामः पञ्चदशवर्षवयस्कः सीता तु षड्वार्षिकी आसीत्। अथ वनगमनकाले रामः सप्तविंशतिवर्षीयः सीता तु अष्टादशवर्षदेशीयेति कथनं। अथ षन्मासोत्तरद्वादशे वर्षे समतीते पञ्चवट्यां शूर्पणखाया नासिकाच्छेदनादिकथनं। तत्र माघशुक्लचतुर्द्दश्यां सीताहरणकथनं। मार्गशुक्लदशम्यां हनूमतः समुद्रलङ्घनकथनं। पौषस्य तृतीये दिने जलनिधितीरे रामस्य ससैन्यस्य उपस्थितिकथनं। चतुर्थे दिने विभीषणेन सह मित्रताकथनं। एवं सेतुबन्धनलङ्काप्रवेशादिदिनकथनं। माघनवम्यां नागपाशबन्धनादिकथनं। चैत्रस्याष्टादशदिवसे रावणबधकथनं। वैशाखस्य प्रथमदिने रामस्य पुनः सुवेलाचलप्रत्यागमनकथनं। तत्र तृतीयायामग्निशुद्धिकथनं। सप्तमे दिने अयोध्याप्राप्त्यनन्तरं राज्याभिषेककथनं। अथ गर्भाधानात् सप्तमे मासेऽतीते चैत्रस्य द्वादशदिवसे सीताया निर्व्वासनकथनं। आषाढ़स्य नवमदिवसे सीतायाः पुत्रयुगजननकथनं।

No. 2289. धर्म्मारण्यमाहात्म्यम्। Substance, country-made paper, 16 × 5 inches. Folia, 123. Lines, 10 on a page. Extent, 3,508 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Incorrect.

Dharmáraṇya-máhátmya. Praise of Dharmáraṇya as a place of pilgrimage. It notices all its sacred spots, and narrates a great number of legends in support of the merits of those spots. The work is so written as to appear as an episode of a Puráṇa, but the codex does not give the name of the Puráṇa. It is obviously apocryphal.

Begininng. नत्वं संहृतिवारिधिं त्रिजगतां नैनाम यस्य प्रभो-
येनेदं सकलं विभाति सततं जातं + + संहृतं।

यद्यैव + + + + मानविधुरे वेदान्तवेद्यो विभु-

स्तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परं ॥

— — — — — — — — — — — — ।

नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः ।

सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥

एकदा सूतमायान्तं दृष्ट्वा तु शौनकादयः ।

परं हर्षं समाविश्य पप्रच्छुर्नैकचेतसा ॥

स्थिताः श्रोतुं कथास्तत्र + + + + स्तपस्विनः । इत्यादि ।

End. दानादिभिर्यथान्यायं सम्पूर्णफलहेतवे ।

मुद्रिकां कुण्डले चैव ब्रह्मसूत्रं हिरन्मयं ॥

वस्त्राणि च विचित्राणि गन्धमाल्यानुलेपनैः ।

देववत् पूजनं कृत्वा गाश्च + + + + + + ॥

Colophon. इति श्रीधर्म्मारण्यमाहात्म्यं परिपूर्णं ।

(अत्राध्यायसंख्यावैषम्यं वर्त्तते ।)

विषयः । धर्म्मराजेन सह नारदस्य संवादेन धर्म्मारण्यमाहात्म्यकीर्त्तनं । अथैकदा धर्म्मारण्ये तपश्चरतो धर्म्मराजात् अनिष्टमाशङ्कमानस्य देवराजस्य सार्द्धं देववृन्देन ब्रह्मलोकगमनादिवृत्तान्तकीर्त्तनं । ततो धर्म्मराजं मोहयितुं धर्म्मारण्यं प्रविष्टया वर्द्धन्या सह तस्य संलापादिकथनं । धर्म्मवापीवृत्तान्तकथनं । धर्म्मक्षेत्रस्थापनविवरणकथनं । धर्म्मराजकृतशिवस्तोत्रकथनं । धर्म्मारण्यवासिनां गृहस्थानां सदाचारवर्णनं । सदाचारलक्षणादिकथनं । धर्म्मवाप्यां पितॄणां तर्पणश्राद्धादिकरणमाहात्म्यकीर्त्तनं । पतिव्रताधर्म्मनिरूपणं । सामान्यतः कुलस्त्रीणां कर्त्तव्यानि । अथ कार्त्तिकस्य प्रार्थनया महादेवेन सृष्टिवृत्तान्तकीर्त्तनं । तत्रादौ वटवृक्षस्य उत्पत्तिकथनं । तत्पत्रे बालरूपतया भगवतो वासुदेवस्य शयनादिवृत्तान्तकीर्त्तनञ्च । हरिहरादीनां धर्म्मारण्यगमनपूर्व्वकं तत्र तत्त्वचोलसम्पन्नानां मुनीनां निवासस्थापनादिवृत्तान्तकीर्त्तनं । तत्र गोत्रप्रवरकथनपूर्व्वकं प्रेरकं अवस्थादिवर्णनञ्च । धर्म्मारण्ये गोमातुः सुरभेः प्रभावेण सहस्रशो-वेदपारगब्राह्मणानामुत्पत्तिकथनं । गन्धर्व्वराजस्य विश्वावसोः कन्यकाभिः सार्द्धं तेषां परिणयादिवर्णनञ्च । अथैकदा लोलजिह्वाभिधानेन राक्षसेन विप्रकृतानां तेषां परित्राणाय कृतप्रयाणेन नलकूवरेण सह निशाचरराजस्य युद्धवर्णनं । तत्र चाकृतार्थे तस्मिन् विष्णुकृततद्बधवर्णनञ्च । अथ संज्ञागर्भे अश्विनीकुमारयोर्जन्मवृत्तान्तकीर्त्तनं । देवसराभिधानस्य नृपतेः विवरणकथनमुखेन भगवतो हयशीर्षावतारवृत्तान्तकथनं । शक्तिस्थापनविवरणकथनं । शान्तादेवीमाहात्म्यादिकथनं । कर्णाटासुरविवरणकथनं । इन्द्रसरोवरमाहात्म्यकीर्त्तनं । तत्र जयन्तेश्वरमाहात्म्यादिकथनञ्च । शिवमाहात्म्यवर्णनं । वरक्षेत्रवर्णनं । कुलदेवतानामुत्पत्तिकथनं । गोत्र-

प्रवरनिर्णयः। विवाहयोग्यकन्यादिनिरूपणं। योगिन्यादीनां स्थानादिनिरूपणं। सरस्वतीतीर्थमाहात्म्यादिवर्णनं। द्वारकामाहात्म्यादिवर्णनं। गोवत्सतीर्थमाहात्म्यकथनं। श्राद्धविधानकथनञ्च। लोहासुरस्य वृत्तान्तकीर्त्तनं। असुरविजयार्थं ब्रह्मण उपदेशेन धर्म्मारण्ये देवानां यज्ञानुष्ठानमहोत्सववर्णनं। संक्षेपेण श्रीरामचरितवर्णनं। तत्र इन्द्रजित्कुम्भकर्णादीनां सर्व्वेषां रक्षसां निधनप्राप्तिदिनकथनञ्च। अथ ब्रह्मराक्षसादिबधजनितपापक्षयकामेन रामचन्द्रेण वसिष्ठोपदेशेन विविधतीर्थयात्रापूर्व्वकं धर्म्मारण्यगमनवृत्तान्तकथनं। तत्र धर्म्मारण्याधिष्ठात्र्या देवतया सह रामस्य संवादकथनं। राममन्दिरस्थापनविवरणं। तत्र रामदत्तताम्रशासनस्थापनविवरणकथनञ्च। अथ तत्र रामकृतयज्ञवृत्तान्तकथनं। सीतापुराभिधाननगरस्थापनविवरणकथनञ्च। कलौ मानवानां चरित्रादिवर्णनं। तत्र बौद्धधर्म्मस्य प्राबल्यकथनं। वणिजान्तु जैनधर्म्मपरत्वनिरूपणं। धर्म्मारण्ये हनूमत्समागमविवरणकथनं। जैनधर्म्मावलम्बस्य आमराजस्य वैष्णवधर्म्मग्रहणादिविवरणकथनं। विप्रवंशविस्तारादिकथनं। तेषां स्थानादिनिरूपणञ्च। क्षत्रियादिवर्णानां स्थानादिनिरूपणं। सङ्करजातीनामुत्पत्तिकर्म्मादिनिरूपणं। कलिधर्म्मकथनं। विशेषेण धर्म्मारण्यमाहात्म्यकीर्त्तनञ्च।

No. 2290. प्रणवकल्पः। Substance, country-made paper, 13 × 5⅓ inches. Folia, 76. Lines, 2—3—5 on a page. Extent, 642 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Generally correct.

Praṇava-kalpa. On the object, purport, meaning, derivation, and merits of the Praṇava mantra. The work is alleged to be a part of the Skanda-puráṇa.

Beginning. सत्रान्ते नैमिषारण्ये शौनकस्य महीयसः।
आसीनं मुनिशार्दूलं सूतं पौराणिकोत्तमं॥
समागत्य परीवृत्य शौनकाद्या महर्षयः।
यथेष्टाः सत्कथाः पुण्याः पर्य्यपृच्छन् मुमुक्षया॥
मन्त्रान् प्रसञ्जयंस्तत्र शौनकः प्रत्यभाषत।
शौनक उवाच।
सूत सूत महाप्राज्ञ व्यासशिष्य महामते। इत्यादि।

End. इतीदं प्रणवस्यास्य नाम्नां साहस्रमीरितं।
लब्धये सर्व्वतपसां वेदानां पर्य्यवाप्तये॥

Colophon. इति प्रणवकल्पे पञ्चमोऽध्यायः। समाप्तोऽयं ग्रन्थः।

विषयः। स्कन्दपुराणीयप्रणवकल्पोऽयं। सूतशौनकसंवादेन प्रणवमाहात्म्यं प्रपञ्चयति।

तत्र प्रणवस्य अपवर्गप्रदत्वकथनं। अथ महादेवस्य प्रमुखात् पार्व्वत्याः प्रणवमाहात्म्यश्रवणहृष्टतानाकथनं। तत्र प्रणवस्याङ्गस्तुतिकथनं। तस्य कवचकथनं। हृदयकथनं। पुरश्चरणविधिकथनञ्च। प्रणवाष्टोत्तरशतनामस्तोत्रकथनं। प्रणवषोड़शनामकीर्त्तनं। प्रणवपञ्जरकथनं। प्रणवमालामन्त्रकथनं। प्रणवगायत्रीकथनं। प्रणवस्तवराजकथनं। प्रणवाक्षरमालामन्त्रकथनं। प्रणवानुस्मृतिकथनं। प्रणवसहस्रनामकीर्त्तनञ्च।

NO. 2291. प्रणवकल्पप्रकाशः। Substance, country-made paper, 13 × 5½ inches. Folia, 82. Lines, 7 on a page. Extent, 1,046 ślokas. Character, Nágara. Date, ? Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Prose. Correct.

Praṇava-kalpa-prakáśa. A commentary on the work noticed under the next preceding No. By Gaṅgádhara Sarasvatí, Bhikshu, pupil of Rámachandra Sarasvatí, who was a pupil of Sarvajna Sarasvatí.

Beginning. गुरुगणपतिशम्भुश्रीशवाणीशदुर्गा-
रविशशिशचिमुख्यान् सर्व्वगीर्व्वाणनाथान्।
प्रणवमपि च वेदान् व्यासपूर्व्वांश्च नत्वा
प्रणवहृदयकल्पं व्याचिकीर्षे शिवाप्तं॥

प्रणवजपध्यानार्थविचारादौ यज्ञदानतपोविशोधितचित्तानां तीव्रमुमुक्षापर्य्यवसितसाधनसम्पन्नानां ब्राह्मणोत्तमानामेवाधिकार इति प्रदर्शनार्थमाख्यायिकां प्रस्तौति सत्रान्त इति।

End. शब्दतोऽर्थतश्च परिशीलनीय इति सिद्धं।
वासुदेवेन्द्रयतिना प्रीत्यर्थं शिवतुष्टये।
मया प्रणवकल्पोऽयं यथामति विकाशितः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीसर्व्वज्ञसरस्वतीपूज्यपादप्रशिष्येण श्रीरामचन्द्रसरस्वतीपूज्यपादशिष्येण श्रीगङ्गाधरेन्द्रसरस्वत्याख्यभिक्षुणा विरचितः प्रणवकल्पप्रकाशः सम्पूर्णः।

विषयः। स्कन्दपुराणीयप्रणवकल्पस्य व्याख्यानम्।

No. 2292. वृहत्कोशलखण्डं, (श्रीरामरासः।) Substance, countrymade paper, 13 × 7 inches. Folia, 129. Lines, 12 on a page. Extent 3,072 ślokas. Character, Nágara. Date, Sm. 1914. Place of deposit, Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur. Appearance, new. Verse. Generally correct.

Rámarása ALIAS **Vrihatkośola-khaṇḍa.** An amplified description of the story of Ráma. The codex comprises only the last book which describes a great number of incidents in the life of Ráma which have

not been noticed in the Rámáyaṇa of Válmíki. The most prominent incident noticed is the Rása festivals and throughout an attempt is made in the book to produce in the life of Ráma a counterpart of the amours of Krishṇa as described in the Bhagavata Puráṇa. The work is written in the style of a Puráṇa, and is intended to serve as an appendix to some Puráṇa or other, the name of which is not given.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततोजयमुदीरयेत् ॥
अथापृच्छन्महाभागः शौनकः स्नातकश्च सः ।
रहस्यं रामचन्द्रस्य भक्तानां भक्तिवर्द्धनं ॥
भो भो सूत महाबुद्धे स्मृतिमन् मतिमन् विभो ।
रामोऽपि स्त्रीसहस्रैस्तु रेमे कच्चिन्मनोरमः ॥
कास्ताः + त्यारतिस्ताभिः कदा वा कथमास सा ।
एकपत्नीव्रतं तस्य न्टणां धर्म्मगुरोः कथं ॥
वावदूक तदाचक्ष्व गोप्यं कर्णरसायनं ।
श्रोतुं धर्त्तुं स्थिरस्नेहं मादृशं यदि मन्यसे ॥
श्रोतुर्यस्मिन् श्रुते स्नेहः + + सीतापतेः पदे ।
अविच्छिन्नं भवेत्तन्मे श्रोतुं संत्वरते मनः ॥
श्रुतं रामायणं छात्स्नमार्षं हि महतां गतिं ।
शान्तिं नैति तथाप्येष वैष्णवोमन्मनोऽन्तरः ॥ इत्यादि ।

End. एषा पञ्चदशाध्यायी रामरासविलासिनी ।
आनन्दोल्लासिनी भूयाद्धृदि दुष्कामनाशिनी ॥
रामकेलिकथामेतां श्रुत्वा भार्गवसत्तमः ।
आशीःपूर्व्वं समभ्यर्च्य सूतं वासोविभूषणैः ॥
सर्व्वेष्वपि पुराणेषु श्रुतेषु संहितासु च ।
तादृशी न मम प्रीति र्जातैतस्यान्तु यादृशी ॥
अस्याः श्रवणमात्रेण ससीतालक्ष्मणोहरिः ।
मानसं न त्यजेज्जातु जनानां जनवत्सलः ॥
अद्भुता परमा रामकेलिरेषा मनोरमा ।
कर्णौ च मानसं कस्य रमयेन्न विना पशुं ॥
येषां तु मानसं रामे लग्नं नेह मनोरमे ।
वञ्चिता विधिना पापास्ते वै क्रूरतरेण च ॥

रामं पृच्छन्ति सङ्गत्या सम्भूताः कथयन्ति ये।
श्रूयन्ते च सुकथ्यन्ते देवैरिन्द्रादिभिस्तु ते॥
येषां रामः प्रियोनैव रामे न्यूनत्वदर्शिनां।
द्रष्टव्यं न मुखं तेषां सङ्गतन्तु कुतस्तरां॥
असम्भाग्यवशाद्भक्तो रामस्य त्वमुपस्थितः।
श्रोतव्यं तन्मुखादेव रामचारित्रमद्भुतं॥
चतुर्द्दशसहस्राणि वर्षाणां रघुनन्दनः।
स्थित्वा पुरे वने वापि यद्यच्चक्रे सुरारिजित्॥
— — — — — — — — —।
तान्त्व श्रावय सौतेय भक्तान् श्रद्धावतोहि नः।
उवाच श्रवणानन्दी भद्राभद्रं भवत्विति॥

Colophon. इति श्रीमद्बृहत्कोशलखण्डे श्रीरामरासे पञ्चदशोऽध्यायः। संवत् १९१४॥

विषयः। प्रथमेऽध्याये,—सूतेन सह शौनकादीनां संवादेन रामस्य बाल्यलीलावर्णनं। यौवनारम्भे रामरूपस्य रमणीयतावर्णनं। अथैकदा समं समवयस्कैः रामः क्रीड़ारसमनुभवितुं कदलीकाननं प्रविवेश। तत्र हि रामरूपमुग्धतया विस्मृतपुरुषभावैः सखिभिः सादरमभ्यर्थितोऽसौ रामरसमभिनन्दितुं नन्दनमिव कदलीकुञ्जमासाद्य कुसुमशयनन्टत्यगीतादिविनोदेनापि चित्तविनोदमलभमानः स्वेच्छया तेषां स्त्रीत्वं ससर्ज्ज। अथ प्रभाते स्वप्रभावेणैव भूयस्तेषां पौरुषभावं सम्पाद्य राजधानीं प्रपेदे। २ये अध्याये,—रामरूपं निरूप्य गोपप्रमदानां समदानां पतित्वेन राममधिगन्तुं शिवाराधनकथनं। अथ रामोऽपि शिवाराधनार्थं सरयूतीरमधिगच्छन्नेव गोपीभिः सह रासोत्सवं संवर्द्धयामास। कथयामास च पुनरपि यूयं वृन्दावने राससुखमवापस्यथेति। ३—५मे अध्याये देवकन्याभिः सह रामस्य रासवर्णनं। रामं प्रति दशरथस्य उपदेशः। रामकृतशम्बरासुरस्तनुपराजयकथनं। रामस्य शारदरासोत्सववर्णनं। ६—८ अध्याये, रामगुणश्रवणेन सीतायाः पूर्व्वरागवर्णनं। अथ नारदमुखात् सीताया अनुरागवृत्तान्तं विज्ञाय रामस्य स्मरदशा। जनकालये तस्य परिणयमहोत्सववर्णनं। कौतुकगृहे कामिनीनां रामं प्रति वक्रोक्त्यादिवर्णनं। सरयूतीरस्थिताभिनवप्रासादे सीतया सह रामस्य विहारवर्णनं। तया सह रासोत्सववर्णनं। रासमण्डपे देवाङ्गनानां लतादिरूपेणावस्थितिकथनं। ९—१२, अध्याये,—अथ वनभूमौ कामिनीनां मुग्धतया विलासवर्णनं। वनशोभावर्णनं। अथ सीतया सह रामस्य दोलोत्सववर्णनं। तत्र सीतासखीनामुपचाररचनादिचातुर्य्यवर्णनञ्च। अथ सीतामुद्दिश्य रामस्य सङ्गीतरहस्यकीर्त्तनं। तत्र च क्रमेण रागादीनां लक्षणभेदादिकथनं। वाद्यभेदरहस्यकथनं। तत्र विविधतालस्वरूपादिकथनं। नृत्यभेदप्रपञ्चनं। रसशास्त्ररहस्योद्घाटनञ्च।

१२—१५ अध्याये,—अथैकदा रासरसोन्मत्ततया रामस्य सीतासखीनां पुरतः लास्यलीलाप्रदर्शनकथनं। तासां मौग्ध्यवर्णनं चित्तविलासवर्णनञ्च। अथ कौतुकार्थं तत्र रामस्य अन्तर्द्धानादिवर्णनं। दोलिकोत्सववर्णनं। सम्भावितवियोगानां कामिनीनां राममुद्दिश्य कारुण्योक्तिवर्णनञ्च।

No. 2293. विष्णुधर्म्मोत्तरम्, वा विष्णुधर्म्मः। Substance, country-made paper, 18 × 6 inches. Folia, 135. Lines, 12 on a page. Extent, 3,819 ślokas. Character, Nágara. Date, Sм. 1910. Place of deposit, Calcutta, Government of India; also at Bettiyá, Mahárájá Rájendrakiśora Siñha, Bahádur; another copy, at Darbháñgá, Bábu Guneśvara Siñha. Appearance, fresh. Verse. Generally correct.

Vishṇu-dharma. A work on Vishṇu as the supreme divinity. The codex contains only the second part of the work, and is called Vishṇudharmottara. It dilates at great length on the divinity of Vishṇu, and gives in detail all the rituals and rules for his worship, and the fasts and penances to be observed in honour of him. The work is held in considerable esteem by the Vaishṇ[illegible]s, and largely quoted. It professes to be a Puráṇa.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरो[illegible]।
देवींसरस्वतीञ्चैव ततोजयमुदीरयेत्॥
द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शुभञ्च।
योभारतं समधिगच्छति वाच्यमानं
किं तस्य पुस्करजलैरभिषेचनेन॥
कृताभिषेकं तनयं राज्ञः पारीच्चितस्य च।
द्रष्टुमभ्याययुः प्रीत्या शौनकाद्या महर्षयः॥
तानागतान् स राजर्षिः पाद्यार्घ्यादिभिरर्च्चितान्।
सुखोपविष्टान् विश्रान्तान् कृतसंप्रश्नसत्कथान्॥
तत्कथाभिः कृताह्लादः प्रणिपत्य कृताञ्जलिः।
शतानीकोऽथ पप्रच्छ नारायणकथां परां॥ इत्यादि।

Colophon. नहि तत् सर्व्वतीर्थेषु सरित्सु च निमज्जनात्।
फलं भवत्यनन्तस्य यादृक् पादाम्बुधारणात्॥

End. इति विष्णुधर्म्मेषु प्रशंसा समाप्तेति। श्रीसंवत् १९१०।

विषयः। १अध्याये,—शतानीकेन सह जनमेजयस्य संवादेन श्रीकृष्णस्याराधनोपयोगि
क्रियायोगकथनं। भगवन्माहात्म्यकीर्त्तनं। इन्द्ररूपधारिणा उपेन्द्रेण सह तपस्यतः अम्बरीषस्य
संवादकथनेन भक्तियोगमाहात्म्यकीर्त्तनं। भक्तियोगस्यापि क्रियायोगाश्रितत्वकथनं। शुक्रेण
सह प्रह्लादस्य संवादेन भक्तियोगकथनं। उपवासलक्षणं। उपवासस्य भगवत्प्रीत्याधायकत्व-
कथनं। तत्र सुगतिद्वादशीव्रतविधानकीर्त्तनञ्च। याम्यक्लेशविमुक्तिकारणकथनं। एकभक्तव्रत-
विधिकथनं। द्वादशमासिककृष्णाष्टमीव्रतविधिकथनं। चातुर्मास्यव्रतविधिकथनं। कुलाप्ति-
द्वादशीव्रतविधिकथनं। विजयद्वादशीव्रतविधिकथनं। जयन्त्यष्टमीव्रतविधानं। अजितैका-
दशीव्रतविधानं। घृतेन विष्णोः स्नपनविधिः। विष्णुव्रतविधिः। संप्राप्तिद्वादशीव्रतविधिः।
गोविन्दद्वादशीव्रतविधिः। अखण्डद्वादशीव्रतविधिः। पापनाशिनी द्वादशी। पदद्वयव्रतविधि-
कथनं। मनोरथद्वादशीव्रतकथनं। अशोकपौर्णमासीव्रतविधानं। सुकलत्रप्राप्तिव्रतविधानं।
पतिव्रताधर्म्मादिकथनं। स्त्रीधर्म्मव्रतकथनं। नरकवर्णनं। पापविशेषेण नरकविशेषकथनं।
नरकद्वादशीव्रतविधानं। पाषण्डानां स्वरूपवर्णनं। तैः सार्द्धमालापे प्रायश्चित्तविधानञ्च।
मासर्क्षपूजाविधिः। अत्र साम्भरायण्या उपाख्यानकथनञ्च। सर्व्वबाधाप्रशमनविधिकथनं।
नक्षत्रपुरुषव्रतविधानं। अनन्तव्रतविधानं। देवगृहलेपनविधिकथनं। तत्र दीपदानविधिक-
थनं। देवादिस्तुतिप्रशंसाकीर्त्तनं। तिलद्वादशीव्रतविधानं। भगवता सह अर्ज्जुनस्य संवादक-
थनेन स्तोत्रकथनं। स्थानविशेषे प्रधानानि विष्णोः पञ्चपञ्चाशन्नामानि। वीरभद्रगीतायां शुक्ल-
तद्वादशीव्रतप्रभावकथनं। अश्विपुरूरवसादिमङ्गलस्तोत्रकीर्त्तनं। ब्रह्माख्यानककीर्त्तनं। अशून्य-
शयनद्वितीयाव्रतकीर्त्तनं। संसारहेतुमुक्त्याख्यानकथनं। श्रीकृष्णेन सह युधिष्ठिरस्य संवादेन
याम्यपथाख्यानकीर्त्तनं। गोदानमाहात्म्यादिकीर्त्तनं। दानमौनब्रह्मचर्य्यादिनियमफलकथनं।
द्रव्यदानविशेषे फलविशेषकीर्त्तनं। वृथादाननिरूपणं। विप्रावमाननपूजनयोः फलकथनं।
विप्रमाहात्म्यकीर्त्तनं। दानप्रशंसा। तपःप्रशंसा। सत्यप्रशंसा। उपवासप्रशंसा। एकभक्तादि-
प्रशंसा। ब्राह्मणादिवर्णान्यत्वप्राप्तिकारणकथनं। सुवर्णदानमाहात्म्यकीर्त्तनं। विशेषेण गोदान-
माहात्म्यकथनं। भूमिदानमाहात्म्यकीर्त्तनं। संग्राममाहात्म्यकथनं। मांसभक्षणत्यागमाहात्म्य-
कीर्त्तनं। दण्डनीतिकीर्त्तनं। हरिभक्तिमाहात्म्यकीर्त्तनं। युधिष्ठिरचण्डालप्रश्नसंवादः। जनक-
गीताकथनं। जन्मरहस्यकथनं। गजेन्द्रमोक्षविवरणं। अनुस्मृतिकीर्त्तनं। विष्णुपञ्जरकथनं।
सारस्वतस्तवकथनं। विष्णुषट्ककथनं। वत्ससुरसंवादकथनं। भक्तिमाहात्म्यादिवर्णनं। विष्णु-
श्रीसंवादकथनं। स्वधर्म्माचरणप्रशंसा। अदितिस्तवकथनं। वामनस्तवकथनं। बलिवञ्चनवि-
वरणकथनं। चक्रस्तवकीर्त्तनं। उत्क्रान्तिस्मरणकथनं। वैवस्वतगाथाकीर्त्तनं। पुष्पादिवि-
भागकथनं। मान्धातुः राज्यप्राप्तिहेतुकथनं। त्रिविक्रमव्रतकथनं। पदत्रयव्रतकथनं। गोदा-
नविधिकथनं। तिलधेनुदानविधिकथनं। घृतधेनुकल्पविधिकथनं। जलधेनुदानविधिकथन-

मुखेन पुङ्गवगाथाकीर्त्तनं। शुद्धिव्रतकथनं। देवकीव्रतकथनं। प्रह्लादबलिसंवादकथनं। पापप्रशमनस्तवकीर्त्तनं। अन्यविधपापप्रशमनस्तवकथनं। अत्रबन्धूपाख्याने कारुण्यस्तवकथनं। परमपदाख्यानकथनं। ब्रह्माद्वैतस्वरूपादिकीर्त्तनं। पापक्षयोपायकथनं। योगस्वरूपादिकथनं। भगवन्मूर्त्तिलक्षणादिकथनं। यमनियमादिसमाख्यानादिनिरूपणं। वर्णाश्रमधर्म्मकथनं। नरनारायणाख्यानकथनमुखेन उर्व्वश्याः सम्भवादिकथनं। विश्वरूपदर्शनकथनं। चतुर्युगावस्थाकथनं। विस्तरेण कलिधर्म्मकथनं तत्र नराणां चरित्रादिवर्णनञ्च। शास्त्रमाहात्म्यकीर्त्तनं। अनुक्रमणिकाकथनञ्च।

No. 2294. **वृहत्पाराशरः।** Substance, country-made yellow paper, 18 × 5½ inches. Folia, 115. Lines, 8—9 on a page. Extent, 3,200 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Vṛihat-páráśara. A complete code of laws for the guidance of the Hindus during the current or Kali age. According to its introduction certain pious Bráhmaṇs repaired to Vyása at his hermitage amidst a Deodar forest on the Himálaya, and requested him to expound the duties of householders and others during the Kali-Yuga, even as Manu and others had expounded the laws meet for previous ages. Vyása took the enquirers with him to his father, Parás'ara, and obtained from him instructions, which form the substance of the work, which accordingly is said to be the composition of Parás'ara himself. The very first verse of the text, however, belies this assumption, as there we have a third party who says he will describe the duties as expounded by Parás'ara. We are next told that it was one Suvrata who prepared the compilation. (*Proktaván Vyásamukhyánám śesham munirabhásatah, niyuktam subratah śaham vipránám prinanáya cha.* (I. 60). The epithet *Vṛihat* added to its name shows that the work is an amplified recension of a previous work, and that work is said to be the *Párás'ara-sañhitá* which is reckoned the most authentic, being the one which is usually and very largely quoted by digest writers and commentators. That has the advantage too of an elaborate and exhaustive commentary by Mádhava Ácharya. There is a third work which is especialised by the epithet *Vṛiddha* or old, but I have not yet seen a copy of it.

Both the *Páráśara-sañhitá* and the *Vṛihat-páráśara* are divided into 12 chapters, but whereas the former extends to only 592 verses, the

latter comprises 3,200 verses, and the subject matter of the different chapters is not the same. The first treats of *A'chára* in the first three chapters, and of *Práyaśchitta* (expiation) in the following nine, whereas the second makes *A'chára* the principal theme of its instructions, and expiation a subsidiary or casual one. The style of writing, too, is markedly different. The former is written in an archaic style similar to, but somewhat later than, that of the other Smṛiti Sañhitás including Manu and Yajṉavalkya, the latter affects the loose colloquial form of the later Puráṇas and the Tantras. It should be added, however, that the *Páráśara-sañhitá* is unquestionably much later than Manu, Yajṉavalkya and the other authentic Smṛitis which it names in its introduction. And this is what was to be expected, for avowedly the work is not the composition of Parásara, father of Vyása, but of some one of a much later date. Anyhow it is earlier and more authentic than the work now under notice. The quotations given in the Digests are all taken mostly from the short treatise and a few from sources not now known; they do not occur in the large recension which, as far as I can ascertain, has nowhere been cited, showing clearly its apocryphal character.

Contents: *Chapter I.* Introduction. Summary of the special duties of the four Yugas. Peculiarities of Aryan and non-Aryan countries.

Chapter II. The eight daily duties, including bathing at the three conjunctions of the day, repetition of mantras, worship, hospitality, &c. Sandhyás described in detail. Rules for bathing, and varieties of bathing. Water fit for bathing. Dressing. Offering of water to the manes, (*tarpaṇa*). Different classes of sacred pools. Rules for the repetition of sacred mantras. Rosaries. *Praṇava.* Merit of each letter of the Gáyatrí mantra.

Chapter III. *Worship,* to whom to be offered. Water, fire, breast, sun, altars and images are the six classes of objects through which worship is to be made. Worship of Vishṇu specially recommended. Worship of Vaiśvadeváh. Hospitality. Duties of the four castes. Duties of householders. Ploughing. Milking. Duties of Bráhmaṇs who betake to agriculture. Merits of cattle and of protecting them. Making of ploughs. Trees not to be felled, nor clothes sent to the washerman, on the day of the new-moon. Rules for sowing seeds. Proper times and places for sowing. Classification of agriculture into bad and good.

Chapter IV. *Marriage*—eight kinds. Selection of bridegrooms. Defects of brides and grooms. Respect due to women. Constancy.

Polygamy, when admissible. The five things in a house called Panchas'uná, where animal life may be accidently destroyed. The five daily Yajnas. Pránágnihotra. Knowledge of Brahma. Rules for performing Pránáyáma. Water to be tasted before a meal. Conception. The ten sacraments. The sacred cord. Education. Evil of not putting on the sacred cord. Fasts. Duties of men and women. Merits of sons. S'ráddha at Gayá, a duty for a son to perform. Family customs and local customs. Impurity. Acceptance of gifts. Condemned and prohibited kinds of food. Purification. Times of vacation at school.

Chapter V. Bráhmaṇs for performing S'ráddha. Invitations of Bráhmaṇs to a S'ráddha. Persons bound to perform S'ráddhas. Sráddhas with undressed articles. Times meet for S'ráddhas. Leaves, flowers, fruits, &c., for S'ráddha. Periodical S'ráddhas. Articles fit for gift at S'ráddhas. Cooking of rice at a S'ráddha. S'ráddha on the day of Maghá constellation. Special rites for suicides, persons killed by tusked animals &c. Cremation of an image when the corpse is not found. Gradation of the 12 kinds of sons as regards S'ráddhas.

Chapter VI. Impurity of the person resulting from birth or death in a family. Distinction between the two. When impurity does not result under such circumstances. Rules for cremation.

Chapter VII. Expiatory rites of various kinds for various offences.

Chapter VIII. Religious gifts. Their nature, time and advantages. Special merits of gifts at particular specified times.

Chapter IX. Propitiatory rites for preventing evils likely to result from adverse planets. Omens, &c. Excavation of tanks, &c. The rite of *Lakshahoma,* or the offering of a hundred thousand oblations to the fire. Do. of *Koṭihoma.* Altars for ditto. Rites for obtaining a son.

Chapter X. Duties of kings and polity generally. War, peace, negotiations. Penal laws. Prosperity of the people. Duties of Vánaprasthas.

Chapter XI. Distinctions between Brahmacháris, householders, Vánaprasthas, and Bhikshus.

Chapter XII. Performance of the Yoga. Details of practical Yoga, of meditative Yoga, and of Yoga of knowledge. Discrimination of time.

Beginning. व्यक्ताव्यक्ताद्यदेवाय वेधसेऽनन्तवेधसे ।
नमस्कृत्य प्रवक्ष्यामि धर्म्मान् पाराशरोदितान् ॥
अथातोहिमशैलाग्रे देवदारुवनाश्रमे ।

व्यासमेकान्तमासीनं द्विजाः पृच्छन्ति धार्म्मिकाः ॥
मानुषाणां हितं धर्म्मं वर्त्तमाने कलौ युगे ।
वर्णानामाश्रमाणाञ्च किञ्चित् साधारणं वद ॥
युगे युगे च ये प्रोक्ता धर्म्मा मन्वादिभिर्मुने ।
शक्यन्ते नैव ते कर्त्तुं वर्णैराश्रमवासिभिः ॥
संपृष्टोमुनिभिर्व्यासोमुनिभिः परिवारितः ।
प्रष्टुं जगाम पितरं धर्म्मान् पराशरं ततः ॥
सर्व्वेषामाश्रमाणाञ्च वरे वदरिकाश्रमे ।
— — — — — — — — — — ।

तस्मिन् ऋषिसभामध्ये शक्तिपुत्रः पराशरः ।
सुखासीनोमहातेजा मुनिमुख्यगणावृतः ॥
कृताञ्जलिपुटोभूत्वा व्यासस्तु मुनिभिः सह ।
प्रदक्षिणाभिवाद्यैश्च मुनिभिः प्रतिपूजितः ॥
ततः सन्तुष्टमनसा पराशरमहामुनिः ।
व्यासस्य स्वागतं ब्रूया (?) दासीनोमुनिपुङ्गवः ॥
पृच्छतः स्वागतं तस्य आसीनानां समन्ततः ।
(शनं) ? कुशलमित्युक्ता व्यासः पृच्छत्यतः परं ॥
यदि जानासि मां भक्तं स्नेहाद्वा यदि वत्सल ।
धर्म्मं कथय मे तात अनुग्राह्योह्यहं यदि ॥
— — — — — — — — — — ।

व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ।
सुखासीनोमहातेजा इदं वचनमब्रवीत् ॥ इत्यादि ।

End. य इदं शृणुयाद्विप्रः श्रावयेत् पाठयेदिति ।
स तु ध्वस्तसमस्तैना ब्रह्मलोकमवाप्नुयात् ॥

Colophon. इति वृहत्पाराशरे धर्म्मशास्त्रे सुव्रतप्रोक्तायां संहितायां द्वादशोऽध्यायः । समाप्तोऽयं ग्रन्थः ।

विषयः । १ अध्याये, धर्म्मशुश्रूषया समवेतैः सार्द्धं महर्षिभिर्व्यासस्य पराशरसमीपगमनपूर्व्वकं तद्विषयिणी जिज्ञासा । अथ पराशरस्य संक्षेपेण चतुर्युगधर्म्मकथनं । वेदानां अपौरुषेयत्वकथनं । आर्य्यदेशम्लेच्छदेशादिनिरूपणञ्च ।

२ अध्याये, सन्ध्या-स्नान-जप-देवता-वैश्वदेव-आतिथ्यरूपषट्कर्म्मनिरूपणं । तत्र विशेषेण सन्ध्याविधिकथनं । तत्कालकथनादिकञ्च । अथ मान्त्र-पार्थिव-आग्नेय-वायव्य-दिव्य-वारुण-

मानसभेदात् सप्तविधस्नानविधिकथनं। स्नानयोग्यसलिलनद्यादिनिरूपणं। वारुणस्नानक्रमकथनं। वस्त्रधारणविधिकथनं। तर्पणविधिकथनं। पैत्र्यब्राह्मदैवतीर्थादिनिरूपणं। जपविधिकथनं। प्रणवस्वरूपनिरूपणं। जपमालाविवेचनं। प्रत्यक्षरं गायत्र्याः माहात्म्यादिकथनं।

३ अध्याये,—देवपूजाविधिकथनं, तत्र जले, वह्नौ, हृदये, सूर्य्ये, स्थण्डिले, प्रतिमायाञ्च तदर्च्चनविधानकथनं। तत्र अधिकारभेदेन आलम्बनभेदकथनञ्च। विशेषतोविष्णुपूजाविधिकथनं। वैश्वदेवविधिकथनं। आतिथ्यविधिकथनं। ब्राह्मणादिचातुर्वर्ण्यधर्म्मकथनं। विशेषेण गार्हस्थ्यधर्म्मनिरूपणं। तत्र हलवाहनगोदोहनादिविधिकथनं। कृषिवृत्तिसमाश्रितस्य ब्राह्मणस्य धर्म्मनिरूपणं। गोमाहात्म्यादिकथनं। गोसेवामाहात्म्यादिकथनं। हलादिनिर्म्माणविधिकथनं। अमावस्यायां वृक्षादिच्छेदनादिनिषेधः। अमावस्यायां रजकाय वस्त्रदानादिनिषेधकथनं। धान्यादिवपने विधिविशेषकथनं। कालविशेषे भूमिविशेषे च शस्यादिवपनादिविधिकथनं। कृषिशुद्धिनिरूपणं।

४ अध्याये,—दैवाद्यष्टविधिविवाहनिरूपणं। पुरुषपरीक्षाकथनं। कन्यावरयोः गुणदोषनिरूपणं। स्त्रीणां सम्मानकर्त्तव्यतानिरूपणं। पातिव्रत्यधर्म्मादिनिरूपणं। अधिवेदनकालादिनिरूपणं। पञ्चसूनानिरूपणं। ब्रह्मयज्ञादिपञ्चयज्ञनिरूपणं। प्राणाग्निहोत्रविधिः। ब्रह्मविद्यानिरूपणं। प्राणायामविधिकथनं। आपोशानादिविधिकथनं। आधानविधिकथनं। दशविधसंस्कारादिकालकथनं। मुञ्जोपवीतादिनिरूपणं। विद्यास्नानादिनिरूपणं। व्रात्यनिरूपणं। स्त्रीपुरुषधर्म्मकथनं। पुत्रमाहात्म्यकथनं। गयायां पुत्रकर्त्तृकपिण्डदानावश्यकताकथनं। कुलाचारदेशाचारयोर्धर्म्ममूलकथनं। शौचाचारमाहात्म्यकथनं। प्रतिग्रहादिविधिकथनं। भक्ष्याभक्ष्यकथनं। द्रव्यादिशुद्धिनिरूपणं। अनध्यायकालादिनिरूपणं।

५ अध्याये,—श्राद्धपात्रयोग्यब्राह्मणलक्षणादिकथनं। श्राद्धपूर्व्वदिने ब्राह्मणनिमन्त्रणविधिकथनं। श्राद्धाधिकारिनिरूपणं। आमश्राद्धविधिकथनं। सामान्यतः श्राद्धकालादिनिरूपणं। तत्र पत्रपुष्पधूपादिविवेचनं। पार्व्वणसपिण्डीकरणादिविधिकथनं। श्राद्धे दानयोग्यानि फलमूलादीनि। स्थालीपाकविधिकथनं। मघाश्राद्धादिविधिकथनं। दन्तिशृङ्गिव्यालादिहतानाम् आत्मघातिनाञ्च मरणात् षण्मासोत्तरं नारायणबलिं विधाय श्राद्धादिकरणविधानं। कुशनिरूपणं। विशेषेण औरसादिद्वादशपुत्राणां जात्यनुसारेण श्राद्धाद्यधिकारकथनञ्च।

६ अध्याये,—अशौचनिरूपणं। जननमरणयोः शुद्धिभेदकथनं। दाहविधिकथनं। क्वचिदशौचाभावकथनं।

७ अध्याये,—विस्तरेण प्रायश्चित्तविधिनिरूपणं। तत्र द्वादशवार्षिकादिव्रतादिप्रक्रियाकीर्त्तनं। तदनुकल्पविधानञ्च। द्रव्यशुद्धिकथनं।

८ अध्याये,—विस्तरतोदानविधिकथनं। तत्र तिलधेनुहेमधेनुप्रभृतिमहादानविधिकथनञ्च। अथ मासतिथिनक्षत्रादिविशेषे दानविशेषविधिकथनं।

९ अध्याये,— विविधशान्तिविधिकथनं। तत्र विनायकशान्तिविधानं। ग्रहशान्तिविधिकथनं। अद्भुतशान्तिविधिकथनं। तत्र अद्भुतनिरूपणञ्च। रुद्रशान्तिविधिकथनं। तड़ागाद्युत्सर्गविधिकथनं। लक्षहोमविधिकथनं। कोटिहोमविधिकथनं। तत्र कुण्डलक्षणादिनिरूपणञ्च। अथ पुत्रकामनया पुरुषसूक्तविधिः कर्त्तव्य इति तद्विधानकथनं।

१० अध्याये,—राजधर्म्मनिरूपणं। तत्र सन्धिविग्रहादिविधिनिरूपणं। दण्ड्यादण्ड्यनिरूपणं। प्रजापालनविधिकथनं। वानप्रस्थधर्म्मकथनं।

११ अध्याये,—ब्रह्मचारि-गृहस्थ-वानप्रस्थ-भिक्षुकाणामवान्तरभेदनिरूपणं।

१२ अध्याये,—योगाभ्यासविधिनिरूपणं। तत्र ध्यानयोग-कर्म्मयोग-ज्ञानयोग-निरूपणं। कालचक्षणादिकथनञ्च।

No. 2295 कणादसंहिता, (नाड़ीपरीक्षाप्रकरणम्)। Substance, country-made paper, 15 × 4 inches. Folia, 13. Lines, 10 on a page. Extent, 422 ślokas. Character, Bengali. Date, ? Place of deposit, Deoghar, the family physician of the head Páṇḍá. Appearance, new. Verse. Incorrect.

Kanáda-sañhitá. A treatise on pathology and medicine. By Kanáda. The codex contains only the chapter on the pulse as an index to disease and when its indications imply approaching death. It is followed by a chapter on the tongue, but it is not complete.

Beginning. यद्वक्त्रेभ्यः पञ्चसंख्यागतेभ्यो-

वेदा जाता ऋग्यजुःसामरूपाः।
आयुर्व्वेदोऽथर्व्ववेदस्य तस्मिन्
आस्तां शम्भो श्रीकणादस्य भक्तिः॥
आस्ते वेदः पञ्चमोवैद्यकाख्यो-
वेत्ता कश्चित्तस्य नास्ते महेशात्।
तस्माज्ज्ञाताध्येत तस्मात्पुराणात्
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रं॥
प्रथमे नाड़िकाज्ञानं द्वितीये रोगनिर्णयः।
तृतीये च कषायौषधञ्चतुर्थे पारदादिकं।
पञ्चमे तु महाविद्यारसजारणमारणं॥ इत्यादि।

End. दिनैकं जीवितं तस्य द्वितीये मरणं ध्रुवं।

इति नाड़ीपरीक्षा।

Colophon. इति कणादसंहितायां नाड़ीपरीक्षाप्रकरणं।
(इतःपरं जिह्वापरीक्षायाः कियत्यः पङ्क्तयः सन्ति।)

विषयः। सर्व्वेषु रोगेषु नाड़ीनां गतिविशेषेण साध्यासाध्यादिपरिज्ञानविधिनिरूपणं।

No. 2296. श्लोकवार्त्तिकम्। Substance, country-made paper, 14 × 4 inches. Folia, 82. Lines, 11 on a page. Extent, 3,361 ślokas. Character, Nágara. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Míśra. Appearance, fresh. Verse. Incorrect.

Mimáñsá-śloka-vártika or simply **S'loka-vártika.** A metrical exposition of the Mimáñs'á Aphorisms of Jaimini, noticing prominently the different doctrines therein adverted to. By Kumárila Bhaṭṭa. The doctrines noticed are Nirálamba, S'únyaváda, Pratakshaváda, S'abdaváda, Abhávaprámáṇyaváda, Chitrákshepa, Sambandhákshepa, Sphoṭaváda, A'kritiváda, Apohaváda, A'tmaváda, &c. All these topics are taken from the first section of the first chapter of Jaimini's work. The work is looked upon as an introduction to the Tantra-vártika.

Beginning. विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे॥
अभिवन्द्य गुरूनादौ शिष्यधीपद्मिनीरवीन्।
तत्प्रसादात् करिष्येऽहं मीमांसाश्लोकवार्त्तिकं॥
तद्विद्वांसोऽनुगृह्णन्तु चित्तस्रोतैः प्रसादिभिः।
सन्तः प्रणयिवाक्यानि गृह्णन्ति ह्यनसूयवः॥
न चात्रातीव कर्त्तव्यं दोषदृष्टिपरं मनः॥
दोषोह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते॥
कुतोवा गृह्यते दोषं सूरयोमद्विधोक्तिषु।
नेष्यते यः परस्थोऽपि स स्वयं गृह्यते कथं॥
निर्द्दोषलैकवाक्यत्वं क्व वा लोकस्य दृश्यते।
सापवादा यतः केचिन्मोक्षस्वर्गावपि प्रति॥
आगमप्रवणश्चाहं नापवाद्यः स्खलन्नपि।
नहि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते॥ इत्यादि।

End. इति प्रमाणत्वमिदं प्रसिद्धं
युक्त्येह धर्मं प्रति चोदनायाः
ऊतः परन्तु प्रविभज्य वेदं ॥
चेषा ततोवक्ष्यति यस्य योऽयः ॥

Colophon इति भट्टकुमारिलकृते मीमांसाश्लोकवार्त्तिके प्रथमाध्यायस्य प्रथमः पादः ।

विषयः । जैमिनिसूत्रतर्कपादीयशावरभाष्यस्य व्याख्यानं । तत्र विशेषेण निरालम्बनकथनं । शून्यवादः । प्रत्यक्षादिवादः । शब्दवादः । अभावप्रामाण्यवादः । चित्राक्षेपः । सम्बन्धाक्षेपः । स्फोटवादः । आकृतिवादः । अपोहवादः । सम्बन्धाक्षेपपरिहारादिकथनं । चित्रापरिहारः । आत्मवादादिकथनञ्च ।

No. 2297. तन्त्रवार्त्तिकम् । Substance, country-made paper, 14 × 5 inches. Folia, 256. Lines, 8-9-10 on a page. Extent, 6,024 ślokas. Character, Tailaṅga. Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbháṅgá, Mímáñsaka Chitradhara Miśra. Appearance, fresh. Prose. Generally correct.

Tantra-vártika. A prose commentary on the Mímáñsá Aphorisms of Jaimini. By Kumárila Bhaṭṭa. This begins with the second section of the first chapter and extends to the close of the seventh chapter of the text. This along with the *S'loka-vártika* and a few others gives a running dissertation on the whole of Jaimini's work.

Mr. Hall gives the following account of this work :—"The first four books of the present work bear, collectively, the titles of *Tantra-ṭíká*, *Mímáñsá-bháshya-vártika*, *Mímáñsá-vártika*, and *Guru-vákya-leśa-saṅgraha*. The last eight books are called, as an aggregate, *Ṭub-dushi*, *Ṭup-ṭíká*, and *Laghu-vártika*. If there be any general name for Nos. III and VII, it seems to be *Sábara-bháshya-vártika*. Most of this is doubtful and sufficiently improbable; but it is the result of a long investigation by the best paṇḍits of the Benares College. * * * *

"The author of the *Tantra-chúḍámaṇi*, or Kṛishṇa Deva, asserts that *vártika* is the common name of five separate works of Kumárila: the *Bṛihaṭ-ṭíká*, *Madhyama-ṭíká*, *Káriká*, *Tantra-ṭíká*, and *Ṭup-ṭíká*; these compositions diminishing as to size from first to last in the order in which their appellations are here arranged. The same authority says that *Tantra-vártika* is another name for *Tantra-ṭíká* and that the *Ṭup-*

ṭíká is likewise denominated *Tantra-ratna*. Krishṇa Deva further alleges that the *vártika* has been annotated by Bhavadeva, Ambeka, Párthsárathí, Somes'vara, the author of the *Páráyaṇa*, and Paritosha." *Contributions*, p. 170.

Beginning. आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते।

सिद्धप्रमाणभावस्य धर्म्मे वेदस्य सर्व्वशः॥

विध्यर्थवादमन्त्राणामुपयोगोऽधुनोच्यते।

सामान्यतः सिद्धे प्रामाण्येऽधुना विभज्य विनियोगः प्रतिपाद्यते। इत्यादि॥

End. मुख्यानुग्रहे मुख्यस्य प्रायणीयस्य नामधेयातिदेशेन ज्योतिष्टोमधर्म्मप्राप्ते-र्द्वादशोपसद्दर्शनं नावकल्पते।

तस्माद्दैकाह्निकोधर्म्म एकाहेषु प्रवर्त्तते।

प्रत्यक्षं नामधेयं हि चोदकाद्बलवत्तरम्॥

Colophon. इति श्रीभट्टकुमारिलस्वामिविरचिते तन्त्रवार्त्तिके सप्तमोऽध्यायः समाप्तः॥

विषयः। जैमिनिसूत्रशावरभाष्यस्य अर्थवादपादादारभ्य सप्तमाध्यायपर्य्यन्तं व्याख्यानम्। तर्कपादवार्त्तिकन्तु श्लोकवार्त्तिकनाम्ना विख्यातमिति ज्ञेयं।

No. 2298. तन्त्ररत्नम्। Substance, country-made paper, 11 × 5 inches. Folia, 285. Lines, 8 on a page. Extent, 8,835 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavkágrám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, new. Prose. Correct.

Tantra-ratna. A gloss by the author on his own Tantra-vátika. (No. 2297.)

Beginning. अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा। पूर्व्वाध्याये शेषपर्य्यायमिदमर्थमेव चिन्तितं। इहापि क्रतुपुरुषेदमर्थमेव चिन्त्यतां इति न लक्षणभेदः स्यादत आह,—तृतीयेनाध्यायेन अवधृते शेषत्वे कः क्रत्वर्थः कः पुरुषार्थ इति चिन्त्यत इति सम्बन्धः। इत्यादि।

End. इति हविषोऽविनाशदर्शनात् क्रतुवैगुण्यमेव दर्शितं। लिङ्गदर्शनानि च ब्राह्मणानामिदं हविरित्येवमादीनि॥

आर्त्विज्यं न भवेत्कर्म्म स्वतः क्षत्रियवैश्ययोः।

ब्राह्मणानान्तु विदुषामार्त्विज्यं स्यादिति श्रुतं॥

Colophon. इत्युपाध्यायश्रीपार्थसारथिमिश्रविरचिते तन्त्ररत्ने द्वादशाध्यायस्य चतुर्थपादः। अध्यायस्य समाप्तः।

विषयः। भट्टकुमारिलकृततन्त्रवार्त्तिकस्य व्याख्यानम्।

No. 2299. परमलघुमञ्जूषा । Substance, country-made paper, 13 × 4 inches. Folia, 18. Lines, 7 on a page. Extent, 409 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darhháñgá, Mímáñsaka Chitradhara Miśra. Appearance, new. Prose Correct.

Paramalaghu-maṇjúshá. An epitome of his own Vyákaraṇa-siddhánta-maṇjúshá grammar, giving briefly the philosophy and uses of the case affixes. By Náges'a Bhaṭṭa. The large text has not yet been met with, and the abridgment is generally called Maṇjúshá simply. (*cf.* My Catalogue of Sanskrit Grammars, p. 89.)

Beginning. नत्वा साम्बं शिवं शान्तं बालानां बोधहेतवे ।
परमलघुमञ्जूषा नागेशेन वितन्यते ॥
अथ कारकाणि निरूप्यन्ते ।
कर्त्ता कर्म्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ॥
तत्र क्रियानिष्पादकत्वं कारकत्वं । इत्यादि ।

End. विशिष्यार्थवाचकान्नामार्थत्वाभावान्न कदाचिदुत्पत्तिरित्यलं ॥

Colophon. इति श्रीमहामहोपाध्यायनागेशभट्टकृता परमलघुमञ्जूषा समाप्ता ॥

विषयः । कारकार्थस्वरूपादिविवेचनं ।

No. 2300. मीमांसाकौस्तुभः । Substance, country-made paper, 12 × 4½ inches. Folia, 97. Lines, 11 on a page. Extent, 2,970 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavka-grám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra; another copy at Calcutta, Library of the Asiatic Society of Bengal. Appearance, new. Prose. Correct.

Mímáñsá-kaustubha. An exposition of the Mímáñsá doctrine in the form of comments on the aphorisms of Jaimini, with occasional interpretations of the words of the aphorisms. By Khaṇḍadeva, son of Rudradeva. The codex is imperfect, commencing with the second section of the first chapter and ending with that chapter. The Asiatic Society's copy is, likewise, incomplete, containing only parts of the first two chapters. A complete copy has not yet been met with.

Beginning. विघ्नध्वान्तनिवारणैकतरणिर्भक्तैकचिन्तामणि-

विद्याकाननगाहनैकसरणिर्म्मैथिलभूषामणिः ।
भूयादेष कुतर्ककर्कशधियां दर्पापहर्त्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः ॥
वृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
मधित्तरङ्गचारी भूयान्नृत्यप्रियः हरिः
शब्दबोधतरङ्गा विद्यागङ्गोत्तमाङ्गेऽस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्त्यै ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । अत्र सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वं । वायुर्वै क्षेपिष्ठा देवतेत्यादयोऽर्थवादा धर्म्माधर्म्मयोः प्रमाणं । इत्यादि ।

End. धर्म्मे प्रमाणमेतान्युक्तानि अथ तस्य भेदोक्तिः ।
मीमांसाम्बुनिधिं प्रमथ्य विविधैर्न्यायोच्चयैर्निर्ज्जरैः
कृत्वा जैमिनिसूत्रमन्दरमथुं वेदं तथा वासुकिं ।
यद्धालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्योमणिः ॥
श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभ इति प्रथमाध्याये चतुर्थोऽङ्घ्रिः ॥

Colophon. इति श्रीमत्पूर्व्वोत्तरमीमांसापारावारपारीणधुरीणश्रीरुद्रदेवसूनोः खण्डदेवस्य कृतौ मीमांसाकौस्तुभे प्रथमाध्यायस्य चतुर्थः पादः ।

विषयः । मीमांसासूत्रमवलम्ब्य विशदरूपेण सविस्तरं मीमांसादर्शनप्रतिपाद्यानामर्थानामवधारणं ।

No. 2301. काशिका । Substance, country-made paper, 13 × 4 inches. Folia, 507. Lines, 13 on a page. Extent, 28,333 ślokas. Character, Nágara. Date, Sm. 1653. Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, old. Prose. Correct.

Káśiká. A commentary on the S'loka-vártika of Bhaṭṭa Kumárila (No. 2296). By Sucharita Mis'ra. This quite distinct from the work of the same name by Vaidyanátha Páyaguṇḍá, which is a commentary on the grammatical work called *Paribháshendu-śekhara*.

Beginning. वार्त्तिककारोवार्त्तिकारम्भे शिष्टाचारमनुविदधानोमङ्गलं तावत्करोति विशुद्धेति । दृष्टा हि शिष्टानां प्रवृत्तिः सर्व्वकार्य्येषु मङ्गलपूर्व्विका । मङ्गलञ्च देवतास्तुतिनमस्कारादि—इत्यादि ।

End. कृत्स्नस्याध्यायस्य प्रमाणलक्षणोपपत्तिं। तथाचोक्तं। चोदनासूत्रनिर्दिष्टो· यः प्रमाणपरिग्रहः। स प्रकारः स आद्येन लक्षणेन प्रपञ्चित इति।

Colophon. इत्युपाध्यायसुचरितमिश्रकृतौ काशिकायां वेदाधिकरणं समाप्तं। समाप्ता चेयं काशिकाटीका।

हरनेत्राग्निषड्भूमिमिते विक्रमभूभुजः।
शकेऽब्दे + + + इषे शुक्ले नागतिथावदः॥
काशिकापुस्तकं काश्यां भट्टमाधवसूनुना।
स्वपाठार्थं पटुधिया रघुनाथेन पूरितं॥

विषयः। भट्टकुमारिलेन मीमांसासूत्रतर्कपादीयशावरभाष्यस्य पद्येन या श्लोकवार्त्तिकाभिधेया टीका कृता तद्व्याख्यानम्।

No. 2302. मञ्जूषाकुञ्चिका। Substance, country-made paper, 14 × 4 inches. Folia, 104. Lines, 7 on a page. Extent, 2,524 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbhangá, Mímáñsaka Chitradhara Miśra. Appearance, new. Prose. Correct.

Manjúshá-kunchiká. A key to the Vaiyákaraṇa-manjúshá of Náges'a Bhaṭṭa. By Krishṇa Mis'ra.

Beginning. मञ्जूषाकुञ्चिकाशिल्पशाब्दब्रह्मसमन्वयः।
दिश दिशेति दिश्यान्तः शर्म्म शाश्वतिकं परं॥

नागेशेनेति। भटतीति भट्टः वाग्मी भट परिभाषणे तन् प्रत्ययः मज्जतीति मञ्जूषा मस्जेर्म्रम् चेत्यूषन् - इत्यादि।

End. द्रव्यसंस्कारकर्म्मत्वं गुणत्वमितिसिद्धान्तात्। एतेन दृष्टोपकारजनकत्वाभावात् सम्मार्ज्जनस्य प्राधान्यमित्यपास्तमिति।

Colophon. (इतः परं समाप्तिसूचकवाक्यं नास्ति।)

विषयः। नागेशभट्टकृतवैयाकरणमञ्जूषाव्याख्यानम्।

No. 2303. आचारचन्द्रिका। Substance, country-made paper, 16 × 4 inches. Folia, 90. Lines, 8 on a page. Extent, 1,627 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, decayed. Prose and verse. Correct.

A'chára-chandriká. A digest of the Smṛiti rules regarding A'chára or duty. By Ratnes'vara Mis'ra.

Beginning. वन्दे सीतापतिं रामं स्वात्मारामाभिवन्दितं।
दीक्षितं रणयज्ञेषु विबुधानन्ददायिषु॥
अथाचारप्रभवोधर्म्म इत्युक्तेराचारस्य धर्म्मकारणतया स एवादौ विविच्यते। तत्र मनुः। ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयन्। इत्यादि।

End. चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा।
पर्व्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च॥ इति॥

Colophon. इति महोपाध्यायसन्मिश्रश्रीरत्नेश्वरविरचिताचारचन्द्रिका सम्पूर्णा॥

विषयः। सुप्तोत्थितस्य नियमकथनं। मूत्रपुरीषोत्सर्गविधिः। तत्र मृत्तिकाग्रहणसंख्याकथनं। आचमनस्वरूपविधिकथनं। प्रौढ़पादलक्षणादिकथनं। द्विराचमननिमित्तकथनं। उच्छिष्टस्पर्शे आचमनादिकथनं। दन्तधावनविधिः। प्रातःस्नानादिविधिः प्रातःसन्ध्यानियमकथनं। त्रिविधस्नानविधिः। शिवनिर्म्माल्यस्पर्शनिषेधः। अनुदकमूत्रपुरीषकरणे प्रायश्चित्तं। सन्ध्योपासनविधिः। सन्ध्याकालपरिमाणं। पवित्रधारणप्राणायामतर्पणादिविधिः। देवपूजाविधिः। शिवलिङ्गमहिमादिकथनं। वैश्वदेवविधिः। पञ्चमहायज्ञविधिः। भिक्षादानादिविधिः। अतिथिपूजादिविधिः। भोजनविधिः। शयनविधिः। दारोपयामविधिः। पर्व्वनिरूपणञ्च।

No. 2304. वैद्यनाथमाहात्म्यम्। Substance, foolscap paper, 14 × 3½ inches. Folia, 62. Lines, 7 on a page. Extent, 987 ślokas. Character, Nágara. Date, Sm. 1929. Place of deposit, Deoghara, Kamalalochana Jhá. Appearance, new. Verse. Incorrect.

Vaidyanátha-máhátmya. An account of the Lingam of Vaidyanátha at Deoghar, in the Sántal Pargannah. It professes to be an extract from the Pátála-khaṇḍa of the Padma-puráṇa. For remarks on the authenticity of this work see my paper on the temples of Deoghar in the Journal of the Asiatic Society of Bengal, for 1883.

Beginning. आनन्दपूर्णहृदयः सदयः सर्व्वजन्तुषु।
वैद्यनाथोजगद्वन्द्योमय्यस्तु किल दक्षिणः॥
पुरा देवेन्द्रदर्पस्य दलकोरावणोऽसुरः।
यमाराध्य विमुक्तोऽभूत् तं नमामि महेश्वरं॥
पार्व्वत्युवाच।

प्राणेश वैद्यनाथस्य माहात्म्यं वद मां प्रति।
लोकानामुपकाराय यदि श्रद्धा मयि प्रिय। इत्यादि।

End. स्तुतिपाठं ततः कुर्य्याद्ब्राह्मणान् भोजयेत् ततः।
स्वयम्भुवापि देवेशि अनुज्ञाप्य+ ब्राह्मणान्।
तदा फलमवाप्नोति पुराणे कथितं शिवे॥

Colophon. इति पद्मपुराणे पातालखण्डे वैद्यनाथमाहात्म्ये अष्टमोऽध्यायः।
संवत् १९२९।

विषयः। वैद्यनाथस्य माहात्म्यादिकथनं। तत्र रावणस्य कैलासात् शिवलिङ्गानयनादिवृत्तान्तवर्णनं। तस्य मूत्रपीड़ादिवृत्तान्तकथनं। शिवगङ्गाचन्द्रकूपादीनामुत्पत्तिकथनं। तपोवनादिमाहात्म्यकीर्त्तनं। वैद्यनाथस्थदेवदेवीनां माहात्म्यादिकथनं। षोड़शोपचारेण वैद्यनाथस्य पूजाविधानकथनं। तत्र मन्त्रादिकथनञ्च। काश्यामपि वैद्यनाथक्षेत्रस्य माहात्म्यकीर्त्तनं।

No. 2305. वीरविरुदम्। Substance, country-made paper, 14 × 3½ inches. Folia, 12. Lines, 4 on a page. Extent, 132 ślokas. Character. Maithili. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsáka Chitradhara Miśra. Appearance, fresh. Verse. Incorrect.

Víraviruda. A poem in praise of Kṛishṇa as the supreme divinity. By Chandradatta.

Beginning. विमलाजिनवसने सुविकटदशने चञ्चलरसने भीमरवे।
करधृतकरवाले, रणविकराले नगरबाले ललितशिवे॥
मधुरस्मितहासिनि शम्भुविलासिनि गिरिवरवासिनि मयि सकलं।
सुरवैरिविदारिणि खगवरचारिणि मङ्गलकारिणि कुरु कुशलं॥
भूभारोद्धरणाय भूसुरसुरत्राणाय भूमितले
ब्रह्मेन्द्रामरवृन्दवन्दितपदे वंशे प्रशंस्ये यदोः।
त्वय्याविर्भवति प्रभौ विलसति ब्रह्माण्डभाण्डोदरे
चण्डीभर्त्तुरकाण्डताण्डवविधौ शङ्खध्वनिः पातु माम्॥
जय घनसुन्दर नमितपुरन्दरनन्दितचरणतलागतनिजशरणागतवन्दित—इत्यादि।

End. जय जय दितिसुतलक्षयक्षविक्षेपविधायकपरजन + + फलदानदायकशायककान्तकलिका॥

Colophon. इति वीरविरुदं चन्द्रदत्तनिर्म्मितं।
श्रीकृष्णस्य स्तोत्रव्याख्यानरूपगणादिमाहात्म्यवर्णनं।

No. 2306. वीरविरुदटीका । Substance, country-made paper, 14 × 3 inches. Folia, 10. Lines, 6 on a page. Extent, 217 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, fresh. Prose. Incorrect.

Víraviruda-ṭíká. A commentary on the poem noticed under the next preceding No. By Chandradatta, the author of the poem.

Beginning. प्रणम्य हरिपादाब्जं जानकीजन्मभूमिभूः ।
चन्द्रदत्तः स्वरचितां व्याचष्टे विरुदावलीं ॥
चिकीर्षितग्रन्थनिर्व्विघ्नसिद्ध्यर्थं स्वेष्टदेवताप्रार्थनरूपं मङ्गलमाचरति विमलेति । इत्यादि ।

End. विकलं दानं यस्य तस्य दानस्य संदायकः दाता सायकोयस्य ।

विषयः । निजकृतवीरविरुदस्य व्याख्यानम् ।

No. 2307. तर्कपल्लवः । Substance, country-made paper, 14 × 4 inches. Folia, 90. Lines, 12 on a page. Extent. 3,871 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭavká-grám, Post Delsiñsarái, Zíllá, Darbháñgá, Mimáñsaka Chitradhara Miśra. Appearance, fresh. Prose. Correct.

Tarka-pallava. An epitome of the Nyáya system of inference, (*Anumána*). The codex is incomplete, and the author's name cannot be made out.

Beginning. वावदूकयितुं मूकान् मूकीकर्तुञ्च वाग्मिनं ।
गौरीनाथेन सुधिया तायते तर्कपल्लवः ॥
ज्ञानं तावद्द्विविधं । अणुभवः स्मृतिश्च । तत्रानुभवस्तु द्वा प्रत्यक्षानुमित्युपमितिशाब्दभेदात् तत्र प्रत्यक्षप्रमापि षड्विधा । इत्यादि ।

End. न च कर्षकादुत्पन्नमङ्कुरमित्यादिप्रतीतिबलात् कर्तृजन्यत्वं तत्र सेत्स्यतीति वाच्यं एतादृशप्रतीतेरभावात् । इति ।

Colophon. इतःपरं लिप्यभावात् परिसमाप्तिसूचकवाक्यं नास्ति ।

विषयः । प्रत्यक्षानुमानोपमानशाब्दप्रमाणप्रपञ्चनं । पुस्तकेऽस्मिन् अनुमानप्रकरण यावदस्ति । अत्र तु अतीवसूक्ष्मानुसन्धानेन प्राचीननवीनमतयोः सारासारं विविच्य समुद्भाविताऽर्थोऽस्तीति ज्ञेयम् ।

No. 2308. शिवस्तवटीका। Substance, country-made paper, 13 × 3 inches. Folia, 32. Lines, 7 on a page. Extent, 827 ślokas. Character, Bengali. Date, Sk. 1678. Place of deposit, Iṭákumárí-grám, Zillá Ruṅgpur. Vaikuṇṭheśvara Bhaṭṭáchárya. Appearance, old. Prose. Correct.

S'ivastava-ṭíká. A commentary on Pushpadanta's hymn to S'iva. By Rámajívana Tarkavágís'a. An English translation of the hymn occurs in the Journal of the Asiatic Society.

Beginning. शिवं प्रणम्य देवेशं चतुर्व्वर्गफलप्रदं।
पुष्पदन्तसमुद्गीतस्तवकाठिन्यविस्तरे॥
शैववैष्णवसौराणां परमाह्लादकारकं।
व्याख्यानयं प्रवक्ष्यामि विनिष्कृष्य विभाव्य च॥

ननु तन्महिम्नोऽवधिमजानन् कथं स्तवे प्रवृत्तः प्रवर्त्तकज्ञानाभावादिति स्वाधिकारतामात्मनः सूचयन् स्तौति महिम्न इति। इत्यादि।

End. तथा च वागदेवताया असाध्यं यत् तत् सुतरामन्येषामसाध्यमिति भावः। विष्णुपक्षे सूर्य्यपक्षेऽप्येवं बोध्यमिति संक्षेपः।

Colophon. इति श्रीरामजीवनतर्कवागीशकृता शिवस्तवटीका समाप्ता। शाकाब्दाः १६७८।

विषयः। पुष्पदन्तकृतस्य शिवमहिम्नः स्तोत्रस्य शिवपक्षे विष्णुपक्षे सूर्य्यपक्षेऽपि व्याख्यानम्।

No. 2309. व्रतोद्यापनकौमुदी। Substance, country-made paper, 16 × 4 inches. Folia, 88. Lines, 5 on a page. Extent, 1,576 ślokas. Character, Bengali. Date, ? Place of deposit, Iṭákumárí-grám, Zillá Ruṅgapur, Vaikuṇṭheśvara Bhaṭṭáchárya. Appearance, decayed. Prose and Verse. Incorrect.

Vratodyápana-kaumudí. A digest of the rules for the performance of optional fasts called Vratas. By Rámakṛishṇa. The work is founded principally on the Vrata-khaṇḍa of Hemádrí's Chaturvarga-chintámaṇi.

Beginning. प्रणम्य शारदां देवीं शरच्चन्द्रसमप्रभां।
क्रियते रामकृष्णेन व्रतोद्यापनकौमुदी॥
हेमाद्रिव्रतखण्डोक्तव्रतानि कानिचित् खलु।
समाहृतानि गौड़ेषु तानि वक्ष्यामि यत्नतः॥

अथ नियतसंकल्पविषयः कर्म्मविशेषोव्रतं। तच्च काम्यनित्यभेदेन द्विविधं। तत्र काम्यत्वं नाम फलापेक्षत्वं। इत्यादि।

End. इह लोके सुखं भुक्त्वा परे च त्रिदिवं व्रजेत्।
इति भविष्यपुराणे चौरपूर्णिमाव्रतं॥

Colpohon. इति श्रीरामकृष्णविरचिता व्रतोद्यापनकौमुदी समाप्ता।

विषयः। व्रतलक्षणादिकथनं। नित्यकाम्यभेदेन तस्य द्वैविध्यकथनं। व्रतारम्भकालनिरूपणं। मलमासादिनिरूपणं। अधिकारिनिरूपणं। व्रतिणां नियमकथनं। प्रतिष्ठाकालादिनिरूपणं। संकल्पादिवाक्यविवेचनं। प्रतिष्ठापद्धतिकथनं। सर्व्वेच व्रतानां विधानकथनं। प्रयोगकथनञ्च। प्रतिपदादिपञ्चदश्यन्ततिथिव्रतनिरूपणं। संक्रान्तिव्रतनिरूपणं। वारव्रतनिरूपणं। नक्षत्रव्रतनिरूपणं। प्रकीर्णकव्रतकथनञ्च।

No. 2310. विचारनिर्णयः। Substance, country-made paper, 15 × 3 inches. Folia, 46. Lines, 6 on a page. Extent, 1,104 ślokas. Character, Bengali. Date, Sk. 1663. Place of deposit, Iṭákumárí-grám, Zillá Ruṅgpur, Vaikuṇṭheśvara Bhaṭṭáchárya. Appearance, old. Prose and verse. Incorrect.

Vichára-nirṇaya. On judicature. By Gopála Nyáyapanchánana. This is a different and fuller recension of the work noticed under No. 2184, *ante* VI, p. 210.

Beginning. अथ विचारनिर्णयः। स विचारार्हवाक्यस्य संशयपूर्व्वपक्षोत्तरोपन्यासपूर्व्वकं यथार्थतात्पर्य्यनिश्चयात्मकः। तदुक्तं भट्टपादैः। विषयोविशयश्चैव पूर्व्वपक्षस्तथोत्तरं। निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं। इत्यादि।

End. एवं संवत्सररूपकालस्य वृद्धिनिमित्तकालविशेषस्यापि सहकारित्वेन संवत्सरमध्ये वृद्धिनिमित्तं विना कृते + + + + + प्रेतत्वविमुक्तिरिति कृतं पल्लवितेन।

Colophon. इति गोपालन्यायपञ्चाननविरचितोविचारनिर्णयः समाप्तः। शकाब्दाः १६६३।

विषयः। विचारलक्षणकथनप्रसङ्गेन अधिकरणस्वरूपनिरूपणं। यागलक्षणादिनिर्णयः। तिर्य्यगधिकरणनिरूपणं। देवतास्वरूपनिरूपणं। योगसिद्ध्यधिकरणनिरूपणं। सर्व्वशब्दार्थनिरूपणं। अर्थवादाधिकरणनिरूपणं। तत्र गुणवादानुवादादिस्वरूपकथनं। विधिस्वरूपादिविवेचनं। स्फ्यास्त्रिष्टाधिकरणादिस्वरूपकथनं। वैधहिंसाविवेचनं। दानस्वरूपादिनिरूपणं। स्तेयलक्षणादिकथनं। दत्ताप्रदानिकनिरूपणं। प्रसङ्गाद्ब्राह्मणादीनां नामस्वरूपनिरूपणं। देयद्रव्याणां

दवताकथयं। सम्प्रदानवाक्ये परस्मैपदात्मनेपदप्रयोगभेदविवेचनं। विरोधाधिकरणनिरूपणं। प्रतिग्रहलचणादिकथनं। दानफलकथनं। वृषोत्सर्गकालादिनिरूपणं। अशौचकृत्यकथनं। पूरकपिण्डदानादिविधिकथनं। प्रेतश्राद्धाधिकारिनिरूपणं। वृषोत्सर्गस्य यागत्वव्यवस्थापनं। वृषोत्सर्गविचारप्रसङ्गेन तद्दचिणाविवेचनं। वृषाङ्कादिनिर्णयः। होमलचणादिविवेचनं। कुण्डनिर्म्माणादिविधिकथनं। मलमासलचणादिविवेचनं। उपवासलचणादिविवेचनं। अनुकल्पादिस्वरूपविवेचनं। सपिण्डीकरणस्वरूपादिविवेचनञ्च।

No. 2311. वर्षकृत्यम्। Substance, country-made paper, 16 × 4, inches. Folia, 240. Lines, 6 on a page. Extent, 4,230 ślokas. Character, Bengali. Date, ? Place of deposit, Iṭákumárí-grám, Zillá Ruñgpur, Vaikuṇṭheśvara Bhaṭṭáchárya. Appearance, new. Prose and verse. Correct.

Varsha-kṛitya. A calendar of feasts, fasts, and ceremonies. By Rávana S'armá, Champati.

Beginnnig. प्रणम्य कमलाकान्तं वीक्ष्य प्राक् स्मृतिसङ्ग्रहान्।
श्रीमता शर्म्मणा साधु वर्षकृत्यं विधीयते॥

अथ संक्रान्तिनिरूपणं। अयने द्वे विषुवे द्वे चतस्रः षड़शीतयः। चतस्रोविष्णुपद्यश्च संक्रान्त्योद्वादश स्मृताः। इत्यादि।

End. ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणां।
सन्न्यासिनाञ्च गोमांससुरातुल्यं श्रुतौ श्रुतं॥
न कालनियमः कश्चित् कृष्णनामानुकीर्त्तनात्।
इति प्रकीर्णकं।
सच्चम्पहट्टिकुलपद्मविकाशभानः
श्रीमान् शर्म्मधरणीविवुधोत्तमेन।
व्याकारतर्कसुकृतागमकाव्यवारि-
धीन्दुना (?) परिसमाप्यत वर्षकृत्यं॥

Colophon. इति वर्षकृत्यं सम्पूर्णं।

विषयः। संक्रान्तिनिरूपणं। वैशाखादिषु द्वादशसु मासेषु प्रत्येकं कृत्यविधानकथनं। तत्र तत्र प्रत्येकं प्रयोगकथनञ्च। अथ धर्म्मघटव्रतविधिः। पिपीतकीद्वादशीव्रतविधिः। चम्पकचन्दनव्रतविधिः। सावित्रीव्रतविधिः। अम्बुवाचीविधिः। चातुर्म्मास्यव्रतविधिः। अशून्यशयनद्वितीयाव्रतविधिः। अघोरचतुर्द्दशीव्रतविधिः। मनसापूजाविधिः। अमावास्याव्रतविधिः। अनन्तव्रतविधिः। कुक्कुटीव्रतविधिः। दुर्व्वाष्टमीव्रतविधिः। तालनवमीव्रतविधिः। वीराष्टमीव्रतविधिः। कोजागरकृत्यविधिः। खञ्जनदर्शनविधिः। आकाशदीपप्रतिष्ठाविधिः। गोष्ठाष्टमीवि-

धिः । विष्णूत्थानविधिः । वकपञ्चकविधिः । प्रेतचतुर्द्दशीविधिः । उल्काादानादिविधिः । यूतप्रतिपद्विधिः । भ्रातृद्वितीयाविधिः । कार्त्तिकेयव्रतविधिः । नवान्नविधिः । दानद्वादशीव्रतविधिः । पाषाणचतुर्द्दशीव्रतविधिः । विधानचतुर्द्दशीव्रतविधिः । चन्द्रभागाव्रतविधिः । विभूतिद्वादशीव्रतविधिः । सर्व्वजयाव्रतविधिः । संसारफलत्यागविधिः । पार्व्वतीचतुर्थीव्रतविधिः । सन्तानद्वादशीव्रतविधिः । नारायणीद्वादशीव्रतविधिः । व्रतराजव्रतविधिः । दधिसंक्रान्तिव्रतविधिः । वरदाचतुर्थीविधिः । पञ्चमीव्रतविधिः । माकरीसप्तमीविधिः । भीष्माष्टमीविधिः । महानन्दाविधिः । वराहद्वादशीव्रतविधिः । रटन्तीचतुर्द्दशीविधिः । दोलयात्राविधिः । फलचतुर्द्दशीव्रतविधिः । शिवरात्रिव्रतविधिः । वारुणीविधिः । एकादश्या विधिः । तत्र नियमादिकथनं । तिलकादिविधिः । गीतामाहात्म्यकीर्त्तनं । वैष्णवस्य कृत्याकृत्यनिरूपणं । तुलसीमाहात्म्यकीर्त्तनं । द्वादशीनियमकथनं । शिवमाहात्म्यकथनं । रुद्राक्षमाहात्म्यं । वंशपौर्णमासीव्रतविधिः । बुधाष्टमीव्रतविधिः । शालग्रामदानविधिः । खण्डतिथिव्यवस्थाकथनं । अधिमासादिनिरूपणं । युगाद्याकथनं । मन्वन्तरादिकथनं । ग्रहणनिरूपणं । सूतिकाषष्ठीपूजाविधिः । शीतलापूजाविधिकथनञ्च ।

No. 2312. गीतगोविन्दमाधुरी । Substance, country-made paper, 16 × 4 inches. Folia, 48. Lines, 7 on a page. Extent, 1,006 ślokas. Character, Bengali. Date, ? Place of deposit, Khurshe-grám, Post Káliganj, Zillá Ruṅgpur, Rámadhana Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Gítagovinda-mádhurí. A commentary on the Gítagovinda of Jayadeva. By Rámatáraṇa Chúḍámaṇi.

Beginning. नवीननीरदश्यामं गोविन्दं नन्दनन्दनं ।
प्रणम्य क्रियते टीका गीतगोविन्दमाधुरी ॥

अथ सहृदयकुलशिरोमणिरुत्तमभवान् महाकविर्जयदेवः हरिभक्तिमाधुरीसमनुभवविधुराणां पामराणां श्मशानसदृशानि हृदयानि पवित्रयितुं गीतिव्याजेन भगवल्लीलावर्णनमुपक्रमते मेघैरिति ।

End. कविर्हि लोकोत्तरवर्णननिपुणः । अत्र हि प्रतिभैव परं निदानं । सा च प्रज्ञा नवनवोन्मेषशालिनी प्रतिभोच्यते इत्युक्तलक्षणा । उपजातिवृत्तं ।

Colophon. इति श्रीरामतारणचूड़ामणिकृतायां गीतगोविन्दमाधुर्य्यां टीकायां द्वादशः सर्गः समाप्तः ।

विषयः । जयदेवकृतगीतगोविन्दस्य व्याख्यानम् ।

NO. 2313. प्रायश्चित्तवारिधिः । Substance, country-made paper, 16 × 4 inches. Folia, 68. Lines, 6 on a page. Extent, 1,231 ślokas. Character, Bengali. Date, ? Place of deposit, Khurshe-grám, Post Kálíganja, Zillá Ruṅgpur, Rámadhana Bhaṭṭáchárya. Appearance, new. Prose and verse. Correct.

Práyaśchitta-váridhi. A summary of the rules for the performance of expiatory rites to avert the evil effects of sins. By Bhavánanda S'armá.

Beginning. नमस्कृत्य रमेशानं सच्चिदानन्दविग्रहं ।
क्रियते बालबोधाय प्रायश्चित्तस्य वारिधिः ॥

अथ प्रायश्चित्तस्वरूपं । तत्र पापक्षयमात्रसाधनत्वेन वेदबोधितं कर्म्म प्रायश्चित्तं क्वचित् गङ्गास्नानाश्वमेधादीनां पापक्षयमात्रसाधनत्वेन न प्रायश्चित्तत्वव्याघातः । इत्यादि ।

End. तत्र तत्र विश्वजिन्न्यायेन स्वर्गसाधनत्वमवसेयं । अधिकन्तु प्रायश्चित्तविवेकादौ द्रष्टव्यमिति ।

Colophon. इति श्रीभवानन्दशर्म्मकृतौ प्रायश्चित्तवारिधिः परिपूर्णः ।

विषयः । प्रायश्चित्तस्वरूपनिरूपणं । तत्र तार्किकरीत्या विविधमतोपन्यासपूर्व्वकं तत्र तत्र खण्डनं । धर्म्मस्वरूपविवेचनं । धर्म्मे प्रमाणानि । पापनिरूपणं । तत्र कारणकथनं । अतिपातकमहापातकादिलक्षणकथनं । मातृगमनादितुल्यत्वनिरूपणं । अतिपातकप्रायश्चित्तकथनं । महापातकप्रायश्चित्तकथनं । गोबधप्रायश्चित्तं । गोबधापराद्कथनं । अभक्ष्यभक्षणप्रायश्चित्तं । अगम्यागमनप्रायश्चित्तं । भोजनादिकाले मार्ज्जारादिस्पर्शनप्रायश्चित्तं । लशुनगृञ्जनादिभक्षणप्रायश्चित्तं । मत्स्यमांसादिभोजनप्रायश्चित्तं । भक्ष्याभक्ष्यद्रव्यकथनं । प्रकीर्णकप्रायश्चित्तकथनञ्च ।

No. 2314. तत्त्वचन्द्रिका । Substance, country-made paper, 16 × 4 inches. Folia, 28. Lines, 7—6 on a page. Extent, 567 ślokas. Character, Bengali. Date, ? Place of deposit, Khurshe-grám, Post Kálíganja, Zillá Ruṅgpur, Rámadhana Bhaṭṭáchárya. Appearance, old. Prose, Correct.

Tattva-chandriká. A summary of the adual Vedánta doctrine. By Mahádeva Sarasvatí, disciple of Sachchidánanda Sarasvatí.

Beginning. परात्मानं नमस्कृत्य सच्चिदानन्दविग्रहं ।
नमामि स्वगुरुं भक्त्या सच्चिदानन्दनामकं ॥

अथ आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति विधिस्तावदात्मश्रवणादौ जीवान् प्रवर्त्तयति । तत्र चिन्त्यते । इत्यादि ।

End. न स पुनरावर्त्तते इति श्रुत्या मुक्तस्यात्मनोनिरस्तसमस्तभेदज्ञानस्य मायातीतत्वात् कथं पुनरागमनं सम्भवतीति।

Colophon. इति श्रीपरमहंसपूज्यपादसच्चिदानन्दसरस्वतीपादपद्ममधुपश्रीमहादेवसरस्वतीविरचिता तत्त्वचन्द्रिका सम्पूर्णा।

विषयः। आत्मश्रवणादीनां विधेयतानिरूपणं। जीवात्मस्वरूपकथनं। अत्र चार्व्वाकबौद्धतार्किकादीनां मतखण्डनं। परात्मजीवात्मनोरभेदकथनं। सूक्ष्मदेहादिनिरूपणं। अविद्यानिरूपणं। मायानिरूपणं। जीवस्य ब्रह्मप्रतिबिम्बत्वकथनं। तुरीयहिरण्यगर्भादिचतुर्व्यूहकथनं। अध्यारोपापवादादिनिरूपणं। प्रमाणादिनिरूपणं। तत्र प्रत्यक्षानुमानादिलक्षणकथनं। जगत्सृष्टिविवेचनं। प्रपञ्चस्य मिथ्यात्वकथनं। पञ्चीकरणकथनं। जीवस्य उत्क्रान्त्यादिनिरूपणं। तत्त्वज्ञानकथनं। मोक्षनिरूपणञ्च।

NO. 2315. वैराग्यचन्द्रिका। Substance, country-made paper, 15 × 3⅓, inches. Folia, 16. Lines, 6 on a page. Extent, 303 ślokas. Character, Bengali. Date, Sk. 1702. Place of deposit, Khurshe-grám, Post Káliganja, Zillá Ruñgpur, Rámadhana Bhaṭṭáchárya. Appearance, new. Prose and verse. Correct.

Vairágya-chandriká. On asceticism as appropriate to Vaishṇavas. By Purushottamadása. The divinity invoked is Kṛishṇa.

Beginning. प्रणम्य गुरुपादाब्जं संशयध्वान्तनाशनं।
क्रियते वैष्णवप्रीत्यै रम्या वैराग्यचन्द्रिका॥

अथ यदहरेव विरज्येत् तदहरेव प्रव्रजेदितिश्रुत्या पुरुषः खलु वैराग्यान्मोक्षशास्त्रे प्रवर्त्तते वैराग्यञ्च, दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं। तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति।

End. गुरूणां पादयुगलकमलभ्रमरायितः।
वैराग्यचन्द्रिकां चक्रे दासः श्रीपुरुषोत्तमः॥

Colophon. इति समाप्तं। शकाब्दाः १७०२।

विषयः। वैराग्यस्वरूपादिकथनं। जीवस्वरूपकथनं। संसारस्य अनित्यत्वकथनं। वैराग्यसाधननिरूपणं। परापरभेदेन द्विविधवैराग्यकथनं। भगवान् नन्दनन्दन एव परब्रह्मशब्दवाच्य इति निरूपणं। सालोक्यादिपञ्चविधमुक्तिनिरूपणञ्च।

No. 2316. विल्वमङ्गलटीका । Substance, country-made paper, 15 × 3½ inches. Folia, 23. Lines, 6 on a page. Extent, 405 ślokas. Character, Bengali. Date, ? Place of deposit, Iṭákumárí-grám, Zillá Ruṅgpur, Paṇḍit Yádaveśvara Tarkaratna. Appearance, old. Prose. Incorrect.

Vilvamaṅgala-ṭíká. A commentary on a poem by Vilvamaṅgala in praise of Krishṇa. By Vidyálaṅkára. The author's personal name has not been made out; what is given is obviously a literary title.

Beginning. प्रथमपत्रं नास्ति। पद्मं रूपकत्वेन उदारगर्भगृहं यस्य सः। अन्यपदार्थे बहुव्रीहिसमासः। तं किम्भूतं गोधूलिधूसरशरीरं। इत्यादि।

End. अस्माभिः सदा तव पादपद्मं भावनीयं नान्यत् किञ्चिच्चिन्तनीयं। यद्यपि मायापाशनियन्त्रितोऽस्मि तथापि नान्योभावनीयः।

Colophon. इति विद्यालङ्कारविरचिता विल्वमङ्गलटीका समाप्ता।

विषयः। विल्वमङ्गलकृतविल्वमङ्गलाभिधानश्रीकृष्णस्तुतिकाव्यस्य व्याख्यानम्।

No. 2317. निर्द्धारणवादार्थः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 2. Lines, 6 on a page. Extent, 47 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍára, Zillá Ruṅgpur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Nirdháraṇa-vádártha. A logico-grammatical dissertation on the uses of the genitive and the locative cases. The name of the author is not given in the codex; it is probably a part of the work noticed under the next following work.

Beginning. ननु पुरुषाणां क्षत्रियः शूरतम इत्यादि निर्द्धारणस्थले कीदृगन्वयबोध इति चेत्। निर्द्धारणषष्ठ्यादिभेदाभेदस्थार्थः। इत्यादि।

End. आख्यातार्थे उद्देश्यतावच्छेदकताकान्वयबोधानङ्गीकारात्।

Colophon. इति निर्द्धारणवादार्थः समाप्तः।

विषयः। निर्द्धारणविहितयोः षष्ठीसप्तम्योरर्थनिरूपणं।

No. 2318. तदादिसर्व्वनामविचारः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 3. Lines, 6 on a page. Extent, 48 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍára, Zillá Ruṅgpur, Ráya Ramaṇimoh́ana Chaudhuri, Bahádur. Appearance, new. Prose. Correct.

Tadádi-sarvanáma-vichára. A logico-grammatical dissertation on pronouns. By Gadádhara.

Beginning. अथ तदादिसर्व्वनामविचारः। ननु तदादिसर्व्वनाम्नः केन रूपेण शक्तिः अत्र प्राहुः। सर्व्वनाम्नोबुद्धिस्थ एव शक्तिः। न चैवं येन रूपेण—इत्यादि।

End. घटपटादिनिष्ठा एकैवप्रकारतेति लाघवमिति प्राहुः।

Colophon. इति श्रीगदाधरकृततदादिसर्व्वनामविचारः समाप्तः।

विषयः। तदादिसर्व्वनामशब्दानां शक्तिनिरूपणं।

No. 2319. निर्द्धारणविचारः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 3. Lines, 6 on a page. Extent, 60 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍár, Zillá Ruṅgpur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Nirddháraṇa-vichára. A logico-grammatical dissertation on the uses of the genitive and the locative cases in definitions. By Gadádhara.

Beginning. अथ निर्द्धारणविचारः। नराणां चत्रियः शूरतम इत्यादौ षष्ठी निर्द्धारणे निर्द्धारणञ्च जात्यादिभिः समुदायादेकदेशस्य पृथक्करणं। इत्यादि।

End. पृथिवी गन्धवतीत्यादौ विशेष्यतावच्छेदकगन्धवत्त्वादेर्व्यभिचारितया कर्म्मधारयासाधुत्वात् षष्ठीसमासे निषेधसार्थक्योपपादनेऽपि न प्रतीकारः।

Colophon. इति श्रीगदाधरकृतोनिर्द्धारणविचारः समाप्तः।

विषयः। निर्द्धारणविहितयोः षष्ठीसप्तम्योरर्थविवेचनं।

No. 2320. सादृश्यवादः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 2. Lines, 6 on a page. Extent, 48 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍár, Zillá Ruṅgapur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Sádriśya-váda. A Nyáya dissertation on similitude. By Gadádhara.

Beginning. अथ सादृश्यवादः। सादृश्यञ्च तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वमिति मीमांसकाः। तत्र चन्द्रवन्मुखमित्यत्राव्याप्तिः। चन्द्रगताह्लादजनकत्वेऽपि चन्द्रत्वस्य मुखेऽसत्त्वात्। इत्यादि।

End. रामरावणयोर्युद्धं रामरावणयोरिव। इत्यादावभेदेऽपि सादृश्यं। तस्मात् क्वचित् सादृश्यं भेदगर्भमितिरीत्या समाधा कार्य्या ॥

Colophon. इति श्रीगदाधरकृतः सादृश्यवादः।

विषयः। साधर्म्म्यापरनामधेयस्य सादृश्यस्य स्वरूपविवेचनं।

No. 2321. नानार्थसन्दिग्धार्थविचारः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 4. Lines, 6 on a page. Extent, 85 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍár, Zillá Ruñgapur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Nánártha-sandigdhártha-vichára. A Nyáya dissertation on synonymes and their relations to each other. By Gadádhara.

Beginning. ननु नानार्थसन्दिग्धार्थयोः कोभेदः। नह्यनयोर्भेदमुपलभामहे। उभयोरर्थविशेषाप्रतिपत्तौ तुल्यत्वात् सत्यमस्त्येव भेदः। इत्यादि।

End. अन्यादयोऽपि नित्यं संप्रति यौगिका इत्यन्ये।

अत्रापेर्वाङ्गत्वादिति अपरे इति गौतममतं ॥

Colophon. इति श्रीगदाधरकृतोनानार्थसन्दिग्धार्थविचारः समाप्तः।

विषयः। नानार्थसन्दिग्धार्थयोरभेदवादं निरस्य तयोः स्वरूपादिविवेचनं।

No. 2322. साहित्यविचारः। Substance, country-made paper, 17 × 3½ inches. Folia, 3. Lines, 6 on a page. Extent, 70 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍár, Zillah Ruñgapur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Sáhitya-vichára. A Nyáya dissertation on the relation of rhetoric to logic. By S'ríkṛishṇa Tarkálañkára.

Beginning. ननु पित्रादीनां निरपेक्षाणां न देवतात्वं।

अथ श्राद्धममावस्यायां पितृभ्योदद्यादित्यादिगौतमवचने, पूर्व्वेद्युः ब्राह्मणान् सन्निपात्य इति वसिष्ठवचने बहुवचनात् साहित्यप्रतीतेः। इत्यादि।

End. निरुक्तसाहित्यस्य प्रत्येकं परिसमाप्ततया।

उभयसाधारण एकरूपत्वासम्भवादिति ॥

Colophon. इति श्रीकृष्णतर्कालङ्कारविरचितसाहित्यविचारः समाप्तः।

विषयः। साहित्यलक्षणविवेचनं।

No. 2323. त्वतलादिभावप्रत्ययविचारः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 4. Lines, 6 on a page. Extent, 72 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabhâṇḍár, Zillá Ruṅgapur, Ráya Ramanímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Tvataládibháva-pratyaya-vichára. A Nyáya dissertation in the uses and imports of affixes for the formation of abstract nouns. By Gadádhara.

Beginning. ननु त्वतलादिभावप्रत्ययस्य केन रूपेण शक्तिरिति चेदत्र प्राञ्चः। धर्म्मत्वरूपेण धर्म्म एव शक्तिर्लाघवात्। इत्यादि।

End. तादृशेतरत्वरूपेण पूर्व्वपदार्थविशिष्टोत्तरपदार्थावच्छेदकमेव कर्म्मधारयोत्तरभावप्रत्ययोबोधयति। नान्यसमभिव्याहारव्युत्पत्त्यैव द्रव्यत्वादेरप्रत्ययः।

Colophon. इति श्रीगदाधरकृतस्त्वतलादिभावप्रत्ययविचारः समाप्तः।

विषयः। त्वतलादिभावप्रत्ययानां शक्तिनिरूपणमुखेन अर्थनिरूपणं।

No. 2324. अनुकरणविचारः। Substance, country-made paper, 18 × 4 inches. Folia, 7. Lines, 9 on a page. Extent, 219 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Ruṅgpur, Kumára Mahimáranjana Ráya, Chaudhurí. Appearance, fresh. Prose. Generally correct.

Anukaraṇa-vichára. A Nyáya dissertation on onomatopoetic words which are not definable by grammatical rules. By Gadádhara.

Beginning. अथानुकरणं। अनुक्रियते उच्चार्य्यते यत् तदनुकरणं। तच्च द्विविधं शब्दानुकरणार्थानुकरणभेदात्। इत्यादि।

End. काले सप्तम्यन्त इत्यनुकृतं प्रथमार्थेऽपदमिति।

Colophon. इत्यनुकरणविचारः समाप्तः।

विषयः। अनुकरणस्वरूपनिरूपणं। अनुकार्य्यानुकरणयोर्भेदविवेचनं। प्रकृतिवदनुकरणमिति कातन्त्रसूत्रार्थनिरूपनञ्च।

No. 2325. गणेशपुराणं, पूर्व्वखण्डम, वा उपासनाखण्डम्। Substance, country-made yellow paper, 22 × 6 inches. Folia, 120. Lines, 8—9 on a page. Extent, 4,802 ślokas. Character, Nágara. Date, ? Place of deposit, Kákiníyá, Zillá Ruṅgpur, Kumár Mahimáranjana Ráya, Chaudhurí. Appearance, new. Verse. Incorrect.

Gaṇeśa-puráṇa. On the divinity of Gaṇesa, illustrated by a great number of traditions. Súta relates the Puráṇa at the request of the sages assembled at the Naimísha forest. An abstract of this work occurs in the Journal of the Bombay Branch of the Royal Asiatic Society. The codex comprises only the first part.

Beginning. नमस्तस्मै गणेशाय ब्रह्मविद्याप्रदायिने ।
यस्य संस्मायते नाम विघ्नसागरशोषणे ॥

ऋषय ऊचुः ।

सूत सूत महाप्राज्ञ वेदशास्त्रविशारदः ।
सर्व्वविद्यानिधे त्वत्तोवक्तान्यो नोपलभ्यते ॥
जन्मजन्मान्तरीयं नः स्थितं पुण्यं महत्तरं ।
तेन सन्दर्शनं जातं सर्व्वज्ञस्य सतस्तव ॥
वयं धन्यतमा लोके जीवितं नः सुजीवितं ।
पितरोवेदशास्त्राणि तपांस्याश्रम एव च ॥
अष्टादश पुराणानि विस्तराच्छ्रावितानि नः ।
अन्यान्यपि हि नः श्रोतुमिच्छास्ति द्विजसत्तम ॥
शैानकीये महासत्रे + + द्वादशवार्षिके ।
त्वत्कथामृतपानान्नोनान्यद्विश्रामकारणं ॥

सूत उवाच ।

साधु पृष्टं महाभागा भवद्भिः पुण्यकर्म्मभिः ।
साधूनां समचित्तानां मतिर्लोकोपकारिणी ॥
ममापि परितोषोऽस्ति कथानां कथने द्विजाः ।
अतोऽहं साधुवृत्तेभ्यः कथयिष्ये विशेषतः ॥
अन्यान्यपि पुराणानि वर्त्तन्तेऽष्टादशैव तु ।
गाणेशं नारसिंहञ्च नृसिंहादीन्यथापि च ॥
गणेशस्य पुराणं यत्तच्चादो कथयाम्यहं ।
दुर्ल्लभं श्रवणं यस्य मर्त्त्यलोके विशेषतः ॥ इत्यादि ।

End. पूरयत्यखिलान् कामान् जनानां भक्तिकारिणां ।
माहात्म्यं विस्तृतं तस्याः स्कान्दे प्रोक्तं विशेषतः ॥
अतिविस्तरभीत्यात्र न प्रोक्तं मुनिसत्तम ॥

Colophon. इति श्रीगणेशपुराणे पूर्व्वखण्डे भार्गवीये ८१ अध्यायः ।

विषयः। सूतेन सह ऋषीणां संवादेन गणेशस्य हरिहरादिभिः सेव्यमानस्य ओङ्काररूपतया निर्गुणत्वेऽपि उपासकानामनुग्रहार्थं सगुणत्वकथनं। तन्माहात्म्यकीर्त्तनमुखेन सौराष्ट्रदेशवास्तव्यस्य सोमकान्तस्य नृपतेरुपाख्यानकीर्त्तनं। अथ सञ्जातकुष्ठरोगतया नितरां निर्व्वेदमापन्नोऽसौ सुकुमारहृदयं कुमारं हेमकण्ठाभिधानं राजपदे प्रतिष्ठाप्य वानप्रस्थोभविष्यामीतिकृतनिश्चयोगार्हस्थधर्म्मं राजनीतिञ्च सम्यक्समुपदिदेश। अथासौ कुमारः निर्व्वन्धातिशयेनापि तेन निर्व्वार्य्यमानः राज्यादिकं विहाय सपत्नीकस्य पितुः स्त्रीमात्रसहाय एवानुगामी बभूव। अथैकादा वनमध्ये च्यवनस्य मुनेरनुग्रहेण तत्पितुर्भृगुनामकस्य महर्षेराश्रमगमनवृत्तान्तकथनपूर्व्वकं तेषां शान्तिलाभवृत्तान्तकीर्त्तनं। तत्र विन्ध्याचलसमीपवर्त्तिकल्लारनगरनिवासिनश्चिद्रूपसंज्ञस्य वैश्यस्य उपाख्यानकथनं। सोमकान्तस्य पूर्व्वजन्मविवरणकथनं। अथ तत्पुरतोभूगोर्गणेशपुरागमवृत्तान्तकीर्त्तनं। तत्र ग्रन्थारम्भे अकृतगणेशप्रणतितया सर्व्वत्र चित्तमालिन्यमनुभवतोव्यासस्य ब्रह्मलोकगमनपूर्व्वकं पितामहप्रमुखाद्गणेशमाहात्म्यादिश्रवणवृत्तान्तकीर्त्तनं। गणेशमन्त्रराजनिरूपणादिकं। तत्रैकदा महाप्रलये रिहरादीनां ज्योतिःस्वरूपगजाननदर्शनादिकथनं। हरिहरादिकृतगणेशस्तोत्रकीर्त्तनं। अथ लम्बोदरस्य उदरं प्रविश्य ब्रह्मणःद्वितीयब्रह्माण्डदर्शनादिना चमत्कृतिमा नः गणेशस्तोत्रादिकीर्त्तनं। तत्र वटवृक्षस्थितबालगजाननदर्शनकथनं। गणेशाज्ञयाब्रह्मणः स्रो व रणवृत्तान्तकीर्त्तनं। मधुकैटभविप्रकृतस्य प्रजापतेर्भगवतीस्तोत्रादिकीर्त्तनं। अथ सिद्धक्षेत्रग पूर्व्वकं महाविष्णुकृतगणेशमन्त्रजपादिवृत्तान्तकथनं। सिद्धक्षेत्रोत्पत्तिकथनञ्च। विदर्भविषयेषु कौण्डिल्यनगरपतेर्भीमनामकस्य उपाख्यानकीर्त्तनं। दक्षकृतगणेशाराधनविवरणकथनं। कर्ण देशीयभानुनगरस्थस्य वल्लभाभिधानस्य राज्ञ उपाख्यानकथनं: सिन्धुदेशीयपल्लीपुरनिवासिनः श्रेष्ठिनः उपाख्यानकथनं। बल्लालविनायकक्षेत्रोत्पत्तिविवरणं। कौण्डिल्यनगराधिपतेश्चन्द्रसेनस्य नृपतेरुपाख्यानकीर्त्तनं। रुक्माङ्गदाभिषेकवर्णनं। अथैकदा वटवृक्षसमारूढस्य तस्य नारदेन सह संवादकथनं। तत्र विदर्भेषु कदम्बपुरवास्तव्यस्य कस्यचित् श्रेष्ठिनोगृहे चिन्तामणिगणेशस्थितिविवरणकथनं। इन्द्रकृताहल्याधर्षणविवरणकथनं। तस्य च कदम्बतरुतलनिषण्णस्य गणेशमन्त्रजपादिना सहस्राक्षत्वादिविवरणकीर्त्तनञ्च। चिन्तामणितीर्थवृत्तान्तकीर्त्तनं। रुक्माङ्गदस्य विनायकपुरगमनविवरणं। तत्र रुक्माङ्गदरूपधारिणा वज्रधरेण मुकुन्दाभिधाना रुक्माङ्गदकामिनी समालिङ्गितेतिविवरणकथनं। तद्गर्भे गृत्समदस्य जन्मादिकथनञ्च। वरदाभिधानगणेशमूर्त्तिवृत्तान्तकीर्त्तनं। गणेशपुरविवरणकथनमुखेन त्रिपुरासुरस्य गणेशाद्वरग्रहणादिवृत्तान्तकीर्त्तनं। अथ समरसंरम्भे त्रिपुरासुरात् महेन्द्रस्य पराजयवृत्तान्तमवगत्य नितरां दुःखितस्य ब्रह्मणोविष्णुलोकगमनपूर्व्वकं तदुपदेशेन सार्द्धं सुरगणैः गणेशस्तोत्रादिकीर्त्तनं। त्रिपुरासुरेण सह पशुपतेः संग्रामवर्णनं। तत्र च पराङ्मुखस्य पञ्चमुखस्य तद्बधार्थं गणेशार्च्चनादिवृत्तान्तकथनञ्च। तत्र शिवकृतगणेशसहस्रनामस्तोत्रकीर्त्तनं। कार्त्तिकपूर्णिमायां त्रिपुरासुरस्य निधनमिति तद्दिने त्रिपुरारिपूजनस्यावश्यकतानिरूपणं।

अथ हिमालयगुहामुखात् हैमवत्या आविर्भावादिकथनं। तत्र धीवरमुखेन देव्या वृत्तान्तमुपलभ्य हिमालयस्य कन्यारूपेण तस्याः स्वगृहरचणादिविवरणकथनं। पशुपतिं पतित्वेनाधिगन्तुं तस्या गणेशमन्त्रादिसाधनविधिकथनं। तत्र पार्थिवगणेशपूजनविधिकथनं। षोड़शोपचारमन्त्रादिकथनञ्च। गणेशमन्त्रादिकथनं। गणेशचतुर्थीव्रतविधिकथनं। तद्व्रतस्येतिहासकथनप्रसङ्गेन सौभरेः कर्दमस्य च मुनेरुपाख्यानकीर्त्तनं। नलोपाख्यानकथनं। चन्द्राङ्गदमहिष्या इन्दुमत्या उपाख्यानकथनं। पार्व्वत्या सह शिवस्य विवाहकथनं। शूरसेनस्य नरपतेः सदसि विमानसहितस्य सुरपतेः पतनवृत्तान्तकथनं। तत्र सङ्कटचतुर्थीव्रतविधिकथनं। अङ्गारकचतुर्थीविधिकथनं। तत्र अवन्तीनगराधिपतेर्भारद्वाजस्य उपाख्यानकथनं। चन्द्रं प्रति गणेशस्य शापदानादिवृत्तान्तकथनं। गणेशाय दूर्व्वाङ्कुरदानमाहात्म्यकथनप्रसङ्गेन सुभद्राया उपाख्यानकीर्त्तनं। शिशुरूपधारिणा गजाननेन अनलासुरबधवृत्तान्तकथनं। नारदेन सह मिथिलानाथस्य जनकस्य विरोधवर्णनं। दूर्व्वया गणेशप्रीतिजनने विविधोपाख्यानकथनं। चतुर्थीव्रतोद्यापनविधिकथनं। कार्त्तवीर्य्यस्य गणेशप्रीत्यर्थं तपस्यादिवर्णनं। सारङ्गधरकुमार्य्याः सुन्दराया उपाख्यानं। परशुरामकार्त्तवीर्य्यार्ज्जुनयोरुपाख्यानादिकथनञ्च।

No. 2326. गणेशपुराणम्, क्रीड़ाखण्डम्, वा उत्तरखण्डम्। Substance, country-made paper, 23 × 7 inches. Folia, 249. Lines, 8 on a page. Extent, 6,820 ślokas. Character, Nágara. Date, Sm. 1882. Place of deposit, Kákiníyá, Zillá Rañgapur, Kumár Mahimáranjana Ráya, Chaudhurí. Appearance, new. Verse. Incorrect.

Gaṇeśa-puráṇa. Second part of the work described under the last preceding number.

मुनय ऊचुः।

Beginning. सम्यगाख्यानमाख्यातं त्वया सूत महामते।
साद‍रं श्रुतमस्माभिर्न च तृप्तिं गता वयं॥
यथा न तृप्यते जन्तुरन्नमश्नन् दिने दिने।
अन्यत् कथान्तरं ब्रूहि येन तृप्यामहे वयं॥

सूत उवाच।

उक्तश्चोपासनाकाण्डं क्रीड़ाखण्डं वदामि वः।
यथा कृतं गणेशेन नानादैत्यविहिंसनं॥
साधुद्विजगवाञ्चैव पालनं परमादरात्।
तदहं संप्रवक्ष्यामि श्रूयतां स्थिरचेतसा॥ इत्यादि।

End. युष्माभिः परिपृष्टं यत् सर्व्वं पापप्रणाशनं।
सर्व्वकामप्रदं भुक्तिमोक्षदं पुण्यवर्द्धनं॥
गणेशस्य परेशस्य नानालीलाधरस्य च।
वक्तृश्रोत्रोरघहरं किमन्यच्छ्रोतुमिच्छथ॥

इति श्रीमद्गणेशपुराणे उत्तरखण्डे फलश्रुतिवर्णनं सम्पूर्णं। शुभमस्तु। संवत् १८८२।

Colophon. इति श्रीमद्गणेशपुराणे क्रीड़ाखण्डे बालचरित्रे गणेशगीता। समाप्तं पुराणं॥

विषयः। ब्रह्मणा सार्द्धं व्यासस्य संवादेन गणेशस्य युगभेदेन रूपगुणवाहनादिभेदकथनं। अङ्गदेशीयनगरनिवासिनोधूम्रकेतोर्विवरणकथनं। देवान्तकनरान्तकयोरुपाख्यानकथनं। तयोर्महादेवाद्वरलाभपूर्व्वकं स्वर्गविजयादिवृत्तान्तकथनं। अथादितेः पुत्रकामनया कश्यपं सेवमानायास्तदुपदेशेन गणेशप्रीत्यर्थं तस्यास्तपस्यादिवर्णनं। दैत्यभारनिपीड़िताया मेदिन्या ब्रह्मलोकगमनपूर्व्वकं निजदुरवस्थावर्णनं। अदितिपुत्रत्वेन गणेशस्य जन्मग्रहणादिकथनं। विरजामोक्षकथनं। तत्र कृष्णस्येव कश्यपकुमारस्य बाल्यलीलादिवर्णनप्रसङ्गेन विरजाया राक्षसीरूपप्राप्तिविवरणकथनं। ग्राहरूपस्य गन्धर्व्वराजस्य मोचनकथनं। बालगजाननस्य चूड़ापनयनादिमहोत्सवकथनं। तत्र शक्रादिप्रसादात् अङ्कुशादिशस्त्रप्राप्तिकथनं। रौद्रकेतोस्तपस्यादिवर्णनं। काशीराजेन सह रथमारुह्य गच्छन्तं बालगणेशं निहन्तुं नरान्तकस्य राक्षसपतेश्चेष्टादिवर्णनं। अथैकदा धर्म्मदत्ताभिधानः कश्चिद् ब्राह्मणः बालगणेशसन्दर्शनार्थं काशीराजगृहं समागत इति तद्वृत्तान्तकीर्त्तनं। काशीराजपुरे राक्षसानामुपद्रवातिशय्यवर्णनं। बालगणेशस्य राक्षसदलनिधनपर्व्वकं तत्र शान्तिः स्थापितेतिवृत्तान्तकथनं। तदाज्ञया काशीराजस्य दण्डकारण्यगमनपूर्व्वकं भूशुण्डिना सह संवादकथनं। अथ काशीराजगृहे गणकरूपेण कस्यचिद् दैत्यस्य प्रवेशवर्णनं। कूपकन्दरयोर्निधनवृत्तान्तकथनं। बालगणेशकृतान्धकादिनिधनकथनं। अदितिरूपधारिण्या राक्षस्या नाशवृत्तान्तकथनं। शुक्लाभिधेयस्य ब्राह्मणस्य गृहे विनायकभोजनवृत्तान्तकीर्त्तनं। विदर्भदेशवास्तव्यस्य भीमनामकस्य व्याधस्य गणेशोपासनया अतुलैश्वर्य्यादिप्राप्तिकथनं। दितिगर्भे हिरण्याक्षस्य जन्मादिवृत्तान्तकथनं। हिरण्यकशिपुप्रह्लादविरोचनबलीनां जन्मादिकथनं। विष्णोर्वामनरूपेण अवतारकथनं। तत्कृतगणेशाराधनादिविवरणकथनं। बलिविचेष्टितकथनं। शिवाशिवयोः संवादेन शमीपत्रस्य गणेशप्रीतिजननकारणत्वकथनं। तत्र मद्रदेशाधिपस्य प्रियव्रतस्य उपाख्यानकथनं। शमीगर्भे अग्नेरवस्थितिकारणकथनं। शमीमाहात्म्यकथनमुखेन मन्दारमाहात्म्यकीर्त्तनं। काशीपुरीनिर्म्माणविवरणकथनं। तत्र शिवस्य कर्णकुण्डलपतनादिना मणिकर्णिकादीनामुत्पत्तिकथनं। शिववरदर्पितस्य दुरासदस्य दानवपतेर्विचेष्टितवर्णनं। भस्मासुरवृत्तान्तकथनं। दुरासदवधवृत्तान्तकथनमुखेन गणेशस्य काश्यां षट्पञ्चाशन्मूर्त्तिताकथनं। अथ गणकरूपधारिणोगणेशस्य दिवोदासवशीकरणादिवृत्तान्तकथनं। महादेवस्य काश्यामागमनादि-

विवरणकथनं। मुद्गलस्य उपदेशेन काशीराजस्य वैनायकलोकगमनवृत्तान्तकथनं। काशीराजगृहागतयोः सनकसनन्दनयोर्बालगणेशदर्शनादिविवरणकथनं। अथ बालगणेशकृतराक्षसासुरकुञ्जरासुरजम्भकासुरादिनिधनकथनं। नरान्तकदेवान्तकादिभिः सार्द्धं बालगणेशस्य समरसंरम्भवर्णनं। तेषां विनाशकथनञ्च। अथ पितरौ स्वावतारप्रयोजननिवेदनेन प्रबोध्य गणनाथस्य अन्तर्द्धानमितिवृत्तान्तकथनं। अथ सिन्धुनामकासुरनिधनार्थं गणेशस्य पार्व्वतीपुत्रत्वेन जन्मग्रहणे निश्चयकथनं। तत्र मैथिलविषयेषु गण्डकीनगरे चक्रपाणिरितिनाम्ना समाख्यातो नरपतिरासीदिति तद्विवरणकथनं। सिन्धोरुत्पत्त्यादिकथनं। सिन्धुविचेष्टितविधुराणां विबुधानां दुरवस्थादिवर्णनं। अत्र गणेशं पुत्रत्वेनाधिगन्तुंपार्व्वत्यास्तपस्यादिवर्णनं। गणेशजन्मोत्सववर्णनं। अलङ्कारदानार्थं हिमालस्य तत्र गमनादिवृत्तान्तकीर्त्तनं। तत्र गणेशस्य हेरम्बेतिनामकरणकथणं। हेरम्बकृतगृध्रासुरबधवृत्तान्तवर्णनं। एवं बालासुरबधवृत्तान्तवर्णनं। मरीचिकृतगणेशकवचकथनं। गणेशकृतव्योमासुरविनाशकथनं। कमठासुरविनाशकथनं। दुन्दुभिबधकथनं। गणेशस्य बाल्यलीलावर्णनं। मत्स्यरूपेण दैत्येन गणनाथोजलमध्ये नीत इतिविवरणकथनं। गणनाथस्य मुखमध्ये गिरिजादीनां ब्रह्माण्डदर्शनवृत्तान्तकीर्त्तनं। क्रीड़াव्याजेन चञ्चलासुरस्य स्कन्धारोपितगणनाथस्य पलायनादिवर्णनं। वृकासुरबधकथनं। अथैकदा शिवालयगमनपूर्व्वकं गणनाथं दृष्ट्वा विमुग्धया अदित्या पुत्रत्वेन तं स्वगृहं नेतुकामया तया सार्द्धं पार्व्वत्या विवादः समजनीतिवृत्तान्तकीर्त्तनं। विनताप्रसूतादण्डाद् गणेशपादस्पर्शेन विदीर्णतया शिखण्डिन उत्पत्तिकथनं। तस्य गणेशवाहनत्वकथनञ्च। कमलासुरादिबधकथनं। ब्रह्मकृतगणेशस्तोत्रकथनं। कमण्डलुभवाया नद्या उत्पत्तिकथनं। ब्रह्मणे गणेशस्य विश्वरूपप्रदर्शनविवरणकथनञ्च। गणेशस्य मयूरेशेतिनामकथनं। गणेशकृतशतमखमखध्वंसनवृतान्तकीर्त्तनं। गणेशेन सह युद्धवर्णनपुरःसरं यमस्य दर्पहरणवृत्तान्तकीर्त्तनं। सिन्धुदैत्यस्य विनाशादिकीर्त्तनं। मित्रकौस्तुभाभिधानयोर्दैत्ययोर्निधनवृत्तान्तकीर्त्तनं। पितृसिन्धुसंवादकथनं। गणेशस्य विवाहमहोत्सववर्णनं। सिन्दूरोत्पत्तिवृत्तान्तकथनं। गणेशस्य अन्तर्द्धानकथनं। पुनः पार्व्वतीगर्भे गजाननरूपेण जन्मग्रहणादिकथनं। तत्कृतगन्धर्व्वादिपराजयकथनं। पराशरसंवादकथनं। सिन्दूरासुरविप्रकृतानां देवादीनां दुरवस्थादिवर्णनपुरःसरं गणेशकृततन्नाशनादिवृत्तान्तकीर्त्तनं। वरेण्यमुद्दिश्य गजाननस्य सांख्ययोगोपदेशदानविवरणकथनं। कर्म्मयोगादिकथनं। जीवादीनामुत्क्रान्त्यादिनिरूपणञ्च। कुष्ठरोगसन्तप्तस्य चन्द्रकान्तस्य रोगशान्तिर्विमानप्राप्तिश्च। हेमकण्ठदर्शनवर्णनं। गणेशस्तोत्रकीर्त्तनं। पुराणफलश्रुतिकथनं। गणेशगीताकथनञ्च।

No. 2327. कल्पसूत्रम्, गूढ़ार्थभावसहितम्, वा कल्पसूत्रकल्पद्रुमकलिकासहितम्। Substance, country-made paper, 11 × 6 inches. Folia, 169. Lines, 13—14—15 on a page. Extent, 5,322 ślokas. Character, Nágara. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana, Ráya Chaudhurí. Appearance, new. Prose. Incorrect.

Kalpa-sútra with a commentary named **Kalpa-druma-kaliká** ALIAS **Gúḍárthabháva.** The life of the last Jina Mahávíra, in the Mághadhi language with a Sanskrit paraphrase. The text by Bhadraváhu; the paraphrase by Lakshmívallabha. An English translation of the text was published many years ago by the Oriental Translation Fund.

टीकायाः,—ॐ नमः श्रीअर्हते नमः।

Beginning. श्रीवर्द्धमानस्य जिनेश्वरस्य जयन्तु सद्वाक्यसुधाप्रवाहाः।
येषां श्रुतिस्पर्शनजप्रसत्तेर्भव्या भवेयुर्विसलात्मभासः॥
श्रीगौतमोगणधरः प्रकटप्रभावः
सल्लब्धिसिद्धिनिधिरञ्चितवाक्प्रबन्धः।
विघ्नान्धकारहरणे तरणिप्रकाशः
साहाय्यकृद्भवतु मे जिनवीरशिष्यः॥
कल्पद्रुकल्पसूत्रस्य सदर्थफलहेतवे।
कतुरा + + सद्योग्या कलिकेयं प्रकाश्यते॥

श्रीकल्पसूत्रस्य गम्भीरार्थस्य श्रीगुरुप्रसादादर्थः क्रियते। यथा चैत्रमासे कोकिलोमधुरं वक्ति तत्र सहकारमञ्जरी कारणं। — — — — — तत्रादौ श्रीकल्पसिद्धान्तस्य अधिकारत्रयवाचिकेयं गाथा। पुरिम इत्यादि।

मूलस्य,—पुरिमचरमाणकप्पोमंगुलं वद्धमाणन्ति तित्थम्मि। तो परिकहिया जिनगणहराचिथे + बलिचरित्तं॥ अचेनुक्क उद्देशिय सिज्जायर रायपिण्ड कियकम्मे। वय जिक्व पभिक्कमणेमा संयज्जोसवणकप्पो॥ इत्यादि।

End. मूलस्य,—उसभस्सणं अरहो कोसलियस्स चउरासीगणाः गणहरा होव्व। तेणं काव्येणं तेणं समएणं उसभेणं अरहा कोसलीए वीसं पुव्वसयसहस्सां ई कुमारवासमज्झे वसित्ता॥

टीकायाः,—आदीश्वरस्य निर्व्वाणात् एककोटिकोटिः सागरोपमाणां त्रिवर्षसार्द्धाष्टमासद्विचत्वारिंशत्सहस्रवर्षैरूना यदा गता तदा श्रीवीरनिर्व्वाणमभूत्। श्रीवीरनिर्व्वाणात् नवशतमशीतिवर्षैश्च कल्पसूत्रं पुस्तकेषु लिखितमित्यनेन श्रीआदीश्वरस्य पञ्चकल्याणकानि विस्तरेण निरूपितानि॥ इति श्रीआदीश्वरजीवाख्यानं सम्पूर्णं। श्रीरस्तु।

श्रीकल्पसूत्रवरनाममहागमस्य
गूढार्थभावसहितस्य गुणाकरस्य ।
लक्ष्मीनिधेर्विहितवल्लभकामितस्य
व्याख्यानसप्तममगात् परिपूर्त्तिभावं ॥

शासनाधीश्वरश्रीवर्द्धमानस्वामिगुरुक्रमे गौतमं यावज्जिनदत्तसूरिश्रीजिनकुशलसूरितत्-पट्टानुक्रमे भट्टारकश्रीजिनचन्द्रसूरिजीतत्पट्टालङ्कारवर्त्तमानभट्टारकश्रीजिनहर्षसूरिजीतणी आम्नाये श्रीसङ्घजयवन्तोप्रवर्त्त ॥ इति सप्तमीवाचना ॥

विषयः। चतुर्व्विंशतितमतीर्थङ्करस्य महावीरस्य जीवनवृत्तकथनं। तदुक्तजैनधर्म्मवा-चनाकीर्त्तनञ्च। तत्र वृषभदेवमहावीरयोः पञ्चमहाव्रतनिरूपणं। अन्येषां द्वाविंशतितीर्थङ्करा-णां चत्वारि व्रतानीतिकीर्त्तनं। अथ मोक्षमार्गप्रतिपन्नानां सर्व्वेषां जिनानामाचारभेदे कारण-कथनं। कल्पसूत्रश्रवणादिमाहात्म्यकीर्त्तनं।

No. 2328. न्यायतरङ्गिणी। Substance, country-made paper, 16 × 4 inches. Folia, 60. Lines, 28 on a page. Extent, 309 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí. Appearance, new. Verse. Correct.

Nyáya-tarañginí. An exegesis of the Bháshápárichchheda. By Kesáva. The text has been translated into English by Dr. E. Roer in the Bibliotheca Indica.

Beginning. तस्मै नमः प्रणवपङ्कजषट्पदाय
श्रीकेशवेश्वरविरिञ्चिपरात्मनेऽस्मिन्।
सर्व्वञ्च चिचितकृतिप्रतिभाय योऽयं
मन्तव्य एकपुरुषस्त्रिगुणस्त्रिमूर्त्तिः ॥
ओङ्कारकारणगुणार्ज्जितकार्य्यभाव-
श्रीकेशवेश्वरगुरुप्रमितात्मनेऽर्थे।
तद्भावदर्शितगुणप्रतिभाय तस्मै
कस्मै नमः शाश्वतभास्वतेऽग्रे ॥
— — — — — — — ।
भ्रान्त्युत्सारिततत्त्वमौक्तिकमयी कीर्त्तिस्थिरं प्रीतये
येषावास्तु सतां नचेद्गुरुजनानन्तै चिरं स्थायिनी।
आप्तानामथवास्तु वस्तुमननी शम्भोः शिरोभूषणी
नानाभावगवेषणाद्यगरिमश्रेयःश्रिया श्रेयसी ॥

श्वासां न्यायतरङ्गिणी सुललिता ज्ञानेन्दुसान्द्रामृता
पूता पूतजनप्रमोदजनिकानन्दप्रवाहावहा ।
भावाभावविचारतत्त्वमधुरा सिद्धान्तशुद्धाश्रया
सद्भ्या इव सत्यविचपटुताप्यस्यास्त्वियं सेव्यतां ॥
द्रव्यात्तम्मिगुणक्रियैकरुचिरा सामान्यमान्याग्रतः
सव्याहृत्तविशेषशेषगणिता सद्गम्यभावाकृतिः ।
साभावप्रतिभावयुक्तिरचिता तत्प्रसंख्यान्वया
सत्सन्दर्भनिगर्भरत्नविभवा सिद्धान्तसारात्मिका ॥
— — — — — — — — — ।
द्रव्यं गुणाः कर्म्म तथैवजातिर्विशेष इष्टः समवाय एकः ।
अभाव उक्तः परबोधनार्थस्तन्मर्म्ममाधुर्य्यरसेनसिद्धः ॥ इत्यादि—

End. अस्मात् तत्सावधानैः सुकृतिवरुतरायासत तेऽपिधीरा-
स्त्वद्विश्वासैकचित्ताः किमिदमशुभदं वर्त्म संच्छेदयद्भिः ।
नानोपायप्रयत्ना अपि च कति हताः पारमासादयन्तः
संसाराब्धेस्तु सन्तोमुखरितवरुलक्षेशरूपोर्म्मिकायाः ॥

Colophon. इति श्रीकेशवकृतन्यायतरङ्गिण्यामनुमानप्रमाणपरिच्छेदः सम्पूर्णः ।

विषयः । भाषापरिच्छेदरीत्या द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावरूपसप्तपदार्थनिरूपणं ।

No. 2329. सर्व्वसिद्धान्तः । Substance, country-made paper, 13 × 6 inches. Folia, 85. Lines, 12—13—16 on a page. Extent, 3,300 ślokas. Character, Nágara. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí. Appearance, new. Prose and verse. Incorrect.

Sarvasiddhánta. An essay on the divinity of Rámachandra and the truth of the dual theory of the elder Vedánta. By Rájakumára Vis'vanátha Siñha.

Beginning. सान्द्रानन्दसुधाम्बुधेरुदयभूः सत्यप्रतिज्ञावशी
मायेशप्रतिपादकोपनिषदां प्रामाण्यमेव स्वयं ।
सीतालक्ष्मणवायुसूनुसहितः सर्व्वेश्वरेशोविभु-
र्नानाद्यद्भुतभूरिशक्तिरवतु श्रीरामचन्द्रः स नः ॥
शक्तिः संविदसौ हरेः प्रणयिणी जाद्यं हरन्ती नृणां

मुक्ताकुन्द + + न्दुकम्बुमिहिकाकर्पूरकान्तद्युतिः ।
वीणावादनहर्षितार्त्तजगतीहस्ताक्षमालामति-
र्हंसीव प्रतिगाहतामविरतं मे मानसं भारती ॥
व्यासव्यासक्तचित्तप्रथितहरिगुणानर्थधारावगाहं
सद्योयोलेखितुंताननुपममहणं मोदकं मातृदत्तं ।
शुण्डाग्रे सन्दधानस्त्रुटितरदरयोविघ्नराजोमदीयं
प्रत्यूहं काण्डमस्मिन् हरतु दुरि + + + वमानोदरीयं ॥
पतितोद्धृतिमहिमानः सदयहृदयप्रिया दासगुरुचरणाः ।
विश्वनाथहृदयस्थमतसिद्धान्तं तन्वते स्वयमेव ॥

भो महाराजकुमार विश्वनाथसिंहदेव भवन्निर्म्मितभाषाप्रबन्धरामायणप्रतिपादितश्रीरामपरत्ववैष्णवपरत्वपर्य्यालोचनया बुद्धिमत्प्रवराग्रगणनीयसमधिगतसमस्तवेदान्ततत्त्वभवदमात्यश्रीमद्भोदूलालसततप्रतिपादिताद्वैतमतपर्य्यालोचनया—इत्यादि ।

End. चन्द्रलालोऽनिरुद्धोवै युग्मभक्तिप्रवर्त्तकः ।
यतः श्रीराधिकाकृष्णकृपापात्रं हि मद्वपुः ॥
गुरूत्तमस्य केशस्य त्वियं शुद्धा परम्परा ।
तनोतु मङ्गलान्याशु प्रियादासनिरूपिता ॥
तस्य शिष्योऽस्मदाचार्य्यः परमानन्दरूपवान् ।
भुवने श्रीप्रियादासोनित्यं तस्मैनमोनमः ॥

Colophon. इति श्रीगुरुपरम्परा—इति श्रीसर्व्वसिद्धान्ते श्रीमहाराजकुमारश्रीविश्वनाथसिंहविरचिते भिक्षुकाचार्य्यसंवादे पञ्चमः सिद्धान्तः । समाप्तश्चायं ग्रन्थः ॥

विषयः । भगवान् रामचन्द्र एव श्रुतिस्मृतिपुराणदर्शनादिप्रतिपाद्यः सर्व्वतः परः पदार्थ इति सप्रपञ्चप्रपञ्चनं । तत्र श्रीराममूर्त्तेर्नित्यत्वकथनमुखेन ब्रह्मणः साकारत्ववादव्यवस्थापनं । श्रीरामचन्द्रस्योपासनैव सर्व्वतः परमेतिनिरूपणं । मुक्तिरपि श्रीरामचन्द्रादेवेतिनिरूपणं । भक्तिस्वरूपादिनिरूपणं । वैराग्यस्वरूपतद्भेदादिनिरूपणं । भगवन्नामरूपलीलाधामगुणानां नित्यत्वनिर्णयः । भगवतोभक्त्यधीनत्वकथनं । अद्वैतवादखण्डनपुरःसरं विशिष्टाद्वैतवादव्यवस्थापनं । प्रतिविम्बवादखण्डनं । मोक्षस्य ज्ञानानधीनत्वनिरूपणं । जीवस्य उत्क्रान्त्यादिविवेचनं । जीवात्मस्वरूपादिविवेचनं । उपासनास्वरूपादिनिरूपणं । भक्तियोगनिरूपणं । तत्र चक्रादिचिह्नधारणविधिकथनं । ऊर्द्धपुण्ड्रादिधारणविधिकथनं । भगवन्मन्त्रादिनिरूपणं । अर्च्चनवन्दनादिभक्त्याङ्गनिरूपणं । अतिथिसत्कारविधिकथनं । नैष्ठिकी भजनक्रिया षड्विधेति तन्निरूपणं । भगवद्भक्तेः रसत्वनिरूपणञ्च ।

No. 2330. कलापतत्त्वार्णवः। Substance, country-made yellow paper. 20 × 3¾ inches. Folia, 63. Lines, 8 on a page. Extent, 2,232 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí; also another copy at Iṭákumárí, Zillá Rañgpur, Paṇḍit Yádaveśvara Tarkaratna. Appearance, fresh. Prose. Correct.

Kalápa-tattvárṇava. A commentary on the Kátantra grammar. By Raghunandana Achárya. The codex examined contains only that portion which treats of *Kṛit* affixes.

Beginning. प्रणम्य परमं देवं गोपालं चित्तरञ्जनं।
करोमि शब्दशास्त्रस्य प्रवृत्तिं प्रक्रियां शुभां॥
सदर्थाम्बतलाभाय सूक्तिरत्ना + + द्रुतं।
कलापपूर्व्वतन्त्रस्य समुद्रः सेव्यतामयं॥
कुनिबन्धानुसन्धानमुत्सृज्य दूरतः खलु।
यान्धोऽयं सेव्यतां साधो मनोजज्ञानहेतवे॥

अथ कृदन्ताः शब्दाः सर्व्ववर्म्मणा कथमव्युत्पादिता वररुचिना वा कथं व्युत्पादिता इति शिष्यजिज्ञासायां प्रतिपादयन्नाह वृत्यादिवदिति। इत्यादि।

End. वातविषयाश्चेति वातश्चेत् कर्त्तृत्वेन विषयं करोतीत्यर्थः।

Colophon. इति रघुनन्दनाचार्य्यशिरोमणिकृते कलापतत्त्वार्णवे कृत्सु षष्ठः पादः समाप्तः।

विषयः। कातन्त्रीयकृद्वृत्तेर्व्याख्यानम्।

No. 2331. मण्डपकुण्डसिद्धिः। Substance, country-made yellow paper. 13 × 4½ inches. Folia, 10. Lines, 7 on a page. Extent, 173 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí. Appearance, fresh. Verse. Incorrect.

Maṇḍapa-kuṇḍa-siddhi. Rules for the erection of altars and halls for sacrificial rites. By Viṭṭhala Díkshita, son of Vara S'armá.

Beginning. गाढ़ध्वान्तमनेकभानुजठरे राजत्कलाधारिणि
प्रोद्यच्चक्रफरीयुगं दरदलत्पद्मे + + रावणिः।
स्वर्णोत्तुङ्गगिरिद्वयाधरचरी दीना कलिन्दात्मजा
पश्याश्चर्य्यमिदं शिवामिति वदन् स्मेरः शिवः पातु वः॥

ख्यातिगोत्रे नितरां पवित्रे
पवित्रकर्म्माजनि वूरशर्म्मा।
तत्सूनुना विट्ठलदीक्षितेन
विरच्यते मण्डपकुण्डसिद्धिः॥
कृतोर्द्ववाहोः समभूगतस्य
कर्त्तुः शरांशप्रपदोच्छ्रितस्य।
यावासहस्तोऽस्य जिनांशकोर्द्व
स्यादङ्गुलं तत्तद्विभांशका ये॥ इत्यादि।

End. ग्रन्थे परोक्ते + + दूषणोक्त्या
किं वा गुणोक्त्या विदुषा विचार्य्यं।
ग्रन्थे मदुक्ते सदसद्विशोध्यं
सर्व्वस्तु सर्व्वं नहि वेद कश्चित्॥
अङ्गीकार्य्या मत्कृतिर्निस्तुषेयं
कस्मादेवं पण्डितान् प्रार्थयेऽहं।
चीरं पेयं नीरमेतद्विहाय
कोवा विज्ञं हंसमा+र्थयेत॥

Colophon. इति विट्ठलदीक्षितविरचिता मण्डपकुण्डसिद्धिः समाप्ता।

विषयः। मण्डपनिर्म्माणप्रक्रियाकथनं। तत्र भूमिनिरूपणादिकथनं। स्तम्भतोरणचूड़ादिनिर्म्माणविधिकथनं। वेदिनिर्म्माणविधिकथनं। कुण्डनिर्म्मानविधिकथनं। तत्र सूत्रस्त्ररीत्या भूक्षेत्रपरिमाणविधिकथनञ्च।

No. 2332. मण्डपकुण्डसिद्धिविवृतिः। Substance, country-made yellow paper. 13 × 4½ inches. Folia, 27. Lines, 10 on a page. Extent, 975 ślokas, Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí. Appearance, fresh. Prose. Generally correct.

Maṇḍapa-kuṇḍa-siddhi-vivṛiti. A commentary on his own treatise on the formation of halls and altars for sacrificial rites. By Viṭṭhala Díkshita, (next preceding No.).

Beginning. मत्तमतङ्गजवदनं सादितविघ्नावलीसदनं।
गौरीहरयोः स्तोकं पालितलोकं स्तुदावलम्बे॥

कल्याणि वाणि निजपाणिसरोजयुग्मं
संयोज्य देवि करवाणि तव प्रणामं।
मत्तुण्डमण्डललसद्रसनाङ्गणं ते
नृत्याय नृत्यमिदमस्तु रसानुसिक्तं॥
सन्तानकल्पतरुमण्डनमण्डितायां
कुण्डोल्लसज्ज्वलनकाञ्चनवेदिकायां।
सीतारघूद्वहकराकलितैकपाणि-
र्वैवाहहोमसमये दिशताच्छुभानि॥
कुण्डमण्डपसंसिद्धेर्विवृतिं लिखितोक्तिषु।
प्राचीनवाक्यसन्दर्भं सन्दर्शयितुमारभे॥

इह हि शिष्टाः ग्रन्थारम्भे स्वेष्टदेवतानमस्कारादिरूपं मङ्गलमाचरन्ति। तस्मान्माध्यन्दिनीयोदीक्षितविट्ठलशर्म्मा स्वकृतकुण्डसिद्धिं व्याचिख्यासुः स्वाभीष्टदेवतास्मरणमाशीरूपं मङ्गलमाचरति शार्दूलविक्रीड़ितेन। इत्यादि।

अथ कृतिदिवसमाह।

End. शशियुगतिथिगण्ये याति शाके वरेण्ये
विभवशरदि रम्ये मासि शस्ये तपस्ये।
शशधरमितिदक्षे मुख्यपक्षेऽवलक्षे
कमलनयनतिथ्यां भानुमद्वारवत्यां॥

Colophon. इति सङ्गमनेरस्थविट्ठलदीक्षितरचिता स्वकृतमण्डपकुण्डसिद्धविवृतिः सम्पूर्णा।

विषयः। निजकृतमण्डपकुण्डसिद्धेर्व्याख्यानम्।

No. 2333. ऋभुगीता। Substance, country-made paper, 14 × 4 inches. Folia, 52. Lines, 10 on a page. Extent, 1,300 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí. Appearance, fresh. Verse. Incorrect.

Ribhugítá. A series of lectures on the adual doctrine of the later Vedánta. By Ṛibhu, who descends from the region of Brahmá, and, in the company of Sanatkumára, repairs to the Badaríkás'rama, where he expounds the doctrine for the edification of the sages assembled there. An imitation of the Bhagavadgítá.

Beginning. चैतन्यमात्रं ब्रह्मैव आत्मा केवलमद्वयः।
परमानन्दरूपं वा अखण्डैकरसः परः॥
पुरा सर्व्वे ब्रह्मनिष्ठाः कदाचिन्मिलिताः परे।
सनत्कुमारमागत्य पप्रच्छुर्ज्ञानमुत्तमं॥
मुनय ऊचुः।
भगवन् सर्व्वतत्त्वज्ञ आत्मज्ञानं मद्दा + +।
उक्तं भगवता सर्व्वमद्वैतं परमाद्भुतं॥ इत्यादि।

End. मायाकार्य्यञ्च माया वा नास्ति नास्ति न संशयः।
ज्ञानं वा ज्ञानभेदं वा नास्ति नास्ति न संशयः।
सर्व्वं प्रपञ्चं हेयञ्च प्रोक्तं प्रकरणञ्च ते।
यस्य श्रवणमात्रेण आत्माकारं प्रपद्यते॥

Colophon. इति श्रीऋभुगीतायां प्रपञ्चहेयत्वप्रकरणं नाम सप्तविंशतितमोऽध्यायः॥ ॥ २७ ॥

विषयः। १ प्रथमाध्याये,—सनत्कुमारेण सह ऋषीणां संवादेन ब्रह्मलोकादिनिर्गतस्य ऋभोर्वदरिकाश्रमगमनपूर्व्वकं निदाघगृहगमनवृत्तान्तकीर्त्तनं। निदाघं प्रति ऋभोरुपदेशदानकथनं। तत्र आत्मस्वरूपनिरूपणं। २ अध्याये,—जगतोब्रह्मात्मकत्वादनात्मकत्वाभावकथनं। ३ये अध्याये,—आत्मनोब्रह्मरूपत्वात् सर्व्वात्मकत्वनिरूपणं। ४र्थे अध्याये,—प्रपञ्चमिथ्यात्वप्रपञ्चनं। ५ मे अध्याये,—ब्रह्मणो अभिन्नत्वेन जीवात्मनः स्वरूपनिर्णयः। ६ ष्ठे अध्याये,—वेदवाक्य-व्रत-भुवन-भवनादीनां मिथ्यात्वप्रपञ्चनं। ७ मे अध्याये,—सर्व्वस्य वस्तुनश्चिन्मात्रत्वनिरूपणं। ८ मे अध्याये,—सर्व्वस्य जगतः अखण्डैकरसत्वनिरूपणं। ९ मे अध्याये,—स्वानुभवप्रकारकथनं। १० मे अध्याये,—प्रपञ्चस्य शशविषाणतुल्यत्वकथनं। ११ शे अध्याये,—देहात्मवादनिन्दनं। मन एव बन्धहेतुरितिनिरूपणं। सङ्कल्पस्यैव महामोहतापत्रयाद्यात्मकत्वकथनं। १२ शे अध्याये,—अहं ब्रह्मास्मीतिज्ञानमेव महास्नानमितिनिरूपणं। १३ शे अध्याये,—ब्रह्मतर्पणविधिकथनं। १४ शे अध्याये,—आत्महोमविधिकथनं। १५ शे अध्याये,—ब्रह्मज्ञानस्वरूपकथनं। जीवन्मुक्तस्वरूपकथनञ्च। १६ शे अध्याये,—विदेहमुक्तिनिरूपणं। १७ शे अध्याये,—आत्मनोऽन्यन्न किञ्चिदस्तीतिनिरूपणं। १८ शे अध्याये,—सच्चिन्मयत्वनिरूपणं। १९ शे अध्याये,—ब्रह्मैव सत्यमितिनिरूपणं। २० शे अध्याये—सर्व्वमसदेवेतिनिरूपणं। २१ शे अध्याये,—अस्मदादिपदार्थस्य चिद्रूपत्वनिरूपणं। २२ शे अध्याये सर्व्वस्य प्रपञ्चस्य द्वैताद्वैतशून्यत्वनिरूपणं। २३ शे अध्याये,—ब्रह्मानुभवस्वरूपकथनं। २४, २५ शे अध्याये,—सर्व्वानुभवप्रकारकथनं। २६ शे अध्याये,—मोक्षोपायादिनिरूपणं। २७ शे अध्याये,—सर्व्वस्य प्रपञ्चस्य हेयत्वनिरूपणञ्च।

No. 2334. वेदगर्भः। MS. seen by the Political Agent of Manipur.

Vedagarbha or "the Womb of the Vedas," a dissertation on the nature, character, meaning, and use as the only means of salvation of the mystic syllable Om. Anonymous.

ॐ गायत्रीकल्पः।

Beginning. ॐकारस्य त्रयं रूपं श्वेतं पीतञ्च लोहितं।
अष्टदुःखिकृतं पापं ॐकारोद्दहते क्षणात्॥ १॥
तकार चम्पकं वर्णं ब्रह्मविष्णुशिवार्च्चितं।
ब्रह्महत्याकृतं पापं तकारोद्दहते क्षणात्॥ २॥

End. नास्त्येव कल्पकल्पान्ते समः स्वर्गे महीयते।
प्रणवं गीयते नित्यं जपेत् सर्व्वत्र योनरः॥
न तस्य हानिर्जायेत सर्व्वत्र विजयी भवेत्।
इति वेदगर्भे द्वैपायनेनोक्ते प्रणयनंख्या(?) प्रस्तुतः॥

Colophon. इति वेदगर्भः समाप्तः।

विषयः। ॐ कारस्य माहात्म्यं।

No. 2335. होमतत्त्वं। MS. seen by the Political Agent of Manipur.

Homatattva. A manual for the performance of the Homa rite in connection with various sacrifices. Anonymous.

ॐ ब्रह्मणे नमः।

Beginning. अथ होमतत्त्वप्रयोगः। आचार्य्योऽलङ्कृतोहोममण्डपमागत्य सामान्यार्घ्यं विधाय द्वारपूजां कुर्य्यात्। गृहं प्रविश्य तत्तत्कल्पोक्तदेवतां ऐशान्यां दिशि हस्तप्रमाणां वेदिकां विधाय तदुपरि घटं संस्थाप्य यथाशक्ति संपूज्य वीक्षणादिभिः कुण्डं संस्कुर्य्यात्।

End. सर्व्वत्राष्टाहुतीर्जुहुयात् एवंक्रमेण तं परमशिवे संहृत्य पुनः हृष्टिवर्णनात् वेदाहुतीर्जुहुक्रमेण जनयेत् (जुहुयात्)। तद्यथा मन्त्रध्वानेभुवनाध्वानस्तमाध्वानः कलाध्वानः एवं क्रमेण जनयेत् (जुहुयात्)।

Colophon. इति होमतत्त्वविधिः समाप्तः।

No. 2336. विक्रमभारतम, प्रभवादिकल्पः । Substance, country-made yellow paper, 22 × 4 inches. Folia, 402. Lines, 10 on a page. Extent, 6,015 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mahimáranjana Ráya Chaudhurí. Appearance, new. Verse. Generally correct.

Vikrama-bhárata. An imitation of the Mahábhárata, giving a description of India as it was under Vikramáditya, designed to extol the worship of S'iva as the supreme divinity, and abounding in illustrative stories and accounts of places dedicated to S'iva. By Rájá Sambhúchandra Ráya, a zemindar in the district of Rañgpur, at the early part of this century. The codex professes to comprise only the part which refers to creation and early history, and is called *Prabhavádi-kalpa.*

Beginning. वाक्यार्थाविव योजितौ द्रुहिणनिर्म्माणेतरौ भास्वरौ
शब्दार्थाविव किं तड़िद्द्युतिशरन्मेघद्युतिद्योतितौ ।
सिन्दूराद्रिपयोनिधी युगपदेकस्मिन् समेतौ नु किं
वन्देऽहं परमेश्वरौ शिवकरौ तावर्द्धनारीश्वरौ ॥
— — — — — — — — — — — ।
तमन्तरङ्गेण विवेशयन्तं सदाशिवं चेतसि चित्तविज्ञः ।
पुरा पुरारीचरणकर्म्ममानसः श्रीब्रह्महंसोमुनिरेक आसीत् ॥
तमापतन्तं सहसा तरस्वी तपस्विनामुत्तममुत्तमश्रीः ।
ज्वलद्भुताशप्रतिमाङ्घ्रिसन्निधौ ज्वलद्भुताशप्रतिमः पपात ॥
— — — — — — — — — — — — — ।
सुखोपविष्टं तं शान्तं प्रसन्नमुखपङ्कजं ।
पप्रच्छ मुनिशार्दूलः पुष्पाञ्जलिपुरःसरः ॥
मेरुदत्त उवाच ।
राजतोनो भयं किञ्चिद्दैवतेनोपसर्गतः ।
शुभं तीर्थजनानां + मङ्गलं तेऽधुना सदा ॥
तपोभिर्वर्द्धते किं नो मुन्यन्नं ते गृहागतं ।
दृषदृषस्य धान्यस्य तण्डुलः स्वस्तिवाचनं ॥
— — — — — — — — — — ।
ब्रह्महंस उवाच ।
तस्मिन् शासति राज्येऽस्मिन् राजनि श्रीनिकेतने ।
कुतोऽकाले महानिद्रा कुतः पापभयं महत् ॥

किं राजा स न योरक्षेत् प्रजाः स्वीयप्रजासमाः ।
प्रजायां क्षेमयुक्तायां राजा क्षेमसमन्वितः ॥
विशेषतः सदाचारं द्विजातीनां विशिष्यते ।
सदाचारान्मनुष्याणां सम्पदः स्युर्निरापदः ॥ इत्यादि ।

End. शैवी कथा परमविक्रमभारतस्था
सर्व्वं पुनाति भुवनं परिगीयमाना ।
याराध्यते भवनिबन्धनमोचनाय
ब्रह्मादिभिः सुरगणैः सततादरेण ॥
श्रीशम्भुचन्द्रनृपतेर्हृदयारविन्दे
यद्दयन्निगूढितमभूदितिहासवृत्तं ।
यच्चाण्डजीवलसदण्डकदम्बकं तत्
प्रोद्भीयमानमधुना मम बुद्धियोगात् ॥

Colophon. इति श्रीमच्छिवायने विक्रमभारते शतसाहस्त्र्यां शाम्भवसंहितायां प्रभवादिकल्पे षट्संवादसन्दर्भे नन्दीश्वरस्य चतुर्व्यूहानुकीर्त्तनं नाम चतुःषष्टितमोऽध्यायः । समाप्तश्चायं प्रभवादिकल्पः ।

विषयः । १—२ अध्याये,—मेरुपृष्ठेन सह ब्रह्महंसस्य संवादेन विक्रमादित्यस्य माहात्म्यादिकीर्त्तनं । बैाद्धधर्म्माभ्युदयकाले शैानकादीनां धर्म्मारण्यपरित्यागविवरणकथनं । सात्त्विकपूजाविधिकथनं । धर्म्मवसुसंवादेन वाकदार्व्वमुनिकर्तृकविक्रमभारताख्यानकीर्त्तनं । ३—५ अध्याये,—अमरावतीवर्णनं । इन्द्रकर्त्तृकविक्रमादित्यप्रशंसावर्णनं । तत्रैकदा मृगयाप्रवृत्तस्य विक्रमादित्यस्य पुरतः परीक्षार्थमिन्द्रस्य व्याघ्ररूपेण उपस्थितिविवरणकथनं । तदाक्रमणभीतस्येव मुनिकुमाररूपस्य धर्म्मस्य शरणत्वेन विक्रमादित्याश्रयणविवरणकथनं । विक्रमादित्यस्य व्याघ्रं प्रति उपदिष्टं स्वीयमांसप्रदानञ्च । ६—१० अध्याये,—जयायै दुर्गायाः शापदानादिवृत्तान्तकीर्त्तनं । राजर्षेर्ऋषभदेवस्य कन्यात्वेन तस्याः जन्मादिकथनं । विक्रमादित्यस्य उत्पत्तिकथनं । नन्दीश्वरस्य भृङ्गिरीटेर्ज्जन्मकथनं । जयायाः शापमोचनकथनं । उत्कलराजविलापवर्णनं । तत्पत्न्यां शैव्यायां पुत्रचतुष्टयजन्मकथनादिकञ्च । ११—१३ अध्याये,—भृङ्गिरीटेर्मातामहालयगमनवृत्तान्तकथनं । ऋषभदेवस्य अष्टादशपुत्रवृत्तान्तकीर्त्तनं । पुलहान्महर्षेस्तेषां विद्यालाभादिकथनं । भृङ्गिरीटिकृतदैत्यद्वयबधकथनं । भद्रशिलाग्रामे तस्य प्रस्थानकथनं । वत्सराजकल्पराजयोर्युद्धवर्णनं । भृङ्गिरीटिं प्रति दुर्व्वासमः शापदानादिकथनं । शापमुक्तस्य तस्य दक्षालयवासविवरणकथनं । १४—१९ अध्याये,—दक्षस्य स्वप्नदर्शनेन विस्मितस्य हिमालयगमनपूर्व्वकं महादेवप्रीत्यर्थं तपस्यादिवर्णनं । दक्षयज्ञारम्भः । तत्र सतीसतीशयोः संवादेन सत्याः क्रोधादिवर्णनं । दक्षोक्तिश्रवणेन तस्याः प्राणत्यागादिविवरणकथनञ्च । दक्षस्य मेषमुख

त्वादिप्राप्तिकथनं। ध्रुवस्य वंशे दक्षस्य पुनरुत्पत्तिकथनं। १७—२४ अध्याये,—नारदं प्रति दक्षस्य शापदानवृत्तान्तकथनं। दधीचिना सह संवादे दक्षस्य क्रोधादिकथनं। चन्द्रभागानदीतीरे तपश्चरतोऽष्टङ्गिरीटेः विमानलाभादिवर्णनं। तेन सह दक्षस्य कैलासगमनादिवृत्तान्तकीर्त्तनं। दक्षशापेन नन्दिनोवानरास्यताप्राप्तिकथनं। पृथ्व्यावतरणपूर्व्वकं नन्दिनोविष्णुचक्राराधनविश्वकर्म्माराधनादिवृत्तान्तकथनं। सौभरेः पुरीनिर्म्माणादिवृत्तान्तकथनं। २५—३१ अध्याये,—संक्षेपेण रामायणकथनं। नन्दिकृतमहादेवस्तोत्रादिकथनं। महादेवं प्रति नन्दिनः काकुवाक्यकथनादिकं। अवन्तीदेशमाहात्म्यकीर्त्तनं। नन्दिनं प्रति शिवस्य विविधप्रबोधदानकथनं। विक्रमादित्यजन्मकथनं। नवरत्नकथनं। गाथकनामादिकथनं। महावीरप्रभृतीनां जन्मकथनं। ३२—३७ अध्याये,—अवन्तीनगरसीमादिकथनं। अवन्तीमालवादिनामनिर्व्वचनं। अवन्तीकन्याविवरणकथनं। हेमशीलव्योमशीलयोरुपाख्यानकथनं। शताश्वराजस्य उपाख्यानकीर्त्तनं। गुल्मकोपाख्यानकथनं। क्षेमकासुरस्य तपस्यादिवर्णनं। वज्रदंष्ट्रमूषिकेण सह तस्य बन्धुत्वकरणकथनं। उज्जयिनीशब्दव्युत्पत्तिकथनं। धाराशब्दव्युत्पत्तिकथनं। पञ्चशिखसमाख्यस्य गन्धर्व्वस्य नृपतेः जयत्सेनस्य समीपे शुभङ्करनाम्ना परिचयदानविवरणकथनं। जयत्सेनस्य शक्रेण सह समरार्थं अमरावतीगमनादिविवरणकथनं। ३८—४२ अध्याये,—हेमशीलव्योमशीलाभ्यां मुनिवेशधारिणोदैत्यस्य कस्यचिद्वधवर्णनं। इलूपाख्यानकीर्त्तनं। देवस्थानामुत्पत्तिकथनं। कोङ्कवेङ्कासुरयोर्युद्धवर्णनं। सान्दीपनेरुपाख्यानकथनं। गिरिव्रजपुराधिपस्य नन्दिवर्द्धनस्य राज्ञ उपाख्यानकथनं। विल्वभुजोवृत्तान्तकीर्त्तनं। गार्ग्येण सह सिंहवसुसंवादकथनं। इन्द्रद्युम्नविष्णुवर्म्मणोर्विरोधविवरणं। तत्र दारुमयमूर्त्तिस्थापनकथनं। स्तम्भस्य मुण्डानामकीर्त्तनञ्च। ४३—४९ अध्याये,—महासेनस्य खड्गलाभकथनं। अङ्गारकासुरकन्यापरिणयवर्णनञ्च। वासवदत्तागर्भान्नरवाहनदत्तस्योत्पत्तिकथनं। शर्किलककर्टकपानकनिधनवृत्तान्तकीर्त्तनं। तत्र राज्ये चारुदत्तस्य नियोग इति विवरणकथनञ्च। गोपालपुत्रस्य राज्याभिषेकवर्णनं। सप्तपद्मोपाख्यानकीर्त्तनं। दार्व्वाघाटस्य विवरणकथनं। वर्षांच्छ्रासस्य वृत्तान्तकथनं। आस्तिकोपाख्यानकथनं। क्षेमधुरविवरणकथनं। गणपतिराजवृत्तान्तकथनं। क्षेमधन्वन उपाख्यानकथनं। तेन सह पिशाचानां संवादकथनञ्च। ५०—५४ अध्याये,—पुलोमागर्भे लक्ष्मीजन्मकथनं। पद्मगर्भे पुलोमायाः गर्भमोचनवृत्तान्तकीर्त्तनं। अदितिपुत्रत्वेन विष्णोर्जन्मग्रहणकथनं। लक्ष्मीनारायणविवाहमहोत्सववर्णनं। यज्ञपत्नीदक्षिणाविवरणं। कीचकस्य जन्म तथा अंशुमत्या सह विवाह इति विवरणकथनं। अनरण्यकन्यायाः पद्मावत्या विवरणकथनं। नर्म्मदाया नद्या जन्मकथनं। तस्या मित्रावरुणेन सह विवाहवर्णनञ्च। चुम्बलोत्पत्तौ रन्तिदेवस्य विवरणकथनं। शोणभद्रनामकस्य नदस्य उत्पत्तिकथनं। (विक्रमभारतीयप्रभवादिकल्पस्य विवरणम्।) ५५—५७ अध्याये,—प्रह्लादस्य जन्मादिवृत्तान्तकथनं। शिप्रानदीमाहात्म्यादिकथनं। राज्ञः शूरसेनस्य राज्ये मर्म्मठासुरचेष्टितादिवर्णनं। तत्र मत्स्यसूक्तविवरणकथनं। मानमित्रकन्याहरणादिकथनं। मर्म्मठस-

तमायापुरीनिम्माणादिविवरणकथनं। माहिन्द्रद्वीपाख्यानकथनं। अहिच्छत्रदेशाधिपयोः कलहन्तृबलहन्तृनामकयोर्विवरणकथनं। पञ्चशिखमुनिवृत्तान्तकीर्त्तनं। ५८—६४ अध्याये,—फेणानद्युपाख्यानकीर्त्तनं। सूर्य्यवंशकथनं। कटाहविवरणकथनं। कालज्ञानकथनं प्रणवोत्पत्तिकथनं। हिरण्यगर्भादीनां जन्मकथनं। तत्त्वज्ञाननिरूपणं। ब्रह्मस्वरूपादिनिरूपणं। प्रकृतिभेदकथनं। लिङ्गशरीरादिनिरूपणं। पञ्चकोषविवेचनं। जीवात्मपरात्मनोरभेदचिन्तनप्रकारकथनं। महावाक्यार्थकथनं। पञ्चकुमारजन्मादिकथनं नन्दिनस्तुर्व्यूहलनिरूपणं। ग्रन्थफलश्रुतिकीर्त्तनञ्च।

No. 2337. विक्रमभारतम्, शैशवादिकल्पः। Substance, country-made yellow paper, 22 × 4 inches. Folia, 286. Lines, 10 on a page. Extent, 7,494 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kumára Mohimáranjana Ráya Chaudhurí. Appearance, new. Verse. Correct.

Vikrama-bhárata. A second part of the work described under the next preceding No. It is entitled *S'ais'avádi-kalpa.*

Beginning. शम्भुं स्वयम्भुं संनम्य कार्त्तिकेयं गणेश्वरं।
गौरीं सरस्वतीं लक्ष्मीं ततोजयमुदीरयेत्॥
ॐ तत् सत् परमं ब्रह्म त्रिगुणोदयसम्भवं।
भारती भारती यस्य ब्रह्म यन्मुखमण्डलात्॥
— = — — — — — — — —।

मेरुपृष्ठ उवाच।

ब्रह्महंस श्रुतोऽस्माभिः सत्कल्पः प्रभवादिकः।
शिवकल्पा वयं सर्व्वे शिवकल्पाद्भवादृशात्॥
— — — — — — — — — — —।
कथमाकलितः पूर्व्वं सत्कल्पः शैशवादिकः।
किं किं विचित्रा परमा कथा तत्र विराजते॥
विशेषं श्रोतुमिच्छामोब्रह्महंस निगद्यतां॥
साङ्गोपाङ्गेन भगवन् अलं मादृग्विलम्बनैः॥

ब्रह्महंस उवाच।

— — — — — — — — — —।
कलिकलमषहन्दघ्नं श्रीमद्विक्रमभारतं।

यस्यवक्ता स्वयं देवोधर्म्माधर्म्मविदाम्बर ॥
श्रोतारोवसवः सर्व्वे तत्र किन्न मनोरमं ।
सत्कल्पः कल्पितः पूर्व्वं विशेषात् शैशवादिकः ।
तमहं वः प्रवक्ष्यामि यथाक्रमपरिग्रहात् ॥
— — — — — — — — — — — ।
प्रमारनामातिबलप्रवीरोयोवह्निवंशोद्भव उग्रकर्म्मा ।
तद्वंशरत्ने पुरुषप्रवीरोरत्नं बभौ श्रीयुतविक्रमाख्यः ॥ इत्यादि ।

End. अतः स्त्रैणदोषं विनाशस्य मूलं
सदाहं प्रमण्ये नितान्तञ्च जन्तोः ।
न शान्तं न मानं भवेत् तस्य कस्मिन्
परं निन्दनं सन्ततं तस्य भूयात् ॥ १८३ ॥
अनेनैव रूपेण मे वाक्यहन्दं
सदा ये सुमर्त्याः प्रकुर्व्वन्ति पानं ।
न तेषां कदाचित् कुतश्चित् कथञ्चित्
जनैर्निन्दनीया धरायां भवन्ति ॥ १८४ ॥

Colophon. इति श्रीमच्छिवायने विक्रमभारते शतसाहस्र्यां शाम्भवसंहितायां शैशवादिकल्पे ब्रह्महंससंवादे अवन्तीराजावल्यां दण्डिराजचरिते स्त्रैणतावर्णने द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

विषयः । (ग्रन्थोयं काकिनीयाधिपतेः शम्भुचन्द्ररायचतुर्धुरीणस्य कृतिरिति ज्ञेयं ।) तत्र १—३ अध्याये,—अग्निवंशीयप्रमारनामकराजवंशे विक्रमादित्यजन्मकथनप्रसङ्गेन संक्षेपात् भारतयुद्धोद्यमे वीराणां निधनविवरणकथनपूर्व्वकं मगधाधिपतेः महापद्मस्य राज्यकाले भारतवर्षीयदुर्भाग्यराशिवर्णनं । ४--७ अध्याये,—वृचक्षुर्नामकस्य नरपतेः राज्यशासनसमये सप्तस्वप्नदर्शनवृत्तान्तवर्णनं । तत्पुरतः स्वप्नवृत्तान्तकथनार्थं आजमीरदेशवास्तव्यस्य पुष्करनामकस्य द्विजस्य समागमादिकथनं । तत्र वैवस्वतकल्पीयप्रलयोपवर्णनं । जलप्लावनोपाख्यानकल्पनाकीर्त्तनं । ८—११ अध्याये,—वृचक्षुषोराज्ये अनावृष्टिनिबन्धनं प्रजानां दुःखबाहुल्यं राजकृतप्रबोधश्चेतिवर्णनं । दुर्भिक्षादिवर्णनं । बौद्धानां प्रादुर्भाववर्णनं । नेपालादिदेशे बौद्धधर्म्मविस्तारकथनं । बौद्धधर्म्मदेशनामकथनमुखेन जलशरावन्यायस्वरूपकथनं । १२—१५ अध्याये,—बौद्धधर्म्मावलम्बिना दामवेलेन सह आर्य्यधर्म्मरतस्य कटस्य शास्त्रार्थकथनादिकं । निरीश्वरसांख्योत्पत्तिकथनं । तत्र कपिलस्य जन्मादिविवरणकथनञ्च । माध्यमिक-योगाचार-वैभाषिक सौत्रान्तिकरूपचतुष्टयबौद्धानां मतनिरूपणादिकं । जैनधर्म्मोत्पत्तिकथनं । तन्मतविस्तारकथनञ्च । १६—२१, अध्याये,—प्रमारादिवीरचतुष्टयजन्मादिवृत्तान्तकीर्त्तनं । तेषां परिषदग-

णोत्पत्तिकथनं। बौद्धराजेन सह समरसन्नहनवर्णनञ्च। अथ विस्तरेण जालपर्व्वकृततुमुलयुद्ध-वृत्तान्तकीर्त्तनं। तच जलम्पुरास्थितश्यामदुर्गाभिगमनविवरणकथनं। २२—२९ अध्याये,—तातारदेशस्थभीमचूड़ादिनरपतीनां युद्धादिवर्णनं। तत्क्षणयक्षणाभ्यां सह जालपर्व्वणोबन्धन-विवरणकथनं। जालपर्व्वादीनां शिवसन्दर्शनादिवृत्तान्तकथनं। बौद्धधर्म्मपरित्यागानन्तरं तेषां शैवधर्म्मग्रहणविवरणकथनञ्च। जालपर्व्वभूपालस्य मोचनवृत्तान्तकथनं। सन्धिकरणविवरणकथनं। २७—२९ अध्याये,—जालपर्व्ववंशजातानां शिलीमुखादीनां पुनर्युद्धोद्योगवृत्तान्तकथनं। वेदविद्यापारगेण सह चक्रापीड़ादीनां संवादकथनं। तत भञ्जरापत्तनसमाक्रमणविवरणकथनं। चेत्रपार्श्वादिन्वपचतुष्टयबन्धनवृत्तान्तकीर्त्तनं। कोलारसाभिधानस्य नरपतेः विजयवृत्तान्तकनं। बौद्धमतिबालारणाचार्य्यस्योपदेशेन पुनः युद्धोत्साहवर्णनादिकं। ३३—३७ बौद्धवैदिकयुद्धे इन्द्रस्य पुनः प्रबोधदानकथनं। सप्तकबन्धविजयवृत्तान्तकीर्त्तनं। नेपालाधीश्वरस्य हाम्बीरस्य तथा श्रावस्तिनगराधिपतेः तत्त्कस्य च विवरणकथनं। कृष्ठासुरस्य दौरात्म्यादिकथनं। मगधराज्ये चन्द्रवंशीयानां सारणादीनां आधिपत्यादिकथनं। अवन्तीदेशीयराजावलीकथनं। सावित्रीविवाहकथनं। ३८—४२ अध्याये,—कुन्तसेनादिद्वादशराजचरित्रवर्णनं। दण्डिराजचरित्रवर्णनं। तत्र अश्विनीलाभवृत्तान्तकथनञ्च। सिलुनदीतीरे श्रीकृष्णेण सह समरसंरम्भे काश्मीराधिपतेः दामोदरस्य निधनप्राप्तिविवरणकीर्त्तनं। दण्डिराजस्य अश्विनीदानपराङ्मुखस्य श्रीकृष्णात्पराजयादिप्राप्तिकथनं। स्त्रैणतायाः दुःखपरिणामत्वनिरूपणञ्च।

No. 2338. श्रीश्वरीमहाकाव्यम्, वा सप्तशतीकाव्यम्। Substance, country-made paper, 16 × 4 inches. Folia, 80. Lines, 5 on a page. Extent, 994 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Gopáleśvara Bhaṭṭáchárya. Appearance, new. Verse. Correct.

S'ríśvarí-maháká vya ALIAS **Saptaśatí-kávya.** An epic poem founded on the incidents described in the Chaṇḍí section of the Márkaṇḍeya-puráṇa. By S'rís'vara Vidyálañkára.

Beginning. पुष्पगन्धाविव शिवौ चन्द्रचन्द्रकराविव।
जगतोऽभ्युदयाकारौ तौ वन्दे पितरौ वरौ॥
इयं याभ्यां सप्तशती स्वर्गमर्त्यगताभवत्।
महौषधिसमृद्धार्थं शशाङ्कादिव चन्द्रिका॥ युग्मं।
सर्व्वसाधारणा या च पुण्या श्रीश्वरवाङ्मयी।
विवस्वानिव सर्व्वेषां दृष्टिरोध्यन्धकारहृत्॥
निहन्त्याकर्णनाद्या च पापं पापविभेदिनी।

देवीमाहात्म्यवाग्वादे नदी गङ्गेव पावनी ॥
सा वस्तुशक्त्या हरतु साङ्गा व्याङ्गापि पातकं ।
असम्यगुदितोप्यग्नि सवितेव तमस्ततिं ॥
चैत्रवंशे बभौ पूर्व्वमपूर्व्वगुणगौरवः ।
सुरथः सुरथाख्यानो वह्निनामिव पावकः ॥ इत्यादि ।

End. काशीनामवतस्ततः स्तुतिरियं पुण्याभिगुप्ताभवद्यावत्सन्ति यथार्थपाठकगणास्ति+स्य सम्यागमे सेदानीमभिवर्त्तते फलतस्तस्मात् फलं लभ्यतां साचाद्ध्ययनाख्यवंशघटनासंघट्टनैः काङ्क्षितं ॥

Colophon. इति श्रीश्रीश्वरीये महाकाव्ये सप्तशत्यां वरप्रदानोनाम द्वादशःसर्गः । समाप्तमिदं सप्तशतीकाव्यं ।

विषयः । (मार्कण्डेयपुराणीयदेवीमाहात्म्यमवलम्ब्य विरचितमिदं महाकाव्यं ।) तत्र १ प्रथमे सर्गे सुरथस्य राज्ञः जन्मादिवर्णनं । समाधिना सह तस्य समागमः । मेधसाश्रमवर्णनं । मधुकैटभयोरुत्पत्तिः । भगवता सार्द्धं तयोर्युद्धं निधनञ्च । २ ये सर्गे,—महिषासुरविप्रकृतानां देवानां विलापादिवर्णनं । महामायोत्पत्तिः । महिषासुरसैन्यवर्णनं । देव्याः समरसंरम्भवर्णनञ्च । ३ ये सर्गे,—महिषासुरनिधनवर्णनं । ४ र्थे सर्गे,—निशुम्भशुम्भादीनां जन्मचेष्टितादिवर्णनं । हिमालयवर्णनं । ५ मे सर्गे,—देवगणकृतमहामायास्तोत्रवर्णनं । ६ ष्ठे सर्गे,—देव्या दूतसंवादकथनं । ७ मे सर्गे,—धूम्रलोचनचण्डमुण्डादिभिः सह देव्या युद्धवर्णनं । कालिकाया आविर्भावकथनञ्च । ८ म सर्गे,—शुम्भादीनां युद्धोद्यमवर्णनं । सैन्यवर्णनञ्च । ९ मे सर्गे,—रक्तवीजवधवर्णनं । १० मे सर्गे,— निशुम्भस्य समरसंरम्भवर्णनं । तन्निधनवर्णनञ्च । ११ शे सर्गे,—शुम्भबधवर्णनं । १२ शे सर्गे,—समाधिसुरथयोस्तपस्यावर्णनं । वरलाभकथनञ्च ।

No. 2339. शिवकुसुमाञ्जलिः । Substance, country-made paper, 14 × 4 inches. Folia, 9. Lines, 4 on a page. Extent, 72 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Gopáleśvara Bhaṭṭáchárya. Appearance, new. Verse. Correct.

S'iva-kusumáṇjalí. A hymn in praise of S'iva. By S'rís'vara Vidyálañkára.

Beginning. रजतसदृशवर्णं सर्पसंशोभिकर्णं
फणिमणिकृतहारं मूर्त्तिमन्मुक्त्यगारं ।
त्रिभुवनजनरम्यं केवलं ज्ञानगम्यं
भजत परमहंसं चारुचन्द्रावतंसं ॥ इत्यादि ।

End. अयं ते पद्योरस्तु वाक्प्रसूनाञ्जलिर्द्वयोः ।
योग्योवा यदि वायोग्योन किं मूढ़ाभिर्मंसनं ॥

Colophon. इति श्रीश्रीश्वरविद्यालङ्कारकृतशिवकुसुमाञ्जलिः समाप्तः ।

विषयः । स्तोत्रव्याजेन शिवरूपमाहात्म्यादिकीर्त्तनं ।

No. 2340. सूर्य्यशतकम् । Substance, country-made paper, 15 × 3½ inches. Folia, 24. Lines, 5 on a page. Extent, 265 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Gopáleśvara Bhaṭṭáchárya. Appearance, new. Verse. Correct.

Súrya-śataka. A century of verses forming a hymn in praise of Súrya, the sun-god. By S′rís′vara Vidyálañkára. This is of course distinct from the hymn of this name by Mayúra Bhaṭṭa.

Beginning. निर्लक्ष्यं व्याप्तविश्वं पुर इव विलसद्ब्रह्मणोरूपमुक्तं
इष्टं नासीत + + + + + + + विषये संशयोनः प्रवोषः ।
आकाशे यद्यमतकिरणैर्वर्त्तयन् दिक्प्रकाशं
विम्बाकारोभ्रमति परमोहंस एकोऽभ्युदेत्य ॥ इत्यादि ।

End. पुत्रञ्चापि प्रसरितुमलं कन्यकाभिच्छया वा
स्व चेचे चेत् चरितरजसि धारयेत् प्राक्रमेकं ।
नित्यं सैषा प्रभवति पुनर्नूतनं भर्त्तृभोगे
पादन्यासैश्चकितपुरुषा मञ्जुमञ्जीररावैः ॥

Colophon. इति श्रीश्रीश्वरीयं सूर्य्यशतकं समाप्तं ।

विषयः । स्तोत्रव्याजेन सूर्य्यस्य मङ्गलमाहात्म्यादिवर्णनं ।

No. 2341. देवीशतकम् । Substance, country-made paper, 15 × 4 inches. Folia, 30. Lines, 4 on a page. Extent, 262 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur Gopáleśvara Bhaṭṭáchárya. Appearance, new. Verse. Correct.

Deví-śataka. A century of verses forming a hymn in praise of the Deví in the form of S′yámá. By S′rís′vara Vidyálañkára.

Beginning. अये चेतोभृङ्ग भ्रमसि किमलं चौद्रकधिया
लयाम्भेनाद्यापि प्रसृतमधु पुष्पे न निचितं ।

नलिन्याः श्यामाया हरहृदयपद्माकरवने
मधूद्वेलं पद्मं पदमधिगतं नापि च यतः ॥ इत्यादि ।

End. अयि रसनिगलनपिच्छलिते
भवहृदये न तावदारोपय चरणं ।
तद्यदि हृदयग्राहिणी रसहृदये मयि धेहि यावदस्खलितं ॥

Colophon. इति श्रीश्रीश्वरीयं देवीशतकं समाप्तं ।

विषयः । स्तोत्रव्याजेन श्यामायाः रूपमाहात्म्यादिवर्णनं ।

No. 2342. कुलमुक्तिकल्लोलिनी । Substance, country-made paper, 13 × 8 inches. Folia, 80. Lines, 15 on a page. Extent, 3,205 ślokas. Character, Nágara. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Paṇḍit Kamalápati Miśra. Appearance, fresh. Prose and verse. Incorrect.

Kulamukti-kalloliní. A digest of the rules regarding rites, sacrifices, ceremonies, and sacraments enjoined in the Tantras for the followers of the Kaula sect of the S áktas. By A'dyánanda.

Beginning. अथ तत्परषा घोररूपे जातवामदेव ऋचाशिवं + वाग्भवं भगशब्दान्ते । इत्यादि ।

End. कल्लोलिनीचलितबोधसहस्रपत्र-
प्रोद्यन्मधुक्रमगकालिकभृङ्गसंघाः
+ + थिंनः सरभ संप्रपिवन्तु नित्यं
गुर्व्वङ्घ्रिपद्मभजनात् तदपीह लभ्यं ॥

Colophon. इति श्रीमदाद्यानन्दविरचितकुलमुक्तिकल्लोलिनी समाप्ता ।

विषयः । कुलदीक्षाविधिकथनपूर्व्वकं षट्कर्म्मादिसाधनप्रकारकीर्त्तनं ।

No. 2343. उद्धारकोषः । Substance, country-made paper, 15 × 5 inches. Folia, 20. Lines, 8 on a page. Extent, 494 ślokas. Character, Nágara. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Kamalápati Miśra. Appearance, new. Prose and verse. Incorrect.

Uddhára-kosha. A treatise on the derivation, meaning, and use of the mystic mantras of Deví, Gaṇes'a, and other S'ákta divinities,

including rituals for their worship. By Dakshinámúrti. The authorities quoted are the leading Tantras.

ईश्वर उवाच ।

Beginning एकदा स्फटिकैरम्ये सन्तानैश्च समाकुले ।
संस्थितौ पार्व्वतीशानौ लोकरक्षणतत्परौ ॥
पार्व्वती परमेशानं प्रोवाच परमं हितं ।
देव देव सुरश्रेष्ठ दयात्रैगुण्यमानस ।
देवी भगवती देव महात्रिपुरसुन्दरी ।
अस्मिन् सरोवरेऽव्यक्ता पुरा केन प्रकाशिता । इत्यादि ।

End. तथा सप्तकुमाराणां ध्यानं तत्र विनिश्चितं ।
तथा भेदविहीनानां शृणु पार्व्वति तत्त्वतः ॥

Colophon. इति श्रीदक्षिणामूर्त्तिविरचिते उद्धारकोषे षष्ठपटलः ।

विषयः । शक्तिगणेशादिमन्त्रोद्धारप्रकारकथनपूर्व्वकं ध्यानादिकथनं ।

No. 2344. शुद्धिस्मृतिः । Substance, country-made paper, 16 × 3¼ inches. Folia, 25. Lines, 5 on a page. Extent, 281 ślokas. Character, Bengali. Date, ? Place of deposit, Kákiníyá, Zillá Rañgpur, Sríśvara Vidyálañkára. Appearance, new. Verse. Correct.

S'uddhi-smriti. A digest of the Smriti rules regarding impurities of the person resulting from death or birth in one's family. By S rís'vara Vidyálankára.

Beginning. नदीशगङ्गामवलम्ब्य तिष्ठतां
यत् स्वर्धुनी कारणवारिसत्क्रियां ।
स्वकेशवं केशवदात् स्वभावतो-
विभेदतस्तामथवा नदीड़े ॥ इत्यादि ।

End. भर्त्तुः शिष्यस्ततः स्यात्तत इह कथितस्तातवंशस्ततः स्यात्
+ त्रुवंशद्विजाः स्युस्तत इह कथिता उत्तमास्ते यदीच ।
स्त्रीणां प्रेतक्रियायां क्रमश इति चतुर्व्विंशतिर्व्यक्तयस्ता
अश्वत् तत्त्वं विलोक्य स्फुरिह विलिखितास्तत्त्वमूलाः समाप्ताः ॥

Colophon. इति श्रीश्रीश्वरविद्यालङ्कारविरचिता शुद्धिस्मृतिः समाप्ता ।

विषयः । अशौचव्यवस्थादिकथनं ।

No. 2345. कारकचक्रम् । Substance, country-made yellow paper, 15 × 3½ inches. Folia, 13. Lines, 8 on a page. Extent, 383 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabhánḍár, Zillá Rañgpur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Káraka-chakra. An epitome of the rules relating to the use of the Sañskṛit cases. By Purushottama Deva.

Beginning. मुनिं प्रणम्य सर्व्वज्ञं सर्व्वज्ञानप्रकाशकं ।
बालानां कथ्यतेऽर्थाय मया कारकचक्रकं ॥
निमित्तं कारकं प्रोक्तं तथा कार्य्यमपेचते ।
कार्य्यकारणसम्बन्धाद्विचारः सुप्तिङन्तयोः ॥
सुप्तिङन्तं पदमित्यत्र सुविति स्वादयः सप्त विभक्तयोऽष्टम्यन्ते । इत्यादि ।

End. तथापि करणादिकारकानुरोधेन अश्रूयमाणापि क्रिया गम्यत इत्यदोषः ।

Colophon. इति महामहोपाध्यायश्रीपुरुषोत्तमदेवविरचितकारकचक्रं समाप्तं ॥

विषयः । कारकस्वरूपनिरूपणपूर्व्वकं कर्तृकर्म्मादिलक्षणविवेचनमुखेन विभक्त्यर्थकीर्त्तनं ।

No. 2346. जातमार्त्तण्डः । Substance, country-made yellow paper, 16 × 4 inches. Folia, 135. Lines, 6 on a page. Extent, 2,713 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabhánḍára, Zillá Rañgpur, Ráya Ramaṇimohana Chaudhurí, Bahádur. Appearance, new. Prose and verse. Correct.

Játa-mártaṇḍa. A summary of judicial astrology for the preparation of horoscopes. By Práṇakrishṇa.

Beginning. आलोक्य विविधं ग्रन्थं प्राणकृष्णेन धीमता ।
जातमार्त्तण्डमाख्यातं ? क्रियते ग्रन्थसंग्रहः ॥
प्रथमतोवेलानिर्णयः ।
पच्छायां द्विगुणं कृत्वा चतुर्द्दशसमन्वितं ।
पचग्रहकरैर्भागं लब्धदण्डस्थितं पलम् ॥
मतान्तरं । इत्यादि ।

End. शशिनि च कुजदृष्टे बोधनीवल्लभः स्यात्,
सकलगुणनिधानः सर्व्वशास्त्रेषु पूज्यः ।

प्रचुरयुवतिभर्त्ता सर्वसन्तोषकर्त्ता,
धनद इव धनेन प्राणदा स्याद्रिपूणाम्॥

विषयः। वेलानिरूपणोपायकथनं। लग्नमानादिकथयनं। तत्र षड्वर्गनिर्णयः। क्षेत्राधिपनिर्णयः। होरानिर्णयः। द्रेक्काणनिर्णयः। नवांशादिनिर्णयः। जारजयोगनिर्णयः। पितृवैदेश्येन बालकजन्मकथनं। यमन-नाल-गण्डयोगादिकथनं। शिशुरिष्टिनिरूपणं। नाश-योगकथनं। मातृरिष्ट्यादिनिरूपणं। ग्रहाणां बलदृष्ट्यादिनिरूपणं। दीर्घजीवि-अपुत्रक-मृतापत्य-[illegible]-ग्रह-जीवयोगादिनिर्णयः। तथा सिंहासनयोग-डमरुयोग-चतुःसागरादिविविध-यो[illegible]निरूपणं। एवं सर्पाघातयोग-जलजन्तुयोग-सपत्नीयोगादिनिर्णयः। अधिमित्रादिनिर्णयः। वर्गोत्तमादिफलकथनं। तन्वादिद्वादशभावनिरूपणं। धनस्थान-भ्रातृस्थान-बन्धुस्थान-सुतस्थान-लाभस्थानादिनिरूपणं। लग्नफलकथनं। वार-तिथि-नक्षत्र-योग-करण-मास-पक्ष-ऋतु-राशि-गण-वर्णादिफलकथनं। आयुर्निर्णयः। -पताकान्तर्दशादिनिरूपणं। अष्टवर्गादिनिरूपणं। पञ्चस्वरादिनिरूपणं। दशावर्षविभागादिकथनं। रविचन्द्रादीनामन्तर्दशानिरूपणं। साङ्केतिकनिदाननिर्णयः। कुत्र कस्य मृत्युर्भविष्यतीति तन्निरूपणं। चरस्थिरराशिनिधनादिफल-कथनं। स्त्रीजातकेऽपत्यचिन्तनं। राशीनां गोचरादिफलकीर्त्तनं। ग्रहाणां गोचरफलकथनं। सर्व्वग्रहदृष्टिफलकथनं।

No. 2347. उपसर्गविचारः। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 3. Lines, 6 on a page. Extent, 47 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabhándára, Zillá Rañgpur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose. Correct.

Upasarga-vichára. On the meanings, uses and logical influences of Upasarga prefixes. By Gadádhara.

Beginning. अथोपसर्गविचारः। प्राद्युपसर्गा वाचका द्योतका वेति चेदत्राचार्य्यानुयायिनः। उपसर्गा द्योतक एव न तु वाचकः। द्योतकत्वञ्च धातोः प्रक्रियायां तात्पर्य्यग्राहकत्वं। इत्यादि।

End. यत्र धातुलोपोजनितस्वत्रार्थप्रत्ययस्यानुभवसिद्धत्वात्।

Colophon. इति श्री[illegible]दाधरविरचित उपसर्गविचारः समाप्तः।

विषयः। प्रादीनामुपसर्गाणां द्योतकत्ववादव्यवस्थापनपूर्व्वकं प्रत्येकं तेषामर्थनिरूपणं।

No. 2348. वैदिकसर्व्वस्वं । Substance, country-made yellow paper, 16 × 4 inches. Folia, 56. Lines, 6 on a page. Extent, 116 ślokas. Character, Bengali. Date, Sk. 1787. Place of deposit, Tushabháṇḍára, Zillá Rañgpur, Ráya Ramaṇímohana Chaudhuri, Bahádur. Appearance, new. Prose and verse. Correct.

Vaidika-sarvasva. On the images of Vaishṇava divinities, their materials, formation, consecration and adoration, giving in detail all the rites and ceremonies to be observed in the consecration of such images and temples designed for them. By Kṛishṇánandadeva Vidyálañkára. The work was composed about 20 years ago.

Beginning. वासुदेवं नमस्कृत्य नमस्कृत्य गुरोः पदं ।
सर्व्वस्वं वैदिकानान्तु क्रियते धीरसम्मतं ॥
हयशीर्षादिकं दृष्ट्वा श्रीकृष्णानन्दशर्म्मणा ।
प्रमाणं वासुदेवस्य प्रतिष्ठायां वितन्यते ॥

इत्यादि ।

End. कुर्य्यात् स्वस्तिकवच्छेषमिति चक्राब्जमण्डलं ।

Colophon. इति श्रीकृष्णानन्दवेदविद्यालङ्कारकृतौ वैदिकसर्व्वस्वे वरणप्रतिष्ठाप्रमाणतत्त्वं समाप्तम् ।

नत्वा श्रीवासुदेवं सुरमुनिभिः स्तूयमानं मुरारिं
शाके सप्तागसप्तोडुपतिपरिमिते माधवे मासि यत्नात्
कृष्णानन्दप्रणीतं सकलबुधमतं भूमिदेवः सुतार्थं
सर्व्वस्वं वैदिकानां प्रविलिखति मुदा श्रीयुतः श्रीप्रसादः ॥

विषयः । वासुदेवमूर्त्तिकथनं । केशवमूर्त्तिलक्षनं । नारायणमूर्त्तिलक्षणं । माधवमूर्त्तिलक्षणं । गोविन्दमूर्त्तिलक्षणं । विष्णुमूर्त्तिलक्षणं । मधुसूदनमूर्त्तिलक्षणं । वामननूर्त्तिलक्षणं । श्रीधरभूर्त्तिलक्षणं । हृषीकेशमूर्त्तिलक्षणं । पद्मनाभमूर्त्तिलक्षणं । दामोदरमूर्त्तिलक्षणं । तथा वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपचतुर्व्यूहमूर्त्तिलक्षणञ्च । प्रतिष्ठालक्षणं । देवागारविधिकथनं । तत्र भूमिशोधनविधिः । वास्तुपातालयागविधिः । प्रतिष्ठाकालादिनिरूपणं । मण्डपादिप्रमाणकथनं । ब्रह्माचार्य्यसदस्ययजमानादिलक्षणकथनं । पञ्चगव्यपञ्चामृतादिप्रमाणं । परिधानवस्त्रपवित्रादिप्रमाणं । तिलकनिर्णयः । आचमननियमकथनं । स्रुक्स्रुवमेक्षणदर्व्वीसमिध्भद्रपीठचमसप्रोक्षणीगरुड़तोरणशान्तिकुम्भादिप्रमाणकथनं । कुण्डनिर्म्माणविधिकथनं । अग्निजिह्वादिकथनं । अग्निनामानि । सर्व्वतोभद्रमण्डल-लवनाभमण्डलादिविधिकथनं । एकाशीतिकलशप्रमाणं । अङ्कुश-चक्र-महाध्वज-पताका-वितानादिप्रमाणकथनं । दीपप्रमाणं । यागविधि-

कथनं। सकलीकरणविधिः। अग्निजननविधिः। अनुकल्पविधिः। चलाचलमूर्त्तिप्रतिष्ठाविधिः। दक्षिणानिरूपणं। वरुणप्रतिष्ठाविधिः। तत्र नागयष्टिप्रमाणकथनं। चक्राब्जमण्डलनिरूपणञ्च।

No. 2349. ऋग्वेदिवृषोत्सर्गतत्त्वं। Substance, country-made yellow paper, 20 × 4 inches. Folium, 1. containing 10 lines of writing. Extent, 19 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍára, Zillá Rañgpur, Ráya Ramaṇímohana Chaudhurí, Báhádur; another copy at S'ántipur Bhuvaneśvara Tarkálañkára. Appearance, new. Prose and verse. Correct.

Rigvediya-vṛishotsarga-tattva. On the consecration of bulls according to the rules of the Ṛig Veda as summarised by Saunaka. By Raghunandana Bhaṭṭáchárya. This forms a part of the author's well-known Smṛiti digest in 28 parts.

Beginning. प्रणम्य सच्चिदानन्दं रामं कामदमीश्वरं।
ऋग्वेदिनां वृषोत्सर्गं वक्ति श्रीरघुनन्दनः॥

कालमाह। कार्त्तिक्यां पौर्णमास्यां वैशाख्यां वा जीववत्सायाः पयस्विन्याः पुत्रं द्विहायनमेकहायनं वा नीलं बभ्रुं पिङ्गलं वा—इत्यादि।

End. तेन देवता ऋषीन् पितॄंश्च प्रीणाति यश्चोत्सृजेदित्याह शौनकः। ब्राह्मणान् भोजयित्वा शेषं समापयेत्।

Colophon. इति वन्द्यघटीयहरिहरभट्टाचार्य्यात्मजश्रीरघुनन्दनभट्टाचार्य्यविरचितं ऋग्वेदिवृषोत्सर्गतत्त्वं समाप्तम्।

विषयः। शौनकोक्तविधिना संक्षेपेण ऋग्वेदिनां वृषोत्सर्गविधिकीर्त्तनं।

No. 2350. व्यवस्थासेतुः। Substance, country-made yellow paper, 20 × 4 inches. Folia, 162. Lines, 6 on a page. Extent, 3,864 ślokas. Character, Bengali. Date, Sk. 1771. Place of deposit, Tushabháṇḍára, Zillá Rañgpur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose and verse. Correct.

Vyavasthásetu. *Responsa prudentum* on all topics of Smṛiti rites, ceremonies and expiations—in short a digest of Smṛiti rules bearing on householders. By I's'varachandra S'armá.

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दविग्रहं ।
ईश्वरेण व्यवस्थायाः सेतुः सम्यग्वितन्यते ॥

अथ प्रायशः सङ्कल्पानामेव कर्म्मणामारम्भकत्वादादौ स एव निरूप्यते । तथाहि काय-वाङ्मनोभिः रचितं कर्म्म फलाय समर्थमिति श्रुत्या एषा सत्वमुक्तं । इत्यादि ।

End. दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन । इति वचनात् । — — — — — हरिचन्दनं कम्बलकं चन्दनविशेषः । .

Colophon. इति महोपाध्यायश्रीयुक्तेश्वरचन्द्रशर्म्मविरचितोव्यवस्थासेतुः समाप्तः ।
नत्वा शैलसुतासुतस्य चरणौ विघ्नौघनाशौ शुभौ ।
शाके चन्द्रसमुद्रसप्तशशिमे कर्कौटके पूषणि ।
श्रीयुक्तेश्वरशर्म्मरचितं नानाव्यवस्थान्वितं
सेतुं प्रव्यलिखन्मुदा परमया श्रीश्रीप्रसादोद्विजः ॥

विषयः । सङ्कल्पस्वरूपनिरूपणं । तस्य कर्म्माङ्गत्वनिरूपणं । तदकरणे दोषकथनञ्च । मासाद्युल्लेखावश्यकतानिरूपणं । गौणमासादिनिरूपणं । कर्म्मविशेषे मासविशेषनियमश्च । मलमासादिलक्षणविवेचनं । उपवाससङ्कल्पविचारः । विधिस्वरूपविवेचनं । निषेधपर्य्युदास-विवेचनं । विकल्पनिरूपणं । अनुकल्पनिरूपणं । तिथियुग्मव्यवस्थानिरूपणं । जन्मतिथि-व्यवस्थानिरूपणं । दुरदृष्टसूचकयोगतदुपशमनविधिकथनं । शूद्रस्य पौराणिकमन्त्रे अधिकार-कथनं । जन्ममासे चौरादिनिषेधकथनं । प्रतिपदादिषु तिथिषु प्रत्येकं कृत्यनिरूपणं । सर्व्व-काम्यकर्म्मादौ ग्रहपूजाविधानं । वैशाखशुक्लतृतीयायां गङ्गास्नानयवश्राद्धजगन्नाथदर्शनेषु विशेषकथनं । वरदाचतुर्थीविधिः । नष्टचन्द्रविधिः । नागपञ्चमीविधिः । अरण्यषष्ठी-विधिः । स्कन्दषष्ठीविधिः । आरोग्यसप्तमीविधिः । विधानसप्तमीविधिः । माकरीसप्तमी-विधिः । माघस्नानविधिः । जन्माष्टमीनिरूपणं । अत्र उपवासासामर्थ्ये प्रतिप्रसवः । दूर्व्वा-ष्टमीविधिः । भीष्माष्टमीविधिः । अशोकाष्टमीविधिः । श्रीरामनवमीविधिः । दुर्गोत्सव-विधिः । चण्डीपाठादिक्रमकथनं । बोधननवमीविधिः । होमनियमः । चातुर्मास्यव्रतविधिः । हरिशयनादिव्यवस्था । श्रवणद्वादशीविधिः । वारुणत्रयोदशीविधिः । सावित्रीव्रतविधिः । अनन्तव्रतविधिः । भूतचतुर्दशी-रटन्ती-यमतर्पणविधिः । तत्र कालीपूजाविधिः । पाषाण-चतुर्दशीविधिः । शिवरात्रिविधिः । मदनचतुर्दशीविधिः । महाज्यैष्ठीविधिः । कोजागर-विधिः । दोलयात्राविधिः । सङ्क्रान्तिनिरूपणं । कार्त्तिककृत्यनिरूपणं । ग्रहणनिरूपणं । अक्षया स्नानविधिः । करतोयास्नानादिविधिः । अर्द्धोदययोगः । युगाद्याविधिः । मन्वन्तराविधिः । भूमिसुवर्णदानादिविधिः । उद्वाहनिर्णयः । तत्र बान्धवादिनिरूपणं । प्रायश्चित्तव्यवस्था-कथनं । अतिपातकमहापातकानुपातकोपपातकप्रायश्चित्तकथनं । गोवधादिप्रायश्चित्तकथनं । धेनुमूल्यादिनिरूपणं । गोमूल्यं । वृषमूल्यं । प्रायश्चित्तपूर्व्वाह्णकृत्यं । बाल्यादिभेदेन प्रायश्चित्त-

भेदः। गर्भिनीगोबधादिप्रायश्चित्तं। अस्थिभङ्गप्रायश्चित्तं। अपालनप्रायश्चित्तं। द्विजातीनां स्वयं हत्यादिवाहनप्रायश्चित्तं। गोमांसभक्षके गोविक्रयादिप्रायश्चित्तं। गोबधापवादः। क्षत्रियादिबधप्रायश्चित्तं। स्त्रीबधप्रायश्चित्तं। गर्भबधप्रायश्चित्तं। मार्ज्जारादिबधप्रावश्चित्तं। मत्स्यादिबधप्रायश्चित्तं। मद्यपीयानादिभेदनप्रायश्चित्तं। अभि ॰ ारप्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। अथ अनध्यायविवेचनं। अकालवृत्तिव्यवस्था। शूद्रकर्त्तृकतर्पणवाक्यं। शुद्धिव्यवस्था। शुद्धिपदार्थनिरूपणं। सहमरणानुमरणव्यवस्था। अशौचनिरूपणं। मृत्युविशेषाशौचं। अशौचापवादः। अस्थिचयनादिकालः। द्रव्यशुद्धिनिरूपणं। पर्णनरदाहव्यवस्था। मुमूर्षुकृत्यं। प्रेततर्पणव्यवस्था। तत्र उपवासव्यवस्था। पुत्रस्य वर्षकृत्यव्यवस्था। पिण्डदानव्यवस्था। अशौचान्तदिनकृत्यनिरूपणं। तद्द्वितीयदिनकृत्यं। वृषोत्सर्गकालः। वृषलक्षणादिकथनं। अधिकारिनिरूपणं। चन्दनधेनुप्रयोगः। अङ्गप्रायश्चित्तादिकथनं। षोड़शदानविधिः। प्रेतक्रियाधिकारिणः। अतिदिष्टपुत्रकरणाधिकारकथनं। त्रिविधमृतक्रियानिरूपणं। हरिवंशशालग्रामादिदानविधिः। गोविन्दविवाहपद्धतिः। अथ श्राद्धलक्षणादिविवेचनं। देवतालक्षणं। यागलक्षणं। साहित्यलक्षणं। तन्त्रतालक्षणं। नवान्नश्राद्धकालः। शस्त्रहतचतुर्द्दशीविधि॰। अष्टकाश्राद्धविधिः। श्राद्धवेलानिरूपणं। मलमासश्राद्धनिरूपणं। मलमासे दुर्गोत्सवव्यवस्था। वृषोत्सर्गव्यवस्था। जातकर्म्मव्यवस्था। प्रायश्चित्तादिव्यवस्था च। निरवकाशकर्म्मणां कर्त्तव्यताकथनं। मलमासे निषिद्धानि। प्रतिमासं पार्व्वणानुष्ठाने असमर्थस्य पार्व्वणव्यवस्था। दर्भादिनिरूपणं। आमश्राद्धव्यवस्था। जीवत्पितृकश्राद्धव्यवस्था। मासिककालः। सपिण्डनाद्यपकर्षकालः। विघ्नपतितादिश्राद्धकालः। भर्त्तुराब्दिके रजस्वलाव्यवस्था। एकोद्दिष्टश्राद्धकालादिकथनं। अम्बुघटश्राद्धविधिः। त्रिदण्डिसन्न्यासिनां मरणे तेषां पूर्व्वाश्रमपुत्रकृत्यनिरूपणं। वृद्धिश्राद्धव्यवस्था। श्राद्धशेषभोजनादिव्यवस्थाकथनञ्च।

No. 2351. **महार्णवः।** Substance, country-made paper, 19 × 4 inches. Folia, 205. Lines, 8 on a page. Extent, 9,384 ślokas. Character, Bengali. Date, ? Place of deposit, Tushabháṇḍára, Zillá Rañgpur, Ráya Ramaṇímohana Chaudhurí, Bahádur. Appearance, new. Prose and verse. Incorrect.

Mahárṇava On diseases and sufferings resulting from sins committed in former existences and expiations suited for them. Every disease has its cause in a particular sin, and each sin has to be expiated in a particular specified manner. By Vis'ves'vara Bhaṭṭa, son of Poñga Bhaṭṭa. The ordinary technical name for works of this class is *Karmavipáka* or "fruition of work."

Beginning. नमः सकलकल्याणभाजनाय पिनाकिने।
नमोलक्ष्मीनिवासाय देवतायै गिरां नमः॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः।
परा शीलं श्लाघ्यं जगति स्फुजवस्ते कतिपये।
चिरं चित्ते येषां स्वकरतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः॥
माता पुण्यचरित्रकीर्त्तिविभवा यः पार्थिवानां मतः
साकल्यापरमूर्त्तिरार्य्यचरितः श्रीपोङ्गभट्टः पिता।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो-
वेदे स्मार्त्तमते नये च सपदे वाक्ये कृतौ वर्द्दते॥
श्रुतिस्मृतिपुराणानि समालोक्य यथामति।
निबध्यते समासेन + + + यं महार्णवः॥
स्वकर्म्मपाकजनितामयकर्षितानां
सत्कर्म्म कर्म्मकरमित्युदितं मुनीन्द्रैः।
तस्याङ्गजातमितरोक्तविधावपेक्षं
वक्ष्यामि रोगिनिखिलार्त्तिनिवर्हणाय॥

तत्र तावद्वक्ष्यमाणसकलकर्म्मोपयोगित्वे कर्म्मविपाक + + + + + + अवश्य-कर्त्तव्यता प्रतिपाद्यते। इत्यादि।

अथ प्रार्थनामन्त्रः।

End. त्वयस्य तोषिते स्कन्दे वलिभिस्तूपकल्पैभिः।
तेन महेश्वरस्तुष्टस्त्वमव्याः सततं शिशुं॥

त्वमव्याः सततं नरमित्यपि पाठः।

Colophon. इति श्रीपोङ्गभट्टात्मजश्रीविश्वेश्वरभट्टविरचिते महार्णवाभिधाने कर्म्म-विपाके प्रकारान्तरेण स्कन्दग्रहहरं।

विषयः। अथ रोगादिरूपफलनाशस्येष्टत्वात् तन्निदानात्मकदुरितापूर्व्वनाशाय प्राय-श्चित्तादिकं कर्त्तव्यमिति चेन्न समवायिकारणशरीरनाशेनैव तस्य रोगादेर्नाशे किं नित्यका-रणदुरितापूर्व्वनाशेन। यथा,—कपालादिनाशेनैव घटादीनां नाशो न तु दण्डचक्रादि-नाशेन। नच सहजमिदं कौनख्यादिकं प्रत्यादेष्टुं शक्यते। अपिच नरकतिर्य्यग्योन्यादि-जन्यदुःखपरम्परामनुभूतवतः कौनख्यादिकोविकारश्चरमं फलम्। तत उत्पन्नमात्रेण रोगेण स्वकारणदुरितापूर्व्वनाशाजन्यते मन्थनजनिताशुशुक्षणिनेव अरणिचयः। तस्मान्न पापवि-नाशार्थं व्रतचर्य्येतिविप्रतिपत्तिनिरासपूर्व्वकं सम्भावितदुरितापूर्व्वविनाशार्थं प्रायश्चित्तादिकं

कर्त्तव्यमिति निरूपणं। महापातकादिरोगकथनं। कर्म्मविपाकपरिभाषाकथनं। व्रताङ्ग-निरूपणं। सर्व्वपापनाशनकुष्माण्डहोमकथनं। अनुवाकपाठसहस्रततत्प्रयोगादिकथनं। वेद-विशेषे प्रयोगविशेषकथनञ्च। अथ मन्त्रपाठानुष्ठानक्रमसहितगणहोमकथनं। रोगनाशन-कामेन व्याधिप्रतिकृतिदानं कर्त्तव्यमितिनिरूपणं। व्याधिप्रतिमालक्षणादिकथनं। प्रतिमादान-विधेः सूक्तपाठप्रयोगकथनं। अथ कर्म्मज-दोषज-उभयजभेदात् व्याधेस्त्रैविध्यनिरूपणं। सा-मान्यतस्तदुपशमनविधिकथनं। तत्र अश्वत्थानुमन्त्रणविधिकथनं। वेदपारायणविधिकथनं महासौरसूक्तादिपारायणविधिकथनं। श्रीरुद्रमहारुद्रादिविधिकथनं। अथ होमीयस्थण्डिल-कुण्डादिनिर्म्माणविधानकथनं। पञ्चाङ्गरुद्रन्यासविधिकथनं। रुद्राभिषेकविधिकथनं। शत-रुद्रीयपाठक्रमकथनं। तत्र रोगनाशनादिकामनाविशेषे अनुवाकविशेषप्रयोगकथनञ्च। अथ पुरुषसूक्तप्रयोगकथनं। अथ सामान्यतोरोगप्रशमनार्थं विष्णुसहस्रनामकथनं। अपामार्ज्जन-स्तोत्रकथनं। विष्णुहृदयस्तोत्रकथनं। विनायकशान्तिविधिकथनं। ग्रहशान्तिविधिकथनं। नवग्रहयज्ञप्रयोगकथनञ्च। अथ कर्म्मविपाकप्रकरणोक्तहेमरूप्यधान्यादिमानकथनं। कृच्छ्र-चान्द्रायणादिलक्षणकथनं। महाशान्तपनलक्षणकथनं। पराकव्रतयावकव्रतपयोव्रतादिलक्षण-कथनं। व्रतादीनामनुकल्पविधानं। गोमूल्यादिकथनञ्च। व्रतविशेषे स्नानविशेषकथनं। तत्र जलस्नान-भस्मस्नान-मृत्तिकास्नान-गोमूत्र-गोमय दधि-दुग्ध घृतस्नानविधिमन्त्रादिकथनञ्च। गोदान-भूमिदान-लवण-गुड़ादिदानविधिकथनं। अथ महापातकादिजनितरोगाणां निदा-नकथनपूर्व्वकं प्रत्येकं तदुपशमनविधिकथनं। तत्र विशेषेण क्षयरोगनाशनार्थं कदलीदान-विधिकथनं। राजयक्ष्मप्रतिकृतिदानविधिः। गुड़धेन्वादिदानविधिकथनञ्च। शूलरोगना-शनाय त्रिशूलदानादिविधिः। अथ अरुचिशूल-अजीर्णशूल-प्लीहशूल-जठरशूल-कटिशूल-दन्तशूल-कर्णशूल-नयनशूलादिनाशनोपायकथनं। विविधज्वरनाशनविधिः। तत्र सर्व्वज्वर-हरकुण्डदानविधिः। ज्वरतर्पणादिविधिकथनञ्च। श्वासकासहरणार्थं ध्वजपाशदानादिविधिः। शोथरोगहरवस्त्रादिदानविधिः। पाण्डुरोगहरपृथ्वीदानादिविधिः। अन्त्रहरनारायणादि-विधिः। गतिव्रणघ्नगजादिदानविधिः। वातव्याधिहरमृगादिदानविधिः। अपस्माररोगहर-विनायकादिदानविधिः। मुखरोगहरगजादिदानविधिः। मूकत्वहरतिलपद्मादिदानविधिः। गद्गदहरसरस्वतीदानविधिः। अक्षिवेदनाहरगरुड़ादिदानविधिः। नक्तान्धहरगोपालदान-विधिः। जलोदरहरमकरादिदानविधिः। मन्दाग्निहरमेषादिदानविधिः। प्रज्ञाजाड्यहर-घण्टादानादिविधिः। प्रमेहहरसुवर्णधेनुदानविधिः। ग्रहणीहरधेनुदानादिविधिः। दद्रु-रोगहरोमहेश्वरदानविधिः। कुष्ठरोगहरवृषादिदानविधिः। गर्भस्रावहरयज्ञोपवीतादिदान-विधिः। एवं सर्व्वेषु रोगेषु प्रशमनोपायकथनं। तथा सर्व्वदा दुःखहर-सर्व्वकार्य्यासिद्धिहर-दशान्तरगमनक्लेशहर-दारिद्र्यहर-मूर्खत्वहर-पिशाचत्वहरविधानादिकथनं। विविधग्रहहर-विधिकथनं। तत्र तत्र निदानकथनञ्च।

No. 2252. समासवादः। Substance, country-made paper, 16 × 5 inches. Folia, 9. Lines, 11 on a page. Extent, 262 ślokas. Character, Maithili. Date, ? Place of deposit, Tavká, Post Delsiñsarái, Zillá Darbhañgá, Mímáñsaka Chitradhara Miśra. Appearance, old. Prose. Correct.

Samása-váda. A grammatico-logical disquisition on the compounding of words. By Rámabhadra Sárvabhauma. There is a second work of this name, noticed by Mr. Hall, (p. 61), by Jayaráma Nyáya-panchánana Bhaṭṭáchárya.

Beginning. अत्र बहुव्रीहौ चित्रगुमानयेत्यादौ चित्रगोःस्वामिनोबोधने गोपदस्यचित्र-पदस्य ? उभयपदस्य वा चित्रगोः स्वामिनि लक्षणायामेकपदवैयर्थ्यप्रसङ्गात् । इत्यादि ।

End. लक्षणया विनाप्युपपत्तिर्भवतीति संक्षेपः ।

विचार्य्य + र्य्यैः सततं नवीनै-
रुत्कोटवीरुच्चरणप्रवीणैः ।
श्रीसार्व्वभौमैर्बहुवादविज्ञैः
कृतः समासेन समासवादः ॥

Colophon. इति श्रीमन्महामहोपाध्यायश्रीरामभद्रसार्व्वभौमविरचितः समासवादः समाप्तः ।

विषयः । समासे शक्त्यादिनिरूपणं ।

No. 2353. वादसुधाकरः। Substance, country-made paper, 13 × 3½ inches. Folia, 26. Lines, 6 on a page. Extent, 450 ślokas. Character, Maithili, Date, ? Place of deposit, Tavká, Post Delsiñsarái, Zillá Darbhañgá, Mímáñsaka Chitradhara Miśra. Appearance, new. Prose. Incorrect.

Váda-sudhákara. A grammatico-logical disquisition on the effect and purport of declensions and conjugations. By Krishṇa A'chárya, son of Rámasevaka, and grandson of Devídatta.

Beginning. शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।
इति वात्सल्यवान् बिभ्रत् तद्रुपं पातु माधवः ॥

अथाख्यातस्य कृतौ शक्तिर्न तु कर्त्तरि । कृत्याश्रयत्वमेव कर्तृत्वं तच्च कृतिरूपं इत्यादि ।

End. अन्येत्वाहुः, बोधकतारूपशक्तिरपभ्रंशेष्वपि दुर्व्वारा एवेति ।

Colophon. इति श्रीमद्देवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्य्यकृतौवादसुधाकरः समाप्तः ॥

विषयः । आख्यातादर्थशक्तिनिरूपणं ।

No. 2354. गूढ़ार्थदीपिका । Substance, palm-leaf, 14 × 2½ inches. Folia, 288 Lines, 5 on a page. Extent, 7,892 ślokas. Character, Maithili. Date, ? Place of deposit, Harinagara, Post Madhuvani, Zillá Darbhañgá, Paṇḍit Hali Jhá. Appearance, old. Prose and verse. Correct.

Gúḍhártha-dípiká. Expositions of doubtful topics in regard to various Smṛiti rites and ceremonies. By Vámadeva Upádhyáya.

Beginning. गोविन्दचरणद्वन्द्वमाधाय हृदयाम्बुजे ।
वामदेवेन सुधिया कृता गूढ़ार्थदीपिका ॥
हरिप्रसादादेवैषामवेद्यार्था निरूपिताः ।
इह मात्सर्य्यमुत्सार्य्य विदांकुर्व्वन्तु पण्डिताः ॥

तत्र वर्षकृत्ये त्रिंशत्तिथिवटितैर्द्वादशभिर्मासैर्मलमासपाते त्रयोदशभिर्मासैर्वर्षसमाप्तिः । इत्यादि ।

End. इदमन्नमिमा आप इदं हविरित्यन्नजलघृतादिषु ज्ञेयमिति शम् ।

Colophon. इत्युपाध्यायश्रीवामदेवविरचिता गूढ़ार्थदीपिका समाप्ता ।

विषयः । वर्षकृत्ये मलमासादिपाते वर्षगणनाविशेषकथनं । धर्म्मकार्य्येषु पञ्चविधमासनिरूपणं । मलमासविधानं । तिथिस्वरूपादिविवेचनं । युग्मादितिथिविवेचनं । एकादशीनिरूपणं । पारणविधिकथनं । चैत्रादिद्वादशमासकृत्यनिरूपणं । तत्र विशेषेण जन्माष्टमीनिरूपणं । महाष्टम्यादिविधानञ्च । शिवरात्रिविधिः । यजमानस्य कर्त्तव्यकथनं । जननाद्यशौचे शिवलिङ्गादिपूजने विप्रस्य नित्याधिकारकथनं । स्पर्शं विना शालग्रामशिलायामपि स्त्रीशूद्राभ्यां पूजा कर्त्तव्येतिनिरूपणं । व्रतपरिभाषाकीर्त्तनं । व्रतलक्षणादिकथनं । मन्वन्तरादिनिरूपणं । अर्द्धोदयादियोगनिरूपणं । पुण्यकालनिरूपणं । विशेषेण कार्त्तवीर्य्यदीपदानविधिकथनं । अहोरात्रकृत्यनिरूप[णं] । तत्र शौचाचमनदन्तधावनादिकथनं । सन्ध्योपासनादिविधिकथनं । शिखाबन्धनादिविधिकथनं । पञ्चयज्ञविधिः । शिवादिपूजनविधिः । आतिथ्यविधि[ः] । भोजनविधिः । मांसभोजनविधिविवेचनं । विहितमत्स्यपक्षिप्रभृतिनिरूपणं । माहिषदुग्धस्य आमिषत्वकथनं । सामान्यतोभक्ष्याभक्ष्यनिरूपणं । शयनादिविधिकथनं । अशौचनिरूपणं । सापिण्ड्यनिरूपणं । प्रेतकृत्यनिरूपणं । दशपिण्डदानादिविधिकथनं । देशभेदेन शौचाद्याचारस्य विहितत्वकथनं । द्रव्यशुद्धिनिरूपणं । मुमूर्षुकृत्यनिरूपणं । द्वादशविधश्राद्धलक्षणकथनं । श्राद्धदेशनिरूपणं । श्राद्धकालनिरूपणं । काम्यश्राद्धविधिकथनं । श्राद्धे देयानि । निमन्त्रणविधिः । सङ्कल्पवाक्यविवेचनं । सपिण्डीकरणादिविधिः । आद्यश्राद्धविधानकथनञ्च ।

No. 2355. तत्त्वकौस्तुभः। Substance, country-made paper, 11 × 4 inches, Folia, 172. Lines, 10 on a page. Extent, 4,622 ślokas. Character, Nágara. Date, ? Place of deposit, Tavká, Post Delsíñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, fresh. Prose and verse. Correct.

Tattva-kaustubha. A refutation of the dual theory of Madhváchárya, with a view to support the doctrine of S'aṅkara A'chárya as developed in his commentary on the Vedánta Sútras. By Bhaṭṭojí Díkshita.

Beginning. प्रथमपत्रं नास्ति।

कापालं भैरवं शाक्तं गारुड़ं पूर्व्वपश्चिमं।
पाञ्चरात्रं पाशुपतं तथान्येऽपि सहस्रश इति॥

अत्र च भ्रष्टानां गतिप्राप्तये आगमप्रणयनेऽपि तत्र तत्र प्ररोचनार्थं चतुर्षु वेदेषु परमपुरुषार्थमलभमानः शाण्डिल्य इमां विद्यामधीतवान् इत्यादि।

End. आतिवाहिका इति तु माधात् प्राचां पाठः। एतत् पदार्थखण्डनं प्राग्वत्॥

Colophon. इति श्रीभट्टोजीदीक्षितकृते तत्त्वकौस्तुभे चतुर्थाध्यायस्य तृतीयः पादः।
इतः परः चतुर्थपादस्य कियदंशोवर्त्तते॥

विषयः। मध्वाचार्य्यकृतवेदान्तभाष्याधिकरणखण्डनपूर्व्वकं शाङ्करमतस्थापनं।

No. 2356. भट्टभास्करः। Substance, country-mada paper, 11 × 4½ inches. Folia, 119. Lines, 8 on a page. Extent, 1,896 ślokas. Character, Nágara. Date, ? Place of deposit, Tavká, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, fresh. Prose and verse. Incorrect.

Bhaṭṭa-bháskara. A dissertation on the Mímáñsá theory of Duty (*Dharma*) and the eternity and authority of the Vedas as developed by different schools of Mímáñsákas. By Jívadeva, son of A'padeva. Hall's 'Contributions,' p. 188.

Beginning श्रीकृष्णं प्रणतार्त्तिघ्नमापदेवाभिधं गुरुं।
प्रणम्य जीवदेवेन क्रियते भट्टभास्करः॥
अस्तु मत्सरिणां वार्त्ता सन्तस्तत्त्वार्थदर्शिनः।
विवेचयन्तु तत्त्वार्थमेष तेषु कृतोऽञ्जलिः॥

इह खलु सुखदुःखप्राप्तिनिवृत्त्यर्थिप्रेक्षावतां धर्म्माधर्म्मविषये प्रवृत्तिनिवृत्ती दृश्येते।

End. अवेदत्वेऽपि वेदैकदेशत्वादस्यैव प्रामाण्यमिति दिक् ।

Colophon. इति श्रीमदापदेवात्मजजीवदेवकृतौ भट्टभास्करे
धर्म्मप्रमापरिच्छेदः ॥

विषयः । धर्म्मस्वरूपनिरूपणं । धर्म्माधर्म्मयोः प्रमाणकथनं । वेदस्य अपौरुषेयत्वनिरूपणं । वेदलक्षणकथनं । शाब्दीभावनानिरूपणं । आर्थीभावनानिरूपणं । आख्यातादीनां कुत्र शक्तिरिति तन्निरूपणं । विधिस्वरूपविवेचनं । निषेधनिरूपणं । अर्थवादनिरूपणं । मन्त्रनिर्णयः । नित्यत्वादिलक्षणकथनं । यागस्वरूपादिविवेचनं । प्रकृतिविकृत्यादीनां स्वरूपविवेचनं । उत्पत्तिविनियोगाधिकार-प्रयोगभेदेन अपूर्व्वविधेश्चातुर्विध्यनिरूपणं । अङ्गत्वस्वरूपनिरूपणपुरःसरं तत्र श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि षट् प्रमाणानीतिनिरूपणं । श्रुत्यादीनां प्रत्येकं लक्षणोदाहरणादिकथनं । श्रुत्यादीनां विरोधे पूर्व्वपूर्व्वस्य बलीयस्त्वकथनं । सर्व्वेषु कर्म्मसु मनुष्याणामेव अधिकारो नान्येषां सामर्थ्याभावादितिनिरूपणं । मनुष्येष्वपि अनधिकारिनिरूपणं । द्रव्यादिनिरूपणं । भिन्नकल्पयोः सहाधिकारकथनं । यागविशेषे ब्राह्मणक्षत्रियादीनामधिकारविशेषकथनं । वचनातिदेश-नामातिदेश-चोदनालिङ्गातिदेश-भेदेन अतिदेशस्य त्रिविधत्वकथनपूर्व्वकं तत्स्वरूपादिनिरूपणं । अग्निहोत्रादिशब्दानां नामधेयत्वनिरूपणं । अनुवादनिरूपणं । ऊहनिरूपणं । नियमविधिनिरूपणं । परिसंख्यानिरूपणं । स्वाध्यायविधिविवेचनं । लक्षणाविवेचनं । मन्त्राणां धर्म्मप्रामाण्यकथनं । नाम्नः पदमात्रस्य प्रामाण्यकथनं । नामधेयनिरूपणं । दशनामविवेचनं । स्मृतेतिहासपुराणादीनां प्रामाण्यमूहनीयनिरूपणं । सदाचाराणां श्रुतिस्मृतिसमूलत्वेन प्रामाण्यकथनं । श्रुत्याद्यविरुद्धानां धर्म्मबुद्ध्या शिष्टैरनुष्ठीयमानानां धर्म्मे प्रामाण्यकथनञ्च ।

No. 2357 अङ्गत्वनिरुक्तिः । Substance, country-made paper, 12 × 4 inches. Folia, 34. Lines, 16 on a page. Extent, 1,944 ślokas. Character, Maithili. Date, ? Place of deposit, Tavká, Post Delsiñsarái, Zillá Darbhañgá, Mímáñsaka Chitradhara Miśra. Appearance, new. Prose Generally correct.

Añgatva-nirukti. A dissertation on various Mímáñsá topics, and reconciliation of doubtful points of the theory. By Murári Mis'ra.

Beginning. नमामि तुलजां स्वीयकुलजाद्यधिदेवतां ।
स्वस्वाभीष्टफलप्राप्त्यै ब्रह्मादिभिरभिष्टुतां ॥
मुरारिसंसेवनलब्धबुद्धिः
कुमारिलप्रोक्तमतानुसारी ।

मुरारिरङ्गत्वनिरुक्तिमेतां
करोति सद्युक्तिगुणैरुपेतां ॥

तत्राङ्गत्वं न तावज्जातिः तत्साधकाभावात् क्रियीत्यादिजात्या साङ्कर्य्यप्रसङ्गाच्च इत्यादि ।

End. तयोरेव विनियोजकत्वोदाहरणन्तु स्वग्यमित्यनवद्यं श्रुत्यादिप्रमाणकमङ्गत्वं ॥

श्रीजैमिनीयं मतमङ्गतायां
तत्तन्निबन्धेष्वपि संनिबद्धं ।
असुग्रहं सुग्रहमत्र कर्तुं
मुरारिरेतामकरोन्निरुक्तिं ॥
मुरारिनिर्म्मितिर्न्यायमीमांसावासितात्मनां ।
तोषाय विदुषामेषा कण्ठभूषा भविष्यति ॥

Colophon. इति श्रीमुरारिमिश्रविरचिताङ्गत्वनिरुक्तिः समाप्तिमगमत् ॥

विषयः । भट्टकुमारिलमतमवलम्ब्य विरचितमिदं मीमांसाप्रकरणं । तत्र प्राधान्येन अङ्गत्वस्य स्वरूपादिविवेचनं । शेषत्वपरार्थत्वयोः स्वरूपकथनं । प्रकृतिस्वरूपादिनिरूपणं । विकृतिस्वरूपादिकथनं । कारकत्वस्वरूपकथनं । पुरुषार्थस्वरूपादिकथनं । अङ्गत्वे च श्रुति-लिङ्गवाक्यप्रकरणस्थानसमाख्यानानि षट्प्रमाणानि । तत्र श्रुत्यादीनां प्रत्येकं स्वरूपादि-विवेचनञ्च ।

No. 2358 तात्पर्य्यपरिशुद्धिः । (चतुर्थाध्यायः ।) Substance, country-made paper, 12 × 3½ inches. Folia, 32. Lines, 10 on a page. Extent, 775 ślokas. Character, Maithili. Date, ? Place of deposit, Tavká, Post Delsiñgsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, old. Prose. Correct.

Tátparyapari-śuddhi. A gloss on the 4th chapter of Váchaspati Mis'ra's *Nyáyavártika-tátparya* which is a commentary on Udyotakara's Vártikas on the Nyáya aphorisms of Gotama. By Udayana Mahámahopádhyáya. Hall's 'Contributions,' p. 27.

Beginning. मनसोऽनन्तरा प्रवृत्तिरवसरप्राप्ता परीक्षितव्येत्यत आह प्रवृत्तिर्यथोक्ता तथा परीक्षितेत्यर्थः । सूत्रस्य । किं पुनः प्रवृत्तेः परीक्षितमिति । इत्यादि ।

End. सांख्यं दूषयद्भिरित्यर्थ इति । अर्थः शेष इत्यर्थः । इत्येवमाकार इति । इत्येव-माकारज्ञानगम्य इत्यर्थः ॥

Colophon. इति महामहोपाध्यायाचार्य्यश्रीमदुदयनकृतौ तात्पर्य्यपरिशुद्धौ
चतुर्थोऽध्यायः ॥ ४ ॥

घिवयः। गोतमसूत्रवात् ... नभाष्यस्य उद्योतकरकृता वार्त्तिकाभिधाना या व्याख्या तस्या व्याख्यानस्य वाचस्पतिमिश्रप्रणीतस्य न्यायवार्त्तिकतात्पर्य्याभिधानस्य चतुर्थाध्यायमात्रस्य व्याख्यानम्।

No. 2359. शास्त्रदीपिकाप्रकाशः। Substance, country-made paper, 12 × 4 inches. Folia, 69. Lines, 9 on a page. Extent, 1,772 ślokas. Character, Nágara. Date, ? Place of deposit, Tabká, Post Delsiñgsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, new. Prose. Generally correct, but abounding in lacunæ.

S'ástradípiká-prakáśa. A dissertation on the first aphorism of the Mímáñsá Sútra of Jaimini as explained by Párthasárathi Mis'ra in his S'ástradípiká. By S'añkara Bhaṭṭa, son of Náráyaṇa Bhaṭṭa. Hall's 'Contributions,' p. 177.

Beginning. लक्ष्मीति। मुकुन्दं मुक्तिं ददातीति मुकुन्दः। पृषोदरादित्वात् साधुत्वं। वर्णाचरसाम्यान्निरुक्तिवचनान्निरुक्तानां मुकुन्द इतिनिरुक्तिरिति श्रीशङ्कराचार्य्याः। तमीश्वरं मुदा वन्दे। इत्यादि।

End.

परिष्कृतं शास्त्रमुखं यथैव-
माचार्य्य + + मुकुरं पुस्तकात्।
आधाय मिश्रैर्विमलीकृतं त-
द्विमग्नचेतोहरणं करोतु॥
शास्त्रं समारिप्सुरिहेदमाद्य-
सूत्रे तदीयोविषयस्तु धर्म्मः।
प्रयोजनं ज्ञेयतयेत्यधीति-
विधिं वद + + फलं बभाषे॥
सूत्रे द्वितीये लघुना स्वरूपं
धर्म्मे प्रमाणं स्वत एव वेत्ति।
सामान्यतस्त्वादिमसूत्र एव
जिज्ञासयोपात्तमिहाभिधत्ते॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणमीमांसाद्वैतसाम्राज्यधुरन्धर-श्रीभट्टनारायणात्मजभट्टशङ्करोन्नीते शास्त्रदीपिकाप्रकाशे प्रथमसूत्रं समाप्तं॥

शुभमस्तु ग्रन्थ २००० ।

विषयः । पार्थसारथिमिश्रकृतशास्त्रदीपिकाभिधानाया मीमांसासूत्रव्याख्यायाः अथातो-धर्म्मजिज्ञासेतिप्रथमसूत्रव्याख्याव्याख्यानम् ।

No. 2360. शब्दकौस्तुभः । Substance, country-made paper, 13 × 4 inches. Folia, 271. Lines, 12 on a page. Extent, 9,737 ślokas. Character, Nágara. Date, ? Place of deposit, Tabká, Post Delsiñsarái, Zillá Darbháñgá, Mímáñsaka Chitradhara Miśra. Appearance, fresh. Prose. Correct.

S'abda-kaustubha. A commentary on the first section of the first book of Páṇini's grammar. By Bhattojí Bhaṭṭa, son of Lakshmídhara Súri.

Beginning. विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्त्ति वरीवर्त्ति सञ्जरीहर्त्ति लीलया ॥
नमस्कुर्व्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयं ।
श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान् बुधान् ॥
नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितं ।
फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥
परिभाव्य बहून् ग्रन्थान् योऽर्थः क्लेशेन लभ्यते ।
तमशेषमनायासादितोगृह्णीत सज्जनाः ॥
समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभं ।
भट्टोजिभट्टोजनुषः साफल्यं लब्धुमीहते ॥

प्रेक्षावत्प्रवृत्तये व्याकरणविषयं भगवान् भाष्यकारः प्रदर्शयति । अथ शब्दानुशासन-मिति ॥ इत्यादि ।

End. तयोरपत्यं वाहीका । नैषा वृष्टिः प्रजापतेरिति । एतच्च विवेचनं वाहीकग्रामे-भ्यश्चेत्यादावुपयक्ष्यत इति सर्व्वं सुस्थम् ॥

Colophon. इति श्रीविद्वन्मुकुटरत्नस्य लक्ष्मीधरसूरेः सुनुना भट्टोजिभट्टेन कृते शब्द-कौस्तुभे प्रथमाध्यायस्य प्रथमे पादे नवमाह्निकं ।
पादश्चायं समाप्तः ॥

विषयः । पाणिनिसूत्रस्य प्रथमाध्यायप्रथमपादान्तं व्याख्यानम् ।

No. 2361. श्रीकृष्णविरुदावली। टीकासहिता। Substance, country-made paper, 11 × 3½ inches. Folia, 48. Lines, 9 on a page. Extent, 891 ślokas. Character, Nágara. Date, ? Place of deposit, Harinagara, Post Madhuvaní, Zillá Darbhángá, Paṇḍit Hali Jhá. Appearance, fresh. Text, verse and prose; commentary only prose.

S'ríkṛishṇa-virudávalí. A hymn in praise of Kṛishṇa, describing in course of it his form, his merits, and his loveliness. By Chandradatta, of Mithilá.

टीकायाः।

Beginning. प्रणम्य हरिपादाब्जं जानकीजन्मभूमिभूः।
चन्द्रदत्तः स्वरचितां व्याचष्टे विरुदावलीं॥

चिकीर्षितग्रन्थनिर्व्विघ्नसिद्ध्यर्थं स्वेष्टदेवताप्रार्थनारूपमङ्गलमाचरति विमलेति। तत्रादौ विरुदावलीलक्षणं,—गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते। तालप्रस्तावरुद्धा सा कलिकेति प्रगीयते। इत्यादि।

मूलस्य।

विमलाजिनवसने सुविकटवसने चञ्चलरसने भीमरवे
करधृतकरवाले रणविकराले नगवरवाले ललितशिवे।
मधुरस्मितहासिनि ग्रास्भविनाशिनि गिरिवरवासिनि मयि सकलं
सुरवैरिविदारिणि मृगवरचारिणि मङ्गलकारिणि कुरु कुशलं॥
भूभारोद्धरणाय भूसुरसुरत्राणाय भूमीतले
ब्रह्मेन्द्रामरवृन्दवन्दितपदे वंशे प्रशंस्ये यदोः।
त्वय्याविर्भवति प्रभो विलसति ब्रह्माण्डभाण्डोदरे
चण्डीभर्त्तुरकाण्डताण्डवविधौ शङ्खध्वनिः पातु मां॥

जय घनसुन्दरनमितपुरन्दर वन्दितचरणतलागतनिजशरणागतवन्दिते इत्यादि।

मूलस्य।

End. एषा मैथिलचन्द्ररचिता कृष्णस्तुतिर्यद्यपि
काव्यालङ्कृतिवर्ज्जितापि सुधियां सत्कारमेवार्हति।
यद्भक्ता जगदीश्वरस्य चरितं श्लाघ्यसद्भाषया
हर्षाश्रुप्रतिरुद्धगद्गदगिरस्तामेव सत्कुर्व्वते॥

Colophon. इति मैथिलचन्द्रदत्तकृता श्रीकृष्णविरुदावली सम्पूर्णा।

टीकायाः।

विद्वत्सु विनयेन क्षमापयति एषेति।

इति मैथिलचन्द्रदत्तकृता श्रीकृष्णविरुदावलीटीका सम्पूर्णा।

विषयः। श्रीकृष्णस्तुतिव्याजेन तद्रूपगुणमाधुर्य्यादिवर्णनं।

No. 2362. विधिवादः। Substance, country-made paper, 16 × 4 inches. Folia, 18. Lines, 8 on a page. Extent, 378 ślokas. Character, Maithili. Date, ? Place of deposit, Sápura, Zillá Darbháñgá, Paṇḍit, Mádhava Jhá. Appearance, fresh. Prose. Correct.

Vidhi-váda. An elementary logical exposition of the nature and force of rules regarding the power of words as propounded in the *S'abdachintámaṇi* of Gañges'a. By Vañs'adhara S'armá. Hall's 'Contributions,' p. 60.

Beginning. सरस्वतीं नमस्कृत्य श्रीवंशधरशर्म्मणा।
बालानां सुखबोधाय विधिवादोवितन्यते॥

तत्र अभिधापूर्व्वसङ्कल्पभावनाज्ञानं न प्रवर्त्तकं। तस्मिन् सत्यप्रवृत्तेः। इति सत्यं। मस्यायमाशयः। अभिधा नाम पदार्थविशेषः। इत्यादि।

End. तत्पुरुषीयप्रत्यवायं प्रति स्वरूपसम्बन्धेन हेतुत्वमिति न काप्यनुपपत्तिः।

विषयः। . शब्दचिन्तामण्यन्तर्गतविधिस्वरूपविचारस्य व्याख्यानं।

No. 2363 काशीगीतं। Substance, country-made paper, 11 × 4¼ inches. Folia, 20. Lines, 9 on a page. Extent, 351 ślokas. Character, Nágara. Date, ? Place of deposit, Harinagara, Post Madhuvaní, Zillá Darbháñgá, Paṇḍit Hali Jhá. Appearance, old. Verse. Generally correct.

Káśígíta. On the merits of Káśí recited in a pastoral poem in imitation of the Gítagovinda of Jayadeva. By Chandradatta, of Mithilá.

Beginning. मोहैर्भङ्गुरमेतदस्ति भुवनं विज्ञाय भूतेश्वरो-
भव्यार्थी जगतोऽकृतातिकरुणः काशीशरीरं परं।
इत्यन्वेदवतीर्जयन्ति जगतोरेकात्मनोरेतयोः
काशीशङ्करयोश्चिरं सुरधुनीकूले रहःकेलयः॥
आस्ते यद्यपि रामजन्मधरणी श्रीकृष्णजन्मावली
माया नाम पुरी तथा भगवतीकाञ्चीपुरी पुण्यदा।

नाम्नैव प्रकटीकृतस्वमहिमावन्ती तथा द्वारका
एताः सन्तु परन्तु जन्तुनिकरोद्धारे न काशीसमा ॥
यदि हरस्मरणे सरसं मनो—
यदि विवेककलासु कुतूहलं ।
सदुपदेशमहेशकथापथं
शृणु तदा किल मैथिलभारतीं ॥ इत्यादि ।

End. मत्कृतेन च गीतेन भवानीशङ्करौ परं ।
प्रीयेतां + + काषि परिवारसमन्वितौ ॥
— — — — — — — — — ।

Colophon. इति मैथिलचन्द्रदत्तकृतकाशीगीते द्वादशः सर्गः ।
काशीगीतं समाप्तम् ।

विषयः । जयदेवकृतगीतगोविन्दस्य छायारूपमिदं गीतिकाव्यं। तत्र काश्यां शिवलीला-वर्णनमुखेन काशीमाहात्म्यादिवर्णनं ।

No. 2364 समयप्रदीपजीर्णोद्धारः । Substance, palm-leaf, 14 × 1½ inches. Folia, 52. Lines, 4 on a page. Extent, 1,048 ślokas. Character, Maithili. Date, Ls. 522. Place of deposit, Harinagara, Post Madhuvaní. Zillá Darbhañgá, Paṇḍit Hali Jhá. Appearance, old. Prose and verse. Correct.

Samaya-pradípa-jírṇoddhára. An appendix to, and commentary on, the *Samaya-pradípa*, of S'rídatta. By Madhusúdana Ṭhakkura, Mahámahopádhyáya.

Beginning. चलानप्यचलीकुर्व्वन्नचलानपि चालयन् ।
वृन्दावनविहारी स्तात्तापहारी हरिर्मम ॥

अद्य रविवार इत्यादि । मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वश इति यदि समूलं तदा प्रायश्चित्तपरमेव प्रकरणात् । इत्यादि ।

End. नच प्रमाणं लिङ्गं । तत्र सर्व्वदा मेघादिप्लवोस्तीति वाच्यं । तत्पुरुषीयदर्शने विशेषस्याऽपि कारकत्वे जात्यवच्छिन्नकार्य्यत्वे इति ।

Colophon. इति महामहोपाध्यायसर्व्वठक्कुरमधुसूदनविरचितः समयप्रदीपजीर्णोद्धारः समाप्तः ।

विषयः । तार्किकसमयरीत्या श्रीदत्तकृतसमयप्रदीपस्य व्याख्यानं । तदनुक्तांशनिरूपणञ्च ।

No. 2365. रत्नसारः। Substance, country-made paper, 13 × 4 inches. Folia, 13. Lines, 8 on a page. Extent, 876 ślokas. Character, Maithili· Date, Sk. 1704. Place of deposit, Phaḍkiyá-grám, Post Champánagara, Zillá Púrṇiyá, Jayapati Jhá. Appearance, fresh. Verse. Generally correct.

Jyotisha-ratnasára ALIAS **Ratnasára**. Civil astrology, giving rules for ascertaining appropriate and auspicious days for the celebration of sacraments and domestic rites and ceremonies. By Sṛípati.

Beginning. वागीश्वरीं देवगणाधिनाथं
प्रणम्य गर्गादिमुनिप्रणीतं।
विलोक्य दैवज्ञमनोभिरामं
करोम्यहं ज्योतिषरत्नसारं॥
चौड़स्य श्रुतिवेधनस्य कठिनीदानस्य शास्त्रस्य च।
मौञ्जीबन्धनपाणिपीड़नविधे र्यात्रा + कूपस्य च॥ इत्यादि।

End. ज्योतिःशास्त्रमहार्णवस्य विभुतामालोक्य संचेपतो-
वाल्मीकिश्रुतिनारदमनुव्यासादिशास्त्रादिदं।
आकृष्य व्यवहारमात्रमखिलं श्रीरत्नसारं + +
बालानां हृदि मोददं सुविमलं चक्रे ततः सादरं॥

Colophon. इति श्रीपतिविरचितोरत्नसारः समाप्तः।
शकाब्दाः १७०४।

विषयः। चूड़ोपनयनादिषु संस्कारेषु तथा नवान्नधान्यच्छेदनादिषु कार्य्येषु च तिथि-नचत्रादिविवेचनेन शुभाशुभादिनिरूपणं।

No. 2366. संशयतत्त्वनिरूपणं। Substance, country-made paper, 14 × 3½ inches. Folia, 20. Lines, on a page. Extent, 504 ślokas. Character, Nágara. Date, ? Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, old. Prose. Incorrect.

Sañśaya-tattva-nirúpaṇa. A logical dissertation on doubt, and the means of removing it. By Víres'vara Bhaṭṭa, son of Vis'va-nátha.

Beginning. उमामुखसुधासक्तो सादरं त्रिपुरद्विषं
भक्तस्य वाप्यभक्तस्य कामदं कामदं नुमः॥

मनोहरं नमस्कृत्य विश्वनाथं महागुरुं।
वीरेश्वरोऽयं कुरुते सन्देहत्वनिरूपणं॥

तत्त्वनिर्णयस्यैवापवर्गसाधनतया निर्णयस्य च संशयान्यज्ञानरूपत्वेन संशयज्ञानाधीनत्वात् संशयस्य न्यायाङ्गत्वेन तदुपयोगित्वाच्च इत्यादि।

End. स + प्रसङ्ग + इलाभाकुलेन त्रिदशपतिपुरीं या हसन्तीव गर्व्वात्,
तस्यामास्ते नगर्य्याममरनरपतिः स द्विजः कल्पवृक्षः।
तत्पुण्याम्भोदवृष्टः स्मरहरनगरीवासिवीरेश्वरस्त-
न्मूलं प्राप्योपहारं सुवचनमकरोद्वीक्ष्यतां कल्पवृक्षः॥
विज्ञेषु विज्ञप्तिरियं मदीया
देया हि दोषा वचनेष्वमीषु।
परन्तु भावं नितरां विभाव्य
मार्गागतोनैव दुनोति दोषः॥
सुधांशुविम्बं किल जातुचिद्‌दृष्टा
दष्टं सरोषेण सुरद्विषा तत्।
पिवन्ति लोकाः किमु ++++
नेत्रैः प्रशान्तैरमृतं महो +॥

Colophon. इति श्रीमन्नैयायिकमुकुटपूजितचरणारविन्दमनोहरश्रीविश्वनाथसूनु-श्रीवीरेश्वरभट्टविरचितं संशयतत्त्वनिरूपणं पूर्णतामगात्।

विषयः। विशेषेण संशयपदार्थविमर्शनम्।

No. 2367. अमरुशतकटिप्पनी। Substance, country-made paper, 16 × 4 inches. Folia, 28. Lines, 6 on a page. Extent, 516 ślokas. Character, Bengali. Date, ? Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, fresh. Prose. Generally correct.

Amaruśataka-ṭippaní. A commentary on the century of miscellaneous verses called *Amaruśataka.* By Rámarudra Nyáyavágis'a Bhaṭṭácharya.

Beginning. अथ ग्रन्यारम्भे विघ्नविघाताय ग्रन्थकृद्भगवतीस्मरणलक्षणमङ्गलमाचरन् राजानमाशीर्व्वादेन योजयति ज्याकृष्टीति। अम्बिकायाः कटाक्षस्त्वां पातु। कीदृशी ज्या धनुर्गुणः। तस्याकृष्टिराकर्षणं तत्र बद्धोयः खटकामुखपाणिः अङ्गुलिरचनाविशेषः—इत्यादि।

End. कामिनीनां स्तननयनयोरतिशयमोहजनकत्वात्
मनोहरत्वाच्च ग्रन्थसमापने उभयमुपवर्णितं ।

Colophon. महामहोपाध्यायश्रीयुक्तरामरुद्रन्यायवागीशभट्टाचार्य्यविरचिता अमरुश-तकटिप्पणी समाप्ता ।

विषयः । अमरुशतकस्य व्याख्यानम् ।

No. 2368. गुणवती । Substance, country-made paper, 21 × 4 inches. Folia, 36. Lines, 8—9 on a page. Extent, 1,856 ślokas. Character, Bengali. Date, Sk. 1682. ? Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, old. Prose. Incorrect.

Guṇavati. A commentary on the well known *Prabodha-chandrodaya* of Kṛishṇa Mis'ra. By Rudradeva Tarkavágis'a.

Beginning. जनितस्वीयविश्लेऽपि शम्भुमौलिविधुभ्रमा ।
भवानीनखचन्द्राली प्रकाशयतु मे मनः ॥
प्रवर्त्तितोयेन निगूढ़भावः स्फुटीकृतेऽद्द + + दुर्गमस्य ।
भूयात् शरण्यं मम विभ्रमेऽच प्रबोधचन्द्रोदयनाम ते ऽद्दः ॥
श्रीरुद्रदेवकविरत्र मनोनिधातुं
मान्याङ्घ्रिपङ्कजदले विनयं करोति ।
संवर्द्धनेऽप्यकुशला न हि कौमुदी कि-
मम्भोनिधेः किमपि कौतुकमातनोति ॥

प्रारिप्सितनाटकस्य निर्व्विघ्नसमाप्तिकामनया अविगीतशिष्टाचारानुमितश्रुतिबोधितेष्ट-साधनताकं कृतमङ्गलमजिहासितं स्यादिति शिष्यान् बोधयितुमुच्चैराचष्टते । मध्याह्नेति । तत् बुद्धिस्थं महः प्रकाशरूपं ब्रह्म उपास्महे । इत्यादि ।

End. रसिकं ब्रह्म न रसिकं मैत्र्यादेः परिशोधने कृषिकं ।
गुणवत्येषा टीका रमयत्वनिशं सुखेन रौद्री ॥

Colophon. इति रुद्रदेवतर्कवागीशविनिर्म्मितप्रबोधचन्द्रोदयटीका गुणवती समाप्ता । शकाब्दा १६८२ ।

विषयः । कृष्णमिश्रकृतप्रबोधचन्द्रोदयनामनाटकस्य व्याख्यानम् ।

No 2369 पुरुषार्थचिन्तामणिः। कालखण्डः। Substance, country-made paper, 12 × 6 inches. Folia, 422. Lines, 12 on a page. Extent, 11,998 ślokas. Character, Nágara. Date, ? Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, fresh. Prose and verse. Correct

Purushártha-chintámaṇi. An elaborate digest of the Smṛitis. By Vishṇu Bhaṭṭa, son of Rámakrishṇa Súri, nicknamed *Áṭabele.* The codex under notice contains only one part, that on times meet for religious rites (Kálakhaṇḍa), out of several which the work comprises. The author attempts to reconcile the differences and discrepancies which exist in the works of Hemádri and Mádhava Ácharya. In the course of the work all the rites, ceremonies, fasts, periodical feasts and anniversary celebrations have been noticed at length.

Beginning. ब्रह्मविष्णुमहेशानां सर्व्वेषां जगतां प्रभुः।
ईश्वरोनित्यकालात्मा विभुर्विजयतेतरां॥
श्वेः समुद्भवाद्रामकृष्णसूरिरभूत् कुलात्।
आठवेले इतिख्याताच्च+शाचन्द्रमा इव॥
तदात्मजोविष्णुभट्टः पुरुषार्थप्रभाषके।
ग्रन्थे चिन्तामणौ कालसम्यग्ज्ञानप्रसिद्धये॥
हेमाद्रिणा माधवस्य विरोधः कालनिर्णये।
इति ज्ञात्वा कृतालेऽतः परस्परविरोधिनः॥
नवीनविदुषां सुप्रसिद्धमिदं ह्यतः।
सर्व्वेषामृषिवाक्यानां हेमाद्रेर्माधवस्य च।
विसम्वादपरीहारपरिष्कारपुरःसरं॥
करोति कालखण्डन्तु नत्वा विश्वेश्वरं प्रभुं।
तत्र कालोद्विविधः। नित्योजन्यश्च। इत्यादि।

End. गुणग्राह्यैर्विपश्चिद्भिरनुग्राह्योह्ययं सदा॥
धर्म्मसंस्थापनायेहावतीर्णैरीश्वरांशतः।
प्रव+ जगतीपालैः सदा धर्म्मविवृद्धये॥

Colophon. इति श्रीआठवेले उपनामकश्रीमद्रामकृष्णसूरिसूनुविष्णुभट्टकृते पुरुषार्थचिन्तामणौ कालखण्डः समाप्तिमगमत्।

विषयः। कालस्वरूपविवेचनम्। निमेषमुहूर्त्ताहोरात्रदिवसादिलक्षणकथनं। दर्शादि-मासलक्षणकथनं। कार्त्तिकादिद्वादशमासकृत्यकथनं। अयनकथनं। संवत्सरमलमासादिकथनं।

मलमासे कर्त्तव्याकर्त्तव्यानि। तत्र षोड़शमहादानादिकथनं। वषट्कारहोमादिकथनं। पक्षनिर्णयः। तिथिस्वरूपादिकथनं। दिवसस्वरूपादिकथनं। मुहूर्त्तनामानि। प्रातर्मध्याह्नादिविभागकथनं। विधिनिषेधयोः स्वरूपकथनं। खण्डतिथिस्वरूपादिकथनं। उपवासादौ तिथेर्ग्राह्याग्राह्यत्वनिरूपणं। एकभक्ततिथिनिर्णयः। नक्तव्रते तिथिनिर्णयः। अयाचिते तिथिनिर्णयः। उपवासे निथिनिर्णयः। नक्षत्रनिरूपणं। योगनिरूपणं। एकभक्तादौ सङ्कल्पपारणादिनिरूपणं। चैत्रशुक्लप्रतिपदि चान्द्रवर्षाद्यारम्भकथनं। अथ विशेषेण प्रतिपत्कृत्यकथनं। तत्र ज्यैष्ठप्रतिपत्कृत्यकथनं। आश्विनशुक्लप्रतिपदि नवरात्रव्रतारम्भकथनं। दुर्गास्वरूपादिनिरूपणं। दुर्गापूजनादिविधानं। कुमारीपूजनादिविधिः। अश्वपूजनविधिः। देवीभ्रामणादिविधिकथनं। बलिदानविधिः। दुर्गागृहकरणविधिः। म्लेच्छादीनां नाधिकार इति निरूपणं। द्यूतप्रतिपदादिविधानञ्च। अथ द्वितीयाकृत्यकथनं। तत्र विशेषेण श्रावणद्वितीयायामशून्यशयनव्रतनिरूपणं। भ्रातृद्वितीयादिकथनं। अथ तृतीयाकृत्यकथनं। तत्र अक्षयातृतीयाकृत्यनिरूपणं। युगाद्याकथनं। वैशाखशुक्लतृतीयायां परशुरामपूजादिविधानं। भाद्रशुक्लतृतीयायां हरितालिकाकथनं। मार्गशीर्षे रम्भातृतीयाकथनं। एवमन्यत्र। अथ चतुर्थीकृत्यकथनं। चैत्रशुक्लचतुर्थ्यां गणेशपूजाविधिः। संकष्टचतुर्थीविधानं। भाद्रशुक्लचतुर्थ्यां विनायकव्रतविधिः। तत्र चन्द्रादर्शनविधिः। कार्त्तिके कनकचतुर्थीविधिः। नागचतुर्थीविधिः। वरचतुर्थीविधिः। वरदाचतुर्थीविधिः। तत्र ढुण्ढिराजपूजाविधिः। अथ पञ्चमीनिरूपणं। नागपञ्चमीविधिः। ऋषिपञ्चमीविधिः। आश्विनशुक्लपञ्चम्यामुपाङ्गललिताव्रतविधिः। श्रीपञ्चमीविधिः। अथ षष्ठीनिर्णयः। स्कन्दषष्ठीनिरूपणं। कपिलाषष्ठ्यादिनिरूपणं। सप्तमीनिरूपणं। भास्करसप्तमीविधिः। अपराजितासप्तमीविधिः। नन्दासप्तमीविधिः। रथसप्तमीविधिः। अष्टमीनिर्णयः। अशोकाष्टमीविधिः। त्रिलोचनाष्टमीविधिः। जन्माष्टमीविधिः। जयन्तीव्रतनिर्णयः। शिवाष्टमीविधिः। दूर्व्वाष्टमीविधिः। महालक्ष्मीव्रतविधिः। महाष्टम्यां देवीपूजाविधिः। भीष्माष्टमीविधिः। नवमीनिर्णयः। रामनवमीविधिः। तत्र भद्रकालीपूजाविधिः। आषाढ़नवमी। तालनवमीविधिः। महानवमीविधिः। बलिदानविधिविवेचनं। दशमीनिरूपणं। विजयादशमीकृत्यनिरूपणं। एकादशीनिर्णयः। उपवासविधिः। अनुकल्पविधिः। उन्मीलन्यादिभेदकथनं। हरिवासरविधिः। अत्राधिकारिनिरूपणं। द्वादशीनिर्णयः। श्रवणद्वादश्यादिभेदकथनं। त्रयोदशीनिर्णयः। वारुण्यादिविधिः। चतुर्द्दशीनिर्णयः। दमनकचतुर्द्दशीविधिः। नृसिंहचतुर्द्दशीविधिः। अनन्तचतुर्द्दशीविधिः। दीपचतुर्द्दशीविधिः। शिवचतुर्द्दशीविधिः। शिवपूजनमाहात्म्यकीर्त्तनं। लिङ्गपीठादिलक्षणं। पूजाविधिः। तदधिकारिणः। पूर्णिमानिर्णयः। वटसावित्रीविधिः। श्रावण्यां रक्षाबन्धनादिविधिः। पवित्रारोपणविधिः। उपाकर्म्मकालनिरूपणं। भाद्रपौर्णमास्यां नान्दीमुखश्राद्धविधिः। वकुलस्तम्भयात्राविधिः। अथ कोजागरविधिः। कार्त्तिक्यां दामोदरपूजनविधिः। क्षीरसागरदानविधिः। नीलवृषोत्सर्गविधिः। त्रिपुरदाहोत्सवः। फाल्गुण्यामशून्य-

शयनविधिः। होलिकोत्सवविधिः। अमावस्यानिर्णयः। ज्यैष्ठामायां वटसावित्रीविधिः। कुलस्त्र- भयात्राविधिः। वैतरणीस्नानविधिः। माघामायां नवनीतधेनुदानविधिः। अर्द्धोदययोगकथनं। कल्पसूत्रलक्षणं। अन्नाधानादियागकालनिरूपणं। पिण्डपितृयज्ञकालः। ग्रहणनिरूपणं। संक्रान्तिनिरूपणं। सामान्यतः श्राद्धतिथिनिरूपणं। दत्तकपुत्रकथनं। पार्व्वणैकोद्दिष्टवृद्धिश्राद्धादिकालकथनं। खड्गमांसेन श्राद्धविधिकथनं। महालयासपिण्डीकरणादिकालकथनं। युगादिमन्वादिनिरूपणं। नक्षत्रवारादिविशेषे श्राद्धकालादिनिरूपणं। आमश्राद्धकालादिकथनं। शूद्रकर्त्तृकश्राद्धे इतिकर्त्तव्यताकथनं। पतितादिश्राद्धकालकथनं। श्राद्धदिने वैश्वदेवादिकालकथनं। गर्भाधानपुंसवनादिकालादिनिरूपणं। वेदारम्भकालादिकथनं। अनध्यायाः। केशान्तकर्म्मकथनं। गोदानाख्यकर्म्मकथनं। विवाहोत्तरं कन्यागृहे भोजनादिनिषेधः। वाग्दानादिविधिकथनं। वधूप्रवेशद्विरागमनादिविधिकथनं। आवसथ्याधानकालः। अभ्यङ्गस्नानसन्ध्यादिकालकथनं। देवप्रतिष्ठादिकालकथनं। कृषिवस्त्रधारणादिकालकथनं। सूचीकर्म्मकालादिनिरूपणं। स्वामिसेवागजाश्वदोलारोहण-नृत्य-राजदर्शनादिकालकथनं। जय-सेतु-पशुहत्यादिकालकथनं। गजदन्तच्छेद-ऋणमोक्ष-गजमुद्रा-नौकारोहणादिकालकथनं। नवान्नादिकालकथनं। भैषज्यारोग्यस्नानादिकालकथनं। युगधर्म्मकथनं। कलियुगधर्म्मकथनं। कलौ वर्ज्जनीयकथनञ्च।

No. 2370. ब्रह्मतत्त्वसंहितोद्दीपनी। Substance, palm-leaf, 22 × 2 inches. Folia, 140. Lines, 5 on a page. Extent, 3,837 ślokas. Character, Maithili. Date, Sk. 1649. Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, fresh, the edges déstroyed by mice. Prose. Correct.

Brahmatattva-sañhitoddípaní. A commentary on Váchaspati Mis'ra's *Brahmatattvasañhitá* which is a dissertation on the nondual theory of the Vedánta, refuting in the course of it the Nyáya, Sáñkhya and other adverse systems. Anonymous.

Beginning. (अत्र प्रथमतः त्रीणि पत्राणि पार्श्वे मूषिकदष्टाणि) इह जगति केचित् स्वस्वरूपानन्दानन्ताद्वयसाक्षात्कारापसारितनिखिलसंशयविपर्य्यासा जीवन्मुक्ताः, केचिद्विषयज्वालाजटिलसंसारानलप्रवल — — — — जगत्कारणस्य जिज्ञास्यत्वं प्रतिपादितमिहापि तत्प्रतिपादनीयमिति हृदि कृत्वा प्रथमं जगत्कारणं प्रदर्शयति नानेति। इत्यादि।

End. इहेदमवधेयं सच्चिदानन्दस्वरूपं ब्रह्म सर्व्वाश्चर्य्यमयं तस्य सत्त्वं चित्त्वमानन्दत्वं न ततोभिन्नमिति केवलमद्वितीयं ब्रह्म॥

Colophon. इति श्रीवाचस्पतिमिश्रविरचिता ब्रह्मतत्त्वसंहितोद्दीपनी समाप्ता। शकाब्दाः १६४९।

विषयः। न्यायवैशेषिकसांख्यादिमतखण्डनपूर्व्वकमद्वैतवादोपपादनमुखेनप्रत्त्व ख्यातसंघि-ताभिधानवेदान्तप्रकरणस्य व्याख्यानम्।

No. 2371. आचार्य्यमतरहस्यम्। Substance, country-made paper, 17 × 3½ inches. Folia, 11. Lines, 14 on a page. Extent, 823 ślokas. Character, Maithili. Date, ? Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyá-lála Jhá. Appearance, fresh. Prose. Correct.

A'chárya-mata-rahasya. A Nyáya dissertation on Udayana A'chárya's theory of syllogism. By Harírâma Tarkavágís'a.

Beginning. वह्निव्याप्यधूमवान पर्व्वत इत्यादिपरामर्षात् वह्निव्याप्तिविशिष्टधूमादि-विषयिणी—इत्यादि

End. पर्व्वतोघटवान् इत्येतादृशशाब्दबोधसामग्र्याः प्रतिबन्धकत्वमित्यलं पल्लवितेनेति।

Colophon. इति श्रीहरिरामतर्कवागीशविरचितमाचार्य्यमतरहस्यं समाप्तमिति।

विषयः। वह्निव्याप्यधूमवान् पर्व्वत इत्यादिपरामर्षात् वह्निव्याप्तिविशिष्टधूमादिविष-यिणी वह्निव्याप्यधूमवान् पर्व्वतोवह्निमानित्यनुमितिरुत्पद्यते—इत्युदयनाचार्य्यमतस्य उप-पादनं।

No. 2372. नव्यमतरहस्यम्। Substance, country-made paper, 17 × 3½ inches. Folia, 11. Lines, 13—14 on a page. Extent, 915 ślokas. Character, Maithili. Date, Sk. 1733. Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, new. Prose. Correct.

Navya-mata-rahasya. A dissertation on some modern theories about inference. By Harirâma Bhaṭṭáchárya, (the same with the author of the last noticed work, though the literary title appears different).

Beginning. अनुमितिं प्रति पर्व्वतोय धूमव्यापकोवह्निरित्याकारकः परामर्षोहेतुः न तु व्याप्तिविशिष्टवैशिष्ट्यावगाही वह्निव्याप्यधूमवान् पर्व्वत इत्याकारकः। इत्यादि।

End. अनुमित्यादिकं प्रत्यर्थापत्त्यादिसामग्र्याः प्रतिबन्धकत्वकल्पकवादिमतेऽप्युक्तमेवेति। व्याङ्कः॥

Colophon. इति श्रीहरिरामभट्टाचार्य्यविरचितं नव्यमतरहस्यं सम्पूर्णमिति। शका-ब्दाः १७३३।

विषयः। अनुमितिविषये नवीनानां मतोपपादनं।

No. 2373. तिथिचन्द्रिका । Substance, country-made paper, 16 × 4 inches Folia, 58. Lines, 7 on a page. Extent, 1,296 ślokas. Character, Maithili. Date, L. S. 348. Place of deposit, Siñhuli-grám, Post Snáḍáśi, Zillá Púrṇiyá, Jhapaṭlála Jhá. Appearance, old. Prose and verse. Correct.

Tithi-chandriká. On lunar days and the ceremonies thereto appertaining. By Haridatta Mis'ra.

Beginning. नत्वा रमापतिं विष्णुं सच्चिदानन्दविग्रहं ।
मिश्रश्रीहरिदत्तेन क्रियते तिथिचन्द्रिका ॥

तत्र तिथिस्वरूपमाह सूर्य्यसिद्धान्तः । अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी । इत्यादि ।

End. तत्र तत्र पुण्यकालः स्वयमूहनीय इति ।

Colophon. इति मिश्रश्रीहरिदत्तविरचिता तिथिचन्द्रिका समाप्ता । लसं ३४८ ।

विषयः । तिथिस्वरूपकीर्त्तनं । सामान्यतः प्रतिपदादिपञ्चदशतिथिकृत्यनिरूपणं । तत्र विशेषेण श्रीरामनवमीनिरूपणं । वारुणीनिरूपणं । अक्षयतृतीयानिरूपणं । नृसिंहचतुर्द्दशीनिरूपणं । सावित्रीचतुर्द्दशीनिरूपणं । दशहरानिरूपणं । स्नानयात्रानिरूपणं । रथयात्रानिरूपणं । हरिशयननिरूपणं । नागपञ्चमीनिरूपणं । जन्माष्टमीनिरूपणं । प्रसङ्गादेकादशीनिर्णयः । हरितालिकानिरूपणं । कुकुटीव्रतनिरूपणं । दूर्व्वाष्टमीनिरूपणं । अनन्तचतुर्द्दशीनिरूपणं । आश्विनकृष्णपक्षे षोड़शश्राद्धनिरूपणं । मघाश्राद्धनिरूपणं । नवरात्रनिरूपणं । कोजागरनिरूपणं । दीपान्वितानिरूपणं । भ्रातृद्वितीयानिरूपणं । श्रीपञ्चमीनिरूपणं । अर्द्धोदययोगनिरूपणं । भीष्माष्टमीनिरूपणं । भीमद्वादशीनिरूपणं । शिवरात्रिनिरूपणं । होलिकानिरूपणं । संक्रान्तिनिरूपनञ्च ।

No. 2374. सुबोधिनी । Substance, country-made paper, 18 × 5 inches. Folia, 128. Lines, 8 on a page. Extent, 4,508 ślokas. Character, Maithili. Date, ? Place of deposit, Siñhuli-grám, Post Snáḍáśi, Zillá Púrniyá, Jhapaṭlála Jhá. Appearance, old. Prose. Incorrect.

Subodhiní. A commentary on the *Rághuvañs'a* of Kalidása. By Bhavadeva Mis'ra.

Beginning. प्रणम्य यामिनीकान्तकान्तभालस्थलं हरं ।
क्रियते बालबोधाय रघुवंशसुबोधिनी ॥

अथ तत्रभवान् महाकविः कालिदासः प्रारिप्सितपरिसमाप्तिप्रतिबन्धकदुरितनाशनाय

शिष्टाचारपरिपालनाय च ग्रन्थारम्भे मङ्गलमाचरति वागर्थाविति। अहं पार्व्वतीपरमेश्वरौ वन्दे अभिवादये। इत्यादि।

End. सर्व्वागमपरार्थज्ञः सत्यधर्म्मपरायणः।
भवदेवोव्यधाद्रम्यां रघुवंशसुबोधिनीं॥

Colophon. इति सन्मिश्रश्रीभवदेवकृतायां सुबोधिन्यामुनविंशः सर्गः॥

विषयः। कालिदासकृतरघुवंशकाव्यस्य व्याख्यानम्।

No. 2375. स्फोटनिरूपणम्। Substance, country-made paper, 17 × 4 inches. Folia, 16. Lines, 7 on a page. Extent, 357 ślokas. Character, Maithili. Date, ? Place of deposit, Siñhuli-grám, Post Snáḍáśi, Zillá Púrṇiyá, Jhapaṭlála Jhá. Appearance old. Prose. Generally correct.

Sphoṭa-nirúpaṇa. A philosophical enquiry into the nature of sound, as the element of words and letters. By Ápadeva Bhaṭṭa.

Beginning. सर्व्वेश्वरः सर्व्वनिष्ठः सर्व्वशक्तिमयोविभुः।
सर्व्वदः सर्व्वदा पापात् पायान्नोभक्तवत्सलः॥

अथ स्फुटत्यर्थोयस्मादिति व्युत्पत्त्या स्फोटशब्दोऽयं योगरूढः। इत्यादि।

End. एवञ्च स्यान्येव वाचकोलाघवान्न तु आदेशोगौरवादिति तार्किकोक्तमतादरणीयमिति।

Colophon. इति श्रीमदापदेवनिरूपितं स्फोटनिरूपणं समाप्तम्।

विषयः। स्फोटलक्षणादिकथनं। शब्दशक्तिविवेचनं। वर्णस्फोटपदस्फोठादिनिरूपणं। तार्किकादिमताक्षेपकीर्त्तनञ्च।

No. 2376. प्रायश्चित्तप्रदीपिका। Substance, country-made paper, 17 × 5 inches. Folia, 108. Lines, 7 on a page. Exteut, 3,370 ślokas. Character, Nágara. Date, Sk. 1621. Place of deposit, Siñhuli-grám, Post Snáḍáśi, Zillá Púrṇiyá, Jhapaṭlála Jhá. Appearance, fresh. Prose and verse. Incorrect.

Práyaśchitta-pradípiká. Nature of expiations for transgressions of Smṛiti rules, and details of expiations for particular offences. By Ananta Bhaṭṭa, son of Ápadeva Bhaṭṭa.

Beginning. नन्दसूनुं नमस्कृत्य स्वानन्दरसमन्दिरं।
क्रियते विदुषां प्रीत्यै प्रायश्चित्तप्रदीपिका॥

अथ प्रायश्चित्तस्य अधर्म्मनाशनद्वारा परम्परया धर्म्मं प्रति कारणत्वात् प्रथमं तावद्धर्म्मस्वरूपं विविच्यते। तत्र जैमिनिसूत्रं। चोदनालक्षणोऽर्थोधर्म्म इति। इत्यादि।

End. तत्तु गङ्गास्नानतीर्थदर्शनादिना प्रणश्यतीति।

Colophon. इति महायाज्ञिकापदेवभट्टसूनुश्रीमदनन्तभट्टविरचिता प्रातश्चित्तप्रदीपिका समाप्ता। शकाब्दाः। १६२१।

विषयः। धर्म्मस्वरूपकथनं। धर्म्मे वेदस्य प्रामाण्यकथनं। प्रायश्चित्तलक्षणादिकीर्त्तनं। तत्कालनिरूपणं। बालवृद्धादिभेदेन तद्विशेषकथनं। प्रायश्चित्तोपदेशविधिकथनं। तदकरणे दोषकथनं। महापातकादिनिरूपणं। संसर्गनिरूपणं। महापातकादिप्रायश्चित्तविधानं। गोवधादिप्रायश्चित्तकथनं। अभक्ष्यभक्षणप्रायश्चित्तं। मत्स्यमांसादिभक्षणप्रायश्चित्तं। पलाण्डुलसुनादिभक्षणप्रायश्चित्तं। अगम्यागमनादिप्रायश्चित्तं। शूद्राद्यन्नभक्षणप्रायश्चित्तं। मिथ्याकथनादिप्रायश्चित्तं। क्षुद्रजन्तुवधप्रायश्चित्तं। ब्राह्मणस्य सुरास्पर्शादिप्रायश्चित्तं। श्राद्धान्नभोजनप्रायश्चित्तं। असत्प्रतिग्रहप्रायश्चित्तं। श्राद्धाकरणप्रायश्चित्तं। जले मलादित्यागप्रायश्चित्तं। अधमवर्णस्य उत्कृष्टवर्णाक्रोशप्रायश्चित्तं। नीलीवस्त्रादिपरिधानप्रायश्चित्तं। नग्नप्रायश्चित्तं। व्रात्यप्रायश्चित्तं। कन्यादूषणादिप्रायश्चित्तं। विवाहभङ्गादिप्रायश्चित्तं। मिथ्याभियोगप्रायश्चित्तं। अभिचारप्रायश्चित्तं। व्रतभङ्गप्रायश्चित्तं। प्रकीर्णकप्रायश्चित्तकथनञ्च।

No. 2377. पुरुषार्थकौमुदी। Substance, palm-leaf, 16 × 2 inches. Folia 49. Lines, 5 on a page. Extent, 1,170 ślokas. Character, Maithili. Date, ? Place of deposit, Siñhuli-grám, Post Snáḍáśi, Zillá Púrṇiyá, Jhapaṭlála Jhá. Appearance, decayed. Prose. Correct.

Purushártha-kaumudí. A dissertation on salvation, showing that the attainment of the nature of Brahma is salvation. By Raghupati Mahopádhyáya.

Beginning. व्याससूक्तिरुतोद्बोधश्रीरघुपतिशर्म्मणा।
तन्यते पुरुषार्थेषु कौमुदी मुदितात्मना॥

अथ पुरुषार्थेष्वपवर्गस्याभ्यर्हितत्वात् स एव तावन्निरूप्यते। तत्र कस्तावदपवर्ग इत्यपेक्षायामक्षपादीयाः तदत्यन्तविमोक्षोऽपवर्ग इति समामनन्ति। इत्यादि।

End. भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः। इत्यादिश्रुतेरिति।

Colophon. इति महोपाध्यायश्रीरघुपतिविरचिता पुरुषार्थकौमुदी परिपूर्णा।

विषयः। मोक्षस्वरूपविवेचनम्। तत्र तार्किकबौद्धजैनभट्टप्राभाकर-सांख्य-शैवादिमतखण्डनपूर्व्वकं ब्रह्मभावापत्तिरेव मोक्ष इति सप्रपञ्चप्रपञ्चनं। प्रसङ्गात् जीवात्मस्वरूपनिरूपणं।

जीवात्मपरात्मनोरभेदनिरूपणं। अविद्याविवेचनं। मायाविद्ययोः पार्थक्यकथनं। तत्त्वज्ञाननिरूपणं। जीवन्मुक्तिनिरूपणं। ब्रह्मस्वरूपविवेचनञ्च।

No. 2378. मन्त्रकोषः। Substance, country-made paper, 20 × 4 inches. Folia, 10. Lines, 7 on a page. Extent, 279 ślokas. Character, Bengali. Date, ? Place of deposit, Bhaisdirá-grám, Post Gñodoyáḍá, Zillá Púrṇiyá, Khaḍganátha Páṭhaka. Appearance, old. Verse. Incorrect.

Mantra-kosha. A collection of Tántric Víja Mantras, with explanations of their meanings and rules for their use. A brief account is also given of the origin and nature of the Sanskrit alphabet. By Jagannátha Bhaṭṭáchárya.

Beginning. नत्वानन्दमयीं देवीं भारतीं सर्व्वसिद्धिदां।
मन्त्रकोषं वितनुते जगन्नाथोद्विजोत्तमः॥
अथ व्यक्तिं प्रवक्ष्यामि वर्णानां वदने नृणां।
प्रेरितां वायुना नित्यं सुषुम्नारन्ध्रनिर्गतां॥
कण्ठादिकरनैर्भिन्नाः क्रमात् प्रादुर्भवन्ति ते॥ इत्यादि।

End. जयालोकक्रियानेन जगन्नाथेन धीमता।
मन्त्रव्यक्तिः समुद्दिष्टा तन्त्रं दृष्ट्वा समासतः॥

Colophon. इति श्रीमहामहोपाध्यायश्रीजगन्नाथभट्टाचार्य्येणविरचितोमन्त्रकोषः समाप्तः।

विषयः। वर्णानामुत्पत्तिप्रकारकथनपूर्व्वकं तन्त्रोक्तसंकेतेन तेषां पर्य्यायकथनं।

No. 2379. शिवार्च्चनरत्नम्। Substance, country-made paper, 20 × 4 inches. Folia, 25. Lines, 7 on a page. Extent, 777 ślokas. Character, Bengali. Date, ? Place of deposit, Bhaisdirá-grám, Post Gñodoyáḍá, Zillá Púrṇiyá, Khaḍganátha Páṭhaka.

S'ivárchana-ratna. On the worship of S'iva, or the rules and rituals for the adoration of that divinity. By Sañkara A'chárya, of Gauḍa.

Beginning. संसारार्णवमग्नानां समुद्धरणहेतवे।
शिवार्च्चनमहारत्नं शङ्करेण विरच्यते॥
व्यापारान् सकलांस्त्यक्त्वा पूजयध्वं सदाशिवं।
निकटा इव दृश्यन्ते कृतान्तनगरद्रुमाः॥

कालोत्तरे नारदवाक्यं। असार इह संसारे सारमेतच्चतुष्टयं। काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनं। इत्यादि।

End. विल्वपत्रैस्त्रिमध्वक्तैर्वन्ध्या पुत्रवती भवेत्।

Colophon. इति गौड़भूमिनिवासिश्रीशङ्कराचार्य्यविरचितशिवार्च्चनरत्ने सप्तमप्रकाशः।

विषयः। शिवपूजामाहात्म्यादिकीर्त्तनं। पूजादिविधिकथनं। लिङ्गनिर्म्माणादिकथनं। पुष्पादिविवेचनं। होमादिकथनं। पुरश्चरणकथनं। स्तवकवचादिकथनञ्च।

No. 2380. मन्त्रकौमुदी। Substance, country-made paper, 18 × 4 inches. Folia, 26. Lines, 8 on a page. Extent, 983 ślokas. Character, Bengali. Date, Sk. 1709. Place of deposit, Bhaisdirá-grám, Post Gñodoyáḍá, Zillá Púrṇiyá, Khaḍganátha Páṭhaka. Appearance, old. Prose and verse. Incorrect.

Mantra-kaumudí. Mantras and rituals for various Vedic and Smṛiti rites. By Tarkapanchánana Bhaṭṭáchárya. The name given is apparently a literary title, the personal name is wanting.

Beginning. सच्चिदानन्दसन्दोहरूपिणीं भवसुन्दरीं।
प्रणम्य विदुषां प्रीत्यै क्रियते मन्त्रकौमुदी॥

तत्रादौ घटस्थापनमन्त्रव्याख्या। भविष्ये। गणेशादीन् पञ्चदेवान् संपूज्य कलशोदके। ततः समारभेद्‌यागं यं यं वै मनसेच्छति॥ इत्यादि।

End. सूर्य्यशब्देन सूर्य्याधिष्ठेयं नेत्रमुच्यते।
स्वर्णाकारः सूर्य्यो यस्य स भवान् स्वाहा।

Colophon. इति तर्कपञ्चाननभट्टाचार्य्यकृता तन्त्रकौमुदी समाप्ता।
शकाब्दाः। १७०९।

विषयः। यज्ञादौ सर्व्वत्र प्रथमे गणेशादिपूजनस्यावश्यकताकथनं। घटस्थापनमन्त्रव्याख्या। अधिवासनादिमन्त्रव्याख्या। चतुर्द्दशशान्तिमन्त्रव्याख्या। छन्दोगवृषोत्सर्गमन्त्रव्याख्या। वाजसनेयिनाम् वृषोत्सर्गमन्त्रव्याख्या। शान्तिसूक्तव्याख्यानञ्च।

No. 2381. ध्याख्यार्णवः, वा स्वरोदयटीका। Substance, country-made paper 20 × 4 inches. Folia, 130. Lines, 8 on a page. Extent, 3,756 ślokas. Character, Bengali. Date, Sk. 1693. Place of deposit, Bhaisdirágrám, Post Gñodoyáḍá, Zillá Púrṇiyá, Khaḍganátha Páṭhaka. Appearance, old. Prose. Incorrect.

Vyákhyáplava ALIAS **Svarodaya-ṭíká**. A commentary on the Svarodaya *alias* Narapati-jayacharyá, a work on astrology and divination. By Narahari, son of Narasiñha, and grandson of Gaṇes'a, all distinguished astrologers of Mithilá. (*Ante* I, 276; V, 126).

Beginning. तातं गुरुञ्च विबुधं नरसिंहमीशं
नत्वा तदीयदययावगतार्थसार्थः ।
एतत्स्वरोदयसमुद्रगतिप्रसिद्धै
व्याख्याप्लवं नरहरिः प्रकरोत्यवद्यं ॥
श्रीभैरवेन्द्रपदपङ्कजसेवमोत्थ-
कीर्त्तिः समस्तविबुधानसहात् प्रणम्य ।
याचे यदीह भवति स्खलनं कदाचि-
त्तचावनं कुरुत वंशमहाशयत्वात् ॥

प्रारब्धितपरिसमाप्तिं निष्प्रत्यूहामभिलषमाणः कविर्द्दैवतानमस्काररूपं मङ्गलमाचरति । अव्यक्तमिति । इत्यादि ।

End. सर्व्वं शुभाशुभं ग्रहमयं ग्रहाधीनमित्यर्थः ।
श्रीमाण्डवशिनेह विदितेवंशे बुधालङ्कृते
ख्याते श्रोत्रियमण्डलीषु महति स्वाचारचर्य्योज्वले ।
वेदव्याकरणागमादिनिकषोनैयायिकः सत्कवि-
र्ज्योतिःशास्त्रविकाशनैकमिहिरोधीरोगणेशोऽभवत् ॥
तस्मात्मजोऽभून्नरसिंहधीरो-
न्यायागमाद्यद्भुतविद्य एकः ।
वेदस्मृतिज्योतिषशास्त्रसार-
व्याख्यानशुद्धैकमतिर्द्विजेन्द्रः ॥
तस्मात्यजोनरहरिस्तत एव बुद्धा
व्याख्यामिमां सकलशिष्यजनानुबन्धात् ।
नैयायिकः समकरोद्विषदार्थसार्थां
नानागुणेषु कुतुकी मिथिलावनीस्थः ॥
सुदुस्तरे वर्त्मनि ये चरन्ति
स्खलन्ति ते चित्रमिहास्ति नैव ।
अतोयदि स्यात् स्खलनं ममात्र
दयाङ्कुरैरास्ववलम्बनं स्यात् ।

Colophon. इति श्रीनरहरिकृतस्वरोदयटीका समाप्ता । शाके १९९२ ।
विषयः । नरपतिजयचर्य्यापरनामधेयज्योतिःस्वरोदयस्य व्याख्यानम् ।

No. 2382. मधुमती। Substance, country-made paper, 18 × 4 inches. Folia, 374. Lines, 6 on a page. Extent, 8,672 ślokas. Character, Bengali. Date, ? Place of deposit, Púrṇiyá town, Paṇḍit Rámacharaṇa Kaviràja. Appearance, old. Prose and verse. Correct.

Madhumati. An elaborate treatise on materia medica and practice of medicine. By Narasiṁha Kaviràja, a pupil of Rámakṛishṇa Bhaṭṭa, son of Nilakaṇṭha Bhaṭṭa.

Beginning. ईशमनीशं कारणमकारणं व्यक्तमव्यक्तं।
आदिमनादिं शाश्वतमशाश्वतं गोपमच्युतं वन्दे॥
आराधिता द्विजवरैः फलदा + रेखा
संपूजिता + + सदा + भिर्या।
निःशेषदुःखशमनाय शिवा सुवर्णा
सा सर्व्वदा मधुमती विबुधैरुपास्या॥
— — — — — — — — — —।
हिताहितं सुखं दुःखमायुस्तस्य हिताहितं।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते॥
ब्रह्मा स्मृत्वायुषोवेदं प्रजापतिमजीग्रहत्।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन्॥ इत्यादि।

End. समग्रहाणि (?) तन्त्राणि सुविचार्य्य स्वशक्तितः।
सद्भिः समं समालोच्य रामकृष्णप्रसादतः॥
वैद्यश्रीनरसिंहेन मया मधुमती कृता।
तस्मादियं सुमतयः सततं समुपास्यतां॥
लोहमहौषधयोगैर्विहितेयं मधमतीतरणिः।
घनरससङ्गममात्रा (?) व्याधिपयोधेर्द्रुतं नयेत्पारं॥
यदियं कुमतिव्याख्या दोषाच्छन्नगुणा भवेत्।
पण्डितैर्मार्ज्जना कार्य्या तदेतिप्रार्थना मम॥
यद्यपीयं न हि भवेत् पुराणभिषजः प्रिया।
तथापि नव्यवैद्यानामानुकूल्यं करिष्यति॥

Colophon. इति दाक्षिणात्यवैदिकमहोपाध्यायनीलकण्ठभट्टात्मजरामकृष्णभट्टचरण-परिचारकश्रीनरसिंहकविराजविरचिता मधमती समाप्ता।

षियवः। सर्व्वेषां रोगाणां पूर्व्वरूप-रूप-उपशमसंप्राप्ति-निदाननिरूपणपूर्व्वकं सर्व्वेष वस्तरेण चिकित्साप्रक्रियाकथनं। तत्र तत्र औषधकरणयोग्यमन्त्रादिनिरूपणं। औषधपाकप्रक्रियाकथनञ्च। तत्र विविधज्वरचिकित्सा। ज्वरातीसारचिकित्सा। अतीसारचिकित्सा। ग्रहणीरोगचिकित्सा। अर्शोरोगचिकित्सा। अग्निमान्द्यचिकित्सा। क्रिमिरोगचिकित्सा। पाण्डुरोगचिकित्सा। रक्तपित्तचिकित्सा। राजयक्ष्मचिकित्सा। कासरोगचिकित्सा। हिक्काश्वासचिकित्सा। स्वरभेदचिकित्सा। अरोचकचिकित्सा। छर्द्दिरोगचिकित्सा। तृष्णारोगचिकित्सा। मूर्च्छारोगचिकित्सा। मदात्ययचिकित्सा। दाहरोगचिकित्सा। उन्मादादिरोगचिकित्सा। अपस्माररोगचिकित्सा। वातरोगचिकित्सा। वातरक्तचिकित्सा। ऊरुस्तम्भचिकित्सा। आमवातचिकित्सा। शूलरोगचिकित्सा। उदावर्त्तरोगचिकित्सा। गुल्मरोगचिकित्सा। हृद्रोगचिकित्सा। मूत्रकृच्छ्रचिकित्सा। मूत्राघातचिकित्सा। अश्मरीचिकित्सा। प्रमेहमधुमेहादिचिकित्सा। मेदोरोगचिकित्सा। उदररोगचिकित्सा। शोथचिकित्सा। शोथचिकित्सा। वृद्धिचिकित्सा। गलगण्डादिचिकित्सा। श्लीपदचिकित्सा। विद्रधिचिकित्सा। व्रणशोथादिचिकित्सा। भग्नचिकित्सा। नाड़ीव्रणचिकित्सा। भगन्दरचिकित्सा। उपदंशचिकित्सा। शूकदोषचिकित्सा। कुष्ठचिकित्सा। शीतपित्तचिकित्सा। अम्लपित्तचिकित्सा। विसर्परोगचिकित्सा। मसूरिकाचिकित्सा। मुखरोगचिकित्सा। कर्णरोगचिकित्सा। नासारोगचिकित्सा। नेत्ररोगचिकित्सा। शिरोरोगचिकित्सा। स्त्रीरोगचिकित्सा। बालरोगचिकित्सा। विषरोगचिकित्सा। पञ्चकर्म्मविधिकथनं। अथ मानाध्यायकथनं। गणाध्यायकथनं। ऋतुचर्य्याकथनं। वाजीकरणकथनं। रसायनविधिकथनं। रसशोधनविधिकथनं। रसमूर्च्छनविधिकथनं। रसबन्धनविधिकथनं। रसमारणविधिकथनं। उपरसादिविधिकथनं। विषादिविधिकथनं। मारणादिविधिकथनं। लौहसंस्कारविधिः। विशेषेण लौहमारणविधिकथनं। सर्व्वत्र पथ्यापथ्यविधिकथनं। प्रसिद्धद्रव्याणां गुणादिकथनं। अनुपानविधिकथनं। स्वस्वहत्यनिरूपणं। सङ्ग्रहेऽस्मिन् रत्नमालाभैषज्यरत्नावलीप्रभृतिभ्योग्रन्थेभ्यः अधिकानि औषधानि लिखितानीति ज्ञेयम्।

No. 2383. मालती। Substance, country-made yellow paper, 13 × 11 inches. Folia, 58. Lines, 14 on a page. Extent, 1,394 ślokas. Character, Maithili. Date, ? Place of deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, fresh. Prose. Correct.

Málatí. A commentary on the Meghadúta of Kálidása. By Kalyána Malla.

Beginning. प्राज्ञाः ज्वलद्दावानलतापशान्त्यै
यत्पादसम्बुजवरं शरणं प्रयान्ति।

तं सर्व्वभयविघ्नभरनाशनमम्बुजाचं
विष्णुं नमामि सहसा किल विश्वनाथं ॥
पद्मबन्धुकुलाम्भोधिशीतांशुर्लोकविश्रुतः ।
त्रैलोक्यचन्द्र इत्या + + + + + + + श्वरः ॥
तत्पुत्रोऽस्ति पराभूतवैरस्त्रीमण्डनस्पृहः ।
सर्व्वलक्षणसंयुक्तोगजमल्लोमहायशाः ।
तस्य कल्याणमल्लोऽस्ति नन्दनोबुद्धिसागरः ।
तेनेयं मेघदूतस्य टीका नाम्नैव मालती ॥
क्रियते चित्रभावार्थरचनावलिशालिनी ।
विद्वज्जनमनोभृङ्गवृन्दानन्दविवर्द्धिनी ॥
— — — — — — — — कश्चिदिति ।

कश्चिद्यक्षः वसतिं चक्रे निवासं कृतवान् । स्वामिवद्यकलाद्यक्षनामाकीर्त्तनं । इत्यादि ।

End. अभिमतानि सुखानि येषु तथा तानभिलषितसुखसंयुक्तानित्यर्थः ।

Colophon. इति श्रीराजर्षिश्रीकल्याणमल्लविरचिता रुचिभावार्थपरिमललसिता विदग्धबुधमनःस्वीकरणयोग्या कविपुङ्गवश्रीकालिदासप्रणीतस्य मेघदूताभिधानमहाकाव्यस्य मालतीतियथार्थनाम्नी टीका समाप्ता ।

विषयः । कालिदासकृतमेघदूतस्य व्याख्यानम् ।

No. 2384. शुद्धिरत्नाकरः । Substance, country-made paper, 14 × 4 inches. Folia, 102. Lines, 6 on a page. Extent, 8,331 ślokas. Character, Nágara. Date, ? Place of deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, old. Prose and verse. Correct.

S'uddhi-ratnákara. A digest of the Smṛiti rules regarding the impurity of the person which results from birth or death in one's family or from other causes. By Chaṇḍes'vara, who describes himself as the foreign minister or minister for war and peace to a kiṅg of Mithilá, but his name is not given.

Beginning. चन्द्रे कौटिल्यभावस्थगितरुचिशिरःशेखरीभूतखेलद्-
गङ्गाकल्लोलपातान्नयनकृतभुजि प्राप्तधूमायमाने ।
आलिङ्गान्निर्ज्जराणामपि सदसि गतव्रीड़भावं भवानीं
कण्ठच्छायान्धकारे जगदवतु जगन्नायकोनीलकण्ठः ॥

सिद्धिं शुद्धेरवाप्तः श्रुतिविधिविहितैः कर्म्मभिर्न्नित्यरूपै
काम्यैर्नैमित्तिकैरप्युचितशुचिधनैर्यज्ञसम्पादकोयः ।
मन्त्रीन्द्रोमैथिलोर्व्वीवलयपरिदृढ़स्याखिलकानां धुरीणः
श्रीमान् चण्डेश्वरोऽयं रचयति रुचिरं शुद्धिरत्नाकरं सः ।
नानानिबन्धसम्बन्धिव्यवस्थादुःस्थचेतसां ।
निर्व्वीतिरुपकाराय रत्नाकरकृता कृता ॥
प्रायणे जनने शुद्धिरशुद्धिर्नियताक्ष + ।
वर्णानां सङ्करे शुद्धिर्व्यवस्थावर्णसङ्करे ॥ इत्यादि ।

End. ब्रह्मपुराणे + + + + जलं गावोमहिषाश्छागयोनयः । शुद्ध्यन्ति-दिवसैरेव दशभिर्न्नात्र संशयः ।

यन्नामश्रवणं शुभाय जगतां यत्पादचिन्ता महासिद्धै यत् ।

Colophon. इति महासान्धिविग्रहिकश्रीचण्डेश्वरविरचितः शुद्धिरत्नाकरः सम्पूर्णः ॥

विषयः । शुद्धिस्वरूपकथनं । प्रायणशुद्धिकथनं । जननाशौचादिकथनं । जननमरणाशौचनियमकथनं । वर्णसन्निपाताशौचनिरूपणं । अशौचसङ्करकथनं । विदेशस्थाशौचं । बालाद्यशौचं । स्त्र्याशौचं । गर्भस्रावाद्यशौचं । मृत्युविशेषाशौचं । असपिण्डाद्यशौचं । निर्हरणाद्यशौचं । अनशौचिनः । सपिण्डलक्षणं । निर्हरणादिसंस्कारविधिः । उदकादिदानविधिः । शोकापनोदनादिविधिः । प्रवेशनादिविधिः । पिण्डोदकदानविधिः । अस्थिसञ्चयनादिविधिः । अशौचान्तदिनकृत्यं । नारायणबलिविधिः । अधिकारिनिरूपणं । स्वभावशुचयः । तैजसद्रव्यशुद्धिकथनं । भूमिशुद्धिः । देहशुद्धिः । प्रक्षालनादिशुद्धिः । उपहतादिशुद्धिः । पक्वान्नशुद्धिः । स्नानशुद्धिः । उदकशुद्धिः । पश्वादिशुद्धिकथनञ्च ।

No. 2385. तत्त्वालोकः । Substance, country-made paper, 14 × 4 inches. Folia, 34. Lines, 9 on a page. Extent, 841 ślokas. Character, Nágara. Date, ? Place of deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, old. Prose. Incorrect.

Tattváloka. On the nature and use of the Sañskṛit cases. By Vis′vanátha S′armá, Kavíràja. There is a work of this name by Janárdana on the Vedánta. Hall's 'Contributions,' p. 157.

Beginning. सायं गोपवधूटीवक्रदृगन्तेन दत्तसङ्केतः ।
शरणं चक्रधरोमे कारकचक्रं निरूपयतः ॥

अथ सुपर्थोनिरूप्यते । तत्र प्रथमाषष्ठीवर्ज्जं प्रायः सर्व्वाः विभक्तयः कारकाभिधायिन्यः । इत्यादि ।

End. दानसाम्यं तदाश्रयत्वपरम्परया बोध्यमित्याहुः ।
विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य ।
विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता ॥

Colophon. इति श्रीविश्वनाथशर्म्मकृततत्त्वालोकः समाप्तः ।

विषयः । विभक्त्यर्थनिरूपणमुखेन कारकस्वरूपादिविवेचनं ।

No. 2386. आख्यातवादटिप्पनी । Substance, country-made paper, 15 × 3½ inches. Folia, 50. Lines, 10 on a page. Extent, 1,225 ślokas. Character, Nágara. Date, ? Place of deposit, Bahorá-grám, Post Champánagara, Zillá Púrṇiyá, Paṇḍit Lála Jhá. Appearance, fresh. Prose. Incorrect.

A'khyátaváda-ṭippaní. A gloss on the A'khyátaváda, a Nyáya treatise on A'khyáta, or conjugational affixes. By Rámakṛishṇa. (*Cf.* Hall's 'Contributions,' p. 59).

Beginning. मुकुन्दचरणद्वन्द्वमाधाय हृदयाम्बुजे ।
आख्यातवादसद्व्याख्या रामकृष्णेन तन्यते ॥

आख्यातस्येत्यादि । यत्त्वमाख्यातवाच्यतावच्छेदकमित्यर्थः । इत्यादि ।

End. मानसत्वव्याप्यत्वं प्रत्याख्यातमिति समाप्तमनुमितित्वशाब्दवादे मानसत्व-खण्डनं । समाप्तोऽयं ग्रन्थः ।

विषयः । आख्यातवादस्य व्याख्यानम ।

No. 2387. गुणकिरणावलीप्रकाशव्याख्या । Substance, palm-leaf, 14 × 2 inches. Folia, 137. Lines, 6 on a page. Extent, 3,596 ślokas. Character, Maithili. Date, ? Place of deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, decayed. Prose. Generally correct.

Guṇakiraṇávalí-prakáśa-vyákhyá. A gloss on Vardhamána's *Guṇakiraṇávalí-prakáśa*, which is a commentary on Udayana A'chárya's *Guṇakiraṇávalí*, an exegesis on Prasastapáda's exposition of the Vais'eshika doctrine. By Bhagiratha Ṭhakkura.

Beginning. जगदवलम्ब + + श्रोम + + महादेवं सोदरं नत्वा ।
विषमाशयप्रकाशं गुणप्रकाशे भगीरथस्तनुते ॥

एकचेति। हृदयकल्पिताञ्जलेर्मूलभागस्य + + सन्निधानात् तत्र च चिकुरादिप्रतिघाताद्यभागस्य शिरोवर्त्तिचन्द्रकिरणसम्बन्धादिदमुपपादनीयमिति।

End. गवयपदं गवयत्वप्रवृत्तिनिमित्तकमितराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिजनकत्वादित्यनुमानेन व्यतिरेकिणा समीहितः संचेपः।

Colophon. इति महामहोपाध्यायसर्व्वज्ञठक्कुरश्रीभगीरथकृता गुणकिरणावलीप्रकाशव्याख्या समाप्ता।

विषयः। वर्द्धमानकृतगुणकिरणावलीप्रकाशस्य व्याख्यानम्।

No. 2388. महिम्नःस्तवटीका। Substance, country-made paper, 13 × 4 inches. Folia, 17. Lines, 13 on a page. Extent, 884 ślokas. Character, Maithili. Date, ? Place of deposit, Dhamdaha-grám, Post Dhamdaha, Zillá Púrṇiyá, Paṇḍit Vachharan Ṭhákur. Appearance, old. Prose. Correct.

Mahimnastava-ṭíká. A commentary on the well-known hymn of Pushpadanta who addressed it to Mahádeva, but which the commentary applies equally to Hari. By S'rídhara Svámí, a renowned Vaishṇava and commentator on the Bhágavata.

Beginning. नत्वा हरिहरं भक्त्या लिख्यते बुद्ध्यपेचया।
महिमाख्यस्तुतेर्व्याख्योभयपचावलम्बिनी॥

कश्चिद्गन्धर्व्वराजः कस्यचिद्राज्ञः पुरोपवने कुसुमानि प्रत्यहं हरन्नासीत्। राज्ञा तज्ज्ञात्वा शिवनिर्म्माल्येन———परमकारुणिकं सर्व्वकामदं भगवन्तं स्तौति। महिम्न इत्यादि। हे हर सर्व्वाणि दुःखानि हरतीति हरः। तथा च सर्व्वदुःखहरत्वे प्रसिद्धोऽस्य। इत्यादि।

End. हरिशङ्करयोरभेदबोधोभवतु चुद्रधियामनल्पयत्नात्।
उभयार्थतया मयेदमुक्तं सुधियः साधुतयैव शोधयन्तु॥
यत्नतोवक्रया रीत्या कर्त्तुं शक्यं विधान्तरं (?)।
यद्यपीह तथाप्येषा ऋजुबुद्ध्या प्रदर्शिता॥
— — — — — — —।
महिमाख्यस्तुतेर्व्याख्या प्रतिवाक्यमनोहरा।
इयं श्रीमद्गुरोः पादपद्मयोरर्पिता मया॥

Colophon. इति श्रीश्रीधरस्वामिकृता महिम्नःस्तवटीका समाप्ता।

विषयः। पुष्पदन्तकृतमहिमाख्यशिवस्तोत्रस्य हरिपचेऽपि व्याख्यानम्।

No. 2389. राक्षसकाव्यटीका । Substance, country-made paper, 14 × 4 inches. Folia, 5. Lines, 9 on a page. Extent, 172 ślokas. Character, Maithili. Date, ? Place of deposit, Dhamdaha-grám, Post Dhamdaha, Zillá Púrṇiyá, Paṇḍit Vachharaṇ Ṭhákur. Appearance, old. Prose. Incorrect.

Rákshasa-kávya-ṭíká. A commentary on the poem called *Rákshasa-kávya.* By Vidyákara Mis'ra, of Mithilá. The poem is limited to 20 stanzas, in course of which a person, roaming about in a forest, discribes for the entertainment of his wife the sylvan scenery around him. It is attributed to Kálidása. A lithographed edition of the text with an anonymous gloss was published at Benares in Samvat 1931.

Beginning. प्रणम्य जानकीजानिं श्रीविद्याकरमैथिलः ।
राक्षसाख्यस्य काव्यस्य कुरुते विवृतिः शुभा ॥

कश्चित् पुरुषोवर्षर्त्तौ प्रियया सह वनं विहर्त्तुं + + + + परिमलोद्गारीणि पुष्पाणि प्रदर्शयन् सुरते मनः सम्बोधयन्नाह,—कश्चिदिति । कश्चिदनिर्द्दिष्टोना पुरुषपदवाच्य इमां वक्ष्यमाणां गां वाचं वनितां वभाषे—इत्यादि ।

End. अदीनं वहन्तीति अदीनवाहः तैरदीनवाड्भिर्बलिभिरित्यर्थः ॥ २१ ॥

Colophon. इति मैथिलमहोपाध्यायश्रीविद्याकरमिश्रकृता राक्षसकाव्यटीका परिपूर्णा ।

विषयः । राक्षसकाव्यस्य व्याख्यानम् ॥

No. 2390. धातुप्रत्ययपञ्जिका । Substance, palm-leaf, 16 × 2 inches. Folia, 166. Lines, 5 on a page. Extent, 3,093 ślakas. Character, Maithili. Date, L. E. 424. Place of deposit, Dhamdaha-grám, Post Dhamdaha, Zillá Púrṇiyá, Paṇḍit Vachharaṇ Ṭhákur. Appearance, old. Prose. Correct.

Dhátupratyaya-panjíká. Conjugations of all the verbal roots given in the *Dhátupáṭha* of Páṇini. By Dharmakírti Áchárya. The codex is incomplete.

Beginning. प्रणम्य शिरसा देवीं बालानां हितकारिणीं ।
यथासारं प्रवक्ष्यामि धातुप्रत्ययपञ्जिकाम् ॥

अथ तिङ्विभक्तिर्यथासम्भवं क्रियावाचिभ्योधातुभ्यः परस्य लकारस्थाने संक्षेपेणोपदिश्यते इत्यादि।

End. अजभ्रनगमां सनीतिदीर्घः। अधिजिगांसते इत्यादि सर्व्वासु ज्ञेयं॥

Colophon. इत्याचार्य्यश्रीधर्म्मकीर्त्तिविरचिते तिङन्तखण्डे सप्तमः परिच्छेदः समाप्तः। सं ४२४।

विषयः। पाणिनीयधातुपाठोक्तानां प्रसिद्धानां धातूनामदादिदिवाद्यादिक्रमेण तिङा-दिषु रूपभेदादिप्रदर्शनं।

No. 2391. Devípújana-bháskara. The MS. noticed under this name on page 43 appears to be incomplete. From transcripts of the beginning and of the end of the MS. since communicated to me by Government I find the following to be its concluding lines, which bring up the ceremony to the last day of its celebration.

End. तथा दशमीमतिवाह्य यात्रायां दोषमाह भविष्यपुराणं।

दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः।
तस्य संवत्सरं राज्ये न क्वापि विजयोभवेत्।

अशक्तौ राजमार्त्तण्डः कार्य्यवशात् स्वयमगमे भूभर्त्तुः केचिदाऊराय्याः। छत्री युधाद्यमिष्टं वैजयिकं विनिर्गमे कुर्य्यादिति। आयुधं खड्गं। इति दशमीनिरूपणकिरणः। खयुगोग्निशिवे शाके निशाचरतिथौ शुभे। चक्रे श्रीशम्भुनाथेन देवीपूजनभास्करः।

Colophon. इति श्रीसिद्धान्तवागीशमिश्रकृतोदेवीपूजनभास्करः सम्पूर्णः। १२ न॰ ता॰ ०६ आषाढ।

VOLUME VII. PART II. No. XIX.

NOTICES

OF

SANSKRIT MSS.

BY

RA'JENDRALA'LA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German and of the American Oriental Societies, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

For the year 1883-84.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

1884.

No. 2392. स्मार्त्तानुष्ठानपद्धतिः वा प्रयोगरत्नम् । Substance, country-made paper, 12 × 5 inches. Folia, 142. Lines, 12 on a page. Extent, 3,384 ślokas. Character, Nágara. Date, Sk. 1650. Place of deposit, Sántipura, Rámanátha Tarkaratna; another copy at Phaḍkiyá-grám, Post Chámpá-nagara, Zillá Púrṇiyá, Jayapati Jhá. Appearance, old. Prose and verse. Generally correct.

Prayogaratna *alias* **Smártánushṭhána-paddhati.** An elaborate digest of the domestic Sañskára rites, giving at length the rituals of all the rites described. By Ananta Díkshita, son of Viśvanátha. The author follows the school of A'śvaláyana. The subjects, rites and ceremonies described are the following: Rules for Svastivāchana. Intercalary months. Kalaśárchana. Auspicious days. The rite of Abhissheka. S'ráddha performed before marriage and other auspicious occasions, (Nándimukha.) S'thálipáka or cooking of rice for a rite. Ishṭipráyas'chitta. Anugatágni práyaschitta. Naimittaka práyaschitta. Rites for conception. Expiation for first menstruation on an inauspicious day. The establishment of a household fire on the first fire being defiled or blown out. Rite on the first perception of the quickening of an embryo. Símantonnayana rite on the 4th, 6th or 8th month of pregnancy. Expiatory rite for delivery taking place before the performance of the last named rite. (*Vishṇubalí*). Rite immediately after birth (*Játakarma*) Worship of Shashṭhí on the 1st, 2nd or 3rd day after birth. The naming of the child on the 6th or the 7th or the 8th month. Ceremony of placing the child on a bedstead on the 10th, 12th or the 16th day after birth. Rules for nursing. The rite of boring the ears. The ceremony of looking at the sun. The ceremony of taking a child out of the house on the 4th month (*Nishkramaṇa*). The ceremony of weaning, (*Annáprásána*). Ditto of cutting off the umbilical cord (*Vardhápana.*) The ceremony of tonsure on the 3rd month (*Chaulakarma.*) Investiture of the sacred cord. (*Upanayana.*) The rite for strengthening the intellect of a boy, (*Medhájanana*) First worship of sylvan gods (*Devakasthápana*). Invocation of the Mátrikás at the ceremony of the sacred cord, (*Upákarmotsarjana.*) Pupílage. The rites of Mahánámni and Mahávrata. Study of the Upanishads. The rite of *Godána.* Expiation for breach of continence during pupilage. Return home after pupilage, (*Samávartana*). Marriage. Characteristics of brides. Do. of the parents of the bride. Oral contract. Altar for the marriage rite. Duties on the day before that of marriage. The rules for giving

away the bride. The Homa rite at marriage. Homa for entering her new home by the bride. The fourth day homa rite. The gift of salt (*Airiṇidána.*) Entry of the bride into her new home. Second marriage during the lifetime of the first wife. Marriage with an Ákanda tree before contracting a third marriage (*Arkaviváha*). The establishment of a second household-fire on contracting a second marriage during the life-time of the first wife, (*Agnidvaya-sansarga*). Morning and evening homas. How to perform the daily homas when the person is polluted. Homa rite in a summary way, (*Samasyahoma.*) Fortnightly homas. Travelling with one's wife. Entry into the bride's chamber. Expiatory rites for evil dreams and other causes.

Beginning. नमामि पार्व्वतीसूनुं भक्तानां सिद्धिदायकं।
क्रियते ह्युपकाराय स्मार्त्तानुष्ठानपद्धतिः।
दीक्षितानन्तविप्रेण विश्वनाथस्य सूनुना।
प्रयोग उच्यते सम्यङ्मन्त्रविस्तारपूर्व्वकं॥
आश्वलायनशास्त्रेऽस्मिन् सन्ति पद्धतयः शतं।
विना पुस्तकमार्गेण कर्म्म कर्त्तुं न शक्यते॥
तदर्थं क्रियते यत्नः पाठबोधहिताय च।
सुलभोपायसिद्ध्यर्थं वैदिकानां तदुच्यते॥
पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुमन्त्रिताः॥ इत्यादि।

End. नमः पृथिव्यै स्वाहा। वाचस्पतये ब्रह्मण इदं नमः।
सीमन्तव्रतचौलनामकरणान्नप्राशनोपायन-
स्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च।
पुंस्त्वयावसथप्रवेशनसुताद्यास्यावलोकाश्रम-
स्वीकारचितिपाभिषेकदयिताद्यर्त्तौ च नान्दीमुखं॥

Colophon. इति श्रीमदनन्तदीक्षितविरचितं प्रयोगरत्नं प्रायश्चित्तान्तं समाप्तं। शकाब्दाः १६५०।

विषयः। वक्तृणां संस्कारादिषु सप्रमाणप्रयोगकथनं। तत्र स्वस्तिवाचनविधिः। अधिवासविधिः। कलशार्चनविधिः। पुण्याहवाचनविधिः। अभिषेकविधिः। नान्दीमुखश्राद्धविधिः। स्थालीपाकविधिः। इष्टिप्रायश्चित्तविधिः। अनुगताग्निप्रायश्चित्तविधिः। नैमित्तिकप्रायश्चित्तविधिः। अथ गर्भाधानादिसंस्कारविधिः। दुष्टरजोदर्शनशान्तिविधिः। विच्छिन्नस्य गृह्याग्नेः पुनः सन्धा-

नविधिः। गर्भाधानपुंसवनसीमन्तोन्नयनविधिः। अकृतसीमन्तायाः प्रसवे विशेषविधिकथनं। विष्णुबलिविधिः। जातकर्म्मविधिः। षष्ठीपूजाविधिः। नामकरणविधिः। पर्य्यङ्कारोहणविधिः। दुग्धपानविधिः। कर्णवेधविधिः। सूर्य्यावलोकनविधिः। निष्क्रमणविधिः। उपवेशनान्नप्राशनविधिः। वर्द्धापनविधिः। चौलकर्म्मविधिः। उपनयनविधिः। मेधाजननविधिः। देवकोत्थापनविधिः। उपाकर्म्मोत्सर्ज्जनविधिः। अध्ययनविधिः। महानाम्न्यादिव्रतविधिः। महाव्रतविधिः। उपनिषद्व्रतविधिः। गोदानव्रतविधिः। ब्रह्मचारिव्रतलोपे प्रायश्चित्तविधिः। समावर्त्तनविधिः। विवाहविधिः। कन्यादिलक्षणकथनं। कन्यादातारः। वाग्दानविधिः। विवाहवेदिनिर्म्माणविधिः। विवाहपूर्व्वदिनकृत्यनिरूपणं। कन्यादानविधिः। विवाहहोमविधिः। प्रवेशनीयहोमविधिः। चतुर्थीहोमविधिः। ऐरिणीदानविधिः। वधूगृहगमनविधिः। अधिवेदनविधिः। अर्कविवाहविधिः। अग्निद्वयसंसर्गविधिः। उपासनाख्यसायंप्रातर्होमविधिः। अशौचे होमविधिः। समस्य होमविधिः। पक्षहोमविधिः। सभार्य्यस्य प्रवासविधिः। दम्पत्योर्गृहप्रवेशविधिः। अशुभस्वप्नदर्शनादौ प्रायश्चित्तविधिकथनञ्च।

No. 2393. अमरुशतकटीका। Substance, country-made paper, 16 × 3½ inches. Folia, 34. Lines, 7 on a page. Extent, 889 ślokas. Character, Maithili. Date, ? Place of deposit, Vahorá-grám, Post Chámpánagara, Zillá Púrṇiyá, Lála Jhá. Appearance, old. Prose. Correct.

Amaruśataka-ṭíká. A commentary on a century of miscellaneous verses by Amaru, a poet of great renown. By Jnánánanda Kaládhara.

Beginning. विद्या वितरति मुक्तिं भक्तिमविद्या च तां भजिष्यामः।
या चरमा चरमायाः शक्तिः सा नः शिवं दिशतु॥
तदुभयरसपरिपाटीपरिष्कृतवाटीमिमां रम्यां।
कुरुतेऽमरुशतटीकां ज्ञानानन्दः कलाधरः श्रीमान्॥
यः सौभाग्यवता विभक्तिषलितज्ञानामृतानन्दथु-
र्यौवात्स्यायनकामतन्त्रविलसत्केलिक्रियाकौशलः।
व्याचष्टेऽत्र रसद्वयं कविकुलालङ्कारचूड़ामणिः
श्रीलश्रीरविचन्द्र एष पिशुनां मात्सर्य्यतामुत्सृजन्॥
यदि स्यात् परमानन्दे कामानन्दे च वासना।
तदा संसेव्यतां धीराष्टीकेयं कामदा सदा॥
क्व चातिकर्कशः शान्तः क्व चातिललितः शुचिः।
एकत्र वाक्ये व्याख्यातुस्तावहो कौशलं महत्॥

निर्व्विघ्नप्रारिप्सितशतकसमाप्तिकामोग्रन्थकृदिष्टदेवतां कीर्त्तयन्नाह,—व्याकृष्टेति। अम्बि-कायाः पार्व्वत्याः कटाक्षः अपाङ्गदर्शनं। इत्यादि।

End. नानाविधान् भागवतधर्म्मान् निरूप्य रामस्मरणमेव सर्व्वगरिष्ठमिति सूचितं॥

Colophon. इति श्रीमदमरुशतकटीका समाप्ता।

विषयः। अमरुशतकस्य शृङ्गारपक्षे शान्तिपक्षेऽपि व्याख्यानम्।

No. 2394. दण्ड्यर्थमुक्तावली। Substance, country-made paper, 16 × 3½ inches. Folia, 58, Lines, 8 on a page. Extent, 2,280 ślokas. Character, Maithili. Date, ? Place of deposit, Vahorá-grám, Post Champánagara, Zillá Púrṇiyá, Lála Jhá. Appearance, decayed. Prose. Correct.

Daṇḍyartha-muktávalí. A commentary on the *Kávyádars'a* of Daṇḍi. By Narasiñha Suri.

Beginning. अद्यापि योऽहरजटावनवासखिन्नो-
गुर्व्वङ्गनागमनपापमपाकरोति।
गङ्गातटे नयनवह्निसमीपवर्त्ती
चन्द्रोयतिव्रतवरः स शिवं तनोतु॥
नारदादिमुनिवृन्दवन्दितं गोपिकानयननीरजार्च्चितं।
सान्द्रवारिधरकान्तिकोमलं नन्दपुण्यपरिणाममाश्रये॥
दोषान् परस्य परिभूषयति प्रयत्ना-
द्बालस्य वा वऊवयःक्रमगर्व्वितस्य।
गृह्णाति यः परगुणस्य कणानपीह
तस्मै नमोधरणीमण्डलमण्डनाय॥
आसीत् कीर्त्तिकरात् सुधीहरिहरस्तस्मादभूत् सत्कविः
श्रीमत्पण्डितपुङ्गवोवचिकरः श्रीकृष्णशर्म्मा ततः।
तस्मादेष गदाधरः समभवत्तन्नन्दनः सम्प्रतं
सूरिः श्रीनरसिंह एष तनुते दण्ड्यर्थमुक्तावलीं॥
अशक्तिरस्माकमिहास्ति यद्यपि
प्रकृष्ट + + + विवेचने बुधाः।
तथापि गोविन्दपदारविन्द-
भक्त्या न शक्यं किमिहास्ति लोके॥

मन प्रत्यूहव्यूहतिमिरतरणिभूतां विशिष्टदेवतां भगवतीं भारतीं भावयन्नाह चतुर्म्मुखेति चतुर्म्मुखमुखमेवाम्भोजवनं तस्य हंसवधूर्हंसरमणी। इत्यादि।

End. कृतमभिसरणं यस्य तादृशः सन् रमते कीर्त्तिञ्च लभते।

Colophon. इति श्रीनरसिंहसूरिविरचिता दण्ड्यर्थमुक्तावली समाप्ता।

विषयः। दण्डिकृतकाव्यादर्शाभिधानालङ्कारग्रन्थस्य व्याख्यानम्।

No. 2395. प्रभावतीपरिणयम्। Substance, palm-leaf, 15 × 2 inches. Folia, 78. Lines, 5 on a page. Extent 1,647 ślokas. Character, Maithli. Date, ? Place of deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, decayed. Prose and verse. Generally correct.

Prabhávatí-pariṇaya. The marriage of Prabhávatí, a drama in 7 acts. By Harihara.

Beginning. देव्या मानापनोदप्रणतशिवशिरःशीतधाम्ना नखेन्दोः
सम्पूर्णं सिंहिकेयाकृतिकुटिलजटामण्डलाद्वावरुद्धे।
गीर्व्वाणाश्चन्द्रपर्व्वभ्रमचकितहृदोन्यद्देतत्किरीटात्-
सङ्गाद्गङ्गाप्रवाहे प्रवहति विहितस्नानपुण्याः पुनन्तु॥
ध्यानावधानपरिलङ्घनजागरूक-
रोषानलोन्मथितमन्मथविग्रहस्य।
सद्यः प्रबुद्धकरुणापरिणाहदीर्घ-
देवस्य पातु परिदेवितमिन्दुमौलेः॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। पुरोऽवलोक्य। कथमयमशेषभुवनवनिताविधीयमानसायन्तनमङ्गलदीपिकासहस्रसमकालमेव पूर्व्वाचलशिखरसौधपरिसरे। ——————

यः किल श्रीवासुदेवात्मजन्मनः कुमारः प्रद्युम्नस्य।
सच्चरितसन्दर्भगर्भितं प्रभावतीपरिणयं नाम नाटकं।

परन्तु कुतस्त्यमेतदिति स्मारयितुमवशिष्यते। सूत्रः। मारिष मैथिल एवायं प्रबन्धः नटः। सवितर्कं। भाव — — — — — — — — — — — —।

प्रादुर्भूय पुरोगिरेरिव हृषीकेशाकृतीराघवो-
यस्तोग्रद्युतिवद्दिवाकरमहावंशे दिदीपे द्विजः।
या लक्ष्मीरथ मैथिलादुदभवद्विद्यावदातात्मन-
स्ताभ्यामुद्भवमापतुः कुशलवप्रख्यातगोत्रौ सुतौ॥

एषा तयोः प्रथमजेन निजानजात-
श्रीनीलकण्ठकविकण्ठविभूषणाय।
गोविन्दसूनुगुणगुम्फनिषक्तसूक्ति-
मुक्तावली हरिहरेण चिरेण चीर्णा॥

अभिनयाय चास्मासु समर्पिता। इत्यादि।

तथापीदमस्तु।

End. प्राक् प्राप्नोतु चिराद्गिरासहचरी मुद्रां समुद्रात्मजा
नोचेन्मुञ्चतु वैरमित्यपि नचेन्मूढ़ेषु मा मज्जतु।
येषां दुर्म्मदमोहदुर्दिनदशां दोषस्पृशामग्रतः
कामग्रस्त इवावसीदति सतामन्तर्निगूढ़ोगुणः॥

अपि च।

पुरस्तात् पैशुन्यं परिहरतु गोष्ठीं गुणजुषा-
मथैषामौन्नत्यैर्मुदितमिदमास्तात् जगदपि।
कवेरेतत् कल्पावधि मधुरगम्भीरगुरुभि-
र्गिरां गुम्फैः स्यूतं सुकृतमनुगृह्णन्तु सुहृदः॥

इति निष्क्रान्ताः सर्व्वे।

नाट्योपमहरोनाम सप्तमोऽङ्कः।

विषयः। वज्रलाभसुतया प्रभावत्या सह प्रद्युम्नस्य परिणयवृत्तान्तमवलम्ब्य विरचितमिदं नाटकम्। तत्र प्रथमाङ्के,—सारणभद्रयोरभिनयेन सुकुमारे कैशोरे वयसि वर्त्तमाना प्रभावती सह सहचरीभिः भवनदीर्घिकायां विलाससुखमनुभवन्ती कथाप्रसङ्गेन प्रद्युम्नस्य रूपगुणादिकं श्रुत्वा तस्मिन् नितरां प्रीतिमुवाहेति सूचनं। अथ प्रद्युम्नोऽपि चित्रफलके प्रभावतीप्रतिविम्ब-दर्शनेन समुद्भिन्नानुरागकुसुमः सह वयस्येन प्रमदवनं प्रविश्य रहसि तामनुध्यायन्नात्मभूशरेणैव निरतिशयं तापमाप। द्वितीयाङ्के,—विशेषेण प्रभावत्याः पूर्व्वरागवर्णनं। तत्र माधवीम-ण्डपमण्डनायमानायास्तस्याश्चित्तविनोदनाय तरलिकाप्रमुखैः सखीगणैरालेख्यसमर्पितसङ्कल्प-जन्मानं प्रदर्श्य सा कथञ्चित् समाश्वासितेति वर्णनं। तृतीयाङ्के,—शाम्बादिभिः सह नटवेशेन प्रद्युम्नस्य वज्रनाभपुरप्रयानवर्णनं। चतुर्थाङ्के,—तत्र तयोरन्योन्यदर्शनं मदनलेखप्रस्थापनञ्च। अथैकदा समुज्जृम्भिते कुसुमसमये कुसुमवाटिकां सह सखीसमूहेन सनाथयन्त्याः प्रभावत्या भ्रमरबाधनां सूचयन्त्याः पुरतः भ्रमररूपं विहाय स्वरूपेण प्रकाशमानस्य मानसभवस्य तया सार्द्धमङ्गुलीयकविनिमयादिवर्णनं। पञ्चमाङ्के,—तरलिकया सह शाम्बगदयोरन्तःपुरोद्यानं प्रविष्टयोरुद्यानसौन्दर्य्यवर्णनं। सन्ध्यावर्णनं। चन्द्रवतीगुणवतीभ्यां सह शाम्बगदयोः परिणय-

कथनञ्च। षष्ठाङ्के,—सुप्तोत्थितस्य प्रद्युम्नस्य प्रभातरमणीयकतावर्णनं। अथाम्बरतले सहसा घनघटाच्छन्ने तरङ्गिकासनाथया प्रियया सह मनसिजस्य केलिशैलरहगतस्य विलासवर्णनं। नायिकायाः प्रणयमानवर्णनञ्च। सप्तमाङ्के,—राजपुरोहितेन सह कञ्चुकिकुञ्जयोः संवादेन अन्तःपुरवृत्तान्तोऽयं वज्रनाभेन परिज्ञातः समुद्युक्तश्च स कन्यान्तःपुरपाटच्चराणां समुचित-शासनायेति सूचितं। अथान्तरे विमानमार्गेण नारदस्य वज्रनाभेन सह यादवकुमाराणां समरसंरम्भसन्दर्शनं। प्रद्युम्नसमाश्वासनञ्चेति शम्।

No. 2396. मिताक्षरा। Substance, country-made paper, 14 × 10 inches. Folia, 205.Lines, 26—27 on a page. Extent, 4,054 ślokas. Character, Nágara. Date, Sm. 1862. Place of deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, fresh. Prose. Generally correct.

Mitákshará. A commentary on the Gautama Sañhitá—a text-book on law. By Haradatta.

Beginning. प्रथमतस्तोषि पचाषि न विद्यन्ते।——प्रचाल्य पादौ चेति वसिष्ठः। वाग्यतः शब्दमकुर्व्वन्। हृदयस्पर्शः परिमाणार्थमिदं। इत्यादि।

End. धर्म्मः सोऽयमादितोवेदोधर्म्ममूलमित्यारभ्य एवमन्तोधर्म्म उक्तः। द्विरुक्तिः धर्म्म-शास्त्रपरिसमाप्त्यर्था।

Colophon. इति गौतमीयवृत्तौ हरदत्तविरचितायां मिताक्षरायामष्टाविंशोऽध्यायः। शुभं भूयात्। संवत्। १८६२।

विषयः। गौतमधर्म्मसंहिताया व्याख्यानम्।

No. 2397. आलोकदर्पणं। प्रत्यक्षखण्डः। Substance, country-made paper, 16 × 2 inches. Folia, 97. Lines, 5 on a page. Extent, 2,774 ślokas. Character, Maithili. Date ? Place deposit, Dhamdaha-grám, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, decayed. Prose. Correct.

A'loka-darpaṇa. A gloss on Jayadeva's commentary on the *Pratyaksha-chintámaṇí* of Gañges'a. By Maheśa Mahámahopádhyáya.

Beginning. चतुर्व्विधमितिमूलं यद्यपि प्रत्यक्षकरणत्वादिना शरीरादिकमपि संगृह्यते तथापि चतुर्व्विधत्वमक्षतमेवेति भावः।

End. विधाय विदुषां प्रीत्यै प्रत्यक्षालोकदर्पणं।

श्रीगोपाले महेशेन तत्राकारि समर्पणम्॥

Colophon. इति श्रीमहामहोपाध्यायसर्व्वक्कुरश्रीमन्महेशविरचिते आलोकदर्पणे प्रत्यक्षखण्डः सम्पूर्णः।

विषयः। जयदेवमिश्रकृतचिन्तामणिप्रत्यक्षटीकाया व्याख्यानम्।

No. 2398. पूजारत्नाकरः। Substance, country-made paper, 12 × 5 inches. Folia, 142. Lines, 10 on a page. Extent, 2,732 ślokas. Character, Nágara. Date, ? Place of deposit, Dhamdaha, Zillá Púrṇiyá, Bhaiyálála Jhá. Appearance, fresh. Prose and verse. Generally correct.

Pújá-ratnákara. Rituals for worshipping various gods and goddesses according to Tántric rules. By Chaṇḍes'vara. He was minister for Peace and War to a king of Mithilá.

Beginning प्रातः स्वर्गतरङ्गिणीजलभरैर्नीलोत्पलेनाञ्चितः
पार्व्वत्या सितभूतिचन्दनचयैरालिप्तगात्रोज्ज्वलः।
देवश्चन्द्रकलाविलासितिलकोगौरीविवाहोत्सवा-
रम्भे शैलकृतार्हणस्त्रिजगतामर्घ्याहरः पातु वः॥
यत्पूजाकुसुमैः शुभैः सुमनसोनेच्छन्ति कल्पद्रुमान्
यन्नैवेद्यनिवेदनैरपि सुधां भोक्तुं यतन्ते+तं।
स श्रीमान् मिथिलावनीन्द्रमहितो मन्त्रीन्द्रचण्डेश्वरः
सन्न्यायैः परिमार्ज्जितं वितनुते पूजासु रत्नाकरं॥
साधारणविधेयाद्यस्तरङ्गः परिकीर्त्तितः।
सूर्य्यपूजातरङ्गोऽत्र द्वितीयोऽथ सुविस्तरः॥
— — — — — — — क्षिप्रं हि
मानुषे लोके सिद्धिर्भवति कर्म्मणां॥
कर्म्मणां सिद्धिं कांक्षन्तोदेवतानां पूजां कुर्य्युरित्यर्थः। इत्यादि।

End. गिरिष्ठे जपेन्मन्त्री मातरीलोकमातरः।
कौलिकेन विधानेन राज्यायुःसुखदायिकाः॥

Colophon. इति महासान्धिविग्रहिकसर्व्वक्कुरश्रीचण्डेश्वरविरचितः पूजारत्नाकरः समाप्तः शुभमस्तु।

विषयः। साधारणतोदेवपूजाविधिकथनं। तत्र कालदेशस्थानादिविवेचनं। मण्डलवलिहरणादिविधिकथनं। पुष्पचयनादिविधिः। वेदिवितानादिविधिः। नैवेद्यप्रतिपत्तिविधिः। अथ सूर्य्यपूजाया आवश्यकताकथनं। तत्फलादिकथनं। पूजाधिकारिनियमादिकथनं। सूर्य्यमन्दिरमार्ज्जनादिफलकथनं। ब्रह्मस्नानविधिः। पञ्चगव्यविधिः। स्नपनपूजनयोःफलकथनं। सूर्य्यार्घदानविधिः। पञ्चोपचारविधिः। गन्धपुष्पविवेचनं। धूपदीपनैवेद्यादिप्रतिपत्तिकथनं। वासोऽलङ्करणादिदानविधिः। अथ सूर्य्यनित्यपूजाविधानं। चक्रादिनिर्म्माणविधिकथनपूर्व्वकं तत्पूजादिविधिकथनं। स्थण्डिलपूजादिविधिः। सूर्य्यमूर्त्तिपूजाविधिः। सौरस्नानादिविधिः। सूर्य्यस्य रथयात्राविधिः। सौरधर्म्मकथनं। अथ शिवपूजाविधिकथनं। तत्र पार्थिवादिलिङ्गपूजाविधिः। रुद्राक्षधारणादिविधिः। पञ्चोपचारदानादिविधिः। घृताभिषेकमहास्नानादिविधिः। पुष्पादिविवेचनं। शिवप्रीतये दानादिविधिः। घृतकम्बलविधिः। प्रतिकृतिनिवेदनविधिः। महास्नानविधिः। शिवपूजावारादिविधानं। शिवस्य रथयात्राविधिः। एवं ब्रह्मणः पूजाविधिः। तत्र रथयात्रादिविधानञ्च। विष्णुपूजाविधिः। तद्गृहमार्ज्जनादिविधिः। तदुपचारादिविधिः। तत्र पुष्पधूपदीपनैवेद्यादिविधानं। शिलापरीक्षादिविधिः। भगवद्दीक्षादीक्षितानामपराधादिकथनं। दुर्गापूजादिविधिः। कुमारीपूजादिविधिः। मातृपूजनादिविधिः। देवीयागविधिः। मूर्त्तिनिर्म्माणादिविधिः। देव्याः पवित्रारोपणविधिः। कालभेदे तस्याः पूजनादिकथनञ्च।

No. 2399. पुरश्चरणचन्द्रिका। Substance, palm-leaf, 16 × 1½ inches Folia, 52. Lines, 5 on a page. Extent, 1,466 ślokas. Character, Maithili Date, L. E. 538. Place of deposit, Guṇamantí-grám, Post Ráṇígañja, Zilla Púrṇiyá, Bábu S'rípati Jhá. Appearance, old. Verse. Correct.

Puraścharaṇa-chandriká. On Kaula Rites for special sanctification or purification. By Devendra A'śrama, disciple of Vibudhendra A'śrama. CONTENTS: Faith defined. Praise of spiritual guides. Duties of Kaulas. Rules for postures and seats. Rosaries. Gesticulations. Fixing of the pivot. Modes of showing respect to spiritual guides and revered persons. Purification of the elements. Fixation of the soul or spirit in images. Práṇáyáma. Fixation of the mind on particular objects. Intellectual sacrifice. Worship of the soul. Rules for placing the conch-shell in its proper place. Manifest or material worship. Means of making Mantras efficient. Altars. Homas and spoons and other implements for them. Rules for sanctifying the five members of the body.

Beginning. प्रणम्य जानकीनाथं देवेन्द्राश्रमधीमता ।
क्रियते मन्त्रचन्द्राणां पुरश्चरणचन्द्रिका ॥
अशेषशास्त्राम्बुधिपारदृश्वा विशेषतोमान्त्रिकचक्रवर्त्ती ।
उपासकानां हितहेतुभूतां पुरश्क्रियां योविशदीकरोति ॥ इत्यादि ।

End. तन्त्राणि जैमिनिकणादपतञ्जलीनां
श्रीव्यासगोतमसदाशिवपाणिनीनां ।
सांख्यस्य चामरगुरोः कवितां स्मृतिभ्यो-
वेदश्च वेद कृपया रघुनन्दनस्य ॥
तेनेयं प्रथिता माला वाक्पुष्पैरर्थतन्तुना ।
कण्ठे विभूषणं भूयाद्रघुनाथार्पिता सती ॥
इति सकलमन्त्राणां पुरश्चरणचन्द्रिकां ।
सर्व्वागमानुसारेण श्रीदेवेन्द्राश्रमोऽकरोत् ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमद्विबुधेन्द्राश्रमपूज्यपादशिष्यश्रीदेवेन्द्राश्रमविरचितायां पुरश्चरणचन्द्रिकायां जपहोमतर्पणाभिषेकब्राह्मणभोजनविधिः सम्पूर्णः । लसं ५१८ ।

विषयः । भक्तिनिरूपणं । गुरुभक्तिप्रशंसा । कौलिकाचारनिरूपणं । आसनविधिः । जपमालाविधिः । मुद्राविधिः । कीलारोपादिविधिः । गुर्व्वादिवन्दनविधिः । भूतशुद्धिविधिः । प्राणप्रतिष्ठादिविधिः । प्राणायामादिविधिः । पीठन्यासादिविधिः । अन्तर्यागविधिः । आत्मपूजनविधिः । शङ्खस्थापनविधिः । वाह्यपूजाविधिः । मन्त्रसिद्ध्युपायकथनं । कुण्डविधिः । होमविधिः । स्रुक्स्रुवादिलक्षणकथनं । पञ्चाङ्गपुरश्चरणप्रक्रियाकथनं ।

No. 2400. दुर्गाटीका । Substance, foolscap paper, 14 × 4 inches. Folia, 56. Lines, 8 on a page. Extent, 1,485 ślokas. Character, Maithilí. Date, ? Place of deposit, Guṇamantí-grám, Post Ráṇíganja, Zillá Púrṇiyá, Paṇḍit Sadánanda Miśra. Appearance, new. Prose. Correct.

Durgá-ṭíká. A commentary on the Chaṇḍi section of the Márkaṇḍeya Puráṇa. By Jagaddhara.

Beginning. प्रचण्डचण्डमुण्डादिमुखखण्डनपण्डिता ।
चण्डिका पातु पाषाण + + कोदण्डमण्डिता ॥
उपमेदादिकान् कोषान् वीक्ष्य पाणिनिसम्मता ।
श्रीजगद्धरधीरेण दुर्गाटीका विधीयते ॥

पुराणवाणी समभाषि पुण्या
धन्येन मान्येन मुनीश्वरेण ।
ममापकस्यात्र परिश्रमेण
वर्णव्यवस्था कियती यदि स्यात् ॥

इह किल चतुर्द्दशमन्वन्तराणि । स्वायम्भुवोमनुः पूर्व्वं मनुः स्वारोचिषस्तथा । औत्तमिस्ता-मसिश्चैव रैवतश्चाक्षुषस्तथा । षड़ेते मनवोऽतीता अद्य वैवस्वतोमनुः । मार्कण्डेयः स्वशिष्याय क्रौष्टुकिने प्राहस्म, सावर्णिरित्यादि ।

End. भगवत्याः प्रपन्नाय दानसामर्थ्यमाविष्कृतमिति सर्व्वं रमणीयं ।
विद्याच्छत्रं कुलच्छत्रं धारितं येन धीमता ।
मीमांसकः + + गणे सोऽभूत्खण्डेश्वरः कविः ॥
तद्वंशजेन महनीयनयेन नाना-
विद्याविनोददयितेन जगद्धरेण ।
टीकेयमादरवता व्यरचि प्रयत्ना-
दालोकयन्तु कृपया गुणिनोमनीनाम् ॥
रत्नं रत्नधरोपमाय गुणिना + + नवद्यः सतां
+ + + मदयन्तिकापि सुषुवे नैयायिकं यं सुतं ॥
तस्या + + + + जगद्धरेण कविना टीकेयमुज्जृम्भताम्
तत्तद्वर्णविवर्णनैककुशला स्वल्पाक्षरार्थाधिका ॥
अष्टादशव्याकरणप्रवीणमुनीन्द्रपाराशरि-निर्म्मितस्य ।
ग्रन्थस्य काचिद्विहतिर्ममात्र स्वल्पस्य हास्यस्य कदापि मास्तु ॥

Colophon. इति महोपाध्यायश्रीजगद्धरकृतदुर्गाटीकायां त्रयोदशमाहात्म्यं समाप्तं । समाप्तोऽयं ग्रन्थः ।

विषयः । विविधव्याख्यानकौशलप्रदर्शनेन मार्कण्डेयपुराणीयदेवीमाहात्म्यस्य विशदी-करणं ।

No. 2401. दीपिकाप्रकाशः । Substance, palm-leaf, 16 × 2 inches. Folia, 107. Lines, 5 on a page. Extent, 2,728 ślokas. Character, Maithilí. Date, ? Place of deposit. Guṇamantí-grám, Post Ráṇiganja, Zillá Púrniyá, Bábu S'rípati Jhá.

Dípikáprakáśa. A commentary on an astronomical work entitled *S'uddhidípiká.* By Rághava A'chárya.

Beginning. नत्वा गौरीदयितं दृष्ट्वा मिहिरादिशास्त्राणि।
श्रीराघवेण विदुषा वितन्यते दीपिकाज्योतिः॥
शास्त्रारम्भे अभिमतसिद्ध्यर्थं कृतमिष्टदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति। दृष्ट्वेति। तरणिः सूर्यः वो युष्मान् पातु। इत्यादि।

End. कीदृशीं सुविस्तरे ज्योतिःशास्त्रे समस्तव्यवहारजनिकां।

Colophon. इति राघवाचार्य्यविरचिते दीपिकाप्रकाशे यात्रानिर्णयोनामाष्टमोऽध्यायः।

विषयः। शुद्धिदीपिकेतिसमाख्यानस्य ज्योतिर्ग्रन्थस्य व्याख्यानम्।

No. 2402. ललितावृत्ति। Substance, country-made paper, 12 × 4 inches. Folia, 30. Lines, 14 on a page. Extent, 1,308 ślokas. Character, Maithilí. Date, Sk. 1682. Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose. Correct.

Lalitávṛitti. An exegesis on the Paribháshá sútras of Páṇini. By Purushottama.

Beginning. अथातः परिभाषाणां वचनानाञ्च तादृशीं।
वृत्तिं श्रीललितां नाम करोति पुरुषोत्तमः॥
परितोव्यापृता भाषा परिभाषा सा हि एकदेशस्था सकलं शास्त्रमभिज्वलयति, यथा वेश्मप्रदीप इति। सैव द्विविधा लिङ्गवती विध्यङ्गशेषभूता च इत्यादि।

End. अन्यान्यपि शब्दक्रियोपयोगन्यायवाक्यानि लिङ्गोदाहरणाख्यायामवगन्तव्यानीति।

Colophon. इति श्रीपुरुषोत्तमविरचिता परिभाषाटीका ललितावृत्तिः सम्पूर्णा। शकाब्दाः। १६८२।

विषयः। पाणिनिपरिभाषासूत्राणां व्याख्यानं।

No. 2403. अन्वयलापिका। Substance, country-made paper, 13 × 5 inches. Folia, 36. Lines, 12 on a page. Extent, 1,680 ślokas. Character, Nágara. Date. ? Place of deposit, Dhamdaha-grám, Post Dhamdaha, Zillá Púrṇiyá, Paṇḍit Bachharaṇa Ṭhákura. Appearance, old. Prose. Incorrect.

Anvayalápiká. A commentary on the *Kumárasambhava* of Kálidása. By Kṛishṇapati S'armá, of the family of Sañkaradhara of Mithilá. The author names Jagaddhara and Divákara as voluminous commentators on the work; the works of both these are unknown.

Beginning. चित्रं यस्य चरित्रमाकरमरा भित्तुर्मद्दादानवान
नग्नोद्दिग्वसनोमद्दाधनपतिर्विश्वम्भरः च्वेड़भुक् ।
वेदान्तागमवेदकारणगुरुर्देवोजगत्कारणं ।
सोऽव्याद्ग्रन्थविशुद्धये लघुधियं मां + सर्व्वदः शङ्करः ॥
यद्यपि सन्ति प्रचुराष्टीकाः कुमारसम्भवस्य काव्यस्य ।
— — — — — — — — ॥
सङ्कराढ़ीकुलोद्भूतश्रीकृष्णपतिशर्म्मणा ।
टीका कुमारकाव्यस्य क्रियतेऽन्वयलापिका ॥
अस्तीत्यादि । हिमालयोनाम हिमालयाख्योनगाधिराजः नगेष्वधिराज इत्यादि ।

End. गूढ़ं रहसि गुह्ये च न द्वयोः संष्टते त्रिषु-
इति कोषः । विकारोविकृतौ रुजि इति च ।

Colophon. इति कुमारसम्भवटीकायामन्वयलापिकायां सप्तमसर्गविवरणं समाप्तं ।
श्रीमज्जगद्धरदिवाकरपण्डितादे-
रत्यन्तविस्तरतरा हि कुमारटीका ।
स्वल्पावबोधविषया रचिता मयापि
धीरेण कृष्णपतिनान्वयलापिकेयं ॥

विषयः । कालिदासविरचितकुमारसम्भवकाव्यस्य सप्तमसर्गान्तं व्याख्यानम् ।

No. 2404. अन्वयलापिका । Substance, country-made paper, 13 × 5 inches. Folia, 109. Lines, 12 on a page. Extent, 5,559 ślokas. Character, Nágara. Date, ? Place of deposit, Dhamdaha-grám, Post Dhamdaha, Zillá Púrṇiyá, Paṇḍit Bachharaṇa Ṭhákúra. Appearance, old. Prose. Incorrect.

Anvayalápiká. A commentary on the *Raghuvañs'a* of Kálidása. By Kṛishṇapati, the same who wrote the exegisis noticed under the next preceding No.

Beginning. योदचः करणे चषात्रिजगता + + + + भूरिवशा-

यः संह + + दधाति नितरां तेषां पुनः प्राप्तये।
यः सद्वृत्तिधरान् नरानवति योदुर्व्वृत्तवृत्तिं + +
तं वन्दे पुरुषोत्तमं रघुपतिं सीतापतिं श्रीपतिं॥
सन्तीह यद्यपि विशिष्टजनप्रणीत-
टीका रघुप्रभवकाव्यभवास्तथापि।
स्वस्वान्तमोदनकरान्वयलापिकेयं
स्वल्पाति कृष्णपतिना कृतिना प्रचक्रे॥

विघ्नविघाताय शिष्यशिक्षायै चादौ मङ्गलमाचरति। वागर्थैति। पार्व्वतीपरमेश्वरौ वन्दे पितुर्द्दशगुणा मातेतिनिर्द्देशादभ्यर्हितत्वञ्चेति पार्व्वत्या—इत्यादि।

End. किम्भूतां + + + हरिगजेन्द्रैः समेतां।

Colophon. इति मैथिलसङ्कराढ़ीवंशोद्भवश्रीकृष्णपतिविरचितायां रघुवंशटीकायामन्वयलापिकायामूनविंशतितमः सर्गः समाप्त इति।

विषयः। कालिदासविरचितरघुवंशकाव्यस्य व्याख्यानम्।

No. 2405. तत्त्वकौमुदी। Substance, palm-leaf, 17×2 inches. Folia, 184. Lines, 6 on a page. Extent, 6,999 ślokas. Character, Maithilí. Date, Sk. 1552 L. E. 512. Place of deposit, Phaḍkiyá-grám, Post Champánagara, Jayapati Jhá. Appearance, old. Prose. Correct.

Tattvakaumudí. A commentary on the epic poem called *Sisu pála badha.* By Bhavadadatta. The codex ends with the 10th canto.

Beginning. करतलधृतशैलं प्रौढ़िविध्वंसि + +
समर + मितकंसं योगिहृत्पद्महंसं।
मुकुलितनयनायाः सादरं राधिकाया
हृदयमधिवसन्तं नौमि कृष्णं हसन्तं॥
वामार्द्धे मातृबुद्ध्या तदनु पितृधिया दक्षिणार्द्धे पुरस्ता-
न्नैषा नासौ किमेतद्द्विविधमतिमता कार्त्तिकेयेन दृष्टा।
वक्षःक्षिप्ताक्षिहाराभिरुचिरवसनासक्तशार्दूलकृत्तिः
पायादर्द्धेन्दुचूड़ामणिमिलिततनुर्वाञ्छितं नोभवानी॥
— — — — — — — —।
नोवक्षभागुणचयोपचितापि माघे

जाद्यापहापि तनुते मनसः प्रमोदं ।
तावत् प्रकाशयति नोविषयान् विविच्य
चेत् कौमुदी दुरवबोधपदार्थसार्थान् ॥

आदौ मङ्गलार्थं विघ्नोत्सारणकारणभूतं वक्ष्यमाणकथानायकं भगवन्तं नारायणं वस्तुनिर्देशद्वारेण कीर्त्तयन् श्रीशब्दश्च प्रतिसर्गान्ते चिह्नितया प्रयुञ्जान आह श्रिय इति । इत्यादि ।

End. माघे श्रीभवदत्तेन टीका या क्रियते शुभा ।
सर्गः सम्भोगनामासौ तत्रागाद्दशमोऽसमः ॥

Colophon. इति श्रीभवदत्तकृतायां तत्त्वकौमुद्यां दशमः सर्गः । लसं ५११ । शकाब्दाः १५५१ ।

विषयः । माघकृतशिशुपालबधाभिधानकाव्यस्य दशमसर्गान्तं व्याख्यानम् ।

No. 2406. योगरूढ़िविचारः । Substance, country-made paper, 14 × 4 inches. Folia, 6. Lines, 12 on a page. Extent, 183 ślokas. Character, Maithilí. Date, ? Place of deposit, Phaḍkiyágrám, Post Champánagara, Zillá Púrṇiyá. Jayapati Jhá. Appearance, old. Prose. Correct.

Yogarúḍhi-vichára. An enquiry into the meaning of words which, primarily expressive compounds, have subsequently become crude or specific. By Vañśadhara Miśra.

Beginning. योगार्थमात्रावगमे रूढ़िधीः प्रतिबन्धिका ।
अर्थतोभाति रूढ्यर्थोनियमेनेति नूतनाः ॥

पङ्कजं शुष्यतीत्यादौ पङ्कपदार्थान्वितजनिधात्वर्थान्वितडप्रत्ययार्थविशेष्यकशुष्यर्थविशेषणकवाक्यार्थबुद्धिसमर्थमिदं वाक्यमित्यादि ।

End. पदार्थान्वितद्वार्थबोधकत्वं तदा लक्षणां विनैव योगार्थावगम इति ।

Colophon. इति श्रीवंशधरमिश्रकृतयोगरूढ़िविचारः समाप्तः ।

विषयः । प्राचीनार्व्वाचीनमतसंवादेन योगरूढ़िशब्दशक्तिनिरूपणं ।

No. 2407. विजया । Substance, country-made paper, 14 × 3¼ inches. Folia, 26. Lines, 11 on a page. Extent, 842 ślokas. Character, Maithili. Date, ? Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose. Correct.

Vijayá. A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Bhagiratha, of the family of Pítamuṇḍí.

Beginning. अतो + क्रमतीतं यत्नपारि यदीहितं ।
कारणं सर्व्वकार्य्याणां प्रणमामि तमीश्वरं ॥
यः पीतमुण्डीकुलभूषणमग्रजन्मा
माघादिकाव्यस्य चकार टीकां ।
स श्रीभगीरथकविर्विजयाभिधाना-
मेतास्य मन्दमतिबोधकरीं करोति ॥

पुरा हि क्रोष्टुकिसंज्ञकेन मुनिना पृष्टः — — — — — — — इत्यत आह, मार्कण्डेय उवाच इति ।

End. तत्र राज्यं तज्जन्मनि अविध्वंसि अस्खलितं भविष्यति । इति त्रयोदशीमाहात्म्यं ।

Colophon. इति पीतमुण्डीश्रीभगीरथविरचिता चण्डीटीका विजयाभिधाना सम्पूर्णतामगात् ।

विषयः । मार्कण्डेयपुराणोक्तदेवीमाहात्म्यस्य व्याख्यानं ।

No. 2408. श्राद्धनिर्णयः । Substance, palm-leaf, 10 × 2 inches. Folia, 98. Lines, 4 on a page. Extent, 2,328 ślokas. Character, Maithilí. Date, ? Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose and verse. Correct.

S'ráddha-nirṇaya. A summary of the various S'ráddha rites and of directions for performing them. By Sudars'ana.

Beginning. नत्वा सीतापतिं रामं सच्चिदानन्दविग्रहं ।
बालानां बोधसिद्ध्यर्थं क्रियते श्राद्धनिर्णयः ॥

अथ श्राद्धस्वरूपं निरूप्यते, तत्र सम्बन्धपदोपनीतान् पितॄनुद्दिश्य हविस्त्यागः श्राद्धं । इत्यादि ।

End. अत एव तत्र रात्रौ पर्य्युदस्तकालेऽपि श्राद्धं कर्त्तव्यमिति ।

Colophon. इति सुदर्शनकृतौ श्राद्धनिर्णयः समाप्तः ।

विषयः । तत्र श्राद्धस्वरूपविवेचनं । श्राद्धाधिकारिनिरूपणं । श्राद्धकालनिरूपणं । श्राद्धदेशादिनिरूपणं । श्राद्धविधिकथनं । श्राद्धद्रव्यनिरूपणं । पार्व्वणश्राद्धविधिः । एकोद्दिष्टादिविधिः । सपिण्डनविधिः । अष्टकाविधिः ।

No. 2409. विदग्धतोषिणी । Substance, country-made paper, 14 × 4½ inches. Folia, 8. Lines, 10 on a page. Extent, 160 ślokas. Character, Maithilí. Date, Sk. 1674. Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Verse. Correct.

Vidagdha-toshiṇí. An astrological treatise on the motions of the planets and on their effect on human destiny. By Rághavánanda.

Beginning. नत्वा सरस्वतीं देवीं राघवानन्दशर्म्मणा ।
चक्रे विदग्धतोषाय स्पष्टा जातकपद्धतिः ॥
आदौ च्छायादिकैर्ज्ञेयोजन्मकालः सुनिश्चितं ।
तत्कालप्रभवाः कार्य्याः सिद्धान्तोक्तैर्ग्रहस्फुटाः ॥ इत्यादि ।

End. विज्ञाय राजमान्यः स्याद्धीरः कीर्त्तिञ्च विन्दति ॥

Colophon. इति राघवानन्दकृतौ विदग्धतोषिण्यां दशान्तर्दशाध्यायः समाप्तः ।

विषयः । अयनांशादिनिरूपणपूर्व्वकं ग्रहाणां भावादिनिरूपणं । इष्टानयनविधिकथनं । ग्रहाणां बलाबलादिनिरूपणं । इष्टकष्टनिरूपणं । आयुर्दायनिरूपणं । अरिष्टभङ्गविवेचनं । अन्तर्दशानिरूपणञ्च ।

No. 2410. अनुमितिविचारः । Substance, country-made paper, 11 × 3 inches. Folia, 16. Lines, 9 on a page. Extent, 522 ślokas. Character, Maithilí. Date, ? Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose. Correct.

Anumiti-vichára. An essay on inference, a Nyáya treatise founded on the great work of Gañges'a. By Harirâma.

Beginning. अनुमितिस्तु द्विधा पक्षतावच्छेदके साध्यसमानाधिकरणमात्रावगाहिणी पक्षतावच्छेदके साध्यतावच्छेदकावगाहिनी च । इत्यादि ।

End. अनुमितेरनरोधेन तादृशपरामर्षस्य हेतुताकल्पनमावश्यकमिति गौरवं ।

Colophon. इति श्रीहरिरामविरचितोऽनुमितिविचारः समाप्तिमगात् ।

विषयः । अवच्छेदकावच्छेदेन अनुमितिविवेचनम् ।

No. 2411. नित्यकर्म्मलता । Substance, country-made paper, 13 × 3½ inches. Folia, 119. Lines, 10 on a page. Extent, 3,861 ślokas. Character, Maithilí. Date, ? Place of deposit, Rasáḍ-grám, Post

Dahmdaba, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose and verse. Incorrect.

Nityakarmalatá. A summary of the diurnal duties of a religious householder. By Dhírendra Panchíbhushaṇa, son of Dharmes'vara Panchípanchánana.

Beginning. वन्देऽहं पार्व्वतीनाथं संसारार्णवतारकं।
प्रवक्ष्यामि प्रयत्नेन नित्यकर्म्म यथाविधि॥
रघुनाथसुतासूनु रमाकान्तसुतात्मजः।
विमाता सुमतीनाम्नी प्रे+व मम पालने॥
अपि च।
पञ्चीपञ्चाननश्रीमद्धर्म्मेश्वरतनूद्भवः।
धीरेन्द्र इति विख्यातः सानन्दश्चित्तनन्दनः॥
— — — — — — — —।
ऋग्यजुःसामच्छन्दांसि इति वेदास्त्रयस्त्रयी॥
ऋग्ब्रह्मा हि यजू रुद्रः साम विष्णुः प्रकीर्त्तितः।
— — — — — — — ।
सामवेदाधिपो भौमो यजुर्व्वेदाधिपो रविः॥ इत्यादि।

End. कृष्णा कृष्णस्वराखण्डाः क्रव्यादाश्च विगर्हिताः।
अप्रशस्तस्तथाग्नेयः परिवेश + + र्षणे॥

Colophon. इति पञ्चीपञ्चाननश्रीमद्धर्म्मेश्वरात्मजपञ्चीभूषणश्रीधीरेन्द्रविरचिते नित्यकर्म्मलतायां चतुर्थकाण्डे नानाप्रकरणसङ्ग्रहस्तरङ्गः समाप्तः।

विषयः। प्रातरुत्थानादिविधिः। मूत्रपुरीषोत्सर्गविधिः। शौचविधिः। आचमनविधिः। दन्तधावनादिविधिः। तदुत्तरकर्म्मविधिः। पुष्पचयनादिविधिः। तत्र स्तेयापवादकथनं। पर्व्वकृत्यादिनिरूपणं। स्नानादिविधिः। तदुत्तरकर्म्मविधिः। सन्ध्याविधिः। जपविधिः। मालाविधिः। तर्पणविधिः। तदुत्तरकर्म्मविधिः। अध्यापनादिविधिः। पूजादिविधिः। तत्र प्रयोगकथनञ्च। विष्णुपूजादिविधिः विशेषेण दुर्गाशिवपूजादिविधिकथनं। शालग्रामशिलानिरूपणं। पञ्चयज्ञादिविधिः। तत्र नित्यहोमविधिः। बलिविश्वदेवविधिः। नित्यश्राद्धविधिः। तदुत्तरकर्म्मविधिः। अतिथिपूजादिविधिः। दानप्रतिग्रहयोर्विधिः। भोजनादिविधिः। तदुत्तरकर्म्मविधिः। भक्ष्याभक्ष्यनिरूपणं। ब्रह्मचर्य्यनिरूपणं। उपोष्यव्रतस्नातकव्रतादिविधिः। पुराणश्रवणादिविधिः। शयनविधिः। खट्वादिविधिः। सङ्ग्रहणविधिः। वर्णाश्रमधर्म्मविधिकथनञ्च।

———

No. 2412. कारकोल्लासः। MS. reported upon by the Political Agent at Manipur.

Kárakollása. A primer on the use of the Sañskṛit case affixes. By Bharata Sena Mallika, son of Gauráñga, of the family of Harihara Sena. The author lived about three hundred years ago, and wrote commentaries on several mediæval poems. He was a Vaidya by caste.

Beginning. ॐ नमोगणेशाय। त्रैलोक्यत्राणकर्त्तारौ नत्वा गौरीमहेश्वरौ।
करोति कारकोल्लासं पद्येन भरतोभिषक्॥
कारकं स्यात् क्रियामूलं क्रियाधात्वर्थ उच्यते।
धातवस्त्रिविधा धीरैरुक्ताः केचिदकर्म्मकाः॥

End. कारकोक्तविधिः स्वल्पं मयात्र परिकीर्त्तितः।
विस्तारेणैव विज्ञेयस्तत्रान्तरविलोकनात्।

Colophon. इति वैद्यहरिहरसेनवंशभवगौराङ्गमल्लिकात्मजश्रीभरतसेनकृतः कारकोल्लासः समाप्तः।

No. 2413. रामसूक्तम्। MS. reported upon by the Political Agent at Manipur.

Rámaśukta. A hymn in praise of Ráma as the supreme divinity. It appears to be an extract from a large work entitled *Sárvabhauma-sarvasva.* The author's name is not apparent, but his literary title was Sárvabhauma.

Beginning. ॐ नमः परमदेवतायै। नवार्ककोटिमण्डलां चिदिन्दुषोडशीकलां।
नमामि सर्व्वमङ्गलाममङ्गलप्रणाशिनीं।
सूक्तं जयति रामस्य पूर्णब्रह्ममहात्मनः॥
सर्व्वस्वं सार्व्वभौमानां स्वर्गे मर्त्ये रसातले।

End. एवं यत्र यदायासे कूटदुर्घट एव हि।
शिष्टाचारविचारेण न राजा किल्बिषी भवेत्॥

Colophon. इति श्रीरामसूक्ते सार्व्वभौमसर्व्वस्वेऽलिङ्गव्यवहारसाधनं नाम द्वादशोऽध्यायः॥

No. 2414. कारकानन्दः। MS. reported upon by the Political Agent at Manipur.

Kárakánanda. A primer on the use of the Saúskṛit case affixes. Author's name is not given.

Beginning. श्रीकृष्णचैतन्यचन्द्राय नमः। प्रणम्य परमात्मानं सर्व्वान्तं जगदीश्वरं।
कारकानन्दतां वृत्तिमानन्दोविष्टणोम्यहं।

करोतीति कारकः कृञधातोर्व्वुन् वृद्धर्थे कादेशः कारकः करोतीति सर्व्वेषामन्त-र्भूतमित्यर्थः।

End. तेषामुदाहरणं सारस्वत्यादित्वात् सर्व्वव्याकरणात् ज्ञातव्यं पण्डितैर्मुख्याल-स्पत्वादस्माभिर्लिख्यते।

Colophon. इति कारकानन्दः समाप्तः।

No. 2415. मञ्जुभाषिणी। Substance, country-made paper, 13 × 4 inches. Folia, 22. Lines, 14 on a page. Extent, 1,674 śloka. Character, Maithilí, Date, ? Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose. Correct.

Manjubháshiṇí. A commentary on S'aṅkara A'chárya's *A'nandalaharí,* a hymn in praise of S'iva. By S'ríkṛishṇa A'chárya, son of Vallabha A'chárya.

Beginning. जगदण्डपरम्परां प्रसूते विसतन्तुप्रतिमापि याविरामं।
क्षितिमूलनिषेदुषीं नुमस्तामनिशं कुण्डलिनीं समीहिताय॥
अविकल्पविकल्पानामेकगोचरतां गतं।
मिथस्तदविनाभूतं शिवयोर्म्मिथुनं भजे॥
श्रीवल्लभाचार्य्यपुत्रेण श्रीलश्रीकृष्णशर्म्मणा।
आनन्दलहरीव्याख्या यथाशक्ति वितन्यते॥
सञ्चरन्ति सुखं सन्तः स्वाधीनविभवे पथि।
पराभिप्रायगमने प्रवेशसाहसं महत्॥

पुरा किल वाराणस्यां ब्रह्मसूत्रभाष्यकारः — — — — — तत्रैव ब्रह्मशक्तिं स्तौति स्म। शिव इत्यादि।

End. प्रकाशात्मकब्रह्मणा दीप्तमभिव्यक्तमिति शम्।

Colophon. इति श्रीश्रीकृष्णाचार्य्यविरचिता मञ्जुभाषिणी सम्पूर्णा।

विषयः। शङ्कराचार्य्यकृतानन्दलहर्य्यां व्याख्यानम्।

No. 2416. श्रीपतिपद्धतिटिप्पनी । Substance, country-made paper, 16 × 4 inches. Folia, 19. Lines, 11 on a page. Extent, 627 s'lokas. Date, ? Place of deposit, Rasạḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose. Correct.

S'rípatipaddhati-ṭippaní. A gloss on the *S'rípatipaddhati*, a treatise on horoscopy. By Bhaveśa.

Beginning. श्रीपतिजातकपद्धतिगणितमशेषं करोमि बालहितं ।
नत्वा गुरुचरणयुगं भवेशनामा गुरोः कथितं ॥
विघ्नविघाताय मङ्गलं प्रदर्शयति, नत्वेत्यादिना । अहं श्रीपतिनामाचार्य्यः जातकपद्धतिं वक्ष्ये । इत्यादि ।

End. अस्मात्सर्व्वं पूर्व्ववदानेयं विचारस्तु पूर्व्ववत्कार्य्यः ।

Colophon. इति श्रीभवेशविरचिता श्रीपतिपद्धतिटिप्पनी समाप्ता ।

विषयः । श्रीपतिपद्धतिनामकस्य ज्योतिर्ग्रन्थस्य व्याख्यानम् ।

No. 2417. समरसारटीका । Substance, country-made paper, 16 × 5 inches. Folia, 25. Lines, 8 on a page. Extent, 442 ślokas. Character, Maithilí. Date, ? Place of deposit, Rasáḍ-grám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose. Incorrect.

Samarasára-ṭíká. A commentary on Rámachandra Somayájí's *Samarasára*; a treatise on divination. By Bharata.

Beginning. अभिवन्द्य रामचन्द्रं गुरुं तदुक्तं स्वरग्रन्थं ।
विवृणोमि यथाप्रज्ञं तदभिहितार्थानुसारेण ॥
तत्र श्रीरामचन्द्रनामा ग्रन्थकृत् प्रारिप्सितग्रन्थपरिसमाप्त्यादिपरिपन्थिप्रत्यूहापोहाय शिष्टाचारपरिपालनाय च गुरुप्रणामं प्रचिकीर्षितं प्रतिजानीते, नत्वा गुरूनिति ।

End. अकरोत् तद्ग्रन्थार्थप्रकाशिणीं स्वरलाद्य ।

Colophon. इति श्रीरामचन्द्रसोमयाजिविरचितसमरसारटीका भरतकृता समाप्ता ।

विषयः । रामचन्द्रसोमयाजिकृतसमरसाराभिधानज्योतिर्ग्रन्थस्य व्याख्यानं ।

No. 2418. शुद्धिनिर्णयः । Substance, country-made paper, 12 × 3½ inches. Folia, 8. Lines, 10 on a page. Extent, 170 ślokas. Character, Maithilí. Date, ? Place of deposit, Rasáḍgrám, Post Dhamdaha, Zillá Púrṇiyá, Maheśa Jhá. Appearance, old. Prose and verse. Incorrect.

S'uddhinirṇaya. On impurities of the person resulting from death in a family and duties during mourning. By Umápati.

Beginning. आविर्भावतिरोभावौ जन्मप्रलयसंज्ञकौ ।
यदीयौ भवतोनित्यं वन्दे तद्ब्रह्म शाश्वतं ॥
+ + + + + + + + प्रतिपत्तये ।
नानानिबन्धसिद्धोऽसौ लिख्यते शुद्धिनिर्णयः ।
सपिण्डे मृते ब्राह्मणोदशरात्रेण शुद्ध्यति ॥ इत्यादि ।

End. तेन पतिते श्राद्धवर्ज्जिते च जीवत्येव पितरि पार्व्वणविधायक + + + + + + + + ।

Colophon. इति श्रीमदुमापतिविरचितः शुद्धिनिर्णयः ॥

विषयः । सपिण्डाद्यशौचनिरूपणं ।

No. 2419. परीक्षामुखसूत्रम् । Substance, country-made paper, 16 × 4 inches. Folia, 20. Lines, 5 on a page. Extent, 103 ślokas. Character, Nágara. Date, ? Place of deposit, Mahájanṭolá, city A'rá, Zillá A'rá, Bábu Bulákchand. Appearance, new. Prose. Incorrect.

Parikshámukha-sútra. A treatise on logical proofs resulting from perception, inference, memory, analogy and trustworthy speech—their various sub-divisions and fallacies discussed from a Jaina standpoint. Author's name not given.

Beginning. प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्य्ययः ।
इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः ॥

स्वापूर्व्वार्थव्यवसायात्मकं ज्ञानं प्रमाणं । १ । हिताहितप्राप्तिपरिहारासमर्थं हि प्रमाणं ततोज्ञानमेव तत् । २ । इत्यादि ।

End. सम्भवदन्यद्विचारणीयं । ७४ ।
परीक्षामुखमादर्शं हेयोपादेयतत्त्वयोः ।
संविदे मादृशोबालः परीक्षादक्षव + + ॥

विषयः । प्रथमे सन्देशे,—प्रमाणस्वरूपविवेचनं । स्वतः परतश्च तत्प्रामाण्यमिति निरूपणं । द्वितीये सन्देशे,—प्रत्यक्षपरोक्षभेदेन प्रामाण्यद्वैविध्यनिरूपणं । प्रत्यक्षलक्षणादिकथनं । तृतीये सन्देशे,—स्मृति—प्रत्यभिज्ञान—तर्क—अनुमानभेदात् परोक्षस्य चतुर्व्विधत्वनिरूपणं । स्मृत्यादीनां लक्षणादिविवेचनं । स्वार्थपरार्थभेदेन अनुमानस्य द्वैविध्यादिकथनं । व्याप्तिलक्षणादिविवेचनं । चतुर्थे सन्देशे,— प्रमाणविषयस्य सामान्यविशेषात्मेति सप्रपञ्चप्रदर्शनं । पञ्चमे

सन्दर्शे,—अज्ञाननिवृत्त्यादिरूपप्रमाणफलनिरूपणं। षष्ठे सन्दर्शे,—प्रमाणाभासादिविवेचनं। तत्र प्रत्यक्षाभासनिरूपणं। स्मृत्याभासनिरूपणं। प्रत्यभिज्ञानाभासनिरूपणं। तर्काभासनिरूपणं। अनुमानाभासनिरूपणं। तत्र हेत्वाभासादिनिरूपणं। आगमाभासादिनिरूपणञ्च।

No. 2420. **सूक्तिमुक्तावली।** Substance, country-made paper, 14 × 5 inches. Folia, 20. Lines, 8 on a page. Extent, 332 ślokas. Character, Nágara. Date, Sm. 1852. Place of deposit, Mahájanṭolá, city Ará, Zillá Ará, Bábu Bulákchand. Appearance, old. Verse. Generally correct.

Súktimuktávalí. Moral duties appropriate for Jainas and praise of Jinas. By Somaprabha Súri.

Beginning. सिन्दूरप्रकरस्तपः करिशिरः क्रोडे कषायाटवी
दावार्च्चिर्न्निचयः प्रबोधदिवसप्रारम्भसूर्य्योदयः।
मुक्तिस्त्रीकुचकुम्भकुङ्कुमरसः श्रेयस्तरोः पल्लव-
प्रोल्लासः क्रम + नवद्युतिभरः पार्श्वः प्रभोः पातु वः॥
सन्तः सन्तु मम प्रसन्नमनसोवाचां विचारोद्यताः
सूतेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यत्।
किं वाभ्यर्थनयानया यदि गुणोऽस्त्यासां ततस्ते स्वयं
कर्त्तारः प्रथनं न चेदथ यशःप्रत्यर्थिना तेन किं॥ इत्यादि।

End. अभवदजददेवाचार्य्यपट्टोदयाद्रि-
द्युमणिविजयसिंहाचार्य्यपादारविन्दे।
मधुकरसमतां यस्तेन सोमप्रभेण
व्यरचि मुनिपरा + सूक्तिमुक्तावलीयं॥

Colophon. इति श्रीसोमप्रभसूरिविरचिता सूक्तिमुक्तावली सम्पूर्णा।

विषयः। वैराग्यजननजिनमाहात्म्यकीर्त्तनं। जिनार्च्चनमाहात्म्यकीर्त्तनं। गुरूपपत्तिविधिकथनं। जैनमतप्रशंसाकीर्त्तनं। संघसेवनस्य आवश्यकतादिकथनं। अहिंसामाहात्म्यादिकथनं। सत्यमाहात्म्यकीर्त्तनं। मिथ्यावचननिन्दनञ्च। स्तेयनिन्दा। सुशीलताप्रशंसाकीर्त्तनं। परिग्रहनिन्दनं। क्रोधनिन्दनं। अभिमानमदमोहादिनिन्दनं। मायालोभादितिरस्कृतिः। दौर्ज्जन्यनिन्दनं। सौजन्यप्रशंसाकीर्त्तनं। सत्सङ्गमाहात्म्यकथनं। जितेन्द्रियतामाहात्म्यकथनं। लक्ष्मीस्वभावनिन्दनं। दानप्रशंसाकीर्त्तनं। तपोमाहात्म्यकथनं। हृदयशुद्धेरुत्कर्षकीर्त्तनं। वैराग्यप्रशंसा। जैनधर्म्मप्रशंसनं। महतां चारित्रप्रशंसनं। संसारस्य अनित्यत्वादिकीर्त्तनञ्च।

No. 2421. सहस्रनामस्तोत्रम्, सटीकम् । Substance, foolscap paper, bound in a volume. Folia, 91. Lines, 14 on a page. Extent, 2,586 ślokas. Character, Nágara. Date, ? Place of deposit, Mahájanṭolá, city A'rá, Zillá A'rá, Bábu Bulákchand. Appearance, new. Text, verse., Commentary, prose. Incorrect.

Sahasranáma-stotra. A hymn in which a thousand epithets are strung together in praise of Jina. Attached to the text is a commentary explaining the purport and doctrinal value of the epithets. Anonymous. This is obviously an imitation of Hindu works of this kind, of which several have been noticed in the preceding pages (*cf.* III, 16, 20.) Both the Vaishṇavas and the S'áktas have written such hymns to extol the glory of their respective gods and goddesses. The name used is generally the same.

Beginning. स्वयम्भुवे नमस्तुभ्यमुत्पाद्यात्मानमात्मनि ।
स्वात्मनैव तथोद्भूतवृत्तयेऽचिन्त्यवृत्तये ॥
कामभ्रचुहनं देवमामनन्ति मनीषिणः ।
त्वामानुमः स्फुरन्मौलिस्रङ्मलोभ्यर्च्चितक्रमं ॥

टीकायाः,—तुभ्यं नमः । श्रीमते नमः । प्रणामोऽस्तु । कथम्भूताय—स्वयम्भूवे । स्वयं परोपदेशमन्तरेण जगत्स्वरूपं जानातीति स्वयम्भूः । इत्यादि ।

मूलस्य,——

End. स्तुत्वेति मघवा देवं चराचरजगद्गुरुं ।
ततस्तीर्थविहारस्य व्यधात् प्रस्तावनामिमां ॥ इति ।

टीकायाः, — — — — — — चराचराः एव स्थावराः विद्यन्ते यस्मिन् तत् चराचरं जगत् । तस्य गुरुः । चराचरजगद्गुरु। तं तथोक्तम् ।

Colophon. इति सहस्रनामस्तोत्रटीका समाप्ता ।

विषयः । गुणमाहात्म्यावलम्बनेन भगवतोजिनस्य नामसहस्रकथनं ।

No. 2422. ज्ञानार्णवः । भाषाटीकासहितः । Substance, foolscap paper, 14 × 9 inches. Folia, 276. Lines, 15 on a page. Extent, 10,394 ślokas. Character, Nágara. Date, ? Place of deposit, Mahájanṭolá, city A'rá, Zillá A'rá, Bábu Bulákchand. Appearance, old. Prose and verse. Generally correct.

Jnárárṇava in Sanskrit with a commentary in the Hindi dialect. An essay on Jaina doctrine and the circle of duties appropriate for the followers of that doctrine.

The text is claimed by Subháchandra Achárya. Its primary object is to extol the merits of meditation and Yoga observances, the duties of householders being expounded in a subsidiary way. The author says the substance of his treatise has been taken from a work called Jinapati Sútra.

Contents. Twelve kinds of contemplation. Meditation or *Dhiyána* is defined to be the confinement of the naturally unsteady fickle mind within by the contemplation of one object. Two varieties of thinking, one relating to externals and the other to internals. Fixation of the mind by the exercise of Yoga. Its reward or emancipation. Fruits of good and evil works. All things divisible into two classes, sentient and inert. The inert are of five kinds, such as, earth, air and the four elements. The sentient are twofold, worldly and emancipated. These two described in detail, particularly showing how the worldly pass on to the emancipated state. Another classification. Eternity of the universe proved. Soul's bondage and emancipation. Character of the elements. Benevolence, truthfulness, non-theft, continence, and freedom from delusion are the duties of householders. Emancipation results from assiduous application to these duties. Twelve means of learning. The eight members of Yoga, (details the same as given in Patanjalí's Yoga Sútra). Respect for elders. Purification of desires. Marriage. Desires, anger, &c. condemned. The necessity of objects for the senses. The eight expedients of Yoga useful in overcoming worldliness. The vital airs &c. defined. Virtue and vice-defined. Flesh meat condemned. Regions in hell and heaven described. Yogis to meditate on the soul located in the lotus of the heart. A special meditation. The dissolution of Yogís in the great soul is emancipation.

Beginning. ज्ञानलक्ष्मीघनाश्लेष प्रभवानन्दनन्दितं ।
निष्ठितार्थमजं नौमि परमात्मानमव्ययं ॥
भुवनाम्भोजमार्त्तण्डं धर्म्मामृतपयोधरं ।
योगिकल्पतरुं नौमि देवदेवं वृषध्वजं ॥
भवज्वलनसंभ्रान्तसत्त्वशान्तिसुधार्णवः ।
देवश्चन्द्रप्रभः पुष्याज्ज्ञानरत्नाकरश्रियं ॥
सत्संयमपयःपूरपविचितजगत्त्रयं ।
शान्तनाथं नमस्यामि विश्वविघ्नौघशान्तये ॥
— — — — — — —।

अविद्याप्रसराद्भूतग्रहनिग्रहकोविदं ।
ज्ञानार्णवमिमं वक्ष्ये सतामानन्दमन्दिरं ॥
— — — — — — —।
भवप्रभवदुर्व्वारक्लेशसन्तापपीड़ितं।
योजयाम्यहमात्मानं पथि योगीन्द्रसेविते ॥ इत्यादि ।

End. इति कतिपयचरणैर्ध्यानफलं कीर्त्तितं समासेन ।
निःशेषं यदि वक्तुं प्रभवति देवः + + स्वयं ॥
इति जिनपतिसूत्रात् सारमुद्धृत्य किञ्चित्
स्वमतिविभवयोग्यं ध्यानशास्त्रं प्रणीतं ।
विबुधमुनिमनीषाम्भोधिचन्द्रायमानं
चरतु भुवि विभूत्यै यावदद्रीन्द्रचन्द्रौ ॥
ज्ञानार्णवस्य माहात्म्यं चित्ते कोवेत्ति तत्त्वतः ।
यज्ज्ञानात्तीर्य्यते भव्यैर्दुस्तरोऽपि भवार्णवः ।

Colophon. इति श्रीशुभचन्द्राचार्य्यविरचितोज्ञानार्णवोनाम ग्रन्थः समाप्तः ।

विषयः । द्वादशविधभावनाकथनमुखेन ध्यानस्वरूपकथनं । तत्र अस्थिरस्य मनसोघनसंहननतया एकाग्रचिन्ताया अन्तर्णिरोधोध्यानमितिनिरूपणं। तच्च आर्त्तं रौद्रञ्चेति द्विविधं। सर्व्वस्यास्य अमनोज्ञस्य उत्पत्तिर्माभूदिति चिन्ताप्रबन्ध आर्त्तध्यानमिति। अथ हिंसादिषु यथायथमभिरुचिः रौद्रध्यानमिति ज्ञेयं। अथ मुमुक्षवः परिहृत्य आर्त्तरौद्रे द्वे पापध्याने भावशुद्धिसाधनेन योगमभ्यस्य धर्म्मध्यानं कुर्य्यादिति। धर्म्मस्य वाह्याध्यात्मिकभावानां याथात्म्येन अध्यवसाय इति। तथा धर्म्मादनपेतं ध्यानं धर्म्मध्यानमिति च ज्ञेयं। तदनेन योगी सम्यग्दर्शनज्ञानचारित्ररूपरत्नत्रयाधिगमात् विद्योत्पादनेन स्वकर्म्मक्षयात् अनन्तसुखावहं मोक्षं प्राप्नोतीतिनिरूपणं। तत्र येन रूपेण जीवाद्यर्थोव्यवस्थितस्तेन रूपेण अर्हज्जिनप्रतिपादितेऽर्थे श्रद्धानं सम्यग्दर्शनं। जीवादीनां यथावस्थं मोहसंशयादिराहित्येन अवगमनं सम्यग्ज्ञानं। अथ संसरणकर्म्मोच्छित्तावुद्यतस्य ज्ञानवतः पापागमनकारणनिवृत्तिः सम्यक्चारित्रमिति विभावणीयं। अथ क्रमेण शुभाशुभकर्म्मफलकीर्त्तनं। अथ जीव-अजीव-आस्रव-बन्ध-सम्वर-निर्ज्जर-मोक्षरूपेषु सप्तसु पदार्थेषु संक्षेपतोजीवाजीवाख्ये द्वे तत्त्वे। तत्र बोधात्मकोजीवः। अबोधात्मकस्त्वजीवः। अथाजीवस्य आकाशधर्म्माधर्म्मपुद्गलकालास्तिकायभेदेन पञ्चविधत्वं। अथ जीवा द्विविधाः संसारिणोमुक्ताश्च। संसारिणोऽपि द्विविधाः समनस्का अमनस्काश्चेति। तत्र शिक्षाक्रियालापग्रहणरूपा संज्ञा येषामस्ति ते संज्ञिनः समनस्काः। तद्विधुरास्त्वमनस्काः। अथ सिद्धासिद्धभेदेन प्रथमस्य द्वैविध्यकथनं तत्र पञ्चविधस्य ज्ञानावरणस्य क्षयेण, नवभेदस्य दर्शनावरणस्य भेदेन, अष्टाविंशतिविधस्य मोहनीयस्य हानात्, चतुर्व्विधस्य आयुषः स्त्रेषशोषणेन,

चत्वारिंशद्विधस्य नामधेयस्य निधनात्, द्विविधस्य गोत्रस्य च नाशात् पञ्चविधस्य अन्तरायकर्म्मणः प्रध्वंसेन जीवस्य सिद्धत्वं भवति। अथ भव्याभव्यभेदेन जीवस्य पुनर्द्वैविध्यमितिविवेकः। संसारस्य अनादित्वमितिनिरूपणं। अथात्मनः अविद्यया संसारबन्धः, विद्यया च तद्विमुक्तिरितिकथनं। अथ पूरयन्ति गलन्तीति पुद्गलाः, ते च द्विविधाः, अणवः स्कन्धाश्चेतिनिरूपणं। अथ दया, सत्यं अस्तेयं ब्रह्मचर्य्यं, अमोहता चेति पञ्चैतानि सूक्ष्मतया यतिधर्म्म इति स्थूलतया गृहस्थधर्म्म इति निरूपणं। उक्तविधधर्म्मानुष्ठानेन मोक्षोभवितुमर्हतीतिकथनं। एतल्लक्षणो-धर्म्मः श्रुतज्ञानात् जायते। श्रुतज्ञानस्य च द्वादश अङ्गानि, यथा —पर्य्याय-अक्षरपद-संघात-प्रतिपत्ति-अनुयोग-प्राभृताप्राभृत-वस्तुपूर्व्वाणि। अथ पर्य्यायाङ्गरूपक्रियादृष्टिवादविनयदृष्टिवादकथनं। यमनियमादीनां योगाङ्गतया संसारसागरतरणोपायत्वकथनं। विश्वतत्त्वप्रकाशने ज्ञानमेव तृतीयं नेत्रमितिनिरूपणं। अथ अहिंसा, सत्यभाषणं, अस्तेयं, ब्रह्मचर्य्यं, निर्म्मूर्च्छा चेति पञ्चधा साधूनां महाव्रतानि। तत्र हिंसादीनां स्वरूपादिनिरूपणं। वृद्धसेवाया आवश्यकत्वकथनं। भावशुद्धेरभ्यर्थनीयत्वनिरूपणं। परिग्रहनिन्दनं। आशायाः पिशाचरूपत्वनिरूपणं। क्रोधाभिमानादिनिन्दनं। इन्द्रियादिविषयजयावश्यकताकथनं। विशेषेण अष्टाङ्गयोगनिरूपणमुखेन मनसोदुश्चेष्टितादिकथनपूर्व्वकं तज्जये रागद्वेषमोहादीनां नाश इति निरूपणं। शरीर-पवन-नाड़ीप्रभृतिनिरूपणं। धर्म्माधर्म्मापारध्यानादिनिरूपणं। मांसभक्षणादिनिन्दनं। विशेषेण नरकवर्णनं देवपुरवर्णनञ्च। योगिभिर्हृदयकमलकर्णिकान्तर्ज्योतिःस्वरूप एव परमात्मा ध्येय इतिकथनं। सार्व्वज्ञ्यध्यानकथनं। योगिनां परमात्मन्येव लय इति निरूपणञ्च।

No. 2423. सिद्धिप्रियस्तोत्रम्, टीकासहितम्। Substance, foolscap paper, bound in a volume. Folia, 13. Lines, 20 on a page. Extent, 260 ślokas. Character, Nágara. Date, ? Place of deposit, Mahájanṭolá, city Árá. Zillá Árá, Bábu Bulákchand. Appearance, new. Text in verse; Commentary in prose. Incorrrect.

Siddhipríya-stotra. With a commentary. A hymn in course of which the merits of the 24 Jinas are extolled.

मूलस्य,—

Beginning. सिद्धिप्रियैः प्रतिदिनं प्रतिभासमानै-
र्जन्मप्रबन्धमथनैः प्रतिभासमानैः।
श्रीनाभिराजतनुभूपदवी क्षणेन
प्रायोजनैर्वितनुभूपदवी क्षणेन॥

टीका,—जनैर्लोकैः कर्तृभूतैर्वितनुभूपदवी कर्म्मतापन्ना। विगता तनुर्येषां ते वितनवः। अर्थात् सिद्धाः। तेषां भूः पृथ्वी मुक्तिरित्यर्थः। इत्यादि।

मूलस्य,—

End. श्रीवर्द्धमानवचसा परमाकरेण
रत्नत्रयोत्तमनिधेः परमाकरेण।
कुर्व्वन्ति यानि मुनयोजनताहितानि
इष्टानि सन्तु सततं जनताहितानि॥

टीकायाः — — — — — रत्नत्रयमेव उत्तमनिधिः। तस्य। किं कुर्व्वता वचसा।जनताहितानि। जनता उत्पादयता सता।

तुष्टिं देशनया जनस्य मनसि येन स्थितं दित्सता
सर्व्वं वस्तु विजानता शमवता येन क्षताक्षता।
भवानन्दकरेण येन महतां तत्त्वप्रणीतिः कृता
तापं हन्ति जिनः स मे शुभधिया + + सतामीप्सितं॥

Colophon. इति श्रीसिद्धिप्रियस्तोत्रटीका सम्पूर्णा।

विषयः। स्तोत्रव्याजेन चतुर्व्विंशतिजिनानां माहात्म्यकीर्त्तनं।

No. 2424. शान्ताष्टकस्तोत्रम्। Substance, country-made paper, bound in a volume. Folia, 2. Lines, 13 on a page. Extent, 19 ślokas. Character, Nágara. Date, ? Place of deposit, Mahájanaṭolá, city Árá, Zillá Árá, Bábu Bulákchand. Appearance, new. Verse. Incorrect.

S'ántáshṭaka-stotra. A hymn in praise of Jina and prayer for emancipation. Anonymous.

Beginning. न स्नेहाच्छरणं प्रयान्ति भगवन् पादद्वयं ते प्रजा-
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः।
अत्यन्तस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमण्डलो-
ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः॥ इत्यादि।

End शान्तिं शान्तिजिनेन्द्र शान्तमनसस्त्वत्पादपद्माश्रयात्
संप्राप्ताः पृथिवीतलेषु बहवः शान्त्यर्थिनः प्राणिनः।
कारुण्यान्मम भाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु
त्वत्पादद्वयदैवतस्य गदतः शान्त्यष्टकं भक्तितः॥

Colophon. इति शान्त्यष्टकस्तोत्रं सम्पूर्णं।

विषयः। शान्तिप्रार्थनव्याजेन भगवतोजिनेन्द्रस्य माहात्म्यादिवर्णनं।

No. 2425. समयसारः, आत्मख्यात्याख्यवृत्तिसहितः। Substance, country-made paper, 18 × 4½ inches. Folia, 165. Lines, 10 on a page. Extent, 3,729 ślokas. Character, Nágara. Date, ? Place of deposit, Mahájanaṭolá, city A'rá, Zillá A'rá, Bábu Bulákchand. Appearance, new. Text in verse; Commentary in prose and verse. Generally correct.

Samayasára. With a commentary entitled *A'tma-khyáti.* An elaborate treatise on Jain metaphysics and psychology. The text is in Mágadhí and the commentary in Sanskrit. The contents are described at length in the following abstract in Sanskrit. The subjects are too abstruse to be intelligible and useful in a brief English abstract.

वृत्तेः,—

Beginning. नमः समयसाराय स्वानुभूत्या चकासते।
चित्स्वभावाय भावाय सर्व्वभावान्तरच्छिदे॥
अनन्तधर्म्मणस्तत्वं पश्यन्ती प्रत्यागात्मनः।
अनेकान्तमयी मूर्त्तिर्नित्यमेव प्रकाशतां॥
परपरनतिहेतोर्मोहनाम्नोऽनुभावा-
दविरतमनुभाव्यव्याप्तिकल्माषितायाः।
मम परमविशुद्धिः शुद्धचिन्मात्रमूर्त्ते-
र्भवतु समयसारव्याख्ययैवानुभूतेः॥
अथ सूत्रावतारः।
मूलस्य —
वन्दित्तु सर्व्वसिद्धे धुवमचलमणोवमं गइं पत्ते।
वोच्छामि समयपाऊड़मिणमो सुयकेवलि भणियं॥ इत्यादि।
मूलस्य,—

End. जो समयपाऊड़मिदं पढ़िऊणं अच्छतच्च जणाउं।
अच्छे ठाहीचेया सो होहि उत्तमं सोक्खं॥
वृत्तेः—
यस्माद्द्वैतमभूत्पुरा स्वपरयोर्भूतं यतोऽत्रान्तरं
रागद्वेषपरिग्रहे सति यतो जातं क्रियाकारकैः।
भुञ्जाना च यतोऽनुभूतिरखिलं खिन्नं क्रियायाः फलं
तद्विज्ञानघनौघमग्नमधुना किञ्चिन्न किञ्चित् किल॥
स्वशक्तिसंसूचितवस्तुतत्त्वैर्व्याख्या कृतेयं समयस्य शब्दैः।
स्वरूपगुप्तस्य न किञ्चिदस्ति कर्त्तव्यमेवामृतचन्द्रसूरेः॥

Colophon. इति समयसारव्याख्यायामात्मख्यातिनाम्नी वृत्तिः समाप्ता।

विषयः। आत्मनोऽज्ञानस्वरूपत्वकथनमुखेन तस्य ध्रुवत्वं निश्चलत्वं एकत्वञ्चेतिनिरूपणं। सोऽयं नित्यमेव परिणामात्म निस्वभावे अवतिष्ठमानत्वादुत्पादव्ययध्रौव्यैक्यानुभूतिलक्षणया सत्तया अनुस्यूतश्चैतन्यस्वरूपत्वान्नित्योदितविशददृशिज्ञप्तिज्योतिः, अनन्तधर्माधिरूढैकधर्मित्वादुद्योतमानद्रव्यत्वं, क्रमाक्रमप्रवृत्तविचित्रभावस्वभावत्वादुत्सङ्गितगुणपर्य्यायः, अनन्तद्रव्यसङ्करेऽपि स्वरूपादप्रच्यवनात् टङ्कोत्कीर्ण इव चित्स्वभावोजीवोनाम पदार्थ इति निरूपणं। पुण्य-पाप-आश्रवादिनवतत्त्वनिरूपणं। अथ अनुभूतिरेवात्मख्यातिः सा च सम्यग्दर्शनमेवेतिनिरूपणं। परोक्षप्रत्यक्षभेदेन द्विविधप्रमाणनिरूपणं। तत्र उपात्तानुपात्तपरद्वारेण प्रवर्त्तमानं परोक्षं। केवलात्मप्रतिनियतत्वेन प्रवर्त्तमानं प्रत्यक्षमिति तद्विमर्शनं। आत्मानुभूतिप्रकारकथनं। ज्ञेयज्ञापकसङ्करदोषपरिहारेण तीर्थङ्करादीनांस्तवनादिविवेचनं। अप्रतिबुद्धोक्तिनिरूपणं। प्रत्याख्यानज्ञानावश्यकतानिरूपणं। परमार्थत एक एव जीव इति निरूपणं। सर्व्वस्य जगतः पुद्गलपरिनामत्वकथनं। जीवस्य व्यवहारिकसुखदुःखादिमत्त्वनिरूपणं। अजीवपदार्थविवेचनं। कर्त्तृकर्म्मप्रवृत्तेरनादित्वाज्ञानजन्यत्वनिरूपणमुखेनात्मनः स्वयमज्ञानात् कर्त्तृकर्म्मभावेन क्रोधादिषु वर्त्तमानस्य तमेव क्रोधादिवृत्तिरूपं परिणामं निमित्तीकृत्य स्वयमेव परिणममानपौद्गलिककर्म्मसञ्चयात् जीवपुद्गलयोः परस्परावगाहलक्षणसम्बन्धात्मा बन्ध इति निरूपणं। अथ यदा जीवः आत्माश्रवयोर्विशेषदर्शनेन भेदं जानाति तदास्यानादिरप्यज्ञानजा कर्म्मकर्त्तृप्रवृत्तिर्निवर्त्तते, तन्निवृत्तौ च अज्ञाननिमित्तकपुद्गलद्रव्यकर्म्मबन्धोऽपि अपगच्छतीतिनिरूपणं। यथा लोकस्य व्याप्यव्यापकभावेन स्वभावत एव उत्पद्यमानेषु गुणदोषेषु व्याप्यव्यापकभावाभावेऽपि तदुत्पादकोराजेति भवत्युपचारस्तथा पुद्गलद्रव्यस्य व्याप्यव्यापकभावेन स्वभावत एव उत्पद्यमानेषु गुणदोषेषु व्याप्यव्यापकभावाभावेऽपि तदुत्पादकोजीव इत्युपचार इति निरूपणं। जीवस्य परिणामस्वभावत्वनिरूपणं। मिथ्यात्वासंयमकषाययोगोदयानां कर्म्महेतुत्वनिरूपणं। अथ शुभमशुभञ्च कर्म्म अविशेषेनैव पुरुषं बध्नाति बन्धत्वाविशेषादिति कर्म्मण एव बन्धहेतुत्वनिरूपणं। तच्च कर्म्म अज्ञानरूपमेवेतिकथनञ्च। सम्यग्दर्शनज्ञानचारित्राणां मोक्षहेतुत्वकथनं। तत्र जीवादिसम्यग्दर्शनस्वभावेन ज्ञानस्य भवनं सम्यग्दर्शनं, जीवादिज्ञानस्वभावेन ज्ञानस्य भवनं ज्ञानं, रागादिपरिहरणस्वभावेन ज्ञानस्य भवनं चारित्रं। तदेवं सम्यग्दर्शनादिभ्य एकमेव ज्ञानस्य भवनमायातं ततोज्ञानमेव परमार्थतोमोक्षहेतुरिति निष्कर्षकथनञ्च। अथ पुद्गलकर्म्माश्रवणनिमित्तत्वाद्रागद्वेषमोहा एव आश्रवास्ते च अज्ञानिन एव भवन्तीतिनिरूपणं। अथ यदा खलु ज्ञानस्य रागादीनाञ्च भेदविज्ञानं ज्ञानस्य वैपरीत्यकणिकामप्यनासदयदविचलितमवतिष्ठते तदा शुद्धोपयोगमयात्मत्वेन शुद्धात्मोपलम्भाद् रागद्वेषमोहाभावलक्षणः सम्बरः प्रादुर्भवतीति स्वस्वरस्वरूपादिविवेचनं। द्रव्यनिर्ज्जरा भावनिर्ज्जरेतिद्विविधनिर्ज्जराप्रक्रियाकथनं। ज्ञानवैराग्ययोः सामर्थ्यनिरूपणं। विशेषेण वाह्याभ्यन्तरभेदेन बन्धहेतुविवेचनं। अथ स एव निर्व्विका-

रचैतन्यचमत्कारमात्रमात्मस्वभावं तद्विकारकारकं बन्धानाञ्च स्वभावं विज्ञाय बन्धेभ्योविरमति स एव साधकः कर्म्ममोक्षं कुर्य्यादितिनिरूपणं। अथ योहि परात्मनोनियतस्वलक्षणविभागपातिन्या प्रज्ञया ज्ञानी स्यात् स खल्वेकं चिन्मात्रं भावमात्मीयं जानाति शेषांश्च सर्व्वानेव भावान् परकीयानित्येवं जानतोजीवस्य परात्मनिश्चयेन स्वस्वामिसम्बन्धस्याभावात् सर्व्वथाचिद्भाव एव ग्रहीतव्यः शेषाः सर्व्वे एव भावाः प्रहातव्या इति मुमुक्षा समुद्देतीतिनिरूपणं। आत्मनोज्ञानचारित्रपर्य्यायाणां निश्चयव्यवहारप्रक्रियाकथनं। स्वभावेनैव द्रव्यपरिणामोत्पाद इति निरूपणं। मुमुक्षुकृत्यनिरूपणं। मोक्षमार्गस्वरूपादिनिरूपणं। स्याद्वादस्य समस्तवस्तुतत्वसाधकत्वकथनं। आत्मनोज्ञानमात्रैकभावान्तःपातिन्योऽनन्ताः शक्तयः। तास्च कतिचिद् यथा—जीवत्वशक्तिः, चितिशक्तिः, दृशिशक्तिः, सुखशक्तिः, वीर्य्यशक्तिः, प्रभुत्वशक्तिः, विभुत्वशक्तिः, दर्शित्वशक्तिः, स्वच्छत्वशक्तिः, प्रकाशशक्तिः, सङ्कोचविकाशशक्तिः, कार्य्यकारणशक्तिः, परिणम्यपरिणामकत्वशक्तिः त्यागोपादनशून्यत्वशक्तिः, अगुरुलघुत्वशक्तिः, उत्पादव्ययध्रुवत्वशक्तिः, निष्क्रियत्वशक्तिप्रभृतयश्च।

No. 2426. जैनेन्द्रव्याकरणमहावृत्तिः, सूत्रसहिता। Substance, country-made paper, 14 × 6 inches, Folia, 477. Lines, 12 on a page. Extent, 14,948 ślokas. Character, Nágara Date, ? Place of deposit, Mahájanṭolá, city Árá, Zillá Árá, Bábu Bulákchand. Appearance, fresh. Prose. Incorrect.

Jáinendra-vyákaraṇa mahávṛitti. A commentary on the Jainendra-vyákaraṇa. By Abhayanandí. The text is given at length in the body of the commentary. The work is exceedingly rare; the codex extends to the end of the fifth book.

Beginning. देवदेवं जिनं नत्वा सर्व्वसत्वाभयप्रदं।
शब्दशास्त्रस्य सूत्राणां महावृत्तिर्विरच्यते॥
यच्छब्दलक्षणमसुत्रजपारमन्यैरव्यक्तमुक्तमभिधानविधौ दरिद्रैः।
तत्सर्व्वलोकहृदयप्रियचारुवाक्यैर्व्यक्तीकरोत्यभयनन्दिमुनिः समस्तं॥
शिष्टाचारपरिपालनार्थमादौ इष्टदेवतानमस्कारलक्षणं मङ्गलमिदमाहाचार्य्यः।
लक्ष्मीरात्यन्तिकी यस्य निरवद्या च भासते।
देवनन्दितपूजे+ नमस्तस्मै स्वयम्भुवे॥

लक्ष्मीः श्रीः सैव विशिष्य — — — — — — — — शब्दार्थसम्बन्धसिद्धिश्च अनेकान्ताधीनेत्यत आह। सिद्धिरनेकान्तात्।१। — — — — सस्थानक्रियं स्वं।२। — — — — — — हलोनन्तराः स्युः। इत्यादि।

End. भरोभरिखे : १२३ । — — — खे इति किं तत्ता । यथा संख्यसिद्धमिति चेत् — — — — — चतुष्टयं समन्तभद्रस्य (१२४)। कुयोश्च इत्यादि चतुष्टयं समन्तभद्राचार्य्यस्य मतेन भवति नान्येषां तथाचैवोदाहृतं ।

Colophon. इत्यभयनन्दिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ पञ्चमाध्यायस्य चतुर्थपादः समाप्तः । समाप्तश्चायं पञ्चमोऽध्यायः । मङ्गलमस्तु ।

विषयः । प्रकृतिप्रत्यायादिविभागेन वैयाकरणप्रक्रियाकथनं ।

No. 2427. प्रमेयकमलमार्त्तण्डः, वा परीक्षामुखालङ्कारः । Substance, country-made paper, 15 × 9 inches. Folia, 430. Lines, 11 on a page. Extent, 14,746 ślokas. Character, Nágara. Date, Sm. 1896. Place of deposit, Maháján-ṭolá, city Árá, Zillá Árá, Bábu Bulákchand. Appearance, new. Prose. Incorrect.

Prameyakamala-mártaṇḍa ALIAS **Parikshá-mukhálaṅkára.** Commentary on a treatise on Jaina dialectics, entitled *Parikshá-mukha*. The text is by Viránanda Áchárya and the commentary by Prabháchandra. The logic of the Jains is closely allied to the Nyáya of the Hindus.

Beginning. सिद्धेर्धाम महारिमोहहननं कीर्त्तेः परं मन्दिरं
मिथ्यात्वप्रतिपक्षमक्षयसुखं संशीतिविध्वंसनं ॥
सर्व्वप्राणिहितं प्रभेन्दुवदनं सिद्धं प्रमालक्षणं
सन्तश्चेतसि चिन्तन्तु सततं श्रीवर्द्धमानं जिनं ॥
शास्त्रं करोमि वरमल्पतरावबोधो-
माणिक्यनन्दिपदपङ्कजसत्प्रसादात् ।
अर्थं न किं स्फुटयति प्रकृतं लघीयान्-
लोकस्य भानुकरविस्फुरितोगवाक्षः ॥
ये नूनं प्रथयन्ति नोऽसमगुणा मोहादवज्ञां जना-
स्ते तिष्ठन्तु न तान् प्रति प्रयतितः प्रारभ्यते प्रक्रमः ।
सन्तः सन्ति गुणानुरागमनसोये धीधनास्तान् प्रति
प्रायः शास्त्रकृतोयदत्र हृदय वृत्तं तदाख्यायते ॥
त्यजति न विदधानः कार्य्यमुद्दिश्य धीमान्
खलु जनपरिवृत्तेः स्पर्द्धते किन्तु तेन ।
किमु न वितनुतेऽर्कः पद्मबोधं प्रबुद्ध

स्तदपह्नुतिविधायी शीतरश्मिर्यदीह ॥
अज + मदोषं दृष्ट्वामिचं सुश्रीकमूद्यत + यत् ।
विपरीतबन्धुसङ्गतिमुद्गिरति हि कुवलयं किं न ॥

श्रीमदकलङ्कार्थोऽव्युत्पन्नप्रज्ञैरवगन्तुं न शक्यते—इति तद्व्युत्पादनाय करतलामलकवदर्थमुद्धृत्य प्रतिपादयितुकामस्तत्परिज्ञानानुग्रहेच्छाप्रेरितस्तदर्थप्रतिपादनप्रवणं प्रकरणमिदमाचार्यः प्राह — — — — — — स्वापूर्व्वार्थव्यवसायात्मकं ज्ञानं प्रमाणं । इत्यादि ।

End. यत्तु शास्त्रान्तरद्वारेणावगतहेयोपादेयस्वरूपेण तं प्रतीत्यर्थं इति ।

इति प्रभाचन्द्रविरचिते प्रमेयकमलमार्त्तण्डे परीक्षामुखालङ्कारे षष्ठः परिच्छेदः सम्पूर्णः ।

गम्भीरं निखिलार्थगोचरमलं शिष्यप्रबोधप्रदं
यद्व्यक्तं पदमद्वितीयमखिलं माणिक्यनन्दिप्रभोः ।
तद्व्याख्यातमदोयथावगमतः किञ्चिन्मया लेशतः
स्थेयाद्बुद्धधियां मनोरतिगृहे चन्द्रार्कताराविधि ॥
मोहध्वान्तविनाशनो निखिलतो विज्ञानशुद्धिप्रदो-
मेयानन्तनभोविसर्पणपटुर्वस्तूक्तिभाभासुरः ।
शिष्याब्जप्रतिबोधने समुदितो योऽद्रेः परीक्षामुखा-
ज्जीयात् सोऽच निबन्ध एव सुचिरं मार्त्तण्डतुल्योऽमलः ॥
गुरुः श्रीनन्दिमाणिक्योनन्दिताशेषसज्जनः ।
नन्दताद्दुरितैकान्त + जैनम + र्णवः ॥
श्रीपद्मनन्दिसिद्धान्तिशिष्योऽनेकगुणालयः ।
प्रभाचन्द्रश्चिरं जीयाद्रत्ननन्दिपदे रतः ॥

Colophon. इति श्रीप्रमेयकमलमार्त्तण्डः सम्पूर्णतामगमत् । संवत् । १८९६ ।

विषयः । वीरानन्दाचार्य्यकृतपरीक्षामुखाभिधानजैनन्यायसूत्रस्य व्याख्यानम् ।

—

No. 2428. तत्त्वार्थसूत्रम्, श्रुतसागरीटीकासहितम् । Substance, country-made paper, 14 × 7 inches. Folia, 206. Lines, 15—17 on a page. Extent, 7,790 ślokas. Character, Nágara. Date, Sm. 1770. Place of deposit, Mahájana-ṭolá, city Ará, Zillá Ará, Babu Bulákchand. Appearance, fresh. Prose. Incorrect.

Tattvártha-sútra with a commentary entitled *S'ruta-ságarí.* A treatise on Jaina metaphysics, cosmogony and emancipation. By Umáśámi Bhaṭṭáraka. The commentery is by Vidyánanda. The work is divided into ten chapters, and discusses at great length the different topics of Jaina religion.

टीकायाः —

Beginning. सिद्धोमाखामिपूज्यं जिनवरवृषभं वीरमुक्तीरमाप्तं
श्रीमन्तं पूज्यपादं गुणनिधि + पन् सत्प्रभाचन्द्रमिन्द्रं ।
श्रीविद्यानन्द + स्यं गतमलममकलङ्कायमानस्यरम्यं
वक्ष्ये तत्त्वार्थवृत्तिं निजनिजविभवा + श्रुतोदन्वदाख्यः ॥

अथ श्रीमदुमास्वामिभट्टारकः कलिकालगणधरदेवोमहामुनिमण्डलीसंसेवितपादपद्मः कस्मिंश्चिदाश्रमपदे सुस्थितः — — — प्रतिपादयितुकाम इष्टदेवताविशेषं नमस्करोति ।

मूलस्य,—
मोक्षमार्गस्य नेतारं भेत्तारं कर्म्मभूभृतां ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः । १ । तत्त्वार्थश्रद्धानं सम्यग्दर्शनं । २ । इत्यादि ।

मूलस्य,—

End. क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितानन्तररसंख्याल्पबहुत्वतः साध्याः । ८ ।

टीकाया,—
श्रीवर्द्धमानमकलङ्कसमन्तभद्र-
श्रीपूज्यपादसदुमापतिपूज्यपादं ।
विद्यादिनन्दिगुणरत्नमुनीन्द्रसेव्यं
भक्त्या नमामि परितः श्रुतसागराप्त्यै ॥

इत्यनवद्यगद्यपद्यविद्याविनोदनोदितप्रमोदे पीयूषरसपानपावनमतिसमाजरत्नराजमतिसागर + तिराजराजितार्थनसमर्थेन तर्कव्याकरणच्छन्दोलङ्कारसाहित्यादिशास्त्रनिशितमतिना श्रीमद्देवेन्द्रकीर्त्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य संर्द्दितमिथ्यामतदु+रेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्त्तिकराजवार्त्तिकसर्व्वार्थसिद्धिन्यां कुमुदचन्द्रोदयप्रमेयकमलमार्त्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थसूत्रटीकायां दशमोऽध्यायः समाप्तः ।

Colophon. इति तत्त्वार्थस्य श्रुतसागरीटीका समाप्ता । संवत् १७७० ।

विषयः । तत्र प्रथमेऽध्याये,—सम्यग्दर्शनसम्यग्ज्ञानसम्यक्चारित्राणां मोक्षहेतुत्वकथनं जीवादिपदार्थानां यथावत्प्रतिपत्तिविषयिणी रुचिरेव सम्यग्दर्शनमिति तल्लक्षणादिकथनं । जीव-अजीव-आस्रव-बन्ध-सम्बर-निर्ज्जर-मोक्षभेदात् पदार्थानां सप्तविधत्वनिरूपणं । अथ सम्यग्दर्शनस्य साधनं द्विविधं । आन्तरं वाह्यञ्च । तत्र प्रथमं तावत् दर्शनमोहोपशमः क्षयोपशमश्चेति द्विविधं । वाह्यन्तु नारकाणां प्रथमद्वितीयतृतीयनरकभूमिषु केषाञ्चिज्जातिस्मरणं

कषाद्दुर्म्मश्रवणं केषाञ्चिद्वेदनानुभवनमित्यादिवक्तविधं । जीवानां चतुर्द्दशस्थानानि यथा,—मिथ्यादृष्टि सासादनसम्यग्दृष्टिः, सम्यङ्मिथ्यादृष्टिः, असंयतसम्यङ्मिथ्यादृष्टि, देशसंयतः, प्रमत्तसंयतः, अप्रमत्तसंयतः- अपूर्व्वकरणगुणस्थानोपशमकक्षयकः, अनिवृत्तिवादपरम्परागुणस्थानोपशमक्षयक', सूक्ष्मसाम्परायगुणस्थानोपशमक्षयकः, उपशान्तकषायवीतरागच्छद्मस्थः क्षीणकषायवीतरागच्छद्मस्थः, संयोगकेवली, अयोगकेवली चेति । सामान्येन विशेषेण च जीवानां संख्यादिकथनं । सम्यग्ज्ञानविमर्षणं । मतिज्ञानस्य आत्मलाभोपायत्वकथनञ्च । द्वितीये अध्याये,—जीवतत्त्वस्वरूपकथनं तत्र यथा कतकादिरेणुसम्बन्धादपगतपङ्कादिमालिन्यस्य सलिलस्य स्वच्छता समुदेति तथा कर्म्मणः सत्यनुदये जीवस्य स्वाभाविकस्वच्छता भवतीतिनिरूपणं । ज्ञान-दर्शनदान-लाभादिरूपनवविधक्षायिकभावनिरूपणं । द्रव्य-क्षेत्र काल भव भावभेदेन परिवर्त्तनस्य पञ्चविधत्वनिरूपणं । जीवस्य क्षेत्रादिपरिवर्त्तननिरूपणं । समनस्कामनस्कभेदात् तस्य द्वैविध्यविवेचनं । द्वीन्द्रियादिपञ्चेन्द्रियपर्य्यन्तजीवनिरूपणं । द्रव्येन्द्रियभावेन्द्रिययोर्लक्षणादिकथनं । जीवपुद्गलानां गतिनिरूपणं । चित्तस्य जीवचैतन्यपरिणामत्वकथनं । जन्मभेदकारणकथनं । तैजस-कार्म्मणयोः शरीरयोर्विशेषनिरूपणं ।

तृतीये अध्याये,—अथ नारकजीवानां सप्तस्थानानि यथा,—रत्नप्रभाभूमिः, शर्करप्रभाभूमिः, वालुकाप्रभाभूमिः, पङ्कप्रभाभूमिः, धूमप्रभाभूमिः, तमः प्रभाभूमिः, महातमःप्रभाभूमिश्चेति । तत्र तत्र प्रस्तारविलादिसंख्याकथनञ्च । नरकदुःखवर्णनं । अथ तिर्य्यक्लोकस्वरूपकथनं । जम्बूद्वीपसमुद्रादीनां विस्तारसंस्थानादिकथनं । भारत-हैमवत-हरि-विदेह-रम्यक-हैरण्य-ऐरावतरूपसप्तक्षेत्रनिरूपणं । एवं गिरि-वन-नगरादिनिरूपणञ्च । अथ तीर्थकरगर्भकल्याणक-जन्मकल्याणक तपःकल्याणक-ज्ञानकल्याणक-निर्व्वाणकल्याणकरूपपञ्चकल्याणनिरूपणं । सुखमा-सुखमा-सुखमादुःखमादिषड्विधकालनिरूपणं । तत्र तत्र त्रयोविंशतितीर्थङ्कर-नववासुदेव-नवप्रतिवासुदेव-नवनारदादीनां जन्मादिकथणं । अथ आर्य्यम्लेच्छयोर्लक्षणकथनं । तत्रार्य्या द्विविधाः, ऋद्धिप्राप्ताः ऋद्धिरहिताश्च । अत्राद्याः अष्टादशभेदा यथा,—अवधिज्ञानिनः, मनःपर्य्यायज्ञानिनः केवलज्ञानिनः, वीजबुद्धयः, कोष्ठबुद्धयः, सम्भिन्नश्रोत्रिणः, पदानुसारिणः, दूरस्पर्शनसमर्थाः, दूररसनसमर्थाः दूरघ्राणसमर्थाः दूरश्रवणसमर्थाः, दूरावलोकनसमर्थाः, अभिन्नदशपूर्व्विणः, चतुर्द्दशपूर्व्विणः अष्टाङ्गमहानिमित्ताः, प्रत्येकबुद्धाः, वादिनः प्रज्ञाश्रवणाश्चेति अथैषामवान्तरभेदादिकथनपूर्व्वकं लक्षणादिकथनं । भरतैरावतविदेहक्षेत्राणां कर्म्मभूमित्वकथनं ।

चतुर्थे अध्याये,—चतुर्निकायानां देवानां स्वरूपादिनिरूपणं । तत्र भवनवासिनामिन्द्रादीनां लोकपालादीनां वयस्यपीठमर्द्दादिकथनं । व्यन्तराणां किन्नरादीनां स्वरूपादिकथनं । ज्योतिष्काणां ग्रहनक्षत्रादीनां स्थानादिकथनं । कल्पोपपन्नाः कल्पातीताश्चेति वैमानिकानां द्विविधभेदनिरूपणं । स्वर्गभेदनिरूपणं । कल्पभेदनिरूपणं । तत्रत्यलोकानां परिमाणादिकथनञ्च ।

पञ्चमे अध्याये,—अजीवपदार्थनिरूपणं। तत्र द्रव्यपदार्थलक्षणतद्भेदादिकथनं। पुद्गला-दिलक्षणकथनं। धर्म्माधर्म्मयोर्विशेषशक्तिनिरूपणं। अथ प्रायोगिक-वैश्रसिकभेदात् द्विविधबन्धनिरूपणं। द्रव्यादिपदार्थपरीक्षाकीर्त्तनञ्च।

षष्ठे अध्याये,—आश्रवपदार्थविवेचनं। जीवकर्म्मणोराश्रवविशेषनिरूपणं। सम्यक्क्रि-या-मिथ्यात्वक्रिया-प्रयोगक्रिया-समादनक्रिया -ईर्य्यापथक्रिया प्रादोषिकीक्रियाप्रभृतिपञ्चविंश-तिक्रियाकथनं। जीवाजीवाधिकरणविवेचनं। ज्ञानावरणदर्शनावरणयोः स्वरूपादिकथनं। दुःखतापादिवर्गनिरूपणं। अनुकम्पादान-संयमादिरूपसद्वेद्यनिरूपणं। चारित्रमोहादिनिरूप-णं। तीर्थङ्करकर्म्मादिनिरूपणं। तत्र दर्शनशुद्धि विनय-वात्सल्ययोगादिनिर्णयश्च।

सप्तमे अध्याये,—शुभयोगः पुण्याय, अशुभयोगश्च पापायेति प्रपञ्चकथनं। तत्र हिंसास्तेया-नृतादिनिरूपणं। अहिंसादिपञ्चव्रतकथनं। अथ अहिंसासत्यव्रतादिषु प्रत्येकं पञ्चविधभावना-कथनं। तत्र व्रतपञ्चकदृढ़ीकरणाय मैत्रीकरुणाद्युपायकथनं। हिंसास्तेयासत्यादिपञ्चपातकल-क्षणादिकथनं। अहिंसादिव्रतसम्पन्नस्य पुरुषस्य लक्षणादिकथनं। गार्हस्थ्यधर्म्मनिरूपणं। तत्र यानवाहनभूषणाद्युपभोगविवेचनं। श्रावकधर्म्मनिरूपणं। अथ व्रतविशेषे बन्ध बध च्छेद अति-भारारोपण-अन्नपाननिरोध-मिथ्योपदेशादिरूपाभिचारनिरूपणं। दानलक्षणतत्पात्रादिनि-रूपणं।

अष्टमे अध्याये,—अथ मिथ्यादर्शनाविरतिप्रमादकषाययोगानां बन्धहेतुत्वकथनं। जीव-स्य कर्म्मणैव बन्ध इति निरूपणं। ज्ञानावरणीयवेदनीयाद्युत्तरप्रकृतिनिरूपणं। विशेषेण प्रकृ-तिबन्धस्वरूपनिरूपणं। स्थितिबन्धस्वरूपकथनं। प्रदेशबन्धस्वरूपकथनं। पापपदार्थनिरूपणं।

नवमे अध्याये,—भाव भव्यभेदेन द्विविधसंवरनिरूपणं। तत्र गुप्ति-समिति-धर्म्म-अनुप्रेक्षा-परीषह-जय-पराजय-चारित्ररूपसंवरकारणनिरूपणं। बाह्याभ्यान्तरभेदेन द्विविधतपोनिरू-पणं। प्रायश्चित्तभेदकथनं। विनयभेदकथनं। वैयावृत्त्यभेदकथनं। स्वाध्यायभेदकथनं। व्युत्सर्ग-स्वरूपादिकथनं। एकाग्रचिन्तानिरोधरूपध्यानलक्षणादिकथनं। विविधध्यानस्वरूपकथनपूर्व्वकं-मोक्षकारणधर्म्मध्यानलक्षणादिकथनं। निर्ज्जरापुलाकादिनिरूपणं।

दशमे अध्याये,—मोक्षस्वरूपनिरूपणं। तत्र केवलज्ञानोदयात् ज्ञानावरणदर्शनावरण-योर्विलयेन मोहनाशात् कृत्स्नकर्म्मविप्रमोक्षोमोक्ष इतिनिर्णयः। मुक्तस्य गत्यादिनिरूपणं। सिद्ध्युपायकथनञ्च। (तत्त्वार्थसूत्रस्य विवरणम्।)

No. 2429. विवादवारिधिः। Substance, country-made paper, 16 × 4 inches. Folia, 128. Lines, 6 on a page. Extent, 2,333 ślokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Zillá Darbhâṅga, Paṇḍit Bábulál Páṭhak. Appearance, old. Prose and verse. Correct.

Viváda-váridhi. A digest of Hindu law on contracts, interest, wages, boundary disputes, marriage obligations, penal laws, felony, inheritance, &c., &c. By Ramápati Sanmis'ra.

Beginning. नत्वा श्रीकण्ठवैकुण्ठाव कुण्ठौ भक्तनन्दने ।

क्रियते ऋजुबोधाय विवादस्य च वारिधिः ॥

तत्रादाहणादानं । मया व्यवस्थया अयन्दणमधमर्णोत्कर्षाति । इत्यादि ।

End. नानासन्निपातं अभिगमः । नाना भिन्नभिन्नेत्यर्थः ।

Colophon. इत्युपाध्यायसन्मिश्रश्रीरमापतिविरचितोविवादवारिधिः परिपूर्णः ।

विषयः । ऋणादानव्यवस्थाकथनं । अक्षतवृद्धिकथनं । परमवृद्धिः । वृद्धिनिषेधः । आधिनिरूपणं । प्रतिभूविधिः । उद्ग्राहणविधिः । निक्षेपविधिः । अस्वामिविक्रयः । सम्भूयसमुत्थानं । दत्ताप्रापनिकं । दास्यमोचनविधिः । दास्याधिकारिनिरूपणं । वेतनस्यानपाक्रिया । पण्यस्त्रीविधिः । स्वामिपालविवादः । संविद्व्यतिक्रमः । विक्रीयासम्प्रदानं । क्रीत्वानुशयः । सीमाविवादः । सेतुविधिः । क्षेत्राक्षेत्रविधिः । शस्यरक्षाविधिः । अदण्ड्यकथनं । वाक्पारुष्यविधिः । दण्डपारुष्यविधिः । स्तेयविधिः । प्रकाशतस्करविधिः । साहसदण्डविधिः । सङ्ग्रहणविधिः । अभिगमदण्डविधिः । कन्यादूषणविधिः । स्त्रीपुंधर्म्मविधिः । स्त्रीरक्षाविधिः । दायभागकथनं । संसृष्टादिधनविभागः । अवलुप्तविभागः । प्रधानादिविधिः । विभागानर्हकथनञ्च ।

No. 2430. श्राद्धप्रदीपः । Substance, country-made paper, 16 × 4 inches. Folia, 88. Lines, 6 on a page. Extent, 1,892 slokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Zillá Darbháñgá, Khadganátha Páṭhaka. Appearance, old. Prose and verse. Correct.

S'rádha-paddhati. Rules regarding S'ráddha and the different occasions when it is to be performed, and the differences to be observed in the ritual to suit such occasions. By S'añkara Mis'ra, son of Bhavanáth.

Beginning. ऊर्द्धबद्धजटाजूटक्रोड़क्रीड़त्सुरापगं ।

नमामि यामिनीकान्तकान्तभालस्थलं हरं ॥

तत्र श्राद्धत्वं नाम सम्बन्धपदोपनीतान् पितॄन् उद्दिश्य हविस्त्यागः श्राद्धमिति तत्त्वं इत्यादि ।

End. गयायां पिण्डदानेन पितॄणामनृणोभवेदिति ।

Colophon. इति महामहोपाध्यायसन्मिश्रश्रीभवनाथात्मजश्रीशङ्करमिश्रकृतः श्राद्धप्रदीपः सम्पूर्णः ।

विषयः। श्राद्धस्वरूपविवेचनं। तत्र सर्व्वत्र मुण्डनविधिकथनं। ब्रणस्य स्वतोदूषकताकथनं। कुशाहरणविधिकथनं। श्राद्धकालनिरूपणं। तत्र कुतपरौहिणादिकालविवेचनं। संवत्सराभ्यन्तरे मलमासपाते श्राद्धविधिकथनं। संक्रान्तिश्राद्धविधिकथनं। रात्रिश्राद्धनिषेधः। दक्षिणाग्रपवित्रविचारः। मन्त्रोहविचारः। उभयदिने क्षयाहलाभे विधानकथनं। दिनपदस्य तिथौ शक्तिरितिनिरूपणं। श्राद्धविधिः। श्राद्धान्नादिपरिवेशनविधिः। सौवर्णादिपात्रविधिः। दक्षिणादानविधिः। पर्वणरदाहविधिः। आभ्युदयिकश्राद्धकालः। तर्पणविधिः। श्राद्धाधिकारिनिरूपणं। श्राद्धदिने पुनर्भोजनादिविवेचनं। अमावास्याष्टकादिश्राद्धविधिः। वृषोत्सर्गविधिः। सपिण्डीकरणादिविधिः। अपरपक्षश्राद्धविधिः। शस्त्रादिहतश्राद्धविधिः। एकोद्दिष्टविधिः। श्राद्धे पशुघाते दोषाभावकथनं। तीर्थश्राद्धविधिकथनञ्च।

No. 2431. आचारवारिधिः। Substance, country-made paper, 16 × 4 inches. Folia, 68. Lines, 5—6 on a page. Extent, 868 ślokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Zillá Darbhâñgá, Bábulála Páṭhaka. Appearance, decayed. Prose and verse. Correct.

A'chára-váridhi. A digest of the rules regarding A'chára or daily duties of householders. By Umápati Mis'ra, Upádhyáya.

Beginning. नत्वा श्रीकण्ठवैकुण्ठावकुण्ठौ मन्ननन्दने।
क्रियते सुखबोधाय आचारस्य च वारिधिः॥
तत्र मनुः। ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयन्। इत्यादि।

End. आचारवारिधिर्नाम निबन्धोरचितोमया।
प्रीयन्तामत्र विबुधाः गुणदोषपरीक्षकाः॥

Colophon. इत्युपाध्यायसन्मिश्रश्रीरमापतिविरचित आचारवारिधिः परिपूर्णः।

विषयः। प्रातःकृत्यनिरूपणं। तत मूत्रपुरीषोत्सर्गविधिः। शौचविधिः। आचमनविधिः। आचमननिमित्तकथनं। आचमनानुकल्पकथनं। दन्तधावनविधिः। प्रातःस्नानादिविधिः। केशप्रसाधनादिविधिकथनं। शुभाशुभदर्शनफलकथनं। वेदपाठादिविधिः। नदीलक्षणादिकथनं। नैमित्तिकस्नानादिविधिकथनं। अस्पृश्यस्पर्शने स्नानादिविधानं। काम्यस्नानविधिः। सन्ध्योपासनविधिः। जपादिविधिः। कुशनिरूपणं। उपवीतादिविधिकथनं। तर्पणविधिकथनं। देवतर्पणादिविधिकथनं। पूजादिप्रकारकथनं। पुष्पधूपादिनिरूपणं। वैश्वदेवविधिकथनं। पञ्चयज्ञविधिकथनं। नित्यश्राद्धविधिकथनं। भिक्षादानादिविधिकथनं। अतिथिपूजादिविधिकथनं। भोजनविधिकथनं। तदुत्तरकर्म्मविधानं। शयनविधिकथनं। दारोपगमविधिकथनञ्च।

No. 2432 व्यवस्थारत्नमाला। Substance, country-made paper, 17 × 6 inches. Folia, 52. Lines, 11 on a page. Extent, 1,986 ślokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Zillá Darbháñgá, Khaḍganátha Páṭhaka. Appearance, fresh. Prose and verse. Correct.

Vyávasthá-ratnamálá. A digest of the Hindu law of inheritance. By Lakshmínáráyaṇa Nyáyálañkára, son of Gadádhara Tarkavágís'a.

Beginning प्रणम्य गोविन्दपदारविन्दं
योगीन्द्रहृत्कैरवभासचन्द्रं।
ब्रह्मेशनागेन्द्रसुरेन्द्रवन्द्यं
दीनार्त्तिशैलात्ययकृत्सुरेन्द्रं॥
भाषा-सुवर्णसूत्रेण व्यवस्थायुक्तिमौक्तिकैः।
मुनिवाङ्मणिभिर्माला कृता सर्व्वार्थसिद्धये॥
शास्त्राभ्यासपरिश्रमार्थयशसे चास्माकमेषा सदा
बालानां गलभूषणं खलन्दणां शूलं तथा वक्षसि।
दायादार्थिविवादसंशयतमश्छेदार्कवद्भूतले
भूयादङ्गकलिङ्गवङ्गप्रभृतौ राज्ञां विचारोद्यमे॥

अथ दायभागव्यवस्था संदृश्यते। तत्र यत् स्वामिसम्बन्धादेव निमित्तादन्यस्य स्वं भवति तद्दायभाग इति मिताक्षरा। — — — — — — — — — अस्य प्रमाणं। पितृद्वारागतं
द्रव्यं मातृद्वारागतञ्च यत्। कथितं दायशब्देन तद्विभागोऽधुनोच्यते॥
इत्यादि।

End. क्लीबास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः।
इति विधानमालाधृतदेवलवचनानि॥

Colophon. इति श्रीमद्गदाधरतर्कवागीशभट्टाचार्य्यात्मजश्रीलक्ष्मीनारायणन्यायालङ्कारविरचितायां व्यवस्थारत्नमालायां दत्तकव्यवस्थानिर्णयश्चन्द्रकान्तमणिर्नाम दशमोगुच्छः॥

विषयः। दायशब्दार्थनिरूपणं। विभागनिरूपणं। स्वत्वनिरूपनं। बहुस्वामिककद्रव्यविभागरीतिः। स्वत्वनाशकारणकथनं। पित्रनुज्ञया स्वोपार्ज्जितस्यापि विभागदानादिकथनं। पैतामहधनविभागकालादिकथनं। पितृकृतविषमविभागनिरूपणं। कारणविरहे तदसिद्धिनिरूपणं। जीवत्पितृकविभागः। पुत्रार्ज्जिते पितुरंशद्वयकथनं। अनेकपितृकाणां पितृतोविभागकथनं। बालधनस्य मित्रादौ स्थापनविधिः। नष्टोद्धृतविभागकथनं। पोष्यवर्गनिरूपणं। विभागानन्तरोत्पन्नविभागः। अनधिकारिणः। तत्र क्लीवादिलक्षणं। विभाज्याविभाज्यधननिरू-

पर्यं। देवप्रतिमादिविभागप्रकारः। स्त्रीधनादिनिरूपणं। संसृष्टधननिरूपणादिकं। अपुत्रधनाधिकारकथनं। पत्न्या दानाद्यनधिकारकथनं। मिताक्षरे अपुत्रधनाधिकारनिरूपणं। यौतुकधनादिनिरूपणं। शङ्कितव्यभिचारायाः स्त्रीधनोच्छेदनविधिकथनं। ब्राह्मदैवादिविवाहलक्षणं। तत्र तत्र स्त्रीधनाधिकारविशेषकथनञ्च। अप्रजस्त्रीधनाधिकारिणः। विभागकाले निह्नुतस्य विभागकथनं। विभागपत्रलेखनप्रकारकथनं। विभक्तकृत्यनिरूपणं। विदेशागतस्य विभागकथनं। दत्तकनिरूपणं। दत्तकग्रहणविधिकथनं। दत्तकधनाधिकारनिरूपणञ्च।

No. 2433. शिवतत्त्वार्णवः। Substance, country-made paper, 17 × 6 inches. Folia, 96. Lines, 8 on a page. Extent, 1,900 ślokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Zillá Darbhángá, Khadganátha Páṭhaka. Appearance, old. Verse. Incorrect.

S'iva-tattvárṇava. A poem in praise of the worship of Gaurí and I's'a together, interspersed with many Puráṇic and Tántric legends. Anonymous.

Beginning. ज्योतिर्मात्रस्वरूपोगुणगणसहितोनिर्म्मलज्ञानरूपो-
राकेशोयत्र मौलौ गरलमपि गले नागयज्ञोपवीतः।
यस्याङ्गे चार्द्धभागे हिमगिरितनया राजते या प्रभेव
गौरीशौवै सदा वोदुरितमपनयन् पातु नित्यं सदैव॥
गौरीशस्य कथा यत्र धर्म्मज्ञानानुवर्णनं।
सा यज्ञभूमौ परमा वसेद्देवः सवासवः॥
सैः स्वैरंशे शौनकाद्यैः पौलस्त्या + + राः सुराः।
निवासं तत्र तुर्व्वन्तो मङ्गलं कुरुतेऽधुना॥
मण्डलं मज्जनश्चैव स्वस्तिकादिनिवेदनम्।
गन्धं दीपं चरेद्यस्तु धर्म्मकामानवाप्नुयात्॥ इत्यादि।

End. ये शृण्वन्ति नरा भक्त्या न तेषामतिदुर्गतिः।
इति सूतमुखाच्छ्रुत्वा वचः परमपावनम्॥
ऋषयोहर्षमापन्ना जयजयेत्यभ्यकीर्त्तयन्॥

Colophon. इति श्रीशिवतत्त्वार्णवे ब्रह्मनारदसंवादे गौरीशमाहात्म्यं। शुभमस्तु श्रीरस्तु।

विषयः। गौरीशस्य माहात्म्यकीर्त्तनमुखेन मगधाधिपतेः बृहद्रथस्य जरासन्धाभिधानपुत्रजन्मवृत्तान्तकीर्त्तनं। जरासन्धस्य राज्याभिषेकवृत्तान्तकथनं। गौरीशव्रत.....कथनं। आराधनेन सन्तुष्टस्य गौरीशस्य जरासन्धाय वरदानादिवृत्तान्तकथनं। गौरीशलिङ्गस्य जरासन्धपुरे

स्थवस्थितिकथनं। कृष्णावतारकाले ब्रह्मादिकृतगौरीशस्तोत्रादिकथनं। चित्रगङ्गावैकुण्ठवनवृत्तान्तकथनं। श्रीकृष्णेन निहते कंसे तत्पत्न्या जरासन्धतनयायाः पितुः समीपगमनपूर्व्वकं कृष्णविचेष्टितकथनं। श्रीकृष्णजरासन्धयोर्युद्धादिवर्णनं। मथुरापरित्यागपूर्व्वकं श्रीकृष्णस्य द्वारकापुरीनिर्म्माणकथनञ्च। भीमकृतजरासन्धनिधनवृत्तान्तकथनं। जरासन्धसुतस्य सहदेवस्य श्रीकृष्णकृतराज्याभिषेकवर्णनं। गौरीशक्षेत्रमाहात्म्यकीर्त्तनं। शिवपूजामाहात्म्यादिवर्णनं। शिवक्षेत्रविशेषमाहात्म्यवर्णनं। गौरीशस्य षोड़शोपचारेण पूजाविधिकथनं। उमामहेश्वरव्रतविधिकथनं। प्रदोषकाले शिवपूजनमाहात्म्यादिकथनं। प्रदोषकालमहिमादिवर्णनं। कार्त्तिकमासे प्रदोषकाले कमलादिना शिवपूजनमाहात्म्यकथनं। माघमासे गौरीशलिङ्गपूजामाहात्म्यकीर्त्तनं। रुद्राध्यायपाठादिमाहात्म्यकथनञ्च।

No. 2434. तत्त्वकौमुदी। Substance, country-made paper, 17 × 4 inches. Folia, 48. Lines, 7—8 on a page. Extent, 1,584 ślokas. Character, Maithili. Date, L. E. 352. Place of deposit, Mujoná, Zillá Darbhâṅga, Babulála Páṭhaka. Appearance, decayed. Prose. Incorrect.

Tattva-kaumudí. A commentary on Subandhu's Vásavadattá. By Rámadeva Mis'ra. The Vásavadattá has been published in the 'Bibliotheca Indica' along with S'ivaráma Tripáṭhí's commentary. Mr. Hall does not name the work now under notice. He cites, however, a commentary by Jagaddhara.

Beginning. सजलजलदश्यामं पीतवाससमच्युतं।
नन्दसूनुं नमस्कृत्य तन्यते तत्त्वकौमुदी॥

इह खलु प्रारिप्सितपरिसमाप्तिकामयमानः कविकुलकुमुदबन्धुः वागधिदेवताकीर्त्तनरूपं मङ्गलमादौ निबध्नाति करवदरेति। सा सरस्वती वागधिष्ठात्री जयति सर्व्वोत्कर्षेण वर्त्तते। इत्यादि।

End. सुखानि सम्भोगशृङ्गारसम्बन्धीनि अनुभवन् कालं निनाय।

Colophon. इति श्रीरामदेवमिश्रविरचिता वासवदत्ताटीका तत्त्वकौमुदी समाप्ता। लसं ३५२।

विषयः। सुबन्धुकृतवासवदत्ताया व्याख्यानम्।

No. 2435. तत्त्वबोधः। Substance, country-made paper, 14 × 4 inches. Folia, 8. Lines, 6—7 on a page. Extent, 91 ślokas. Character, Maithili. Date, ? Place of deposit, Mujoná-grám, Zillá Darbháṅgá, Yogeśvara Miśra. Appearance, old. Prose and verse. Correct.

Tattvabodha. A short summary of the Vedánta doctrine. Anonymous. CONTENTS: Persons qualified to obtain the knowledge of Brahma. The four kinds of exercise for the purpose. The characteristics of such knowledge. Soul defined. Peculiarities of the gross body, of the rudimentary body, of the subtile body, and of the three conditions of existence. The five envelopes of the body. The definition of the Supreme Soul. Rules for the purification of the constituents of the body. Characteristics of individual souls. Identity of the individual and the Supreme souls. Characteristics of the emancipated while living in a carnal body. Duty. Printed at Mirzapur, Hall's 'Contributions,' p. 112.

Beginning. वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुं।
मुमुक्षूणां हितार्थाय तत्त्वबोधोविधीयते॥
साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनाङ्गभूतं तत्त्वविवेकप्रकारं वक्ष्यामः। इत्यादि।

End. ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताश्रयः। इति स्मृतेश्च।

Colophon. इति श्रीतत्त्वबोधाख्यः ग्रन्थः समाप्तः।

विषयः। ब्रह्मज्ञानाधिकारिनिरूपणं। साधनचतुष्टयनिरूपणं। तत्त्वविवेकस्वरूपकथनं। आत्मनिरूपणं। स्थूलशरीरसूक्ष्मशरीरकारणशरीरादिनिरूपणं। अवस्थात्रयनिरूपणं। पञ्चकोषनिरूपणं। सच्चिदानन्दस्वरूपकथनं। पञ्चीकरणनिरूपणं। जीवादिलक्षणं। जीवेश्वरयोरभेदनिरूपणं। जीवन्मुक्तलक्षणं। कर्म्मनिरूपणञ्च।

No 2436. मोक्षसिद्धिः। Substance, country-made paper, 14 × 4 inches. Folia, 12. Lines, 6 on a page. Extent, 58 ślokas. Character, Nágara. Date, ? Place of deposit, Mujoná, Zillá Darbháñgá, Yogeśvara Miśra. Appearance, new. Prose and verse. Correct.

Moksha-siddhí. A summary account of the three means by which emancipation from transmigration may be acquired. The three means are duty, knowledge and devotion, respectively called Karmayoga, J͟nánayoga, and Bhaktíyoga. By Kṛishṇa Giri, disciple of Kailásáchala. The work was compiled for the king Raṇodippa Siñha in the year, 1015. The era is not named; it is the Newári era.

Beginning. नमस्कृत्य परं ब्रह्म मोक्षसिद्धिं करोम्यहं।
श्रीरणोद्दीपसिंहेन राज्ञा सम्प्रार्थितोऽसितः।

इह खलु धर्म्मार्थकाममोक्षेषु चतुर्व्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। तदुपायास्त्रयः इत्यादि।

End. क्रमेणानुष्ठानान्मोक्ष इति सिद्धं।
बाणेन्दुरन्ध्रेन्दुमिते सुवत्सरे
मार्गे त्वमायां रविवासरे यतिः।
कृष्णोरणोद्दीपन्टपेण प्रार्थितो-
मोक्षस्य सिद्धिं रचयाम्बभूव ह॥

Colophon. इति श्रीमत्कैलासाचलशिष्येण श्रीमत्कृष्णगिरिणा विरचिता मोक्षसिद्धिः समाप्ता।

विषयः। कर्म्मयोगोभक्तियोगोज्ञानयोग इतित्रिविधमोक्षोपायनिरूपणं। क्रमेण तत्तदधिकारिनिरूपणं। तत्र कर्म्मनिरूपणानन्तरं तेन मुक्तिप्राप्तिविवेचनं। एवं भक्त्या ज्ञानेन च मोक्षसिद्धिनिरूपणञ्च।

No. 2437. स्वर्णाद्रिमहोदयः। Substance, palm-leaf, 11¼ × 1 inches. Folia, 103. Lines, 4 on a page. Extent, 1,287 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Dr. Rájendralála Mitra. Appearance, old. Prose. Incorrect.

Svarṇádrimahodaya. A short account of the temples and sacred places of Svarṇádri hill or Bhuvanes'vara. It professes to be a part of the *Ekámrachandriká,* a work on the same subject; but the MSS. I possess do not correspond.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीं व्यासं ततोजयमुदीरयेत्॥
कीर्त्तिर्यस्य सुरासुरैर्मुनिवरैः संगीयते नित्यशो-
नाकस्मातलवासिभिः सुरनरैर्विद्याधरैः किन्नरैः।
पातालेषु च कन्दरेष्वपि महीभ्राणां गतैः पन्नगैः
ब्रह्मोपेन्द्रसवासवान्वितजगत्कर्त्रे नमः शम्भवे॥
वेद्व्यास श्रियावास सर्व्वज्ञ अपराजित।
एकाम्रकस्य महात्म्यं वक्तुमर्हस्यशेषतः॥
व्यास उवाच।
शृणुध्वं मुनिशार्दूलाः प्रवक्ष्यामि समासतः।

सर्व्वपापहरं पुण्यं चेत्र परमदुर्लभं ॥
विघ्नेश्वरं नमस्कृत्य ततस्त्रिभुवनेश्वरं ।
अष्टादशपुराणाब्धेर्वक्ष्याम्येकाम्रचन्द्रिकां ॥
असौ महोदयश्चन्द्रः स्वर्णाद्रावुदितोद्विजाः ।
प्रकाशयति लोकानामेकाम्रकवनोत्तमं ॥
लिङ्गकोटिसमायुक्तं वाराणस्याः समं शुभं ।
एकाम्रकेति विख्यातं तीर्थाष्टकविभूषितं ॥
एकाम्रष्टचस्तत्रासीत् पुण्यकल्पे तपोधनाः ।
तस्यैव नाम्ना तत् चेत्रमेकाम्रकमिति स्मृतं ॥
ब्रह्मोवाच ।
शृणु देवि प्रवक्ष्यामि याथातथ्यं वदामि ते ।
इत्युक्ता भगवान् ब्रह्मा शिवायै कथितं पुरा ॥
सनत्कुमारस्तु तं (?) विप्रा असितादीन् प्रभाषितं (?) ।
तामहं संप्रवक्ष्यामि भवद्भिः प्रतिबुध्यतां ॥

End. उदयति यदि चन्द्रश्चोदयाद्रेश्च शृङ्गे
वितरद्धि मनुजानां लोचनानां विनोदं ।
अयमुदयितग्रन्थश्चन्द्रमाः स्वर्णकूटे—
वितरति पुरुषाणां ज्ञानचक्षुर्विशालं ॥

Colophon. इति श्रीमत्येकाम्रचन्द्रिकायां चतुःप्रकाशसमाप्तौ स्वर्णाद्रिमहोदयोनाम पञ्चदशोऽध्यायः ॥

विषयः । एकाम्रचेत्रस्थितविविधतीर्थस्थानमाहात्म्यादिवर्णनं ।

No. 2438. अभिधावृत्तमातृका । Substance, Káśmíri paper, 11 × 7 inches. Folia, 11. Lines, 15 on a page. Extent, 325 ślokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Abhidhávṛitta-mátṛiká. Considerations regarding the radical and derivative or metaphorical or secondary meanings of words. By Bhaṭṭa Mukula.

Beginning. ॐ नमोनारायणाय । ॐ श्रीशङ्करोजयति । ॐ इह खलु भोगापवर्ग-साधनभूतानां तद्विपर्य्ययपरिवर्ज्जनप्रयोजनानां च पदार्थानां निश्चयमन्तरेण व्यवहारोपारोहिता नोपपद्यते तथाहि सर्व्वाणि प्रमाणानि प्रमेयावगतिनिबन्धभूतानि निश्चयपर्य्यवसायि-

तया प्राधान्यं भजन्ते प्रमाणनिबन्धना च भोगापवर्गसाधनभूतानां तद्विपर्य्ययपरिवर्ज्जनप्रयोजनानां च पदार्थानामवगतिः। अतोनिश्चय एव तेषां पदार्थानां व्यवहारोपारोहे निबन्धनं निश्चयः शब्दसम्बन्धेनार्थगोचरीकरोति शब्दस्य च मुख्येन लाक्षणिकेन चाभिधाव्यापारेणार्थावगतिहेतुत्वमिति मुख्यलाक्षणिकयोरभिधाव्यापारयोरत्र विवेकः क्रियते।

End. अनेन व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु उपयोगात्तद्द्वारेण च सर्व्वासु विद्यासु च सकलव्यवहारभूतासु प्रसरणादस्य दशविधस्याभिधावृत्तस्य सकलव्यवहारव्यापित्वमाख्यातमिति शुभं।

भट्टकल्लटपुत्रेण मुकुलेन निरूपिता।
सूरिप्रबोधनायैवमभिधावृत्तमातृका॥

Colophon. इति श्रीभट्टमुकुलविरचिता अभिधावृत्तमातृका सम्पूर्णा सम्पन्नेति शुभं।

विषयः। मुख्यलाक्षणिकयोर्भेदनिरूपणं तयोरवान्तरभेदनिरूपणञ्च।

No. 2439. ग्रहभावफलम्। Substance, country-made paper, 11 × 4 ½ inches. Folia, 7. Lines, 8 on a page. Extent, 246 ślokas. Character, Nágara. Date, Sm. 1910. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Graha-bhávaphala. On the influence of the 12 signs of the Zodiac on human destiny. Anonymons.

Beginning. श्रीगणेशाय नमः। अथ ग्रहाणां प्रत्येकं भावफलानि लिख्यन्ते। तत्र
सूर्य्यस्य, लग्नेऽर्केऽल्पकचः क्रियालसतमः क्रोधी प्रचण्डोनतो प्रचण्डाननो)
मानी लोचनरुक् सुकर्कशतनुः शूरः क्षमानिर्घणः (निर्घृणः)।
फुल्लाक्षः शशिभे क्रिये स्थितिहरः सिंहे निशान्धः पुमान्
दारिद्र्योपहतोविनष्टतनयः संस्थे तुलासंज्ञके।१।
धनसुतोत्तमवाहनवर्ज्जितोहतमतिः सुजनस्थितसैाहृदः।
परगृहोपगतोहि नरोभवेद्दिनमणेर्द्रविणे यदि संस्थितिः।२।
प्रियंवदः स्याद्धनवाहनाढ्यः सुकर्म्मयुक्तोऽनुचरान्वितश्च।
मितानुजः स्यान्मनुजोबलीयान् दिनाधिराजे सहजेऽधिसंस्थे।३।

End. दयाविहीनोनिधनोन्ययार्त्तः (व्ययार्त्तः) सदालसोनीचजनानुयातः।
न रोगमङ्गो(?) जितसर्व्वसैाख्योव्यये स्थिते भानुसुते प्रसूतः।१२। इति भावफलानि।
तन्वादिस्थशनेः प्रोक्तं यच्च भावोद्भवं फलं। राहोस्तदेव विज्ञेयं मुनीनामपि सम्मतं॥१२॥

स्रोत्रस्थितः पूर्णफलं विधत्ते स्वर्चं हितर्च्चं च फलार्द्धमेव ।
फलाङ्घ्रिमात्रं रिपुमन्दिरस्थस्त्वास्तं प्रयातः खचरोन किञ्चित् ॥ १४ ॥

Colophon. इति ग्रहभावफलं ॥

विषयः । तन्वादिद्वादशराशिस्थग्रहाणां फलकीर्त्तनं ।

No. 2440. चारुचर्य्या । Substance, country-made paper, 12½ × 10 inches. Folia, 4. Lines 26 on a page. Extent, 123 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Chárucharyá. Moral duties described in verse and illustrated with examples. By Vyásadása Kshemendra.

Beginning. श्रीलाभसुभगः सत्यनिष्ठः स्वर्गापवर्गदः ।
जयति त्रिजगत्पूज्यः सदाचार इवाच्युतः ॥
ब्राह्मे मुहूर्त्ते पुरुषस्त्यजेन्निद्रामतन्द्रितः ।
पद्मं प्रातः प्रबुद्धं हि श्रयति श्रीर्गुणाश्रया ॥ इत्यादि ।

End. अन्ते सन्तोषदं विष्णुं स्मरेदन्तारमापदां ।
शरतल्पगतोभीष्मः सस्मार गरुड़ध्वजं ॥
अव्या श्रीव्यासदासेन समासेन सतां मता ।
क्षेमेन्द्रेण विचार्य्येयं चारुचर्य्या प्रकाशिता ॥

Colophon. इति श्रीचारुचर्य्या समाप्ता ।

विषयः । संक्षेपेण सदाचारकथनमुखेन सदृष्टान्तधर्म्मनीतिकीर्त्तनं ॥

No. 2441. युधिष्ठिरविजयः सटीकः । Subsance, Káśmíri paper, 10 × 7 inches. Folia, 231. Lines, 19 on a page. Extent, 5,189 ślokas. Character, Nágara. Date, Sm. 1937. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Yudhishṭhira-vijaya. A poem on the history of Yudhishṭhira, the Páṇḍava king. By Ratnakalpa. Annexed to the text is a commentary entitled *S'ishyahitá.* It is apparently the work of the author of the text. The date of composition is S'aka 1562.

Beginning. (मू॰) प्रदिशतु गिरिशश्लिमितां ज्ञानदशं वः श्रियश्च गिरिशश्लिमितां ।
प्रशमित परमदमायं सन्तः सञ्चिन्तयन्ति परमदमायं ॥ १ ॥

योवा मन्दरवपुषं ममर्द मातङ्गवरममन्दरवपुषं।
कान्तां चापधराद्यः चपितोयेनाङ्गजोपि चापधराद्यः ॥ २ ॥
शिरसां सकले सवलिता सरितांवरा च सकलेशकले।
यस्य च कोटीरमिता स्फुटविवभ्राम वर्षकोटीरमिताः ॥ ३ ॥
अस्ति स गजराजगतीराजवरोयेन गतश्चगजराजगती।
भीषणमधिकं कवयः स्तुवन्ति जन्यं यदीयमधिकं कवयः ॥ ४ ॥

(टी॰) ॐ नमः सरस्वत्यै। नमोविघ्नजिते। ॐ सेवकजनसिद्धरमां तां देवीं नमत सिद्धरमां। या वन्द्या विबुधगणैः स्तुत्या या भूतले विबुधगणैः॥ रचत कलहेरम्बन्त्रिजगद्वन्द्याः सहेरम्बः। बहुविधशृङ्गाररचितं यद्वदनं शम्भुना रचितं॥ रामाङ्केषु शशाङ्कैः १५९३ प्रमिते वर्षे शकेन्द्राणां। अवरङ्गशाहिभूपे शासति सति मेदिनीचक्रं॥ धर्म्मात्मजविजयाख्ये सगभीरे निबन्धेऽस्मिन् टीका। शिष्यहितैषा विधीयते रत्नकण्ठेन॥ अथ प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं व्याख्यातृ-श्रोतृणामाशीर्वचनपुरःसरमभीष्टदेवतास्मरणरूपं मङ्गलाचरणमार्य्याष्टत्तत्रयेण प्रदिशन्नित्यादिना प्रस्तौति ग्रन्थकारः।

End. (मू॰) सुखेन नागसाह्वये पुरे वसत्सु भारतः। ररक्ष गां पुरूरवाः पुरेवसत्सभा-रतः॥ १०५॥

Colophon. इति श्रीमहाकविवासुदेवविरचिते युधिष्ठिरविजये महाकाव्ये अष्टम आश्वासः समाप्तः।

(टी॰) नागसाह्वये पुरे हस्तिनापुरे वसत् तथा सत् स भारतः सज्जनानां या सभा गोष्ठी तत्र रतः सभारतः स युधिष्ठिरः गां भूमिं ररक्ष अशिषत् क इव पुरूरवा इव यथा पुरूरवाः राजप्रवरः गां महीं ररक्षेति। शिवमोस्तु॥ १०५॥

समाप्तश्चैष सटीकः युधिष्ठिरविजयाख्योग्रन्थः। इति शिवम्। रुस्यस्तु।

विषयः। १मे आश्वासे द्रौपदीस्वयम्बरवर्णनं। २ये आश्वासे सुभद्राहरणवनविहार-षड्-तुवर्णनं जलक्रीड़ा-स्तव-चन्द्रोदय-आपानगोष्ठी-सुरतलीला-सूर्य्योदयवर्णनञ्च। ३ये आश्वासे-खाण्डवदाहवृत्तान्तादिवर्णनं। ४र्थे आश्वासे धृतराष्ट्रनिर्वेद-दुर्य्योधनकर्णसंवादवर्णनं व्यासा-गमन-तदनुशासनकीर्त्तनं मैत्रेयागमनवर्णनं दुर्य्योधनानुशासन-तत्क्षोभ-मैत्रेयदत्तशापकथनं द्वैतवनप्रस्थान-द्रौपदीभीमसेन-कथोपकथन युधिष्ठिरानुशासनकीर्त्तनं किरातार्ज्जुनयुद्धवर्णनं स्वर्गेऽर्ज्जुनस्य प्रस्थानवर्णनं इन्द्रदत्तास्त्रप्राप्ति-निवातकवचबधवर्णनञ्च। ५मे आश्वासे तीर्थयात्रान-न्तरं महेन्द्र-विन्ध्य-हिमवद्दर्शनपूर्व्वकं अर्ज्जुनस्य गन्धमादनप्रवेशवर्णनं द्रौपद्या दिव्यप्रसूनलाभ-हनूमद्भीमसेनसमागमादिकथनं अजगरकृतभीमसेनग्रहण-तन्मोचन-द्वैतवनप्राप्ति-घोषयात्रा-दुर्य्योधनबन्धन-अर्ज्जुनकृतदुर्य्योधनमोचनादिवर्णनं युधिष्ठिरादीनां विराटनगरप्राप्ति-कीचकबधवर्णनञ्च। षष्ठसप्तमाष्टमेषु युद्धादिवर्णनपूर्व्वकं युधिष्ठिरविजयलाभादिकीर्त्तनञ्च।

No. 2442. अलङ्कारोदाहरणम्। Substance, Káśmíri paper, 10 × 7 inches. Folia, 43. Lines, 27—28 on a page. Extent, 1,396 ślokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and Verse. Generally correct.

Alańkárodáharaṇa. Rhetorical ornaments explained and illustrated with examples. By Jayaratha.

Beginning. नमस्कृत्य परां वाचमखिलद्वालसम्मतं।
कोऽप्यलङ्कारसूत्राणामुदाहरणमात्रकं॥

इहार्थपौनरुक्त्यं शब्दपौनरुक्त्यं शब्दार्थपौनरुक्त्यञ्चेति त्रयः पौनरुक्त्यप्रकाराः। तत्रार्थपौनरुक्त्यं प्ररूढं दोषः। यथा हरिनयनां सारङ्गाक्षीं कुरङ्गविलोचनां कमलवदनां राजीवास्यां सरोजसमाननां। विलुलितकचां चञ्चत्केशीं चलच्चिकुरोत्करां सुरतविरतौ सम्भ्रमान्ते विलोकय कामिनीं॥ इत्यादि।

End. प्रतिज्ञामात्रमेवैतदित्युपेक्ष्यं विचक्षणैः।
अलङ्कारविमर्शिन्यां युक्तिरुक्तचरात्र यत्॥
सद्म + कमुद्दिश्य निजं सत्यपि बाल्ये श्रुतार्थिनं पौत्रं।
अखिलं निखिलालङ्कृतिसिद्धान्तं जयरथः स्फुट+पदं॥
परिपूर्णमिदमलङ्कारोदाहरणं कृतिर्विपश्चिद्वरश्रीजयरथस्य।

Colophon. इत्यलङ्कारोदाहरणं समाप्तं॥

विषयः। सन्दर्भेऽस्मिन् केवलमलङ्कारसूत्राणामेव व्याख्यानमुखेन उदाहरणनिरूपणं। तत्र शब्दालङ्कारप्रकरणे पौनरुक्त्यभेदकथनपूर्व्वकं पुनरुक्तवदाभासालङ्कारनिरूपणं। अनुप्रासनिरूपणं। यमकादिनिरूपणं। पद्मबन्धगोमूत्रिकादिनिरूपणं। अर्थालङ्कारप्रकरणे उपमानिरूपणं। अनन्वयनिरूपणं। उपमेयोपमानिरूपणं। समनिरूपणं। स्मरणालङ्कारः। विनोदालङ्कारः। संस्कारालङ्कारः। क्रियातिपत्त्यलङ्कारः। रूपकालङ्कारः। परिणामालङ्कारः। सन्देहालङ्कारः। वितर्कालङ्कारः। तात्पर्य्यालङ्कारः। भ्रान्तिमदलङ्कारः। विपर्य्ययालङ्कारः। उल्लेखालङ्कारः। अपह्नुत्यलङ्कारः। उत्प्रेक्षालङ्कारः। अतिशयोक्त्यलङ्कारः। तुल्ययोगितालङ्कारः। दीपकालङ्कारः। दृष्टान्तालङ्कारः। निदर्शनालङ्कारः। व्यतिरेकालङ्कारः। सहोक्त्यलङ्कारः। विनोक्त्यलङ्कारः। समासोक्त्यलङ्कार। परिकरालङ्कारः। अप्रस्तुतप्रशंसालङ्कारः। अर्थान्तरन्यासालङ्कारः। उदाहरणालङ्कारः। पर्य्यायोक्त्यलङ्कारः। व्याजस्तुत्यलङ्कारः। आक्षेपालङ्कारः। निश्चयालङ्कारः। विरोधालङ्कारः। विभावनालङ्कारः। विशेषोक्त्यलङ्कारः। असङ्गत्यलङ्कारः। विषमालङ्कारः। समालङ्कारः। विचित्रालङ्कारः। अनादरालङ्कारः। आदरालङ्कारः। अन्योन्यालङ्कारः। विशेषालङ्कारः। व्याघातालङ्कारः। शृङ्खलालङ्कारः। अनुमाना-

लङ्कारः। व्याप्तालङ्कारः। प्रसङ्गालङ्कारः। पर्य्यायालङ्कारः। परिष्टत्त्यलङ्कारः। समतालङ्कारः। तुल्यालङ्कारः। वैधर्म्म्यालङ्कारः। परभागालङ्कारः। उद्रेकालङ्कारः। परिसंख्यालङ्कारः। प्रतिप्रसवालङ्कारः। तन्त्रालङ्कारः। अङ्गालङ्कारः। अनङ्गालङ्कारः। अर्थापत्त्यलङ्कारः। सम्भवालङ्कारः। विकल्पालङ्कारः। समुच्चयालङ्कारः। अभ्यासालङ्कारः। अभीष्टालङ्कारः। समाध्यलङ्कारः। प्रत्यूहालङ्कारः। प्रत्यनीकालङ्कारः। अप्रत्यनीकालङ्कारः। प्रतीपालङ्कारः। मीलितालङ्कारः। सामान्यालङ्कारः। विवेकालङ्कारः। तद्गुणालङ्कारः। उत्तरालङ्कारः। सूक्ष्मालङ्कारः। व्याजोक्त्यलङ्कारः। वक्रोक्त्यलङ्कारः। स्वभावोक्त्यलङ्कारः। भाविकालङ्कारः। उदात्तालङ्कारः। रसवद्लङ्कारः। प्रेयोऽलङ्कारः। ऊर्ज्जस्व्यलङ्कारः। संसृष्टिः। सङ्करादिनिरूपणञ्च।

No. 2443. जातकालङ्कारः। Substance, country-made paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 21. Lines, 9 on a page. Extent, 467 ślokas. Character, Nágara. Date, Sm. 1872. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Játakálankára. On horoscopy. By Gaṇes'a Daivajn̲a, son of Gopála.

Beginning. सानन्दं प्रणिपत्य सिद्धिसदनं लम्बोदरं भारतीं
सूर्य्यादिग्रहमण्डलं निजगुरुं भक्त्या हृदब्जे स्थितं।
येषामङ्घ्रिसरोरुहस्मरणतोनानाविधाः सिद्धयः
सिद्धिं यान्ति लघु प्रयान्ति विलयं प्रत्यूहशैलव्रजाः॥
यत्पूर्व्वं परमं शुकाख्यगलितं सज्जातकं फक्किका
+ + गूढ़तमं तदेव विशदं कुर्व्वे गणेशोऽस्म्यहं।
दैवज्ञः सुतरां यशःसुखमतिः श्रीहर्षदं स्रग्धरा-
वृत्तैस्तत्र न्वर्णा शुभाय नयदं श्रीमच्छिवानुज्ञया॥ इत्यादि।

End. अभूदवनिमण्डले गणकमण्डलीमण्डनं
श्रुतिस्मृतिविचारभूर्विबुधमण्डलीमण्डनं।
प्रचण्डतरगुर्ज्जराधिपसभाप्रधानप्रभा
कवीन्द्रकुलभूषणं जयति कावजीकोविदः॥
भारद्वाजकुले बभूव परमं तस्मात् सुतानां त्रयं
ज्यायांस्तत्र भवेद् (?) ग्रहज्ञतिलकः श्रीसूर्य्यसूरिः कविः।
श्रीमान् सर्व्वकलानिधिस्तदनुजोगोपालनामाभव-
च्छ्रीमद्दैवविदां वरस्तदनुजः श्रीरामकृष्णोऽभवत्॥

शाके मार्गणरामसायकधरा (१५३५) संख्ये नभस्ये तथा।
मासे ब्रह्मपुरे सुजातकमिदं चक्रे गणेशः सुधीः॥
छन्दोऽलङ्कृतिकाव्यनाटककलाभिज्ञः शिवाध्यायकं
तत्र श्रीशिवविन्मुदे गणितभूगोपालसूनुः स्वयं॥
ये पाठयन्ति दैवज्ञास्तेषामायुः सुखं शिवं।
भूयात् कैरवकुन्दाभा सुकीर्त्तिः सर्व्वतोदिशि॥
हृद्यैः पद्यैर्गुम्फिते स्फुरितेपिऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन्।
वंशाध्यायः श्रीगणेशेन हृत्तैर्युक्तोवेदैः शैलसंख्यः प्रणीतः॥

Colophon. इति गोपालात्मजगणेशदैवज्ञकृतौ जातकालङ्काराभिधं जातकं सम्पूर्णं।

विषयः। तत्र प्रथमाध्याये, जातकसंज्ञादिनिरूपणं। द्वितीयाध्याये, भावादिनिरूपणं। तृतीयाध्याये योगादिनिरूपणं। चतुर्थाध्याये, विषकन्यानिरूपणं। पञ्चमाध्याये, आयुर्दायनिरूपणं। षष्ठाध्याये, लग्नांशभावनिरूपणं। सप्तमाध्याये, ग्रन्थकर्त्तुर्वंशवर्णनं।

No. 2444. ज्योतिःसागरः। Substance, country-made paper, 9 × 4 inches. Folia, 112. Lines, 8 on a page. Extent, 1,288 ślokas. Character, Nágara. Datẹ, Sm. 1876. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Jyotihságara. On the leading topics of Hindu astronomy and astrology. Anonymous.

Beginning. विघ्नराजं प्रणम्यादौ शारदां शास्त्रदेवतां।
दक्षिणामूर्त्तिमीशानं गर्गलल्लादिकान् मुनीन्॥
नानाग्रन्थान् समालोक्य गणकानां प्रसिद्धये।
करिष्ये बालबोधाय ज्योतिःसागरसंज्ञकं॥ इत्यादि।

End. आकाशे च भवेन्मृत्युः पाताले सुखसम्पदः।
एवं भासयते छिङ्गा कथ्यते अशुभाशुभं॥

Colophon. इति ज्योतिःसागरग्रन्थः समाप्तः। संवत् १८७६।

विषयः। षष्टिसंवत्सरनामादिकथनं। तिथिदैवतकथनं। नक्षत्रयोगादिकथनं। अवकहड़ाचक्रकथनं। नष्टराशिकथनं। ग्रहाणां भावादिनिरूपणं। दिनरात्रिमुहूर्त्तादिनिरूपणं। ग्रहभोगकथनं। नित्यदशादिनिरूपणं। अङ्गग्रहफलादिकथनं। चन्द्रताराबलादिनिरूपणं। यमघण्टयोग मृत्युयोग-क्रकचयोगादिकथनं। पञ्चकरौद्गधादिनिरूपणं। घातचन्द्रादिनिरूपणं। लग्नो-

दयभोगादिनिरूपणं। साधारणलग्नबलादिकथनं। ग्रामचक्रादिनिरूपणं। कूर्म्मवास्तु-वास्तुचक्रादिनिरूपणं। वृषभवास्तु-कलसवास्तु-द्वारचक्रादिकथनं। अश्वचक्रादिकथनं। प्रयाणनक्षत्रादिकथनं। नामराशिविचारः। दिक्शूल-विदिक्शूल कालराहु-प्रभृतिनिरूपणं। घवाड़निरूपणं। योगिनीविचारः। ज्वालामुख्यादियोगकथनं। ललाटग्रहकथनं। पन्थाराहुचक्रकथनं। शुभाशुभशकुननिरूपणं। जातकप्रकरणं। तत्र मूलहस्तमूलपुरुषादिकथनं। वस्त्रधारणादिदिनकथनं। रोगमुक्तस्नानप्रकरणम्। पादप्रमाणेन दिनमानज्ञानकथनं। नष्टवस्तुविचारप्रकरणम्। कृषिमुहूर्त्तप्रकरणम्। प्रथमरजोदर्शनसमये मासादिफलकथनं। गर्भाधानपुंसवनादिकालनिरूपणं। तत्र पयःप्राशनादिकालनिरूपणञ्च। विवाहप्रकरणे वरलक्षणकन्यालक्षणादिकथनं। विवाहवेदिनिर्म्माणादिविधिकथनं। अग्न्याधानविधिकथनं। अग्निचक्रकथनं। देवस्थापनविधिकथनं। संक्रान्तिप्रकरणं। तैलाभ्यङ्गप्रकरणं। चन्द्रग्रहणादिकथनं। पल्लीपतनविचारः। छिक्काप्रश्नकथनञ्च।

No. 2445. जातकालङ्कारटीका। Substance, country-made paper, 11⅓ × 4⅓ inches. Folia, 28. Lines, 9 on a page. Extent, 525 ślokas. Character, Nágara. Date, Sm. 1866. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Játakálaṅkára-tíká. A commentary on the work described under the next preceding No. Anonymous.

Beginning. (अथ जातकालङ्कारस्य टीका लिख्यते।) सानन्दमिति। गणेशकविर्नाम्नाहं इदं जातकं कुर्व्वे—इति तृतीयश्लोकेनान्वयः। किं कृत्वा सानन्दं यथा भवति तथा लम्बोदरं गणेशं—इत्यादि।

End. कौटशोऽध्यायः, दशसंख्यैः वर्य्यैः श्रेष्ठैः वृत्तैः प्रणीतः कृतः।

Colophon इति श्रीजातकालङ्कारटीकायां वंशाध्यायः समाप्तः।

विषयः। गणेशदैवज्ञकृतजातकालङ्कारस्य व्याख्यानं।

No. 2446. जातकालङ्कृतिश्रीः (जातकालङ्कारटीका,।) Substance, country-made paper, 12 × 4½ inches. Folia, 52. Lines, 7—8 on a page. Extent, 647 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Játakálaṅkriti-śrí. An exposition and elaboration of the Játakálaṅkára, by the author himself. The codex is incomplete.

Beginning + + यं ब्रह्मविद्यापरिचयचतुरं श्रीशुकं व्यासपुत्रं
नत्वाचार्य्यं मुनीनां हरिपदकमले प्रेमविश्रामभाजं।
शिष्टेष्टं खेटदेवं श्रुतिसमधिगतं माधवं भावयित्वा
भावैर्बह्नाम्यतेऽसौ प्रवरमतिमुदे जातकालङ्कृतिश्रीः॥

अथ ज्योतिर्व्विन्तिलकच्छन्दोऽलङ्कृतिकाव्यरचनानिपुणः श्रीगणेशकविः श्रीशुकजातकानुरोधिजातकालङ्कृतिनामग्रन्थं चिकीर्षुस्तदादौ निर्व्विघ्नपरिसमाप्त्यर्थं शिष्टाचारक्रमागतं भगवद्विभूतिभूतगुरु + + + + + + + + + + गणेशनाम्ना ग्रन्थकरणकुशलेन मया इत्यादि।

End. सर्व्वकलानिधिः सर्व्वकलाकुशलोगोपालनामाभवत् तदनुजः श्रीमद्वेदविदां वरः—इति।

Colophon. (इत्यतोऽलिखिताभावात् परिसमाप्तिसूचकवाक्यं नास्ति।)

विषयः। गणेशदैवज्ञकृतजातकालङ्कारस्य व्याख्यानं।

No. 2447. पद्मकोषः। Substance, country-made paper, 12 × 4¾ inches. Folia, 10. Lines, 9 on a page. Extent, 487 ślokas. Character, Nágara. Date, Sm. 1863. Place of deposit, Calcutta, Government of India; another copy at Rasáḍha-grám, Post Dhamdaha, Zilla Purṇiyá, Paṇḍit Maheśa Jhá. Appearance, fresh. Prose. Generally correct.

Padmakosha. A brief treatise on horoscopy showing the influence of the planets, &c., on human destiny. Anonymous. The codex is incomplete.

Beginning. गणेशं हरिं पद्मयोनिञ्च नत्वा
हरं भारतीं खेचरान् सूर्य्यपुत्रान्।
विलोक्याखिलं ताजिकं पद्मकोषं
प्रवक्ष्ये फलं वर्षलग्ने ग्रहाणां॥
अतः प्रवक्ष्ये यवनादिसम्मतं
तन्वादिकानां रविपूर्व्वकानां।
सामान्यतोभावफलं खगानां
कौतूहलात् खेटविदां हिताय॥ इत्यादि।

End. स्थानसंश्रयोभवति यत्र + स्वोदर + व्ययपस्थः

सिंहीपुत्रोरिपुभयमथवा मर्त्यमृत्युं विधत्ते।
+ + शीर्षे व्यथनमुदरेनेत्ररोगं नराणां
लक्ष्मीहानिं स्वजनकलहं कामिनीनाञ्च पीड़ां॥
इति राहुभावफलं।

Colophon. इति पद्मकोशे भावाध्यायः। स्लोकसंख्या १६०। श्रीः। संवत् १८६२।

विषयः। जन्मलग्नस्थग्रहाणां भावफलकथनं।

No. 2448. केशवपद्धतिः, उदाहरणाख्यटीकासहिता। Substance, country-made paper, 10 × 3½ inches. Folia, 52. Lines, 11 × 12 on a page, Extract, 1,599 ślokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse. Commentary, prose. Correct.

Keśava-paddhati. A treatise on horoscopy, with a commentary entitled Udáharaṇa. The text by Kes'ava, the comment by Visvanátha, son of Divákára.

Beginning. टीकायाः,—श्रीगणेशं नमस्कृत्य केशवीनामपद्धतेः।
गणितं विश्वनाथेन क्रियते बालबुद्धये॥
मूलस्य,—
नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्
कुर्व्वे जातकपद्धतिं स्फुटतरां होराविदां प्रीतये॥
यन्त्रैः स्पष्टतरोऽत्र जन्मसमयोवेद्योऽत्र खेटाः स्फुटाः।
यत्पक्षे हि घटन्त उद्गम इहास्तर्चं षड्ङ्गः स च॥ इत्यादि।

End. मूलस्य,—नन्दीग्रामे केशवोविप्रवर्य्यो-
योऽभूद्धोराशास्त्रसङ्घं विलोक्य।
तेनोक्तेथं पद्धतिर्ज्जातकीया
चत्वारिंशद्वृत्तबद्धा सुबोधा॥
ये सुबोधां पठन्तीमामग्र्यां जातकपद्धतिं।
होरावित्पदवीं याति लोके मानं यशः सुखं॥

इति केशवपद्धतौ अन्तर्दशाध्यायः।

टीकायाः,—इयमिह लोके आचन्द्रार्कं तिष्ठतु। अस्य + कृपाश्च शुभं भवतु। ये सुबोधमित्यस्य स्पष्टार्थः।

Colophon. इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथविरचिते श्रीकेशवदैवज्ञविरचितपद्धत्युदाहरणे अन्तर्दशाध्यायोदाहरणं समाप्तं ॥

विषयः। प्रथमाध्याये,—मध्यमग्रहसाधनार्थमहर्गणकथनं। दशमलग्नादिसाधनं। नतोन्नतसाधनं। भावसाधनं। आरोहावरोहफलकथनं। भावकुण्डलीनिर्णयः। तत्र केन्द्रादिविवेचनं। द्वितीयाध्याये —दृष्ट्यानयनविधिकथनं। ३ये ग्रहाणां बलाबलनिरूपणं। अधिमित्रादिकथनं। सप्तवर्गबलादिसाधनं। भावबलादिकथनं। ४र्थे,—रश्मीष्टकष्टसाधनं। ५मे—आयुर्गणनविधिकथनं। ६ष्ठे —ग्रहाणां समस्तशुभाशुभज्ञानोपायकथनं। ७मे,—दशाप्रवेशादिकथनं।

No. 2449. सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तिः, (अष्टमाध्यायः।)

Substance, foolscap paper, 12 × 10 inches. Folia, 121. Lines, 9 on a page. Extent, 2,518 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Siddha-hemachandra. A grammar of the Sañskṛit language. By Hemachandra Súri. The codex contains only the eighth book which treats of the grammar of the Prákrit language. This work has been twice printed.

Beginning. अथ प्राकृतं॥ अथ शब्द आनन्तर्य्यार्थोऽधिकारार्थश्च। प्रकृतं संस्कृतं। तत्र भवं तत आगतं वा प्राकृतं। संस्कृतानन्तरं प्राकृतमधिक्रियते। संस्कृतानन्तरञ्च प्राकृतस्यानुशासनं। इत्यादि।

End. एवं सिरे सिरम्मि सिरसि, सरे सरम्मि सरसि। सिद्धग्रहणं मङ्गलार्थं। ततो युष्मच्छ्रेयकथा + + + अभ्युदयाश्च।

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य चतुर्थः पादः समाप्तः।

समाप्ता चेयं सिद्धहेमचन्द्रशब्दानुशासनवृत्तिः प्रकाशिका नामेति।

आसीद्विशाम्पतिरमुद्रचतुःसमुद्र-
मुद्रा + + क्षितिभरक्षमबाहुदण्डः।
श्रीमूलराज इति दुर्द्धर + + + र्त्ति + श्री-
+ + + + शुचिचुलुक्यकुलावतंसः॥

तस्यान्वये समजनि प्रबलप्रताप-
तिग्मद्युतिः चितिपतिर्जयसिंहदेवः।
येन स्ववंशसवितर्य्यपरं सुधांशौ (?)
श्रीसिद्धराज इति नाम निजं व्यलेखि॥
सम्यङ्निषेव्य चतुरश्चतुरोऽप्युपायान्
जित्वोप × + + + + + + + + + + + + ।
विद्याचतुष्टय + + + + मतिर्जितात्मा
काष्ठा + + + + । पुरुषार्थचतुष्टये यः॥
तेनातिविस्तृतदुरागमविप्रकीर्ण-
शब्दानुशासनसमस्त + दर्थितेन।
अभ्यर्थितोनिरवमं विधिवद्व्यधत्त
शब्दानुशासनमिदं मुनिहेमचन्द्रः॥ श्रीरस्तु।

विषयः। अध्यायेऽस्मिन् केवलं प्राकृतभाषायाः प्रकृतिप्रत्ययादिभेदप्रदर्शनमुखेन व्याकरण-प्रक्रियाकथनं।

No. 2450. जातकसुधाकरः। Substance, country-made paper, 9 × 4 inches. Folia, 6. Lines, 17—18 on a page. Extent, 277 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Játaka-sudhákara. On palmistry. Anonymous. The codex extends to eight chapters, but it seems to be incomplete.

Beginning. श्रीगणेशाय नमः। यन्नामधेयं सकलार्त्तिभञ्जनं यत्कीर्त्तिसंघः कलिकल्मषघ्नः। योवै रसानां यशसा (?) स्वरूपोदेवः स पायात् करुणानिधिर्नः। १। यं देवदेवं मुनिसिद्धसंघाः स्तुवन्ति गायन्ति च सामगीतैः। तं वन्द आद्यं शशिचूड़ाविराजितं शम्भुमुमार्द्धदेहं। २। यज्जातकं व्यासपराशराद्यगौहर्ष्यकात्यायनछागलेयैः। कृतं तदेवाद्यमहं ब्रवीमि युक्तं सुसामुद्रिकयुक्तिभेदैः। ३। रेखावशात् कुत्र च जन्मकालज्ञानं तथा तत्फलसाधनञ्च। वक्ष्ये शिवं भूमिधरेन्द्रकन्याप्रियं नमस्कृत्य गुरुं स्वकञ्च। ४।

End. सङ्कीर्णा च यदा सा स्याद्रेखा वै नदनामभाक्। तदा सा कुरुते नृणां महाराज्यपदं शुभा। ६७। नदरेखा महाभाग्यं कुरुते सर्व्वसम्पदं। महानदी च रेखा सा कुर्य्याद्धैचितिपं नरं। ६८। सङ्कीर्णा नररेखा वै साम्राज्यं कुरुते चनुः (?)। यदा वै तिलसंयुक्ता जायते

नररेखिका । ६९ । स्वाराज्यभाजं कुरुते नरं भाग्याधिकं सदा । नदाख्या रेखिका पुंभिः सुलभा पूर्व्वसञ्चितैः । ७० ।

Colophon. इति श्रीसामुद्रिकोदिते जातसुधाकरे प्रथमावर्त्तसे नदरेखाप्रणयनं नामाष्टमोऽध्यायः ।

विषयः । १मे अध्याये करचरणादिगतरेखाणां नामकीर्त्तनं तासां फलकीर्त्तनञ्च । २ये ऽध्याये रेखाज्ञानतोजन्मकालीनशाकनिर्णयः । ३ये अध्याये रेखाज्ञानतोजन्मकालीनमास-निर्णयः । ४र्थे अध्याये उक्तरीत्या पक्षनिर्णयः । ५मे अध्याये जन्मतिथिनिर्णयः । ६ष्ठे अध्याये इष्टकालनिर्णयः । ७मे अध्याये आयुषोनिरूपणं । ८मे अध्याये नदरेखादितत्फलकीर्त्तनं ।

No. 2451. नीलकण्ठीसंज्ञातन्त्रम् । Substance, country-made paper, 12 × 5 inches. Folia, 6. Lines, 14–15–16 on a page. Extent, 398 ślokas. Character, Nágara. Date, Sm. 1721. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Nílakaṇṭha-sanjná-tantra. On the astrological influences of the twelve signs of the Zodiac. By Nílakaṇṭha.

Beginning. श्रीवरदमूर्त्तिर्जयति । प्रणम्य हेरम्बमथो दिवाकरं गुरोरनन्तस्य तथा पदाम्बुजं । श्रीनीलकण्ठोविविनक्ति सूक्तिभिस्ताजिकं सूरिमनःप्रसादकृत् । १ । पुमांस्वरोऽग्निः सुदृढश्चतुष्पाद्रक्तोष्णपित्तातिरवोद्विरुग्रः । पौतोदिनं प्रागविषमोदयोल्पसङ्गप्रजोरुच्चनृपः समोजः । १ । वृषः स्थिरः स्त्री चितिशीतरुक्षोयाम्येट्सुभूवायुनिशाचतुष्पात् । श्वेतोतिशब्दोविषयोदयश्च मध्यप्रजासङ्गशुभोहि वैश्यः । २ ।

End. प्रश्नकालेपि सहमं (?) विचार्य्य प्रष्टुरिच्छया ।
सर्व्वेषामुपयोगोऽत्र चित्रं इच्छन्ति प+नाः ।

Colophon. इति नीलकण्ठ्यां संज्ञातन्त्रं पूर्णतामगात् ।

विषयः । मेषादिराशीनां चरपुरुषादिसंज्ञाकथनं ।

No. 2452. यवनजातकम् । Substance, country-made paper, 9 × 4 inches. Folia, 8. Lines, 11—12—13—14 on a page. Extent, 292 ślokas. Character, Nágara. Date, Sm. 1809. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Yavana-játaka. The name shows that it is a summary of astrological knowledge compiled from some Yavana work, but the codex is imperfect, and contains only three chapters on astrological marks on the persons of females. The work is inscribed to one Vṛiddha-yavana.

Beginning. श्रीगणेशाय नमः । अथ स्त्रीनक्षत्रफलं लिख्यते । जातास्विनीषु प्रमदा विनीता प्रभूतकेशा प्रियदर्शना च । प्रियम्बदा सर्व्वसहातिरामा बुध्यान्विता देवगुरुप्रसन्ना । १ ।

End. घ्नन्ति क्रूरा स्त्रियोधारिर्जहि भवान्तथा मृत्युपारं विनिघ्नतः सूर्य्यभौमाः सौम्याः पुष्णन्त्येवा हिलारिभावान् शुक्रश्चास्तं मूर्त्तिस्थेन्दुः (?) । १० ।

Colophon. इति श्रीवृद्धयवनाचार्य्यकृते यवनजातके स्त्रीराजयोगाध्यायः समाप्तः ।

विषयः । १मे अध्याये एकैकस्मिन् नक्षत्रे स्त्रीणां जन्मनः फलं । २ये अध्याये स्त्रीणां रत्या-दिग्रहभावफलं । ३ये अध्याये स्त्रीणां राजयोगकथनं ।

No. 2453. वृहज्जातकं वा जातकविवरणं टीकासहितम् । Substance, country-made paper, 12 × 5 inches. Folia, 82. Lines, 11 on a page. Extent, 3,174 ślokas. Character, Nágara. Date, Sm. 1872. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Vṛihajjátaka alias **Játaka-vivaraṇa**. An elaborate treatise on horoscopy, with a commentary. The text by Varáhamihira, the comment by Mahidhara. The codex is imperfect.

Beginning. (मू) श्रीगणेशाय नमः । मूर्त्तित्वे परिकल्पितः शशभृतोवर्त्माऽपुनर्ज्जन्मनामा-त्मेत्यात्मविदां क्रतुश्च यजतां भर्त्तामरज्योतिषां लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ वाचीनः स ददात्वनेककिरणस्त्रैलोक्यदीपोरविः । १ । भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि होरान्तव महार्णवप्रतरणेभग्नो-द्यमानामहं स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे । २ ।

(टी) श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीगुरुभ्योनमः । श्रीगणेशं रविंश्चैव शारदां गुरुप-द्मजं (शारदापदपद्मजं) नत्वा संक्षेपतोवक्ष्मि वृहज्जातकटिप्पणीं । मिहिराचारपाद्मनात्मैरपन्यस-

माप्ते चावन्तिकाचार्य्योवराहमिहिरोऽर्कलब्धवरोगणितस्कन्धानन्तरं होराग्रन्थं चिकीर्षु-रङ्गाद्द्वाविंशति शार्दूलविक्रीडितेनाह । मूर्त्तिले इति ।

End. (मू) स्वभ्रान्तिके सर्पविवेष्टिताङ्गोवस्त्रैर्विहीनः पुरुषस्तटव्यां । चौरानलव्याकु-लितान्तरात्मा विक्रोशतेऽन्त्योपगतो भूषसः । २९ ।

(टी) आदित्यदासतनयस्तदवाप्तबोधः काम्पिल्लके सवितृलब्धवरप्रसादः । आवन्तिकोमु-निमतान्यवलोक्य सम्यग्होरां वराहमिहिरोरुचिरां चकार ।

Colophon. इति श्रीवराहमिहिरकृते बृहज्जातके उपसंग्रहाध्यायः । बृहज्जातकटी-का समाप्ता ।

No. 2454. विवाहवृन्दावनम् । Substance, country-made paper, 9 × 4 inches. Folia, 16. Lines, 14-15-16 on a page. Extent, 494 ślokas. Character, Nágara. Date, Sm. 1689, Sk. 1553. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Viváha-vṛindávana. Astrological calculations for ascertaining proper auspicious times for marriages, &c. By Kes'avárka.

Beginning. श्रीगणेशाय नमः । श्रीजगच्चक्षुषे नमः । श्रीशार्ङ्गिणोः हरतु वोनवसन्नि-वेशः क्लेशव्ययं च कवलं नयनाञ्चलश्रीः । यत्राञ्चलप्रथनमङ्गलमाचचार शृङ्गारहारमणिकौस्तुभ-रश्मिगुप्तः ॥१॥ सवर्ग्यगर्गभृगुभागुरिरैभ्य गीर्भ्यः सारं वराहमिहिरादिमतानुसारं । स्फारस्फुरत्-परिमलाश्रमतं विवाहवृन्दावनं विरचयामि विचाररम्यं ॥ २ ॥ ध्रुवानुराधामृगमूलरेवतीकर-मघास्वातिरदूषणोगणः । रवेरमीनामकरादिषड्गृहो करग्रहे मङ्गलकृन्मृगीदृशां ॥ ३ ॥

End. प्रायोविवाहपटलं टत (?) लम्बमानं स्तम्बोपमं न सहते नयचालनानि वृन्दावने परमतातपपीड्यमानवृन्दावनेनुरमतामिह सम्मतिश्रीः ॥ १ ॥

Colophon. इति श्रीकेशवार्कविरचिते विवाहवृन्दावने वधूवरप्रश्नाध्यायः ।

विषयः । १मेऽध्याये विवाहविषयकनक्षत्रशुद्धिकथनं । २येऽध्याये विवाहे कालमी-मांसा । ३येऽध्याये मेलकनिर्द्देशः । ४र्थाध्याये नवांशविवेचनं । ५मेऽध्याये तन्वादिस्थग्रहविशेष-गुणकीर्त्तनं । ६ष्ठेऽध्याये विहितचन्द्रताराफलकथनं । ७मेऽध्याये राहोश्छायया चन्द्रसूर्य्यग्रहण-निर्देशः । ८मेऽध्याये षड्वर्गसाधनकथनं । ९मेऽध्याये गोधूलिनिरूपणं । विवाहे तत्प्रशंसा च । १०मेऽध्याये गोचरफलकथनं । ११शेऽध्याये शुभाशुभयोगकथनं । १२शेऽध्याये तन्वादिस्थरश्या-दीनां फलं निर्दिष्टं । १३शेऽध्याये निधनाद्यशुभस्थानस्थितस्य शुभग्रहस्य तन्वादिशुभस्थानस्थि-

शुभग्रहस्य च स्थित्या शुभफलकीर्त्तनं। १४शेऽध्याये ग्रहयोगबलकथनं। १५शेऽध्याये शुभाशुभशारीरलक्षणनिरूपणं। १६शेऽध्याये वरवध्वोर्लग्नादिस्थग्रहवशात् सुखदुःखफलकीर्त्तनं।

No. 2455. जातकमञ्जरी। Substance, country-made paper, 9 × 4 inches. Folia, 44. Lines, 7 on a page. Extent, 616 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Játaka-manjarí. A treatise on horoscopy. By Nrisiñha, son of Náganátha, of the Maudgalya gotra.

Beginning. श्रीगणेशाय नमः। महामेरुप्रान्तप्रवहदुरुजाम्बूनदसरित्तटाघातक्रीड़ापरिमिलितजाम्बूनदरजः। मुखं यस्या धत्ते धवलरदकान्त्या सचपलां वकात्यभधान्तिं स दिशतु ममेष्टं गणपतिः॥ १॥ लब्धा धातुर्वराणि त्रिभुवनमहितं देवराज्यं पुरस्तात् पश्चादेनं निजेष्टप्रदमपि सकलान् द्रुह्यतोविष्णुभक्तान्। प्रह्लादचाणकर्म्मप्रतिहतिसुहृतो दैत्यनाथस्य वक्षश्छित्त्वा लक्ष्मीसमेतोनिजजनहितकृत् पातु देवोन्रसिंहः॥ २॥ स्फटिकधवलच्छाया माया नवेन्दुमरीचिभिः मतिकुवलयं मूढं रूढं प्रबोध्य जलाशये। शरदिव गिरो भृङ्गी रङ्गीकृतागमषट्पदा रमयतु मुदं दद्यादाद्या गिरामधिदेवता॥ ३॥ स्वाङ्गं द्वादशधा विभज्य तपनोयोयाति सर्व्वं जगत् यश्चेन्दोर्न्नवधा कुजस्तु नवधा सौम्यश्चतुःषष्ठिधा। जीवः षोड़शधा भृगुर्व्वसुविधं त्रेधा शनिः सप्तभानुपतिः (?) (सप्तधा स्वभांगः) स्थितिकारणान् चिरमहं नत्वार्थये वाञ्छितं॥ ४॥ श्रद्देषी नित्यतुष्टोगणितनयपटुः सत्यवादी मनस्वी त्रश्विश्चस्थायिबुद्धिः कलुषजनतिरस्कारकृत् सन्निवेषी। सन्मानः स्थानवासी सततभृदुवचाः शास्त्रतत्त्वोपदेष्टा जेता वाद्यान्तराले स भवति गुणवान् देशिकानां वरिष्ठः॥ ५॥ श्रीमन्मौद्गल्यगोत्रोबुधिलसनशशी विद्वनेन्द्रस्य शिष्यः दैवज्ञानां वरिष्ठः सकलगुणनिधेर्नागनाथस्य सूनुः। सूर्य्याल्लब्ध्वा वराणि त्रिभुवनहितकृत् सूर्य्यसिद्धान्तसारं संदृष्ट्वासौ न्रसिंहः सरणिमतितरां जातकाख्यं प्रचख्यौ॥ ६॥ तान् नत्वा द्वादशाचार्य्यान् वक्ष्यते सर्व्वसम्मता। संदृष्ट्वा सूर्य्यसिद्धान्तं मया जातकमञ्जरी॥ ७॥

End. यथेच्छयोगस्तपनादियोगात् तथा विचार्य्यैव वदेत् फलानि। विन्द्यात् पुनः खेचरतामवस्थाभेदेन तीर्थस्थलदिग्विशेषान्॥ १०॥ यस्त्वेत्यं जातकं योविलिखति विबुधः प्रीणयेत्तं स मर्त्यः विश्वस्तं शश्वदिष्टैर्व्वसनकधराभूषणैर्व्वाहनैश्च। त्रिंशत्तत्स्वामिनिष्कसहस्रमपि वा प्रीणयेद्यस्तु नैवं तस्माच्छस्य प्रकृत्या कलुषमतिजुषोलोभिनोमा लिखेत्तत्॥ ११॥

Colophon. इति जातकमञ्जर्य्यां निर्याणयोगोनाम अष्टादशोऽध्यायः।

विषयः। १मे अध्याये आयुरादिगणनायां त्रिविधसिद्धान्तकीर्त्तनं। २ये अध्याये राशिनक्षत्रादीनां नामभेदकथनं। ३ये अध्याये ग्रहाणां राश्यधिष्ठातृत्वादिभावकथनञ्च। ४र्थे अध्याये भावचिन्तनं। ५मे अध्याये करणतत्त्वादिभावफलं। ६ष्ठे अध्याये ग्रहाणां दृष्टेर्बलकीर्त्तनं।

७मे अध्याये ग्रहाणां बलनिरूपणं। ८मे अध्याये आयुर्दायकीर्त्तनं। ९मे अध्याये रिष्टकष्टादिफल-कीर्त्तनं। १०मे अध्याये ग्रहाणां शीघ्रोच्चादिगतिषु फलकीर्त्तनं। ११शे अध्याये लग्नस्थरव्यादि-ग्रहफलं। १२शे अध्याये राजयोगकथनं। १३शे अध्याये गोचरफलकथनं। १४शे अध्याये केन्द्रा-दिस्थग्रहाणां फलं। १५शे अध्याये एकैकस्य राशेरंशभेदेन पुंस्त्रीनपुंसकलक्षणादिकथनं। १६शे अध्याये सुतादिस्थानभेदेन ग्रहाणांस्थितिवशात् पुत्रोत्पत्तिः पुत्रस्य शुभाशुभलक्षणञ्च।

No. 2456. सिद्धान्तरहस्यम्। Substance, country-made paper, 10 × 5 inches. Folia, 41. Lines, 19 on a page. Extent, 1,507 ślokas. Character, Nágara. Date, Sm. 1846. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Siddhánta-rahasya. A commentary on the Grahalághava, a work on astrology. By Vis'vanátha Daivajna, son of Divákara Daivjna.

Beginning. श्रीगणेशायनमः। ज्योतिर्विद्गुरुणा गणेशगुरुणा निर्मथ्य शास्त्राम्बुधिं
यश्चक्रे ग्रहलाघवं विवरणं कुर्व्वेऽस्य सत्प्रीतये।
स्मृत्वा शम्भुसुतं दिवाकरसुतं स्याद्विश्वनाथः कृती
जाग्रज्ज्योतिषवर्गगोकुलपरित्राणाय नारायणः॥ १॥

श्रीमद्गुरुणा गणेशदैवज्ञेन ये ग्रन्थाः कृतास्ते तद्भ्रातृपुत्रेण नृसिंहेन ज्योतिर्विदा स्वकृतग्रहलाघवटीकायां श्लोकद्वयेन निबद्धाः। तद्यथा,

कृत्वादौ ग्रहलाघवं लघुबृहत्तिथ्यादिचिन्तामणिं
सत्सिद्धान्तशिरोमणेश्च विवृतिं लीलावतीव्याकृतिं।
श्रीवृन्दावनटीकिकाञ्च विवृतिं मौहूर्त्ततत्त्वस्य वै
सच्छ्राद्धादिविनिर्णयं + + + + छन्दोर्णवाख्यस्य वै॥ १॥
सुधीरञ्जनं तर्ज्जनीयन्त्रकञ्च सुकृष्णाष्टमीनिर्णयं चोलिकायाः।
लघूपाययन्त्रन्तथान्यानपूर्व्वान् गणेशोगुरुर्ब्रह्मनिर्व्वाणमायात्॥ २॥

श्रीमत्कौशिकमुनिश्रेष्ठवंशोद्भवोजलधितीरनिकटवर्त्तिनन्दिग्रामनिवासी सकलभूमण्डल-पतिपूजितचरणयुगलाम्भोरुहनिखिलशास्त्रार्थप्रवीणाष्टादशसिद्धान्तोक्तोपपत्तिकोविदसमस्तवैया-करणाग्रणीरगणितशास्त्रविचारचतुरोज्योतिर्वित्कुलावतंसः श्रीमत्केशवदैवज्ञात्मजश्रीमद्गणे-शदैवज्ञवर्य्यः ग्रहलाघवाख्यं करणं चिकीर्षुः तत्रादौ निर्विघ्नेन ग्रन्थसमाप्त्यर्थं तत्प्रचयार्थं चाशीर्नमस्क्रियावस्तुनिर्द्देशात्मकानां मङ्गलानां श्रुतिदेवतागुरुवाङ्निर्द्देशात्मकं मङ्गलं वसन्तति-लकया प्रतिबध्नाति ज्योतिरिति।

End. समतं। गोलग्रामनिवासिनोगुरुपदद्वन्द्वाब्जभक्तो रतस्यासीत्तन दिवाकरस्य

तनयः श्रीविश्वनाथाक्कयः । तेनेदं ग्रहलाघवस्य गणितं स्पष्टीकृतं तद्बुधैः शोध्यं शुद्धमिदं सदा तु गणकैः स्वान्ते सदा धार्य्यतां ॥ १ ॥

Colophon. इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिते सिद्धान्तरहस्ये ग्रहलाघवस्योदाहरणं समाप्तं ।

विषयः । ग्रहलाघवाख्यज्योतिषग्रन्थस्य व्याख्यानं ।

No. 2457. प्रभा । Substance, country-made paper, 14 × 5 inches. Folia, 236. Lines, 9 on a page. Extent, 7,138 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Incorrect.

Prabhá. A commentary or Párthasírathi Mís'ra's Mímáñsá-s'ástra-dípiká, an exposition of the Mímáñsá doctrine. By Sad-vaidyanátha, son of Sadrámachandra Súrí.

Beginning. सौन्दर्य्यसीमाहृतराम + +
+ + + गाम्भीर्य्यनमत्समुद्रम् ।
सदा सदाचारनिरस्ततन्द्रं
श्रीरामचन्द्रं पितरं नमामि ॥
श्रीमन्महागणपतेश्चरणारविन्द-
मानम्य भक्तजनसिद्धिदमादरेण ।
श्रीवैद्यनाथकविरङ्कुतभाट्टतन्त्र-
सिद्धान्ततत्त्वममलं विशदीकरोति ॥
अधीत्य सकलं शास्त्रं परिशील्य यथामति ।
सद्गुरूणां प्रसादेन व्याख्यास्ये शास्त्रदीपिकां ॥

आम्नायस्येति । तत्र तावद्विषयोविशयश्चैव पुर्व्वपक्षस्तथोत्तरः । प्रयोजनञ्च पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् । इत्युक्तलक्षणोदाहरणसंशयपूर्व्वपक्षसिद्धान्तप्रयोजनरूपपञ्चाङ्गविचारात्मकाधिकरणघटिताध्यायस्तोमरूपेऽस्मिन् शास्त्रे प्रत्यधिकरणं चतुर्द्धा सङ्गतिमाह्नः । इत्यादि ।

End. समासवनीयानामङ्गं चोदनाया अविशेषात् परोडाशत्वेन उद्देश्यसवनीयविशेषणायोगादिति सूत्रार्थः ।

Colophon. इति श्रीमत्पदवाक्यप्रमाणज्ञसद्रामचन्द्रसूरिवरात्मजसद्वैद्यनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां तृतीयोऽध्यायः सम्पूर्णः ॥

विषयः। पार्थसारथिमिश्रकृतमीमांसाशास्त्रदीपिकायाः प्रथमाध्यायद्वितीयपादादारभ्य तृतीयाध्यायान्तं व्याख्यानम्॥

No. 2458. रत्नपरीक्षा। (गरुड़पुराणीयम्) Substance, country-made yellow paper, 16 × 5 inches. Folia, 12. Lines, 9 on a page. Extent, 324 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranárayaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Ratna-paríkshá. A treatise on precious stones, their descriptions, qualities and uses. The work professes to be an extract from the Garuḍa Puráṇa. The bulk of this work has been published along with English, Bengali and Hindi translations by Rájá Saurindramohan Tagore, in 2 vols. 8vo.

सूत उवाच।

Beginning. वक्ष्मि परीक्षां रत्नानां बलोनामासुरोऽभवत्।
इन्द्राद्या निर्ज्जितास्तेन निर्ज्जेतुं तैर्न शक्यते॥
वरव्याजेन पशुतां याचितः स सुरैर्मखे।
बलोददौ स्वपशुतामतिसत्त्वसुखे रतः॥ इत्यादि

End. प्रसन्नं कोमलं स्निग्धं सुरागं विद्रुमं हि तत्।
धनधान्यकरं लोके विषाग्निभयनाशनम्॥
परीक्षा पुलकस्योक्ता रुधिराक्षस्य वै मणेः।
स्फटिकस्य विद्रुमस्य रत्नज्ञानाय शौनकः॥

Colophon. इत्यादिमहापुराणे गारुड़े रत्नपरीक्षा समाप्ता।

विषयः। देवानां प्रार्थनाय बलासुरस्य सर्व्वैरवयवैः रत्नबीजलक्षीकारविवरणकथनं। अथ वज्रमणीनामुत्पत्तिस्थानकथनं। तत्र स्थानविशेषसम्भवत्वेन तेषां वर्णादिभेदनिरूपणं। वज्रप्रकारभेदकथनं। तेषां प्रत्येकं परीक्षाविधिकथनं। शुभाशुभलक्षणकथनं। अथ मुक्तापरीक्षाविधिकथनं। तत्र गज-वराह-शङ्खादिभ्यस्तासामुत्पत्तिकथनं। तासां प्रत्येकं लक्षणादिकथनं। सिंहलादिषु तासामुत्पत्तिकथनञ्च। पद्मरागपरीक्षानिरूपणं। तत्र सिंहलस्थरावणगङ्गेत्यभिधानह्रदे तेषां प्राधान्येन उत्पत्तिकथनं। तेषां प्रकारभेदादिकथनञ्च। अथ मरकतपरीक्षाविधिकथनं। तेषां लक्षणादिभेदकथनं। इन्द्रनीलपरीक्षादिविधिकथनं। वैदूर्य्यपरीक्षादिविधिकथनं। पुष्परागपरीक्षादिकथनं। कर्क्केतनपरीक्षादिविधिकथनं। भीष्मकपरीक्षादिविधिकथनं। पुलकपरीक्षादिकथनं। रुधिराक्षपरीक्षादिकथनं। स्फटिकपरीक्षादिकथनं। विद्रुमपरीक्षादिकथनञ्च।

No. 2459. निदानम्। (गरुड़पुराणीयम्।) Substance, country-made yellow paper, 18 × 6 inches. Folia, 78, Lines, 9 on a page. Extent, 2,193 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Nidána. On the origin, symptoms, and classification of diseases. An extract from the Garuḍa Puráṇa. This is distinct from a work of this name compiled by Mádhava Kara.

धन्वन्तरिरुवाच।

Beginning. सर्व्वरोगनिदानञ्च वक्ष्ये सुश्रुततत्त्वतः।
आत्रेयाद्यैर्मुनिवरैर्यथा पूर्व्वमुदीरितम्॥
रोगः पाप्मा ज्वरो व्याधिर्विपाकोऽदुष्टमामयः।
यक्ष्मा तङ्क गदा वाधाः शब्दाः पर्य्यायवाचिनः॥
निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतं॥ इत्यादि।

End. वंशाद्न्यस्तता चेति गुडूचीनामसङ्ग्रहः।
किराततिक्तकश्चैव भूनिम्बः काण्डतिक्तकः॥
सूत उवाच।
नामान्येतानि हरिरन्यानि च भिषग्वरः।
रोगहन्ता रोगिरोगी विष्णुर्व्याकरणादिकं॥
गरुड़ोगारुड़ोविष्णु र्गारुड़ी गरुड़ध्वजः।
अतोव्याकरणं वक्ष्ये कुमारोक्तञ्च शौनक॥

Colophon. इत्यादिमहापुराणे गारुड़े निदानं समाप्तं। (औषधनामानि।)

विषयः। सुश्रुतेन सह धन्वन्तरेः संवादेन रोगाणां पर्य्यायकथनं। पूर्व्वरूपादिकथनं। संक्षेपेण सर्व्वरोगनिदानकथनं। ज्वरनिदानं पिण्डनिदानं। कामनिदानं। श्वासनिदानं। हिक्कानिदानं। यक्ष्मनिदानं। अरोदकनिदानं। हृद्रोगनिदानं। मदात्ययनिदानं। अर्श्शो-निदानं। अतीसारनिदानं। मूत्राघातनिदानं। प्रमेहनिदानं। विद्रधिनिदानं। उदर-निदानं। पाण्डुशोथनिदानं। विसर्पादिनिदानं। मिथ्याहारनिदानं। क्रिमिनिदानं। वातव्याधिनिदानं। वातरक्तनिदानं। योगसारकथनं। अनुपानविधिकथनं। अथ चिकित्सा-कथनं। तत्र ज्वरचिकित्सा। नाड़ीव्रणचिकित्सा। स्त्रीरोगचिकित्सा। सिद्धयोगसारकथनं। घृततैलादिविधिः। विविधरोगकथनं। तत्र तत्र रोगविशेषे योगविशेषविधिकथनञ्च। पूर्व्वोक्तेषु सर्व्वेषु रोगेषु प्रत्येकं चिकित्साकथनं। मणिमन्त्रादिविधानञ्च। औषधानां नामकथनपूर्व्वकं पर्य्यायकीर्त्तनञ्च। इति शम्।

No. 2460. चरणव्यूहभाष्यम्। Substance, country-made yellow paper, 18 × 5½ inches. Folia, 22. Lines, 8 on a page. Extent, 572 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva Bahádur. Appearance, new. Prose and Verse. Incorrect.

Charaṇa-vyúha-bháshya. A commentary on the Charaṇa-vyúha, a summary of the contents of the four Vedas and their classification. Anonymous.

Beginning. अथातश्चरणव्यूहं व्याख्यास्यामस्तत्र यदुक्तं चातुर्व्वैद्यं चत्वारोवेदा व्याख्याता भवन्ति। तत्र ऋग्वेदोयजुर्व्वेदः सामवेदोऽथर्व्ववेदश्चेति। तत्र ऋग्वेदस्याष्ट भेदा भवन्ति। चर्चा श्रावकश्चर्व्वकः श्रवणीयपारः क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति चतुष्पारायणमेतेषां शाखाश्चतुर्व्विधा भवन्त्याश्वलायनी सांख्यायनी शाकला वाकला माण्डूकाश्चेति तेषामध्ययनमध्यायाश्चतुःषष्टिः। मण्डलानि दशैव तु। वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे।
इत्यादि।

End. कर्म्मणि चेति चतुर्थी ब्रह्मभावमाप्नोतीत्यर्थः।

Colophon. इति चरणव्यूहभाष्ये चतुर्थः खण्डः।

— — — — — — — — — ।
विद्वद्भिः प्रार्थितेनेयं महीदासद्विजन्मना॥
चरणव्यूहवृत्तिश्च विहिता यत्नतोमया॥

विषयः। चतुर्व्वेदीयचरणव्यूहस्य व्याख्यानम्।

No. 2461. भागवततत्त्वदीपनिबन्धः। Substance, country-made paper, 13 × 7 inches. Folia, 182. Lines, 6 on a page. Extent, 3,184 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Generally correct.

Bhágavata-tattvadípa-nibandha. An enquiry into the philosophy of the Bhágavata Puráṇa, showing that the Bhágavata inculcates the S'uddhádvaita doctrine. By Vallabha Díkshita.

Beginning. नमोभगवते तस्मै कृष्णायाद्भुतकर्म्मणे।
रूपनामविभेदेन जगत्क्रीड़ति योयतः॥
सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः।
भवान्तसम्भवा दैवात्तेषामर्थोनिरूप्यते॥

भगवच्छास्त्रमाम्नाय विचार्य्य च पुनः पुनः ।
यदुक्तं हरिणा पश्चात्सन्देहविनिवृत्तये ॥
एकं शास्त्रं देवकीपुत्रगीत-
मेकोदेवोदेवकीपुत्र एव ।
मन्त्रोऽप्येकस्तस्य नामानि यानि
कर्म्माप्येकं तस्य देवस्य सेवा ॥
इत्याकलय्य सततं शास्त्रार्थः सर्व्वनिर्णयः ।
श्रीभागवतरूपस्य चयं वच्मि यथामति ॥
वेदान्ते च स्मृतौ ब्रह्मलिङ्गं भागवते तथा ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ इत्यादि ।

End. यथा भागवतस्यार्थोह्युदिस्याच्युतनोदनात् ।
तथा निरूपितः सद्भिः चमा कार्य्या ममोपरि ॥
युक्तं वा यदि वायुक्तं मया यद्यन्निरूपितं ।
तत्सर्व्वं कृष्णचरणे वाक्पुष्पं वि+रुधितं (?) ॥

Colophon. इति श्रीवल्लभदीक्षितविरचिते श्रीभागवततत्त्वदीपनिबन्धे द्वादशस्कन्ध-प्रकरणं सम्पूर्णं ।

श्रीमद्भागवते दीपः कृतोवल्लभदीक्षितैः ।
व्यासवैष्णवदासेन लिखितोदीपते + + ॥

विषयः । श्रीमद्भागवतस्य प्रत्येकं द्वादशस्कन्धीयतात्पर्य्यार्थकथनमुखेन शुद्धाद्वैतवाद-निरूपणं ।

No. 2462. मङ्गलाष्टकम् । Substance, country-made paper, 12 × 4 inches. Folium, 1. Lines, 20. Extent, 29 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, fresh. Verse. Correct.

Mañgaláshṭaka. A hymn in eight stanzas in praise of the leading Hindu gods and goddesses. By Kálidása.

Beginning. श्रीमत्पङ्कजविष्टरो(?)हरिहरोवायुर्महेन्द्रोनल-
श्चन्द्रोभास्करवित्तपालवरुणाः प्रेताश्च दिक्पालकाः ।
प्रद्युम्नोनलकूवरः सुरगुरुश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरश्च लाङ्गलधरः कुर्व्वन्तु नोमङ्गलम् ।

End. इत्येतद्वरमङ्गलाष्टकमिदं पापौघविध्वंसनं
पुण्यं श्रीकविकालिदासरचितं हृष्टं प्रबन्धस्तुतम् । (?)
यः प्रातर्भवमानसश्च पठते कार्य्याणि सिद्ध्यन्ति वै
गङ्गासागरसङ्गमं प्रतिदिनं प्राप्नोति पुण्यं महत् ॥

Colophon. इति श्रीकालिदासकृतं मङ्गलाष्टकं सम्पूर्णं ।

विषयः । प्रधानतया प्रसिद्धानां देवतादीनां समीपे आत्मनोमङ्गलप्रार्थनम् ।

No. 2463. भगवन्नाममाहात्म्यसङ्ग्रहः । Substance, country-made paper, 12 × 4 inches. Folia, 15. Lines, 5 on a page. Extent, 154 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, fresh. Prose and verse. Correct.

Bhagavannáma-máhátmya. The merit of reciting or of hearing the recitation of the name of Hari proved by a series of extracts from various Puráṇas and other mediæval works. By Niranjana Yati.

Beginning. प्रणम्य जानकीनाथं सच्चिदानन्दविग्रहं ।
नाममाहात्म्यबोधाय सङ्ग्रहोलिख्यते मया ॥
नारायण हरे राम कृष्ण गोविन्द माधव ।
पाहि मां श्रीहरे विष्णो शिव दीनार्त्तिनाशन ॥ इत्यादि ।

End. कृतोनाममाहात्म्यस्य पुराणादेश्च सङ्ग्रहः ।
अनेन प्रीयतां रामः सीताजानिः सलक्ष्मणः ॥

Colophon. इति श्रीनिरञ्जनयतिना कृतोभगवन्नाममाहात्म्यसङ्ग्रहः समाप्तः ।
शुभमस्तु मङ्गलमस्तु ।

विषयः । निखिलपुराणधर्म्मशास्त्रादिभ्योभगवन्नामकीर्त्तनश्रवणादीनां माहात्म्यवचनान्युद्धृत्य प्रदर्शनम् ।

No. 2464. पिङ्गलप्रकाशः । Substance, country-made paper, 17 × 4 inches. Folia, 51. Lines, 8 on a page. Extent, 2,664 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Incorrect.

Piṅgala-prakáśa. A commentary on Piṅgala's treatise on the metres in common use in Prákṛit poetry. By Vis'vanátha Panchánana, son of Vidyánivása Mahámahopádhyáya.

Beginning. अथशब्दः शास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्व्विघ्नग्रन्थपरिसमाप्तये ग्रन्थादौ करोति ; विविधेति विविधा नानाप्रकारविन्यासविशिष्टा भाषा यत्र तद्विविधमात्रछन्दःकदम्बं तदेव सागरः अतिदुर्गमत्वात्—इत्यादि ।

End. उल्लसितरभसमनःसरसनलिनीदलकृतशयनपर्य्यन्तः शिशिररिपुर्दिवसोदौऽभवत् सुकुसुमसमयावतीर्णोऽरणे ॥

Colophon. इति महामहोपाध्यायश्रीविद्यानिवासात्मजविश्वनाथपञ्चाननकृते पिङ्गलप्रकाशे वर्णार्थः ॥ श्रीगुरवे नमः ॥

विषयः । पिङ्गलाचार्य्यकृतप्राकृतच्छन्दोग्रन्थस्य व्याख्यानम् ।

No. 2465. सारसुन्दरी । Substance, country-made paper, 18 × 3 inches. Folia, 275. Lines, 10 on a page. Extent, 11,645 ślokas. Character, Bengali. Date, Sk. 1602. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, old. Prose. Correct.

Sára-sundarí. A commentary on the Námaliṅgánusásana of Amara Siñha. By Mathuresá Vidyálaṅkára, of the sept of Napádhíya Bandyaghaṭa.

Beginning. ब्रह्मोपेन्द्रमहेशशक्रवरुणादित्येशपादद्वयां
देवद्वेषिपिशाचदानवचमूरुन्मूलयन्तीं परां ।
वन्देऽहं परमेश्वरीं प्रभजतां संसारपीड़ाहरा-
मुग्रां सूर्य्यशतप्रभां त्रिनयनां भत्याश्रिहामम्बिकां ॥
यः सर्व्वानन्दवन्द्यः क्षितितलविदितः सत्कुलीनेत्तवीजी
सूनुस्तस्याथ जज्ञे कृतविविधकुलोमाधवोमाधवाभः ।
काशीनाथोऽपि तस्मात्समजनि कुलवांश्चन्द्रवन्द्यास्ततोऽपि
तस्मात्सुद्योतनामा समजनि शिवरामोऽर्थविच्चक्रवर्त्ती ॥
शिवरामतनूद्भूतविद्यालङ्कारधीमता ।
क्रियते मन्दबोधाय टीकेयं सारसुन्दरी ॥
टीका यद्यपि भूयस्योविद्यन्तेऽत्र मनीषिणां ।
तथापि सर्व्वसारार्थज्ञानाय क्रियते मया ॥
रायमुकुटटीकादेः कलापादिक्रिया यतः ।
सुपद्मप्रक्रिया तस्मान्मद्दरेशेन तन्यते ॥

श्रीरान् प्रणम्य बङ्गीयविनिवेदयामि ।
बद्धाञ्जलिः सकलशास्त्रविचारदक्षान् ।

End. एवमन्यत् सुधीभिर्भाव्यमिति शिवम् ।
गजाष्टतिथियुक्शाके विद्यालङ्कारधीमता ।
लिङ्गादिसङ्ग्रहे टीका निर्म्ममे सारसुन्दरी ॥
शिवरामचक्रवर्त्ती जनकः पार्व्वती प्रसूः ।
यस्य श्रीमथुरेशोऽसौ चकार सारसुन्दरीं ॥

Colophon. इति नपाड़ीयवन्द्यघटीयश्रीमथुरेशविद्यालङ्कारविरचितायां नामलिङ्गानुशासनटीकायां सारसुन्दर्य्यां लिङ्गादिसङ्ग्रहवर्गः। समाप्तेयं टीका ।
पञ्चाभ्ररसचन्द्राब्दे टीकेयं सारसुन्दरी ।
लिखिता वङ्गीयरलाद्रामनारायणधीमता ॥

विषयः। अमरकोषस्य व्याख्यानम्।

No. 2466. श्रुत्यध्यायव्याख्याव्याख्यानम्। Substance, country-made yellow paper, 20 × 4 inches. Folia, 29. Lines, 6 on a page. Extent, 492 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranaráyaṇa Deva, Bahádur. Appearance, new. Prose. Generally correct.

S'rutyadhyáya-vyákhyá-vyákhyá. A gloss on a commentary by Srídhara Svámí on the S'rutyadhyáya section of the 10th book of the Bhágavata Puráṇa. Anonymous.

Beginning. श्रूयत एव श्रुतिः। तथा च अदृष्टार्थश्रवणकेश्वरवाक्यत्वं श्रुतित्वं। लौकिकेश्वरवाक्यवारणाय अदृष्टार्थेकेति। पुराणादिवारणाय ईश्वरेति। इत्यादि ।

End. ज्ञानस्य ब्रह्मसम्बन्धित्वेऽपि न विषयत्वं तस्य प्रकारव्याप्यत्वात् श्रुतिमौलय उपनिषदः। किन्तु याननियन्त्रिताः। इति ।

Colophon. इति श्रुत्यध्यायव्याख्याव्याख्यानम्।

विषयः। श्रीधरस्वामिकृतश्रीमद्भागवतदशमस्कन्धीयश्रुत्यध्यायव्याख्यायाः व्याख्यानम्।

No. 2467. चित्रगुप्तकथा। Substance, country-made yellow paper, 18 × 4 inches. Folia, 4. Lines, 9 on a page. Extent, 100 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Chitragupta-kathá. Origin and history of the Káyasthas. Chitragupta was born out of the entire body (*káyá*) of Brahmá, and hence the name Káyastha. This personage had nine sons, namely, Gauḍa, Máthura, Bhaṭṭa, Nágara, Sena, Adhishṭhána, S'rivástavya, Ambashṭha, and Karaṇa, and these represent the nine septs of the Káyastha clan. At the end there is an account of an annual fast in honor of Chitragupta. The work professes to be an episode of the Uttarakhaṇḍa of the Padma Puráṇa.

Beginning. अम्ब ऋषिरुवाच। मुने कथय धर्म्मज्ञ कायस्थानाञ्च सम्भवं।
कायस्थानां कुतोजन्म तेषां कथय सुव्रत॥
एतत्सर्व्वं समासेन धर्म्मज्ञोऽसि मनोमम।
दत्तात्रेय उवाच।
त्रिकालज्ञं महाप्राज्ञं पौलस्त्यं मुनिपुङ्गवं।
पप्रच्छ उपसङ्गम्य भीष्मोधर्म्मभृतां वरं॥ इत्यादि।

End. ब्राह्मणान् भोजयेत् प्राज्ञस्तेभ्योदद्याद्धनानि च।
वस्त्रान्नं दानपानानि चित्रगुप्तस्य प्रीतये।

Colophon. इति श्रीपद्मपुराणे उत्तरखण्डे चित्रगुप्तकथा समाप्ता।

विषयः। दत्तात्रेयेण सार्द्धं अम्बर्षेः संवादेन चित्रगुप्तस्य जन्मादिकथनं। तत्र ब्रह्मकायजातत्वात् कायस्थेतिसंज्ञाकथनञ्च। तस्य गौड़-माथुर-भट्ट-नागर-सेन-अधिष्ठान श्रीवास्तव्य-अम्बष्ठ-करणनामकनवपुत्रकथनं। सूर्य्यवंशीयसौदासाभिधानन्टपतिकृतचित्रगुप्तपूजाकथनं। कार्त्तिकशुक्लद्वितीयायां तत्पूजनमाहात्म्यादिकथनञ्च।

No. 2468. सहानुमरणविवेकः। Substance, country-made yellow paper, 18 × 5 inches. Folia, 16. Lines, 8-9 on a page. Extent, 713 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva Bahádur. Appearance, new. Prose and verse. Incorrect.

Sahánumaraṇa-viveka. A digest of the rules regarding concremation, discussing all details and supplying the rituals. By Anantaráma Vidyávágís'a, son of Rámacharaṇa Nyáyálaṅkára.

Beginning. श्रीपूर्व्वानन्तरामः श्रीगुरुं नत्वा विधानतः।
सहानुगमनादीनि स्त्रीणां वक्ति सतां मुदे॥

श्रुतिस्मृतिपुराणादीनशेषान् सङ्ग्रहानपि ।
समालोच्य यथान्यायं विचारः क्रियतेऽधुना ॥

तत्रादौ सहानुमरणं निरूप्यते । मिताक्षराविवादरत्नाकरविवादचिन्तामणिशुद्धितत्त्वविवादभङ्गार्णवसेतुप्रभृतिषु ऋषिवेदवाक्यानि यथा । तत्राङ्गिराः । मृते भर्त्तरि या नारी समारोहेद्धुताशनं । इत्यादि ।

End. सहानुमरणादीनां विचारे स्खलनं मम ।
धीरैस्तत्कृपया पूर्य्यमित्यनन्तनिवेदनं ॥

Colophon. (?) महामहोपाध्यायरामचरणन्यायालङ्कारभट्टाचार्य्यात्मजश्रीअनन्तरामविद्यावागीशविरचितः सहानुमरणविवेकः समाप्तः ॥

विषयः । स्त्रीणां भर्तृसहगमनविधिनिरूपणं । साध्वीलक्षणादिकथनं । असतीनामपि सहगमनेन पातित्यनाशमात्रकथनं । साध्वीनां पूज्यताकथनं । अनुमरणविधिकथनं । क्वचिद् बालापत्यादौ सहगमनादिनिषेधकथनं । मुक्तिविवेचनं । स्वर्गादिकामनारहितत्वेन सहगमनाद्यनुष्ठानान्मोक्षसिद्धिर्भवतीतिनिरूपणं । वैधमरणे नात्मघातदोष इति निरूपणं । देशाचारस्य प्रामाण्यनिरूपणं । जातिभेदेन सहमरणानुमरणयोरधिकारभेदकथनं । सहमरणादौ चिताभ्रष्टायाः प्रायश्चित्तादिनिरूपणं । तत्र तत्र श्राद्धविधिकथनं । अशौचादिनिरूपणं ।

No. 2469 प्रायश्चित्तसङ्ग्रहः । Substance, country-made paper, 11 × 4 inches. Folia, 26. Lines, 6—7 on a page. Extent, 318 ślokas. Character, Nágara. Date, Sm. 1837. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, fresh. Prose and verse. Generally correct.

Práyaśchitta-saṅgraha. A digest of the rules regarding expiations. By Devarája. The work is in Hindi and all the Smṛiti excerptas have been translated into that language. The work was prepared under the orders of Mahárájá Chet Siñha, of Benares.

Beginning. काशीवासिजनस्य दस्युयवनप्रत्यूहविच्छित्तये
ख्यातः श्रीबलिवन्द्यसिंहनृपतिर्भर्गस्य भागोभवत् ।
भारेणातिविसंष्ठुला क्षितिभृतामाक्रम्यमाणा बला-
दग्र्यं पृथुनेव येन पृथिवी साम्यं समासादिता ॥
अस्तैःकज्जलपङ्क्तिलैर्मृगदृशां सिन्दूरसंचालनै-
र्दन्तैरश्लिभिश्च वैरिनगरे यस्य त्रिवर्णी सदा ।

सिक्तोयस्य कृपारसेन किमपि प्राप्तो + + स्नानतां
यस्य क्रोधकृशानुना कवलितेनाद्यापि धत्तेऽङ्कुरं ॥
सूनुस्तस्य सुधन्वनः कृतमहादानस्य तेजोनिधेः
क्षौणीं रक्षति चेतसिंहनृपतिः षाड्गुण्यविद्यागुरुः ।
श्रीनारायणपादपद्मयुगलं यः केवलं वन्दते
चूड़ारत्नमरीचिमञ्जु पृथिवीनाथैः परैर्वन्द्यते ॥
सैन्यानि द्विषतामपास्य सहसा दैन्यानि विद्यावतां
कीर्त्तिर्येन नियोजिता स्थगयितुं नूनं दिशोधावति ।
प्रायश्चित्तविधिं विबोद्धुमनसस्तस्यानुरागोदयाद्-
देशैरर्थमुदीर्य्य बोधनधिया सङ्गृह्यते किञ्चन ॥
मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसम्बर्त्ताः कात्यायनबृहस्पती । इत्यादि ।

End. पराके धेनुद्वयं । गोव्रते पञ्चधेनवः । इति व्रतानां प्रत्याम्नायाः ।

Colophon. इति श्रीमहाराजचेतसिंहनियुक्तदेवराजकृतः प्रायश्चित्तसङ्ग्रहः ॥ संवत् १८३० ॥

विषयः । ग्रन्थेऽस्मिन हिन्दीभाषया प्रायश्चित्तविधिनिरूपणं । तत्र तत्तत्प्रमाणानि यथा-श्रुतान्येव हिन्दीभाषया अनूद्य प्रदर्शितानीति ज्ञेयम् ।

No. 2470. तत्त्वसन्दर्भटिप्पनी । Substance, country-made paper, 13 × 6 inches. Folia, 26. Lines, 10 on a page. Extent, 666 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, fresh. Prose. Correct.

Tattva-sandarbha-ṭippaní. Exegetical notes on the "Tattva-sandarbha,' a treatise by Jíva Gos'vámí on the metaphysics of the Vaishṇavas of Bengal. By Vidyábhúshaṇa.

Beginning. भक्त्याभासेनापि तोषं दधाने
धर्म्माध्यक्षे विश्वनिस्तारिनाम्नि ।
नित्यानन्दाद्वैतचैतन्यरूपे
तत्त्वे तस्मिन् नित्यमास्तां रतिर्नः ॥
मायावादं यस्तमःस्तोममुच्चै-
र्नाशं निन्ये वेदवागंशुजालैः ।

भक्तिर्विष्णोर्दर्शिता येन लोके
जीयात् सोऽयं भानुरानन्दतीर्थः ॥
— — — — — —।
आलस्याद्प्रवृत्तिस्तु पुंसां यद्ग्रन्थविस्तरे।
अतोऽत्र गूढे सन्दर्भे टिप्पन्यल्पा प्रकाश्यते॥
श्रीमज्जीवेन ये पाठाः सन्दर्भेऽस्मिन् परिष्कृताः।
व्याख्यायन्ते त एवामी नान्ये ये तेन हेलिताः॥

श्रीवादरायणोभगवान् व्यासोब्रह्मसूत्राणि प्रकाश्य तद्भाष्यभूतं श्रीभागवतमाविर्भाव्य शुकं तदध्यापितवान्। तदर्थं निर्णेतुकामः श्रीजीवः प्रत्यूहकुलाचलकुलिशं वाञ्छितपीयूषबलाहक — — — — कृष्णवर्णमिति। सुमेधसोजनाः कलावपि हरिं यजन्ति।

End. उपदेशवाक्यानि गर्भे मध्ये यस्य तस्मिन्।
टिप्पनी तत्त्वसन्दर्भे विद्याभूषणनिर्म्मिता।
श्रीजीवपाठसंशक्ता सद्भिरेषा विशोध्यतां॥

विषयः। जीवगोस्वामिसङ्कलिततत्त्वसन्दर्भनामकनिबन्धस्य व्याख्यानम्।

No. 2471. सारात्सारसङ्ग्रहः। Substance, country-made paper, 18 × 4 inches. Folia, 684. Lines, 8—9 on a page. Extent, 19,977 ślokas. Character, Bengali. Date, Sk. 1697. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, old. Prose and verse. Incorrect.

Sárátsára-sañgraha. A Tántric miscellany, containing accounts and rituals of a great number of Tántric feasts, fasts, and observances, each illustrated by ancient legends. A detailed table of its contents is given below in Sanskrit. Compiled by Rámasañkara.

Beginning. आद्या या तारतारा सृजति गुणधारा गुणगणा-
दद्दगधारा यस्याः स्रवन्ति गुणधारा गुणधरा।
महामाया माया लसति हरजायादनसुधा(?)
स्वयं या श्रीः श्रेयस्करणवरदा दुःखितजने॥
स्वयं वाणी बाला मुखरयति बालानपि जड़ा-
नमा धूमा वायोः प्रलयलयदा वीजवपुषा।

मातङ्गी ताલङ्गी वररिपुभयदा भैरवी सैान्मुखी या
नमस्येऽहं शाश्वत्यतिगतगतिर्मन्त्रमाता स्वयं या॥
शक्तिः साक्षान्महादेवी महादेवः स शक्तिमान्।
तयोर्विभूतिरेषा वै सर्व्वमेतच्चराचरं॥
वस्तु किञ्चित् क्वचिद्रूपं किञ्चिद्वस्तु चिदात्मकं।
स्वयं शुद्धमशुद्धञ्च परञ्चापरमेव च॥ इत्यादि।

End. एवमुच्चार्य्य दातव्योवलिः कुलजनप्रियः।
यदि न भुच्यते वत्स तदा नैव शुभं भवेत्॥
शुभं यदि भवेत्तच्च भुज्यते तदशेषतः।
एवं ज्ञात्वा महादेवि शान्तिस्वस्त्ययनं चरेत्॥

Colophon. इति श्रीयुक्तरायरामशङ्करविरचिते सारात्सारसङ्ग्रहे भवादिनिर्णयो-नाम द्वादशपरिच्छेदः। समाप्तोऽयं ग्रन्थः। शकाब्दाः १६६७॥

विषयः। शिवाशिवयोर्विभूतिकथनं। अर्द्धनारीश्वरमूर्त्तिकथनं। अर्द्धनारीश्वरस्तोत्रकथनं। इन्द्रादीनामभिमानभङ्गकथनं। अमुनीनामपि निर्व्वाणप्राप्तिकथनं। तन्त्राणामसंख्येयत्वकथनं। इन्द्रादीनां ब्रह्मतत्त्वविषये संशयच्छेदकथनं। संक्षेपेण दुर्गायाः माहात्म्यकथनं। प्रसिद्धानां तन्त्राणां नामकथनं। पीठनिर्णयः। महाविद्यानिरूपणं। कुण्डलिन्यङ्गमातृकानामादिकथनं। महाकामिनीध्यानादिककथनं। पञ्चवाणनिर्णयः। वेदोत्पत्तिकथनादिकं। वर्णमालाकथनं। आद्यायाः एकाक्षरमन्त्रार्थादिकथनं। एवं महादुर्गा-तारा-श्रीविद्या-भुवनेश्वरी-वाग्भवी-धूमावती-वगलामुखी कमला-मातङ्गीप्रभृतीनामेकाक्षरमन्त्रार्थादिकथनं। विद्यानां विशेषनामकथनं। कालीतारादुर्गाणामेकतया अविशेषकथनं। देवतानां विशेषरूपकल्पनाकथनं। तान्त्रिकप्रातःकृत्यादिनिरूपणं। गुरुलक्षणादिकथनं। शिष्यलक्षणादिकं। शिक्षानिषेधादिकथनं। राशिचक्रनक्षत्रचक्रसिद्धारिचक्रादिकथनं। दीक्षाकालादिनिरूपणं। तत्र वार-तिथि-नक्षत्र-योग-करण लग्नादिनिरूपणं। निषिद्धकालेऽपि दीक्षाकथनं। दीक्षास्थानादिनिरूपणं। उपदेशविधिकथनं। मन्त्राणां दशविधसंस्कारविधिकथनं। मन्त्राणां नित्यत्वादिकथनं। सगचक्र-वर्गचक्रादिकथनं। मन्त्राणां गुणदोषादिविवेकः। परिधेयवस्त्रप्रमाणादिकथनं त्रिपुण्ड्रप्रमाणादिकथनं। आराधनविधिकथनं। तत्र पूजाधारार्घ्यपात्रादिनिरूपणं। सन्ध्याविधिकथनं। स्नानविधिकथनं। गायत्रीविधिकथनं। भूतशुद्धिकथनं। प्राणायामविधिकथनं। मातृकान्यासपीठन्यासादिकथनं। प्राणप्रतिष्ठादिविधिः। पूजायां पञ्चशुद्धिविधिः। उपचारप्रमाणादिकथनं। छागादिबलिविधिः। कुमारीपूजनविधिःमन्त्रसंस्कारादिविधिः। निर्म्माल्यनिरूपणं। पूजायां दिङ्नियमकथनं। विहिताविहितद्रव्यादिनिरूपणं। रुद्राक्षादिमालानिरूपणं। जपविधिः। कुल्लुकासेतुप्रभृतिनिरूपणं। मुखशोधनादिविधिकथनं। पुरश्चरणविधि-

कथनं। भूतलिप्यादिकथनं। मन्त्रसिद्धिलक्षणादिकथनं। शान्तिघटस्थानादिविधिकथनं। कुण्ड-विधिकथनं। होमद्रव्यादिनिरूपणं। महादुर्गापूजादिविधिकथनं। कामिन्याः ध्यानपूजादि-कथनं। हरिद्रागणेशविधिकथनं। दुर्गासहस्रनामादिकथनं। जयाविजयापूजादिविधिकथनं। शिवमाहात्म्यादिकथनं। पश्चाचरादिमाहात्म्यकथनं। लिङ्गार्चनविधिकथनं। अष्टमूर्त्तिप्रमाणा-दिकथनं। शिवमन्त्रादिकथनं। सहस्रनामकवचादिकथनञ्च। गणेशमन्त्रादिकथनं। वटुक-भैरवमन्त्रादिकथनं। एवं क्षेत्रपालमन्त्र-गौरीमन्त्र-महिषमर्द्दिनीमन्त्रस्तोत्रादिकथनं। तथा—उग्रदुर्गामन्त्र-नवदुर्गामन्त्र-रणदुर्गामन्त्र-शूलिनीमन्त्र-कालीमन्त्र भद्रकाल्यादिमन्त्रस्तोत्रादिक-थनं। तारामन्त्रादिकथनं। तस्याः शतनामस्तोत्रकवचसहस्रनामादिकथनं। तारिणीकल्पक-थनं। श्रीविद्याविधिकथनं तत्र कामकलानिरूपणं। तन्मन्त्रस्तोत्रादिकथनञ्च। महाषोड़शी-विधिकथनं। भुवनेश्वर्य्याः विधिकथनं। मधुमतीविधिकथनं। श्रीचक्रादिनाशप्रायश्चित्तकथनं। योगिनीन्यासादिकथनं। कामेश्वरीविधिकथनं। आनन्दभैरवीविधिकथनं। त्रिपुराविधिक-थनं। किङ्किनीस्तोत्रादिकथनं। महात्रिपुरसुन्दरीशतनामस्तोत्रादिकथनं। एवं सहस्रनामा-दिस्तोत्रकथनञ्च। बालाविद्याविधिकथनं। त्रिपुरभैरवीविधिकथनं। वागीश्वरीविधिकथनं। छिन्नमस्ताविधिकथनं। प्रचण्डचण्डिकाविधिकथनं। धूमावतीविद्याविधिकथनं। वगलामुखी-विद्याविधिकथनं। मातङ्गीविद्याविधिकथनं। लक्ष्मीविद्याविधिकथनं। अन्नपूर्णाविद्याकथनं। तस्या अकारादिसहस्रनामादिस्तोत्रकथनं। त्रिपुटाविधिकथनं। त्वरिताविधिकथनं। नित्या-विधिकथनं। वज्रप्रस्तारिणीविधिकथनं। अथ दिव्यवीरपशुभावविवेचनं। षट्चक्रनिरूपणं। योगप्रक्रियाकथनं। तत्र यमनियमासनादिलक्षणतद्भेदादिनिरूपणं। ध्येयस्वरूपादिनिरूपणञ्च। षटकर्म्मविधिकथनं। कौलिकानां प्रातःकृत्यादिनिरूपणं। मांसादिशोधनविधिकथनं। शिवा-बलिदानविधिकथनञ्च। (अत्र प्रायः सर्व्वत्र प्रयोगकथनमिति ज्ञेयम्।)

No. 2472. स्मृतिरत्नावली। Substance, country-made paper, 12 × 5 inches. Folia, 68. Lines, 10—11 on a page. Extent, 1,688 ślokas. Character, Nágara. Date, Sm. 1821. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, old. Prose and verse. Incorrect.

Smṛiti-ratnávalí. A digest of the Smṛitis relating principally to domestic rites and ceremonies. By Bechuráma.

Beginning. नत्वा विश्वेश्वरं विष्णुं पार्व्वतीञ्च हरिप्रियां।
क्रियते वेचुरामेण स्मृतिरत्नावलीमिदं॥ (१)
नत्वा भवानीचरणारविन्दं
श्रीमान् वेचुराम इति प्रसिद्धः।

+ + + यतेग्रन्थ + + स्वल्पं
परोपकाराय भवतीह भूमौ ॥

अथ श्राद्धनिर्णयोलिख्यते। तत्र श्राद्धधर्म्मव्यवस्था। हारीतः। आयुः प्रजां धनं विद्यां स्वर्गं मोक्षसुखानि च। प्रयच्छति तथा राज्यं पितरः श्राद्धतर्पिताः। इत्यादि।

End. गृहे दशगुणं दानं गोष्ठे चैव शताधिकं।
पुण्यतीर्थेषु साहस्रमनन्तं शिवसन्निधौ॥

Colophon. इति स्मृतिरत्नावली समाप्ता। संवत् १८२१।

विषयः। श्राद्धमाहात्म्यकथनं। संक्रान्त्यादौ त्रिपिण्डश्राद्धविधिकथनं। प्रेतकर्म्मकथनं। विघ्नादिपतितश्राद्धकालादिनिरूपणं। सपिण्डनादिविधिः। आमश्राद्धादिविधिः। मघाश्राद्धादिविधिः। बालादिमरणादिनिरूपणं। अशौचनिरूपणं। महापातकादिप्रायश्चित्तकथनं। गोवधादिप्रायश्चित्तकथनं। उच्छिष्टभोजनादिप्रायश्चित्तकथनं। कन्यादानादिविधिकथनं। अथात्मघातिनां शुद्ध्यर्थं नारायणबलिविधिकथनं। अशौचादौ चौरविधिकथनं। नक्तव्रतादिविधिकथनं। प्रतिपदादिपञ्चदशतिथिकृत्यनिरूपणं। अथ चैत्रादिद्वादशमासकृत्यनिरूपणं। विशेषेण एकादशीनिरूपणं। सङ्क्रान्तिनिरूपणं। व्रतबन्धादिनिरूपणं। अकालवृष्ट्यादिनिरूपणं। पञ्चामृतादिनिरूपणं। मण्डपादिनिरूपणं। वेदिविधिकथनं। ग्रहणनिरूपणं। अश्वत्थवृक्षसेचनादिविधिकथनं। व्रतादिनियमकथनं। तत्र दन्तधावनादिविधिकथनं। अशौचमध्ये नैमित्तिकव्रतनिषेधकथनं। स्नानकालादिनिरूपणं। प्रातःसन्ध्यादिविधिकथनं। तुलस्यादिचयनविधिकथनं। पूजाविधिकथनं। शालग्राममाहात्म्यकीर्त्तनं। भोजनादिविधिकथनं। दानविधिकथनं। दानपात्रादिनिरूपणञ्च।

No. 2473. राजनीतिः। Substance, country-made yellow paper, 20 × 5 inches. Folia, 15. Lines, 8 on a page. Extent, 375 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Rájaníti A treatise on government and the duties of kings, compiled principally from the Mahábhárata and the Kámandakíya Níti. Anonymous.

Beginning. तस्यामात्यः सदा श्रेयान् यः काकिन्या च वर्द्धते।
कोषः कोषवतः प्राणाः प्राणाः प्राणा न भूपतेः।
गणाद्गृहीत्वा वर्द्धेत गणस्य तु न किञ्चन।
गणस्य दाता क्षीयेत गणस्य तु न किञ्चन॥
अलब्धञ्चैव लिप्सेत लब्धं रक्षेदवेक्षणैः।
रक्षितं वर्द्धयेत्सम्यग्वृद्धं तीर्थेषु निक्षिपेत्॥ इत्यादि।

End. अप्रियाण्यपि कुर्व्वाणोयः प्रियः प्रिय एव सः।
अशेषदोषदुष्टोऽपि कायः कस्य न वा प्रियः॥

Colophon. इति षड्द्वन्द्वप्रकरणं सम्पूर्णं। (इति राजनीतिः।)

विषयः। कोषरक्षादिविधिकथनं। राष्ट्ररक्षादिविधिकथनं दुर्गादिनिर्म्माणकथनं। बलनिरूपणं। युद्धभूमौ प्राणत्यागादिमाहात्म्यकथनं। सन्धिविधिकथनं बलवत्सहशत्रुद्वभेदेन त्रिविधसन्धिनिरूपणं। विग्रहविधिकथनं। यानविधिकथनं। आसनविधिकथनं। द्वैधविधिकथनं। आश्रयविधिकथनं। प्रभावोत्साहमन्त्रजभेदेन त्रिविधप्रतापनिरूपणं। इन्द्र-सूर्य्य-वायु-यम-वरुण चन्द्र वह्नि-पृथिवीहत्त्या राज्ञः सदा अवस्थानकर्त्तव्यतानिरूपणं। तत्र प्रत्येकं तद्वृत्तिनिरूपणञ्च। त्रिविधशक्तिनिरूपणं। आयव्ययस्थितिविधिनिरूपणं। उपायचतुष्टयकथनं तत्र प्रत्येकं तद्विधाननिरूपणं। दण्डप्रशंसादिकथनं। अमात्यविधिनिरूपणं। अमात्यलक्षणादिकथनं। अमात्यनीतिकथनं। प्रसङ्गात् साधारणनीतिकथनञ्च।

No. 2474. महाभारततात्पर्य्यनिर्णयः। Substance, country-made yellow paper, 12 × 6 inches. Folia, 186. Lines, 13 on a page. Extent, 9,067 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Very incorrect.

Mahábhárata-tátparyanirṇaya. On the philosophy of the Mahábhárata. By Ánanda Tírtha.

Beginning. नारायणाय परिपूर्णगुणार्णवाय
विश्वोदयस्थितिलयोन्नियतिप्रदाय।
ज्ञानप्रदाय विबुधासुरसौख्यदुःख-
सत्कारणाय वितताय नमोनमस्ते॥
आसीदुदारगुणवार्निधिरप्रमेयो-
नारायणः परतमः परमात्म + कः।
सर्व्वज्ञसंविदखिलं + + ने निधाय
लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे॥
— — — — — — — ।
जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया।
संक्षेपात् सर्व्वशास्त्रार्थं भारतार्थानुसारतः॥
निर्णयः सर्व्वशास्त्राणां भारतं परिकीर्त्तितं।
भारतं सर्व्ववेदाश्च तुल्यामारोपिताः पुरा॥ इत्यादि।

End. तस्मादयं ग्रन्थवरोऽखिलाश्च
धर्म्मा + + र्चां तु पुमर्थहेतुः ॥
किं वोदितैरनुगुणै + + तथान्यै
नारायणः प्रीतिमुपैति + + ॥
यस्य चीणुदितानि वेदवचनैरूपाणि दिव्यान्यलं
— — — — — — —।
— — — — — — —।
— — मेव निहितं देवस्य भर्गोमहान् ॥

Colophon. बति श्रीमदानन्दतीर्थभगवदाचार्य्यविरचिते श्रीमन्महाभारततात्पर्य्यनिर्णये द्वात्रिंशोऽध्यायः समाप्तः। सम्पूर्णोऽयं ग्रन्थः।

विषयः। १मे अध्याये.—भगवान् नारायण एव सर्व्वशास्त्रप्रतिपाद्य इति निरूपणं। वासुदेवादिचतुर्व्यूहनिरूपणं। द्वैतवादनिरूपणं। भक्तिनिरूपणादिकथनञ्च। २ये,—महाभारतागमादिकथनं। पाण्डवेषु भीमस्य प्राधान्यकथनं। मत्स्यकूर्म्माद्यवताराणां केवलविष्णुत्वकथनं। ब्रह्मरुद्रादीनां वैष्णवविशेषावेशित्वकथनं। शाम्बादीनां वैष्णवावेशित्वनिर्णयः। ए,—पाण्डवादिषु वैष्णवावेशित्वादिनिरूपणं। भगवन्माहात्म्यवर्णनं। पाण्डवादीनां क्रमेण धर्म्मज्ञानवैराग्यादिरूपत्वकथनं। धार्त्तराष्ट्रशकुनिप्रभृतीनां क्रमेण अज्ञानकलिनास्तिक्यादिरूपत्वकथनञ्च। ३—९मे नारायणं नमस्कृत्येत्यत्र तात्पर्य्यकथनं जयशब्दप्रतिपाद्यनिरूपणञ्च। सृष्टिप्रक्रियावर्णनं। संक्षेपेण रामावतारकथानिरूपणं। अथ विस्तरेण रामचरित्रवर्णनं। १०—११शे,—समुद्रमन्थनवर्णनं। वेदव्यासस्य जन्मादिकथनं। व्यासपुत्रस्य शुकस्य उत्पत्तिकथनं। व्यासस्य वेदविभागपूर्व्वकं शिष्येभ्योदानविवरणकथनं। १२—१५शे.—चन्द्रवंशोत्पत्तिकथनं। श्रीकृष्णबलभद्रादीनां जन्मकथनं। विस्तरेण श्रीकृष्णचरित्रवर्णनं। पाण्डवानां जन्मादिकथनं। तेषां बाल्यक्रीड़ादिवर्णनं। धार्त्तराष्ट्रानीनां जन्मकथनं। बाल्यलीलादिवर्णनञ्च। तेषामस्त्रशिक्षादिवृत्तान्तवर्णनं। १६—१७शे,—पाण्डवानां मृगयाकरणकथनं। यादवैः सार्द्धं जरासन्धस्य युद्धादिवर्णनं। रुक्मिणीहरणवृत्तान्तवर्णनमुखेन हंसडिम्भकबधविवरणवर्णनं। १८—२१शे.—भीमार्ज्जुनयोर्द्दिग्विजयवर्णनं। पुरोचनहिड़िम्बादिबधवर्णनं। द्रौपदीस्वयम्बरवर्णनं। पाण्डवानां राज्यलाभादिवर्णनं। सुभद्राहरणवृत्तान्तवर्णनं। खाण्डवदाहवर्णनं। द्यूतक्रीड़ावर्णनं। दुःशासनकृतद्रौपदीवस्त्रहरणवर्णनं। पाण्डवानां बनप्रवेशवर्णनञ्च। २२—२४शे,—पाण्डवानां वनवासवर्णनं। अरणिप्राप्तिवर्णनं। गन्धर्व्वहृतानां कौरवस्त्रीणामुद्धारादिवर्णनं अर्ज्जुनस्य अस्त्रलाभादिवर्णनं। विराटराज्ये पाण्डवानामज्ञातवासवर्णनं। कीचकादिबधवर्णनं। उत्तरगोगृहयुद्धवर्णनं। सन्धिकरणार्थं कृष्णस्य दुर्य्योधनसमीपगमनादिवर्णनं। समरोद्योगवर्णनञ्च। २५—२९शे,—संक्षेपेण भीष्मपर्व्वकथावर्णनं। द्रोणपर्व्वकथावर्णनं।

कर्णपर्व्वकथावर्णनं। शाल्यपर्व्वकथावर्णनं। दुर्य्योधनोरुभङ्गवृत्तान्तवर्णनं। द्रौणिकृतपाण्डवशिशुनिधनादिवृत्तान्तवर्णनं। युद्धभूमौ स्त्रीणां विलापादिवर्णनञ्च। २०—२१शे, अध्याये,—युधिष्ठिरस्य राज्याभिषेकवर्णनं। भीमादीनां यौवराज्याभिषेकादिवर्णनं। युधिष्ठिरेण सह चार्व्वाकस्य संवादादिवर्णनं। शरशय्याशयानं भीष्मं द्रष्टुमनोभिः सार्द्धं पाण्डवैः श्रीकृष्णस्य तत्समीपगमणादिवर्णनं। तदनुरोधेन भगवता संक्षेपेण राजधर्म्मकथनं। मोक्षधर्म्मकथनञ्च। युधिष्ठिरकृताश्वमेधवर्णनं। २१शे, अध्याये—युधिष्ठिराय विदुरस्य उपदेशदानवर्णनं। तेषां कुरुक्षेत्रगमनादिवर्णनं। कृष्णस्य कुरुक्षेत्रे यज्ञानुष्ठानकथनं। कृष्णस्य उद्धवाय धर्म्मोपदेशदानं। अथ सर्व्वेषां बदरिकाश्रमगमनादिकथनं। प्रभासतीर्थे यादवानां मैरेयमत्तानामन्योन्यं संप्रहारेण निधनादिकथनं। बलदेवकृष्णयोः स्वधामगमनकथनं। श्रीकृष्णमाहात्म्यवर्णनं। म्लेच्छकर्तृककृष्णकामिनीसमूहहरणकथनं। युधिष्ठिरादीनां स्वर्गादिगमनकथनं। बुद्धावतारकथाकथनं। कल्क्यवतारकथाकीर्त्तनञ्च।

No. 2475. काव्यरसावली। Substance, country-made yellow paper, 18 × 4 inches. Folia, 7. Lines, 7 on a page. Extent, 208 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Generally correct.

Kávya-rasávalí. A commentary on a poem by Ghaṭakarpara describing the rainy season. By Vaidyanátha Deva S'armá, son of Sarveśvara Tarkasiddhánta, and grandson of Sambharáma Nyáyapanchánana.

Beginning. गुरुं प्रणम्य शिरसा त्रैलोक्यत्राणकारकं।
घटकर्परकाव्यस्य टीका काव्यरसावली॥
कवीनां काव्यशीलानां सम्मुदे क्रियते मया।
द्विजश्रीवैद्यनाथेन तर्कसिद्धान्तसूनुना॥
संक्षेपं पुस्तकं दृष्ट्वा टीकाविरचितं तथा।
यथेष्टकाव्यं काव्यानां प्रकाशनसमीहया॥

घटकर्परनामा महाकविरेकस्मिन् दिवसे वर्षाकाले काव्यप्रकाशाय स्त्रीपुंसावुपलक्ष्य यमकेन तत्कालं वर्णितवान् निचितमिति। अर्थात् हे प्रिये नीरदैर्मेघैः खमाकाशं। इत्यादि।

End. इति टीका कृता धीराः प्रतिपत्तीयता मया।
द्विजश्रीवैद्यनाथेन शाके सप्तमसप्तमे॥

Colophon. इति महोपाध्यायश्रीशम्भुरामन्यायपञ्चाननभट्टाचार्य्यात्मजश्रीसर्व्वेश्वरतर्कसिद्धान्तभट्टाचार्य्यात्मजश्रीवैद्यनाथदेवशर्म्मविरचिता घटकर्परटीका काव्यरसावली समाप्ता।

विषयः। घटकर्परकृतवर्षावर्णनकाव्यस्य व्याख्यानम्।

No. 2476. सारावली। Substance, country-made yellow paper, 14 × 4 inches. Folia, 98. Lines, 9 on a page. Extent, 2,756 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Generally correct.

Sárávalí. A commentary on the Kumára-sambhava of Kálidása. By Gopálananda Váṇivilása, son of Bhagiratha Mis'ra.

Beginning. परमानन्दसन्दोहकन्दं वन्दे+ +प्रभं।
गोविन्दमग्रुभस्कन्द + + + लिन्दवन्ददं॥
श्रीभगीरथमिश्रस्य सूनु + + तयासुधीः।
वाणीविलासः कुरुते टीकां सारावलीमिमां॥

महाकाव्यसमारम्भे सत्सम्प्रदायाधिगतमहाकाव्यलक्षणं वस्तुनिर्देशं निर्दिशन् महाकविः श्रीकालिदासः पर्व्वतेशं हिमालयं वर्णयन्नाह॥ अस्त्युत्तरस्यामिति।

End. प्रथममुखविकारैरिति प्रथमं ये मुखविकाराः वदनविकृतयः तैः। अतएव गूढं संवृतं यथा स्यात् तथा हासयामास॥

Colophon. इति सन्मिश्रश्रीभगीरथसूनुवाणीविलासश्रीगोपालनन्दविरचितायां सारावल्यां कुमारसम्भवटीकायां सप्तमः सर्गः।

विषयः। महाकविकालिदासकृतकुमारसम्भवस्य सप्तमसर्गान्तं व्याख्यानम्॥

No. 2477. शान्तितत्त्वामृतम्। Substance, country-made, yellow paper, 17 × 4 inches. Folia, 61. Lines, 9 on a page. Extent, 1,612 ślokas. Character, Bengali. Date, Sm. 1217. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Verse. Incorrect.

S'ánti-tattvámṛita. On rites appropriate for overcoming the evil effects of accidents, extraordinary phenomena, adverse astral conjunctions, &c., &c. By Náráyaṇa Chakravartí.

Beginning. नत्वा गोपीकान्तं मत्वा च विविधमुनिवाक्यानि।
श्रीनारायणशर्म्मा शान्तिकतत्त्वामृतं तनुते॥
अद्भुतसिन्धुप्रमुखे तत्तत् स्थाने पुराणादौ।
नानास्थाने येऽर्थास्तेऽस्मिन् ग्रन्थे समासेन॥

तत्र शान्तिलक्षणमाह स्मृतिः। यथा शस्त्रोपघातानां कवचं विनिवारणं। तथा दैवोपघातानां शान्तिर्भवति वारणं। एतेन अदृष्टद्वारा ऐहिकमात्रानिष्टनिवारणं शान्तिः। इत्यादि।

End. चिन्तामण्युक्तप्रकारेण चन्द्रपूजां कांस्यपात्रदानानि च कृत्वा धेनुं सुवर्णञ्च दक्षिणां दद्यादित्यर्थः।

Colophon. इति श्रीनारायणचक्रवर्त्तिकृतं शान्तितत्त्वामृतं समाप्तं। सन१२१७।

विषयः। शान्तिलक्षणकीर्त्तनं। ऐहिकानिष्टनिवारणाय शान्तिरेवानुष्ठेयेतिनिरूपणं। उत्पातलक्षणकथनपूर्व्वकं विविधोत्पातकथनं। तत्र साधारणासाधारणभेदनिरूपणञ्च। देशभेदेन उत्पातविशेषे दोषभेदकथनं। अथ भौमोत्पातकथनपूर्व्वकं तत्र तत्र शान्तिकथनं। अथ आग्नेयाद्भुतकथनं। जलजाद्भुतकथनं। वृक्षाद्भुतकथनं। देवप्रतिमाद्भुतकथनं। गृहाद्भुतकथनं। वस्त्राद्भुतकथनं। मृगपक्षिविकारकथनं। अथ अन्तरीक्षोत्पातनिरूपणं। तत्र उल्कादिस्वरूपकथनं। सन्ध्याद्भुतकथनं। निर्घातनिरूपणं। मेघाद्भुतकथनं। मेघवृक्षनिरूपणं। परिघकथनं। विद्युत्कथनं। इन्द्रधनुःकथनं। दण्डाद्भुतनिरूपणं। वृष्ट्याद्भुतकथनं। परिवेशाद्भुतकथनं। प्रतिसूर्य्यकाद्भुतकथनं। गन्धर्व्वनगराद्भुतकथनं। कबन्धाद्भुतकथनं। अथ दिव्योत्पातनिरूपणं। तत्र सूर्य्याद्भुतकथनं। चन्द्राद्भुतकथनं। मङ्गलाद्भुतकथनं। बुधाद्भुतकथनं। बृहस्पत्यद्भुतकथनं। शुक्राद्भुतकथनं। शनैश्चराद्भुतकथनं। ग्रहणाद्भुतकथनं। अपर्व्वग्रहणाद्भुतकथनं। वायव्यमण्डलाद्भुतकथनं। केत्वद्भुतकथनं। नक्षत्रपातोत्पातकथनं। अत्र सर्व्वत्र प्रत्येकं शान्तिकथनं। विशेषेण ग्रहपूजादिनिरूपणं। अथ संक्रान्त्याद्युत्पातशान्तिकथनञ्च।

No. 2478. बालबोधिका। Substance, country-made yellow paper, 20 × 5 inches. Folia, 45. Lines, 10 on a page. Extent 1,567 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Incorrect.

Bálabodhiká. A commentary on Deveśvara's *Kavikalpalatá,* a guide to the art of composing poetry. By Súrya Kavirája.

Beginning. इदानीं वृद्धजनवर्त्मानुसरणेन निजग्रन्थस्य प्रामाण्यं निदर्शयति। कविशिक्षेत्यादि। भो धीराः पण्डिता इयं कविकल्पलता मया निबद्धा। किमर्थं त्वरितं शीघ्रं श्लोकानां सिद्धये। इत्यादि।

End. प्रत्यक् पयोनिधिः अस्ताचलसन्निहितसमुद्रः।

Colophon. इति श्रीसूर्य्यकविराजकृता बालबोधिका कविकल्पलताटीका समाप्ता।

विषयः। देवेश्वरकृतकविकल्पलताभिधानकविशिक्षानिबन्धस्य व्याख्यानम्।

No. 2479. अपेक्षितव्याख्यानम्। Substance, country-made yellow paper, 20 × 5 inches. Folia, 20. Lines, 10 on a page. Extent, 707 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Incorrect.

Apekshita-vyákhyána. A commentary on Bhavabhúti's Uttara-rámacharita. By Bhaṭṭa Náráyaṇa, son of Rañganátha Díkshita.

Beginning. अपारभवसागरोत्तरणसेतुभूतं सकृत्
प्रलापविषयीकृतं जयति यस्य नामामृतं ।
दशास्यकुलकाननज्वलनतीव्रदावानलः
स कोऽपि रघुनाथकोमम भवत्वभीष्टप्रदः ॥
स्वहृद्गतं वा विनिवेशयन्ति ये
भवन्ति ते सभ्यतमा विपश्चितां ।
परस्य हृत्स्थं गहनार्थजातं
यद्वाचि कुर्व्वे स गुरोः प्रसादः ॥ (?)
ये तु शास्त्रनिचयेषु कोविदाः
संस्कृतेषु भुजगेशजित्वराः ।
प्राकृतेषु परिनिष्ठिता न ते
तन्मुदे मम भवत्वयं श्रमः ॥
उत्तरे रामचरिते भवभूतिमहाकवेः ।
अप्रसिद्धं पदं यत् तद्यथामति विविच्यते ॥
प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं
कृतं नान्दीरूपं पूर्व्वंगुरुनमस्कारात्मकं
मङ्गलं सूत्रधारमुखेनावतारयति,—इदं गुरुभ्य इति ।

End. यो मौनभट्टबुध + + वधीतविद्यः
श्रीतान + + सुकृती +कृष्णसूनुः ।
श्रीरङ्गनाथतनयेन तदीयपौत्र-
नारायणेन सुधिया रचितेति टीका ॥
वाराणसीनियतवासपवित्रमूर्त्तिः
श्रीरङ्गनाथविदुषो विहिताध्वरस्य ।
श्रीबालकृष्ण इति यः प्रथितस्तनूज-
स्तस्याग्रजेन रुचिरा समकारि वृत्तिः ॥
ऋतुगजरसचन्द्रैर्विक्रमार्कस्य शाके
+ + वति शुभमासे कार्त्तिके शुक्लपक्षे ।
प्रतिपदि परिपूर्णाकारि जिज्ञासुतुष्ट्यै
विवृतिरियमुमेशाधिष्ठितायां नगर्यां ॥

Colophon. इति श्रीरङ्गनाथदीक्षितसूनोर्भट्टनारायणस्य कृतावपेक्षितव्याख्याने सप्तमोऽङ्कः।

विषयः। महाकविभवभूतिकृतस्य उत्तररामचरितस्य व्याख्यानम्।

No. 2480. विष्णुनामसहस्रभाष्यविवृतिः। Substance, country-made paper, 17 × 5 inches. Folia, 226. Lines, 9 on a page Extent, 6,581 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose and verse. Generally correct.

Vishṇunáma-sahasra-bháshya-vivṛiti. Glossarial notes on S'añkara's commentary on a section of the Mahábhárata, in which a thousand epithets in praise of Vishṇu have been strung into a hymn. Each epithet is described as a name. By Tárakabrahma Sarasvatí, disciple of Gopála Surasvatí Yati.

Beginning. श्रीमाधवोमाधवविघ्नराजान्
वाग्देवतां व्यासमुनिं महान्तं।
श्रीशङ्करं भाष्यकृतश्च भक्त्या
नमाम्यहं लोकहितावतारं॥
श्रीगोपालानन्दयतीन् गुरून् विद्यागुरूनपि।
प्रणम्य श्रीमदद्वैतानन्दान् शमदमालयान्॥
भाष्यं तैरुपदिष्टार्थं भगवत्पादनिर्म्मितं।
विष्णोर्नामसहस्रस्य यथामति विविच्यते॥
क्व सर्व्वविद्भाषितभाष्यमेत-
द्व्याख्याप्रयत्नः क्व च मेऽल्पबुद्धेः।
तथापि वैगुण्यमिह क्षमन्तां
सन्तो यतेर्यन्मननं स्वधर्म्मः॥

इह खलु युधिष्ठिरः परमकारुणिकः शान्तनवाद् भीष्माद्धर्म्मप्रवक्तुः श्रुतिस्मृत्याचारप्रमाणकान् सर्व्वान् धर्म्मान् — — — — — — — हरिवंशे कैलासयात्रायां विष्णुं प्रति शिववचनं पठति। आदिस्त्वं सर्व्वभूतानामित्यादि।

End. व्याख्यानान्तरेष्वपि यथासम्भवं श्रुत्यादिमूलत्वं बोध्यम्।
प्रक्षेपकाल्पष्य (?) निरासहेतो-
र्व्याख्या हरेर्नामसहस्रभाष्ये।

या तारकब्रह्मयतिप्रणीता
समर्पिता सा हरिपादयुग्मे ॥

Colophon इति श्रीगोपालसरस्वतीयतिवरान्तेवासिना तारकब्रह्मानन्दसरस्वतीयतिना शक्त्यानुरूप्यात् कृता विष्णुनामसहस्रभाष्यविवृतिः ।

विषय । महाभारतीयानुशासनपर्व्वोक्तविष्णुनामसहस्रस्य शङ्कराचार्य्यकृतं यद्भाष्यं तस्य व्याख्यानम् ॥

No. 2481. वाराहीतन्त्रम् । Substance, country-made yellow paper, 20 × 5 inches. Folia, 93. Lines, 10 on a page. Extent, 2,545 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyana Deva, Bahádur. Appearance, new. Prose and verse. Incorrect.

Váráhí-tantra. One of the original Tantras, treating of the worship of S'ákta goddesses; and of the various rites, fasts and observances relating to them. The contents of the different chapters (50 in all) are given below in Sanskrit. The work noticed under No. 287 (I, p. 157), is defective.

Beginning. प्रपद्ये देववाराहं सर्व्वज्ञमपराजितं ।
वाराहीं सर्व्वभूतानामीश्वरीं सर्व्वतोमुखीं ।
नानाक्रीड़नकैर्देवः क्रीड़ते योगमायया ।
दयितार्द्धवपुर्हित्वा नृत्यारम्भे जगत्प्रभुः ॥
जगत्स्थितिञ्च कुरुते लोकस्यानुग्रहं हरः ।
तस्य चिन्ताप्रभावेण न स्याद्विदितं जगत् ॥
तद्भक्त्या संप्रवक्ष्यामि वाराहीनामतन्त्रकं ।
सहस्रकन्यासहितं मन्त्रयन्त्रपुरःसरं ॥
पीठोपपीठमाहात्म्यं राजवंशानुकीर्त्तनं ।
संस्थानं कालसंस्थानं ग्रहाणां स्थितिरेव च ॥ इत्यादि ।

End. ततोऽन्यत् किं फलं भद्रे इति पादव्यवस्थितिः ।
गीतस्य पदनृत्यस्य नटीवेशधरस्य च ॥

Colophon. इति वाराहीये महातन्त्रोत्तमे पञ्चाशत् पटलः । समाप्तश्चायं ग्रन्थः ॥

विषयः । तत्र प्रथमपटले,—आगमजामलकल्पतन्त्राणां संख्याकथनं । अवान्तरभेदकथनं । प्रत्येकं स्लोकसंख्याकथनं । आगमलक्षणकथनं । जामललक्षणकथनं । कल्पलक्षणकथनं । मन्त्रलक्षणकथनञ्च । २ये, पटले,—दीक्षाविधिकथनं । तत्र अकडमहरचक्र-कौलचक्रादिक-

थनं। अथ कामनाभेदेन भिन्नभिन्नदैवतमन्त्रकथनं कलौ शक्तिमन्त्रप्राधान्यकथनं। मन्त्रोद्धारविधिकथनं। वैष्णवशैवादिभेदेन मन्त्रेषु प्रणवादियोगनियमकथनं। मन्त्रेषु बाल्ययौवनावस्थानिरूपणं। गृहस्थयत्यादीनां मन्त्रेषु विशेषकथनं। उपांशुमानसभेदेन द्विविधजपकथनं। जपविधिकथनं। स्तोत्रादिवाचनविधिकथनं। तत्र विविधपुराणनामाद्युल्लेखेन विष्णु-नृसिंह-राम-दुर्गादिस्तवकीर्त्तनमाहात्म्यकथनं। २-८,—पटले,—भगवद्गीतापाठक्रमकथनं। चण्डीपाठक्रमकथनं। एवं नीलकण्ठ श्रीरामादिक्रमकथनं। वाराहीमन्त्रविधिकथनं। षट्कूटामन्त्रोद्धारविधिकथनं। तत्पूजाविधिकथनं। तत्र स्तवकवचहोमादिविधिकथनञ्च। सुन्दरीमन्त्रतत्पूजादिक्रमकथनं। स्वाङ्गे विविधचक्रयन्त्रादिधारणमाहात्म्यकीर्त्तनं। महालक्ष्म्याः पूजादिविधिकथनं। ९,—पटले,—दुर्गापूजाविधिकथनं। तत्र पुष्पधूपदीपादिविधिकथनं। बलिदानादिविधिकथनं। तत्र छागलादिलक्षणतच्छेदकथनादिकञ्च। बलिच्छेदनकर्त्तृलक्षणादिकथनं। दिग्विशेषे छागादीनां शिरःपाते फलविशेषकथनं। शोनितदानविधिकथनं। सदीपच्छागमस्तकदानादिविधिकथनं। ब्राह्मणस्य पञ्चमकारनिषेधकथनं। १०-१८,—पटले,—भैरव्याः पूजादिविधिकथनं। चण्डी पूजादिविधिकथनं। सामान्यतः सर्व्वमन्त्राणां पुरश्चरणविधिकथनं। तत्र स्थानादिनिरूपणञ्च। वामशिवापूजाविधिकथनं। छिन्नमस्तापूजाविधिकथनं। तत्र विविधयन्त्रमन्त्रादिनिरूपणं। १९ २४,-पटले,—एकाक्षरविष्णुमन्त्रविधिकथनं। कलौ कामनाविशेषेण देवताविशेषार्च्चनविधिकथनं। कालीमन्त्रादिनिरूपणं। तत्र विशेषेण होमबलिदानादिविधिकथनं। कालरात्रिव्रतविधिकथनं। कालीस्तवकथनं। व्रीहिधान्यादीनां ग्राह्याग्राह्यत्वकथनं। तद्भोज्याभोज्यत्वकथनञ्च। तथा फलविशेषभक्षणादिविधिकथनं। परमान्नमोदकादिभोजनविधिकथनं। २५-२९ पटले.—सारस्वतवीजादिनिरूपणं। तत्पूजादि विधिकथनञ्च। इन्द्राक्षीमन्त्र तत्पूजादिविधिकथनं। महाविद्यापूजादिविधिकथनं।तत्र कुमारीपूजादिविधिकथनञ्च। अपराजितामन्त्र तत्पूजादिविधिकथनं। ३०-३१ पटले,—तीर्थविधिकथनं। तत्र नारायणक्षेत्रविधिकथनं। सामान्यतः तीर्थयात्राविधिकथनं। तत्कालादिनिरूपणं। तीर्थे मुण्डनादिविधिकथनं। अथ वैद्यनाथहिङ्गुलादिविविधतीर्थमाहात्म्यकीर्त्तनं। गयायां पिण्डदानाविधिकथनं। लोहितसागरादितीर्थमाहात्म्यकथनं। विशेषेण कामाख्यापूजाविधिकथनं। ३२-४०, पटले,—कामेश्वरीस्तवराजकथनं। तत्र संवत्सरं यावद् यात्राविधिकथनं। वज्रवलि-शक्रबलि-चेटकबलिप्रभृतिबलिविधिकथनं। मासविशेषे नियमविशेषविधानञ्च। अथ मणिकूटतीर्थविधिकथनं। कौनक्षेत्रतीर्थविधिकथनं। एवं नन्दनक्षेत्रादिविधिकथनं। तीर्थापि नषोर्त्तनं। ४१-४९ पटले,—शाक्तशैववैष्णवादीनां उपासनादिभेदकथनं। पूजाकाल द्रव्यादिविशेषकथनञ्च। तत्पूजादिप्रकारभेदकथनं। सद्गुरुमाहात्म्यकीर्त्तनं। विशेषेण शिवपूजादिविधिकथनं। तत्पुरतोहत्याद्युत्सवविधिकथनञ्च।

No. 2482. दुर्गाभक्तिलहरी । Substance, country-made yellow paper, 17 × 5 inches. Folia, 62. Lines, 8 on a page. Extent, 1,769 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendra-náráyana Deva, Bahádur. Appearance, new. Prose and verse. Generally correct.

Durgá-bhakti-laharí. On the supreme divinity of the goddess Durgá and her worship—a compilation from the Tantras. By Raghúttama.

Beginning. निःशरीरोऽपि भगवान् शरीरिष्वभिजायते ।
यो भक्तकृपया देवस्तं नमामि सनातनं ॥
स्त्रीहंसादिवपुर्धत्ते देवदिर्य्यङ्नराकृतिः ।
निराकृतिरपीशानोनटवद्यः स नोऽवतु ॥
सन्तप्तनिर्वृतिकरीमिव द्वैतानन्दसागरे ।
श्रीदुर्गाभक्तिलहरीं विनिर्म्माति रघूत्तमः ॥
ननु केयं भवानी या जगज्जन्मादिहेतुतया परमोपास्यतया अभिप्रेयते—इत्यादि ।

End. इति सकल + + यासामधु ×
प्रमोहकरी + दिवास्वरूपा ।
रमयति च हरं शिवास्वरूपा
वितरतु वो विभवं शुभानि माया ॥

Colophon. इति श्रीदुर्गाभक्तिलहरी समाप्ता ।

विषयः । परस्य ब्रह्मण एव भक्तानुग्रहाय दुर्गादिरूपतया शरीरकल्पनमितिनिरूपणं । ज्ञानिभिरपि दुर्गैव सेवणीयेतिकथनं । देवीकीर्त्तनमाहात्म्यादिकथनं । देव्यास्तुदर्शनामादिकथनं । देव्या मायासंज्ञानिरूपणं । महामायाशब्दार्थनिरूपणं । दुर्गादर्शनफलकथनं । दुर्गाप्रणामफलकथनं । दुर्गास्मरणादिमाहात्म्यकथनं ; दुर्गाभक्तमाहात्म्यकथनं । नवाङ्गभक्तिलक्षणं । शारदीयापूजाया अकरणे प्रत्यवायादिकथनं । दुर्गापूजाफलादिकथनं । प्रतिमाविशेषे पूजाफलविशेषकथनं । देव्याः कामाख्यादिविविधमूर्त्तिनिरूपणं । लक्ष्मीगङ्गागौर्य्यादीनां भिन्नत्वज्ञाने प्रत्यवायकथनं । शक्तिशक्तिमतोरभेदकथनं । दुर्गायाः नित्यत्वकथनमुखेन औपाधिकजन्मादिग्रहणकथनं । तस्याः मुक्तिहेतुत्वकथनं । हरिहरादीनां भेदज्ञाननिन्दाकथनं । परापरभेदेन द्विविधविद्यानिरूपणं । अविद्यया संसारबन्धकथनं । ब्रह्मस्वरूपनिरूपणादिकं । अविद्ययैव अखिलस्य जगतोभेदज्ञा[illegible]निरूपणं । ब्रह्मणः अवतारस्वरूपादिनिरूपणं । जगत्कारणनिरूपणं । ब्रह्मजीवयोर्लक्षणादिकथनं । ब्रह्मैव शिवविष्णुदुर्गादिशब्दैरभिधीयते—इति—निरूपणं ।

No. 2483. परिभाषादर्पणम् । Substance, country-made yellow paper, 12 × 6 inches. Folia, 55. Lines, 13—14 on a page. Extent, 2,100 ślokas. Character, Nágara. Date, Sm. 1886. Place of deposit, Calcutta, Rájá Rájendranáráyana Deva, Bahádur. Appearance, new. Prose. Correct.

Paribháshá-darpaṇa. A commentary on Kes'ava Mis'ra's Tarkabháshá, a glossary of the technical terms of the Nyáya. By Bháskkara Bhaṭṭa.

(प्रथमपत्रं नास्ति ।)

Beginning. सत्त्वादिति । विनश्यन्तोऽवतिष्ठन्त इति । तथा चानन्वयव्याप्त्याविनश्यन्तोऽवतिष्ठन्त इत्युक्तं । तथाहि केयं विनश्यता नाम विनाशाधिकरणतेति चेन्न इत्यादि ।

End. सामान्यविशेषव्याप्त्यर्थं हेतुरसाधारणकारणमित्यर्थः ॥

Colophon. इति भास्करभट्टविरचितं परिभाषादर्पणं समाप्तम् । संवत् १८८६ ।

विषयः । केशवमिश्रकृततर्कभाषाभिधानन्यायनिबन्धस्य व्याख्यानम् ।

No. 2484. मुद्राप्रकाशः । Substance, country-made yellow paper, 18 × 6 inches. Folia, 10. Lines, 10 on a page. Extent, 1,725 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyana Deva; Bahádur. Appearance, new. Prose. Incorrect.

Mudrá-prakáśa. A commentary on the *Mudrárákshasa* of Visákhadaṭṭa. By Vaṭes'vara Misra, son of Gaurís'vara Mis'ra. A good edition of the play has just been published by Mr. Kás'inátha Trimbak Ṭelang, of Bombay.

Beginning. कल्याणं कल्पवृक्षः परिचरणपरस्यापि भिक्षोः कथं स्या-
द्योगी वा तत्किमङ्गे तनुमतनगुणामेष रामां बिभर्त्ति ।
कण्ठहालाहलश्चेत् किममृतकिरणं वेति तर्कं जनानां
पृच्छन् स्मेराननश्रीगिरिपतितनयावल्लभो वो विधत्तां ॥
— — — — — — — —।
श्रीमानधीत्य नयनाटककोषशब्दान्
तन्त्राण्युपास्य च गुरून्यमातनोति ।
मुद्राविमुद्रितनयांशुकरत्नसिन्धु-
र्गौरीपतेस्तनयमिश्रवटेश्वराख्यः ॥

प्रारिप्सितपरिसमाप्ति + + + प्रादुर्भूतं समयेष्टदेवतास्मरणाशीरूपं मङ्गलमाचरति स्म कविः । धन्येति । विभोर्महादेवस्य शायं वोयुष्मानव्यादितिसम्बन्धः । इत्यादि ।

End. मित्रं चन्द्रगुप्तं प्राप्तः पुत्रकलत्रविभवैः सम्मं महदद्भुतं जातं साम्प्रतं। — — — — — — — — — — — — परगुणोद्भवत्युधांशुक्रमास्तेषां सन्तु पदारविन्दयुगलेऽस्माकं प्रणामाः शतं।

Colophon. इति महोपाध्यायगौरीश्वरात्मजमिश्रश्रीवटेश्वरविरचिते मुद्राप्रकाशे सप्तमोऽङ्कः॥ समाप्तोऽयं ग्रन्थः।

विषयः। विशाखदत्तकृतमुद्राराक्षसनाटकस्य व्याख्यानम्।

No. 2485. द्रव्यभाष्यटीका। Substance, country-made paper, 16 × 3 inches. Folia, 20. Lines, 10 on a page. Extent, 1,212 ślokhas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyana Deva, Bahádur. Appearance, fresh. Prose. Correct.

Dravya-bháshya-ṭíká. A gloss on Prasastapáda's essay on matter viewed from a Vais'eshíka standpoint. By Bhaṭṭáchárya Tarkálaṅkára.

Beginning कणभक्ष्यमुनेः पचरचाविन्यस्तवासनाः।
सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः॥

ग्रन्थारम्भे विघ्नविघाताय कृतस्येश्वरप्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्व्वकं प्रह्व-त्वङ्गमभिधेयं दर्शयति प्रशस्तपादाचार्य्यः प्रणम्येति। ईश्वरं प्रणम्य स्वतः ईश्वरप्रणामादनु पश्चात् कणादं प्रणम्येत्यर्थः।

End. क्वचिदहष्टेन परिगृहीतत्वाच्च। नियतत्वादाशु सञ्चारितेत्यर्थः।

Colophon. इति महामहोपाध्यायभट्टाचार्य्यतर्कालङ्कारकृतद्रव्यभाष्यटीका समाप्ता।

विषयः। प्रशस्तपादाचार्य्यकृतवैशेषिकद्रव्यलक्षणभाष्यस्य व्याख्यानं।

No. 2486. प्रत्यक्षचिन्तामणिदीधितिव्याख्या। Substance, country-made paper, 15 × 3 inches. Folia, 20. Lines, 8 on a page. Extent, 760 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyana Deva, Bahádur. Appearance, fresh. Prose. Correct.

Pratyaksha-chintámaṇi-didhiti-vyákhyá. A gloss on Raghunátha's commentary on the Pratyaksha-chintámaṇi of Gaṅgas'a. By Gadádhara (*Cf.* I., pp. 283, 293 and 298).

Beginning. नत्वा नन्दतनूजसुन्दरपदद्वन्द्वं गुरोरादरा-
दुर्व्वीमण्डलमण्डनायितलसत्कीर्त्तिर्विदित्वा गिरं।

संचिन्ताक्यतिद्त्तदीधितिकृतः प्रत्यक्षचिन्तामणे-
र्व्याख्यां व्याकुरुते गदाधरबुधोमोदाय विद्यावतां ॥

गणकीर्त्तनमङ्गलं कुर्व्वाण एव स्वीयग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थमुत्कर्षं दर्शयति गिरमिति। हृदये मानसे निधानं सम्बन्धसम्पादनं। इत्यादि।

End. एकस्य गुणविशेषत्वे व्योमसंयोगादौ व्यभिचारतादवस्थ्यादिति। (अतः खण्डितं।)

विषयः। गङ्गेशोपाध्यायकृततत्त्वचिन्तामणीयप्रत्यक्षखण्डस्य रघुनाथशिरोमणिकृतदीधिति-नामटीकाया व्याख्यानम्।

No. 2487 त्रिपुरार्चनरहस्यम्। Substance, country-made yellow paper, 19 × 5 inches. Folia, 29. Lines, 10 on a page. Extent, 1,050 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyana Deva, Bahádur. Appearance, new. Prose and verse. Incorrect.

Tripurárchana-rahasya. A manual for the worship of Tripurá. By Brahmánanda. The goddess is looked upon as a form of Durgá and sovereign of the three regions of the universe. The ritual is simple, and not tainted by any of the orgies of Kaula worship.

Beginning. सहस्रारस्थितं शुक्लं ब्रह्मानन्दं निजं गुरुं।
रत्यम्बया युतं वन्दे भोगमोक्षप्रदं शिवं ॥
माया श्रीः कामयोनिश्च शक्तिः षट्कूटमेव च।
शक्त्यादि + वराद्येण मायाबीजादिषोड़शीं ॥
— — — = — — —।

ब्राह्मे मुहूर्त्ते शय्यायामेवोपविश्य शिरसि सहस्रदलकमले वराभयोपेतं द्विभुजं धवलं—इत्यादि।

End. इति गुरुं संप्रार्थ्य स्तोत्रकवचसहस्रनामादिकं पठित्वा यथासुखं विहरेदिति।

Colophon. इति ज्ञानार्णवे दक्षिणामूर्त्तिसंहितासम्प्रदायानुसारतो ब्रह्मानन्दविरचिते श्रीत्रिपुरार्चनरहस्ये बाह्यार्चनापुनरुत्तरङ्गः समाप्तः।

विषयः। तत्रादौ देशिकानां ब्राह्ममुहूर्त्ते कर्त्तव्यविधानं। गुरुपूजाविधिः। अजपाजपविधिः। स्नानविधिः। तर्पणविधिः। त्रिपुरायागविधिः। त्रिपुरायाः पूजापद्धतिकथनं। तत्र गणेशन्यास-योगिनीन्यासादिविविधन्यासनिरूपणं। चक्रसिंहासनोपरिस्थितायास्त्रिपुरसुन्दर्य्याः पूजायां प्रयोजनादिकथनं। कुलदीपविधिकथनं। शान्त्यष्टककथनञ्च।

No. 2488. कात्यायनीतन्त्रम् । Substance, country-made yellow paper, 19 × 5 inches. Folia, 4. Lines, 8 on a page. Extent, 104 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Kátyáyaní-tantra. An original Tantra on the worship of Kátyáyaní, a form of Durgá.

श्रीपार्व्वत्युवाच ।

Beginning. श्रुता कात्यायनीविद्यासमुत्पत्तिस्त्रिलोचन ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिर्भवेद्यतः ।
तत्सर्व्वं ब्रूहि भगवन् कृपया परमेश्वर ॥ इत्यादि ।

End. इति ते कथितं देवि संक्षेपेण तवाग्रतः ।
महादुर्गाजगद्धात्रीविद्योत्पत्तिः सुदुर्लभा ॥

Colophon. इति कात्यायनीतन्त्रे तृतीयः पटलः ।

विषयः । जगद्धात्रीदुर्गाया आविर्भावविवरणकथनं । तत्र धर्म्मसेतूनां रक्षणाय प्रादुर्भूतायास्तस्याः पुरतोऽनिलानलयोस्तृणमात्रपरिचालनदाहनसामर्थ्याभावकथनं । जगद्धात्र्याः स्वरूपवर्णनं । तस्य मन्त्रध्यानादिनिरूपणं । तिथ्यादिविशेषे तस्याः पूजने फलविशेषकथनञ्च ।

No. 2489. कालादर्श, वा कालनिर्णयः । Substance, country-made paper, 14 × 5 inches. Folia, 23. Lines, 90 on a page. Extent, 437 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Verse. Incorrect.

Káládarśa ALIAS **Kála-nirṇaya.** On times meet for religious observances,—a digest of the rules of the Smṛiti on the subject. By Kavivallabha *alias* Áditya Súri, of the Garga race, and disciple of Vis'ves'vara Áchárya.

Beginning. ब्रह्मादयोयद्दशगा युगादि-
काल्रप्रभेदाश्च यदीयभेदाः ।
कालात्मकं सान्तकमूर्त्तयेऽहं
नित्याय तस्मै नियतं नतोऽस्मि ॥
वाणीगणेशावमरेन्द्रमौलि-
माणिक्यनीराजितपादपद्मौ ।

अविघ्नमाविष्कृतभक्तलोक-
मनोरथावन्वहमानमामि ॥
विश्वेश्वराचार्य्यपदारविन्द-
प्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिः स्मृतितत्त्वदर्शी
कालं विनिर्णेष्यति मन्दबुद्धौ ॥
कालो विधिबलाद्दर्शपूर्णमासादिकर्म्मसु ।
अङ्गत्वेनेष्यते तस्मादसौ निर्णीयते मया ॥
उपाधिभेदादेकोऽपि भवेत्कालो ह्यनेकधा । इत्यादि ।

End. दृष्ट्वा पुरातनपुराणवचां विशेष-
मन्वादिकस्मृतिवचांसि विविच्य तत्त्वं ।
संवत्सरागमवचांसि च कालतत्त्वं
निर्णीयतेऽस्य कृतिना कविवल्लभेन ।
इति यज्ञकालनिर्णयः ।

Colophon. इति श्रीमहामहोपाध्यायविश्वेश्वराचार्य्यशिष्यस्य गर्गकुलतिलकस्य कविवल्लभापरनाम्नः आदित्यसूरेः कृतिः कालादर्शो नाम कालनिर्णयः समाप्तः ।

विषयः । एकोऽपि काल उपाधिभेदादनेकविध इति निरूपणं । कर्म्मविशेषे सावनसौरचान्द्रादिमासविशेषविधानकथनं । क्षयादितिथिव्यवस्थाकथनं । कर्म्मविशेषे परपूर्व्वान्वितानां तिथीनां पूज्यकालविशेषनिरूपणं । तथा विशेषेण शिवरात्रिजन्माष्टमीप्रभृतिषु व्यवस्थाकथनं । उपवासविधिकथनं । विस्तरत एकादशीव्रतोपवासविधिनिरूपणं । पारणविधिकथनञ्च । अन्वाधानयागारम्भादौ पर्व्वद्वयनिरूपणं । अमानिर्णयः । मन्वन्तरादिनिरूपणं । युगादिनिरूपणं । महालयानिरूपणं । गजच्छायानिरूपणं । तत्र तत्र श्राद्धविधानञ्च । अष्टकानिर्णयः । प्रत्याब्दिककालादिनिरूपणं । मासिकनिर्णयः । आद्यश्राद्धकालनिरूपणं । एवं सपिण्डीकरणनिर्णयः । एकोद्दिष्टनिर्णयः । नैमित्तिकश्राद्धनिर्णयः । काम्यश्राद्धनिर्णयः । प्रकीर्णश्राद्धविशेषकालादिनिर्णयः । नक्षत्रयोगविशेषे श्राद्धनिर्णयः । (अतः पत्रमेकं खण्डितं) । उपाकर्म्मादिकालनिर्णयः । नागपूजादिकालनिरूपणं । दुर्गायाः रथारोहणकालकथनं । प्रातःस्नानादिकालनिरूपणं । ग्रहणे स्नानादिकालनिर्णयः । संक्रान्तिनिर्णयः । मलमासकर्त्तव्यकर्म्मकालनिरूपणं । अकालनिरूपणं । नदीरजोदोषनिर्णयः । अनध्यायकालनिरूपणं । गर्भाधानादिकालनिरूपणं । वेदव्रतकालादिनिरूपणं । गृहारम्भप्रवेशादिकालनिरूपणं । देवारामतड़ागादिप्रतिष्ठाकालनिरूपणं । यज्ञकालनिरूपणञ्च ।

No. 2490. आनन्दलहरीटीका। Substance, country-made paper, 12 × 5½ inches. Folia, 95. Lines, 5—6—8—9 on a page. Extent, 1,309 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, fresh. Prose. Incorrect.

A'nandalaharí-ṭíká. A commentary on S'añkara's well-known S'ivite hymn entitled 'A'nandalaharí.' By Gaurikánta Sárvabhauma, Bhaṭṭácharya, a S'rotriya Bráhmaṇ of the Ráḍha sept of Gauḍa.

Beginning. ओङ्कारोत्तमरम्यहर्म्यनिलयां प्रासादमध्यस्थितां
मायाख्यां भुवनेश्वरीं निरुपमां ब्रह्मादिभिर्वन्दितां
योगीन्द्रैकनिषेवितां त्रिजगतां + + तिनाशस्थली
ज्ञानानन्दमयीं महोदयकरीं काञ्चिद्भजे देवतां॥
— — — — — — — —।
गौरीकान्तसार्व्वभौमभट्टाचार्य्यसुधीरिमां।
आनन्दलहरीटीकां तनुते विदुषां मुदे॥

शिष्टाचारपरिप्राप्तं प्रारिप्सितविघ्नविघातप्रयोजनकं शिवशक्तिस्मरणरूपं मङ्गलं कृत्वा शिष्यान् शिक्षयित्वा — — — स्तुतिकरणे स्वस्यासम्भावनां प्रकाशयति॥ शिव इति। शिवशब्दस्यार्थस्मरणद्वारा—इत्यादि।

End. यो नानाविधशास्त्रतर्कनिपुणस्वक्रोनिबन्धान् बहून्
पूजां भूरि महीभुजां सदसि यो लेभेऽति धीमान् कविः।
यो गौड़ोत्तरदेशदिग्गज इह श्रीसार्व्वभौमो महान्
भट्टाचार्य्य इमां स एष विदधे टीकां मुदे वाग्विदां॥

Colophon. इति गौड़ीयराढ़ान्वयसच्छ्रोत्रियवंशजगौरीकान्तसार्व्वभौमभट्टाचार्य्यविरचिता आनन्दलहरीटीका समाप्ता।

विषयः। शङ्कराचार्य्यविरचितानन्दलहर्य्या व्याख्यानम्।

No. 2491. आनन्दलहरीटीका। Substance, country-made paper, 16 × 6 inches. Folia, 32. Lines, 10 on a page. Extent, 1,400 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Correct.

A'nandalaharí-ṭíká. Another commentary on the A'nandalaharí. By Gopíramaṇa Tarkapanchánana.

Beginning. श्रीमत्त्रिपुरसुन्दरीं पद्यनिबन्धेन स्तुवन्नाचार्य्यः प्रत्यूहव्यूहनिराशाय मङ्गलार्थकशब्दस्यापि मङ्गलत्वेन ग्रन्थारम्भे शिवपदोपादानेन मङ्गलमाविष्कुर्व्वन् आह। शिवः शक्त्येति। अस्यार्थः। त्वामिति द्वितीयान्तपदप्रतिपाद्यस्य सम्बोध्यस्य सम्बोधनान्तपदव्यतिरेकेण उपस्थित्यसम्भवात् शिवपदश्रवणाच्च हे शिवे इति सम्बोधनपदमूह्यं॥

End. यत्परं ग्रन्थनिर्म्माणकौशलेनार्ज्जितं मया।
तेनार्पितेन पदयोः प्रीयतां परमेश्वरी॥

Colophon. इति महामहोपाध्यायश्रीगोपीरमणतर्कपञ्चाननभट्टाचार्य्यकृतानन्दलहरीटीका समाप्ता।

विषयः। शङ्कराचार्य्यविरचितानन्दलहर्य्या व्याख्यानम्।

No. 2492. छन्दोमञ्जरीटीका। Substance, country-made yellow paper, 17 × 5 inches. Folia, 29. Lines, 10 on a page. Extent, 1,067 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Incorrect.

Chhandomaṉjarí-ṭíká. A commentary on the Chandomaṉjarí of Gañgádása, a treatise on versification. By Govardhanadása, a Vaidya.

Beginning. गङ्गादासकवेः कवेर्मधुलिहः संकल्पकल्पद्रुमा-
न्निर्माता सुमनोविलासजननी या छन्दसां मञ्जरी।
सास्माकं वशगा कथं भवति भोः शिष्यानुरोधादिति
श्रीगोवर्द्धनदासनामभिषजैः प्रारम्भि तत्पञ्जिका॥
— — — — — — — -- — —।

इह छन्दोग्रन्थारम्भे तदन्तरायनिरासाय कविर्गङ्गादासनामा भिषक् शिष्टानुशिष्टं स्वेष्टदेवताप्रणामं प्राक् प्रतिपादयन् आह देवं प्रणम्येत्यादि।

End. गङ्गादासकवेरिति पूर्व्वेण सम्बन्धः। इति षष्ठः स्तवकः।

Colophon. इति सद्वैद्यगोवर्द्धनदासकृता छन्दोमञ्जरीटीका समाप्ता।

विषयः। गङ्गादासकृतच्छन्दोमञ्जरीग्रन्थस्य व्याख्यानम्।

No. 2493. अध्यात्मप्रदीपः, वा अष्टावक्रटीका। Substance, country-made yellow paper, 18 × 5 inches. Folia, 40. Lines, 9—10 on a page. Extent, 1,404 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose. Incorrect.

Adhyátma-pradípa ALIAS **Ashṭávakra-ṭíká.** A commentary on the Ashṭávakra-sañhitá, a treatise, on emancipation by intellectual Yoga. The original is attributed to a saint named Ashṭávakra, the comment is by Vis'ves'vara.

Beginning. यदज्ञानाज्जगज्जातं यद्विज्ञानाद्विलीयते ।
तं नत्वा सच्चिदानन्दं कुर्व्वेऽध्यात्मप्रदीपकं ॥

इह तावदात्मानन्दानुभवपरिपूर्णः परिपूर्णीकृतानेकशिष्यत्वात् परमकारुणिकोभगवानष्टावक्रो मुनिः सकलमुमुक्षुजनमुद्दिधीर्षुः शिष्यं प्रति मोक्षोपायमादिशति मुक्तिमिच्छसिचेदित्यादिना ।

End. तस्य ग्रन्थस्य संख्याक्रमो विद्यते येषु
ते संख्याक्रमा ईदृशा अमी कथिता इत्यर्थः ।

Colophon. इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां संख्याक्रमादिकव्याख्यानं नाम एकविंशप्रकरणं । समाप्तेयं टीका ।

विषयः । अष्टावक्रकृताध्यात्मयोगग्रन्थस्य व्याख्यानम् ।

No. 2494. शीघ्रबोधभूषणम्, (द्वितीयकाण्डम्) । Substance, country-made yellow paper, 18 × 5 inches. Folia, 51. Lines, 8 on a page. Extent, 1,600 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose and verse. Incorrect.

S'íghrabodha-bhúshaṇa. Lessons on versification, rhetoric, &c., for the benefit of persons wishing to write poetry—a vademecum for young poets. By S'ívaprasáda Upádhyáya.

अथ द्वितीयकाण्डनिरूपणं ।

Beginning. काव्यव्यवहारकथनं सोदाहरणं निरूप्यते । चतुर्भिश्चरणैर्बद्धं छन्दः पद्यं निगद्यते । अन्यथा गद्यते गद्यं काव्यज्ञैः काव्यवर्त्मसु ॥ इत्यादि ।

End. ताम्बूलं गृहाण भूदेव वस्त्राभरणमुत्तमं ।
सम्यगाद्य फ+++ ग्रन्थकृद् वशविहृतौ (?)

Colophon. इति शीघ्रबोधभूषणे शिवप्रसादोपाध्यायकृते काव्यव्यवहारकथने द्वितीयकाण्डं समाप्तम् ॥

विषयः । अत्रादौ छन्दोनिरूपणं । तत्र मर्कटीमेरुपताकादिनिरूपणञ्च । अथ अलङ्कारनिरूपणं । तत्र प्रश्नोत्तर-यमक-चित्र-गूढ़-प्रहेलिका-श्लेष-वक्रोक्ति-अनुप्रासरूपशब्दालङ्कारप्रभे-

द्निरूपणं । उपमा-रूपक-उत्प्रेक्षा-समासोक्ति-अपह्नुति-समाहित-स्वभावोक्ति-विरोध-सार दीपक-सहोक्ति-अन्यदेशत्व-विशेषोक्ति-विभावनारूपार्थालङ्कारकथनं। अथ अर्थदोषनिरूपणं। शब्ददोषादिनिरूपणं । त्रिविधरीतिनिरूपणं । अलङ्कारदोषनिरूपणं । कविलक्षणकथनं। अथ कविशिक्षाकथनं । पद्यरचनाविधिकथनं । तत्र तत्र वर्णनीयकथनञ्च ।

No. 2495. स्मृत्यर्थसारः। Substance, country-made paper, 15 × 4 inches. Folia, 134. Lines, 9—10 on a page. Extent, 3,475 ślokas. Character, Nágara. Date, Sm. 1834. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, new. Prose and verse. Incorrect.

Smṛityarthasára. A digest of the rules of the Smṛiti regarding domestic rites and observances. Anonymous.

Beginning. गणेशब्रह्मविष्णीशानम्बा + लोकपान् ग्रहान् ।
दुर्गां मन्वादिकान् वन्दे व्याख्यातॄंश्च सदा गुरून् ॥
श्रीकण्ठश्रीकरार्य्याद्यैः श्रुतिस्मृतिपुराणगैः ।
स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णेष्वनेकधा ॥
अनुष्ठानोपकारार्थं स्मृतिच्छिन्नं प्रयत्नतः ॥
पुराणन्यायमीमांसासाङ्गवेदैः प्रपूरितं ॥
कामधेनौ प्रदीपेऽस्मिं कल्पवृक्षलतादिषु।
शम्भुद्रविड़केदारलोल्लटाद्यैश्च भाषितं ॥
मन्वाद्यनेकस्मृतिषु व्याख्यातप्रतिपादितं ।
स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये॥
प्राची दिशामनुक्तौ स्यादुदीचीशानदिक् तथा । इत्यादि ।

End. यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतं ॥
अज्ञानादथवा लोभात् प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णमिति हि श्रुतिः ॥
इति वचनात् ।

Colophon. इत्यादि स्मृत्यर्थसारः समाप्तः । स्वस्ति । संवत् । १८३४ ॥

विषयः। तत्रादौ स्मार्त्तपरिभाषाकथनं। युगधर्म्मकथनं। तत्रादिपुराणोक्तानि कलौ निषिद्धानि। अथ गर्भाधानादिषोड़शसंस्कारकथनं। तत्र गर्भाधानविधिः। पुंसवनविधिः। अन

पलोभनविधिः। सीमन्तोन्नयनविधिः। जातकर्म्मविधिः। नामकरणविधिः। निष्क्रमणविधिः। अन्नप्राशनविधिः। चौलविधिः। उपनयनविधिः। सावित्रीव्रतविधिः। वेदाब्दव्रतविधिः। आरण्यकव्रतविधिः। गोदानविधिः। विवाहविधिः। अन्त्येष्टिविधिः। कस्यचिन्मतानुसारेण मूकोन्मत्तयोः संस्कारकरणाभावकथनं। क्वचित् कुण्डगोलकयोरपि संस्कार्य्यताकथनं। उपवीतनिरूपणं। अभिवादनविधिकथनं। तत्र गुरुनिरूपणं। अनध्यायकालनिरूपणं। ब्रह्मचारिकर्त्तव्यानि। अथ विशेषेण विवाहेतिकर्त्तव्यताविधिनिरूपणं। तत्र गोत्रप्रवरनिरूपणं। आह्निककार्य्यनिरूपणं। तत्र मूत्राद्युत्सर्गविधिः। शौचविधिः। आचमनविधिः। तन्निमित्तानि। दन्तधावनविधिः। स्नानविधिः। वस्त्रपरिधानविधिः। सन्ध्याविधिः। होमविधिः। दर्भविधिः। वर्हिर्विधिः। स्रुक्स्रुवविधिः। देवतार्च्चनविधिः। माध्यन्दिनस्नानविधिः। देवयज्ञविधिः। पितृयज्ञविधिः। श्राद्धविधिः। श्राद्धकालनिरूपणं। ब्राह्मणनिरूपणं। अमावास्यापार्व्वणविधिः। तत्र पुष्पादिनिरूपणं। एकोद्दिष्टविधिः। सपिण्डीकरणविधिः। वैश्वदेवविधिः। संक्रान्तिनिरूपणं। तत्र पर्व्वनिरूपणं। एकादश्युपवासनिरूपणं। तिथ्यन्तरोपवासनिर्णयः। मलमासे कर्त्तव्यनिर्णयः। भक्ष्याभक्ष्यनिरूपणं। भोजनविधिः। शयनादिविधिकथनञ्च। अथ विस्तरेण द्रव्यशुद्धिनिरूपणं। शरीरशुद्धिविधिः। स्पृष्टास्पृष्टशुद्धिः। अथ अशौचनिरूपणं। तत्र विशेषेण जननमरणाशौचादौ व्यवस्थाकथनं। नारायणबलिविधिः। तत्र सर्पहते विशेषकथनं। आद्यश्राद्धविधिः। अथ सन्न्यासग्रहणविधिः। परिव्राजकस्य संस्कारविधिः। सन्न्यासिनां दहनविधिः। अथ प्रायश्चित्तविधिनिरूपणं। तत्र कर्म्मविपाककथनं। महापातकातिपातकानुपातकोपपातकप्रायश्चित्तकथनं। एवं सङ्करीकरणापात्रीकरणादिप्रायश्चित्तकथनं। अथ विशेषेण ब्रह्महत्याप्रायश्चित्तनिरूपणं। सुरापानप्रायश्चित्तं। मद्यपानप्रायश्चित्तं। सुवर्णस्तेयप्रायश्चित्तं। रत्नस्तेयप्रायश्चित्तं। गुरुतल्पप्रायश्चित्तं। महापातकिसंसर्गिप्रायश्चित्तं। अथ गर्भिणीबधप्रायश्चित्तं। गोबधप्रायश्चित्तं। व्रात्यप्रायश्चित्तं। सामान्यस्तेयप्रायश्चित्तं। ऋणापाकरणप्रायश्चित्तं। अपण्यानां विक्रयप्रायश्चित्तं। परिवेदनप्रायश्चित्तं। पारदार्य्यप्रायश्चित्तं। स्त्रीबधप्रायश्चित्तं। कृकलासादिहिंसाप्रायश्चित्तं। वृक्षगुल्मलतादीनां फलपुष्पादिभिरुपयोगिनीनां छेदे प्रायश्चित्तं। कुक्कुरादिदंशने प्रायश्चित्तं। व्रणादौ कृमिजनने प्रायश्चित्तं। व्रतलोपप्रायश्चित्तं। अवकीर्णिप्रायश्चित्तं मिथ्याभिशंसने प्रायश्चित्तं। रजस्वलास्पर्शप्रायश्चित्तं कन्यापुत्रयोर्विक्रये प्रायश्चित्तं अयाज्ययाजनप्रायश्चित्तं। अशुच्यध्ययने प्रायश्चित्तं। अग्निहोत्रत्यागादिप्रायश्चित्तं। विरुद्धवृत्तिकरणप्रायश्चित्तं। समुद्रयानादिप्रायश्चित्तं। असत्प्रतिग्रहप्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। भावदुष्टकालदुष्टभक्षणादिप्रायश्चित्तं। अशौच्यन्नभक्षणप्रायश्चित्तं। जातिभ्रंशकरप्रायश्चित्तं। प्रकीर्णकप्रायश्चित्तकथनञ्च। तत्र नीलीवस्त्रधारणशक्रचापदर्शनादिप्रायश्चित्तकथनं। रहस्यपापप्रायश्चित्तकथनं। कृच्छ्रचान्द्रायणादिलक्षणकथनं। तीर्थविधिकथनं। सर्व्वप्रायश्चित्तोपसंहारकथनञ्च।

No. 2496. हनूमत्संहिता । Substance, country-made yellow paper, 18 × 4 inches. Folia, 11. Lines, 8 on a page. Extent, 360 ślokas. Character, Bengali. Date, Sk. 1715. Place of deposit, Calcutta, Rájá Rájendranáráyaṇa Deva, Bahádur. Appearance, fresh. Verse. Generally correct.

Hanumat-sañhitá. A poem describing Ráma's arcadian recreations with Sítá. Among other incidents it describes a curious manifestation of eighteen thousand one hundred and eight nymphs from the person of Sítá, with all of whom Ráma engages in dalliance. By Hanumán.

Beginning. जयत्यनन्ताद्भुतसङ्गरप्रियो-
महाबली वीरवली सखाग्रणीः ।
प्रचण्डमार्त्तण्डसहस्ररश्मिः (कान्तिः)
श्रीरामपादद्वय एकतानः ॥
कुम्भोद्भवायाम्बुधिशोषणाय
विशुद्धविज्ञानशुभप्रदाय ।
श्रीरामपादद्वयनिश्चिताय
महामुनीन्द्राय नमो नमस्ते ॥
श्रीअगस्त्य उवाच ।
श्रुतं रामस्य माहात्म्यं तव वक्त्रान्महाकपे ।
ऐश्वर्य्यमतुलं तेजः प्रभावं परमात्मनः ॥
— — — — — — ।
श्रीहनूमानुवाच ।
साधु पूज्योऽसि ब्रह्मर्षे
मनसैवेति निश्चितं ।
गुह्याद्गुह्यतरं दिव्यं
तव प्रीत्या वदाम्यहं ॥ इत्यादि ।

End. श्रीहनूमहषेः काव्यं श्राव्यं भाव्यं सदैव हि ।
तस्मिन् ससीतो रामोऽपि तुष्टो भवति नान्यथा ॥

Colophon. इति श्रीहनूमत्संहितायां परमरहस्ये महारासरसोत्सवे पञ्चमोऽध्यायः ।
बाणेन्दुमुनिभूमौ हि शाके श्रीरामसुन्दरः ।
कर्क्कंकृष्णतृतीयायामलेखीद्रामरासकं ॥

विषयः। एकदा समानरूपगुणाभिः सह सहचरीभिः सरयूकूलोपवनं प्रस्थितया सीतया-समं रामचन्द्रस्य रासोत्सववर्णनं। वनशोभावर्णनं। विलासिनीनां विलासकलापवर्णनं। सरयूमाहात्म्यवर्णनं। रामेण सह विलासार्थं सीताशरीरात् साष्टोत्तरशताष्टादशसहस्रकामि-नीप्रादुर्भावकथनं। अथ रामोऽपि ताभिः सह विहर्त्तुं स्वात्मरूपान् पुरुषान् ससर्ज्जेतिवर्णनञ्च। कामिनीनां विविधविलासवर्णनं। जलविहारवर्णनं। पद्मदले महारासोत्सवशोभवर्णनं। रामरासोत्सवश्रवणादिमाहात्म्यकथनञ्च।

No 2497. सिद्धान्तविन्दुलघुटीका। Substance, country-made paper, 18 × 3 inches. Folia, 61. Lines, 9—10 on a page. Extent, 2,778 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Rájá Rájendra-náráyaṇa Deva, Bahádur. Appearance, fresh. Prose. Correct.

Siddhánta-vindu-laghu-ṭíká. A short commentary on the Siddhántavindu—a dissertation on the Vedántic doctrine, written by Madhusúdana Sarasvati in the form of an exposition of Sañkara's compendium of the Vedánta in ten stanzas called *Daśaśloki.* By Náráyaṇa Tírtha. Hall's Contributions, p. 109.

Beginning. श्रीशं शान्तमनन्तमद्वयसुखं स्वाध्यस्तसत्ताप्रदं
नत्वाचार्य्यवरं गुरूंश्च सततं सिद्धान्तविन्दोर्गिरः।
सत्प्रीत्यै श्रुतिमुख्यमाननिवहैः सिद्धान्तसंग्राहिका
दुर्ब्बोधाः प्रकटीकरोति मतिमान् नारायणाख्यो यतिः॥
परमात्मा परं ब्रह्म निर्ब्बिशेषः स्वसाक्षिकः।
सच्चित् सुखधनोऽद्वैतोऽन्वताधिष्ठानकारणं॥
तद्भेदभिया स्वस्य जाग्रत्स्वप्नादिसाक्षिणः।
स्वाध्यस्तानर्थविलयान्मोक्षस्तद्रूपसंस्थितिः॥
इति वेदान्तसिद्धान्तो भगवत्पादसम्मतः।
कृष्णद्वैपायनाभीष्ट इति सन्तोऽच सादराः।
एको वशी सर्व्वभूतान्तरात्मा
एकं रूपं वहुधा यत्करोति।
तमात्मस्थं ये नु पश्यन्ति धीरा-
स्तेषां सुखं शाश्वतं नेतरेषां॥

ब्रह्मविदाप्नोति परंब्रह्म विद्ब्रह्मैव भवतीत्यादिश्रुत्या — — — — — ग्रन्थारम्भं प्रतिजानीते, श्रीशङ्करेत्यादि।

End. कुत्यथतदनुकूलनर्वाणां श्रीमदाचार्य्यपरम राप्राप्तगुरुभूतत्वादितिभावः अतीष्टयं भाष्यभासतीविवरणाद्यपेक्षया कठिनरूपं तन्ममैव न गुरोरित्यर्थः।

Colophon. इति श्रीनारायणतीर्थकृता सिडान्तविन्दुलघुटीका समाप्ता।

विषयः। मधुसूदनसरस्वतीकृतसिडान्तविन्दुनामक वेदान्तप्रकरणस्य व्याख्यानम्।

No. 2498. शब्दप्रामाण्यखण्डनम्। Substance, country-made paper, 15 × 6 inches. Folia, 12. Lines, 6 on a page. Extent, 155 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇághát, Zillá Nadiyá. Kálidása Bhaṭṭáchárya. Appearance, fresh. Prose. Correct.

S'abdaprámáṇya-khaṇḍana. A refutation of the Vais'eshika doctrine of authentic speech not being a distinct class of evidence, as the Naiyáyikas believe, but only a form of inference. By Vaṅs'idhara.

Beginning. नमो भगवते तस्मै विष्णवे परमात्मने।

रूपनामविभेदेन जगत् क्रीड़ति यो यतः॥

अथशब्दो न स्वातन्त्र्येण प्रमाणं। कृप्तप्रमाणात् तदर्थसिद्धेर्नातिरिक्तं प्रमाणं कल्प्यते गौरवात्। इत्यादि।

End. असतः शशशृङ्गवज्ज्ञानासम्भवेन तस्यासिद्धत्वादित्यर्थः। इत्यास्तां विस्तरः।

Colophon. इति वंशधरीये शब्दप्रामाण्यखण्डनं।

विषयः। वैशेषिकमतेन शब्दस्यानुमानान्तर्गतत्वनिरूपणमुखेन तस्य पृथक्प्रामाण्यखण्डनं।

No. 2499. अद्वैतचन्द्रिका। Substance, country-made paper, 16 × 4 inches. Folia, 48. Lines, 7 on a page. Extent, 1,155 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇághâṭ, Zillá Nadiyá. Kálidása Bháṭṭáchárya. Appearance, fresh. Prose. Correct.

Advaita-chandríká. An essay on the adual Vedánta doctrine, and refutation of adverse theories. By Ananta Bhaṭṭa. This appears to be quite distinct from a work of this name by Brahmánanda Sarasvatí. *Cf.* Hall's Contributions, p. 157.

Beginning. पूर्णानन्दज्ञानशक्तिस्वरूपं नित्यमव्ययं।

प्रणम्य परमात्मानं क्रियतेऽद्वैतचन्द्रिका॥

अथ खल्वात्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्य इतिवाक्येन वेदान्तश्रवणं साक्षाद्विधीयते—इति चेन्न, विधित्वप्रयोजकरूपसम्पत्त्यभावात्। तथाहि वेदान्तश्रवणं नापूर्व्वविधिगोचरः प्राप्तत्वात्। इत्यादि।

End. तस्माच्छ्रुत्या युक्त्या बहुज्ञानां वचनाच्च जीवस्य सच्चिदानन्दनित्यशुद्धबुद्ध-मुक्तस्वरूपता सिद्धेति भावः ।

Colophon. इति श्रीमदनन्तभट्टकृता अद्वैतचन्द्रिका समाप्ता ।

विषयः । विविधवादखण्डनपूर्व्वकमद्वैतवादोपपादनं ।

No. 2500. स्मृतिरत्नम् । Substance, country-made paper, 15 × 4 inches. Folia, 215. Lines, 9 on a page. Extent, 8,305 ślokas. Character, Bengali. Date, Sk. 1699. Place of deposit, Ulá, Post, Ráṇághát, Zillá Nadiyá, Kálidása Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Generally correct.

Smṛiti-ratna. A digest of the Smṛitis regarding domestic rites, duties, and observances. By Raghunátha Bhaṭṭa.

Beginning. नत्वा कृष्णपदद्वन्द्वं द्वन्द्वज्ञानविनाशनं ।
क्रियते रघुनाथेन स्मृतिरत्नं प्रयत्नतः ॥

तत्रादौ स्मृतेः प्रामाण्यं विविच्यते । तत्र जैमिनिसूत्रं अपि वा कर्त्तृसामान्यात् प्रमाणमनुमानं स्यादिति । अस्यार्थो भाष्यकारमतानुसारेण प्रदर्श्यते । इत्यादि ।

End. सुस्थः स्वल्पोपचारेण दुःस्थः शक्त्याद्यपेक्षया ।
यत्नतः पूजनीयास्ते पूजिताश्चेत् शुभावहाः ॥
इति मत्स्यपुराणवचनात् ।

Colophon. इति महामहोपाध्यायश्रीरघुनाथभट्टविरचिते स्मृतिरत्ने तिथ्यादिप्रभा-समाप्ता । शकाब्दाः १६९९ ।

विषयः । स्मृतिप्रामाण्यनिरूपणं । धर्म्मस्वरूपविवेचनं । विधिस्वरूपादिनिरूपणं । नियम-परिसंख्यादिविवेचनं । अधिकरणस्वरूपादिकथनं । कालनिरूपणं । तिथ्यादिस्वरूपविवेचनं । तिथिद्वैधविवेचनं । तत्र तत्र विहितकृत्यविधानकथनञ्च । उपवासविधिकथनं । जन्माष्टमी-विधिकथनं । एकादश्यादिविधिकथनं । नवरात्रविधिकथनं । मन्वन्तरानिरूपणं । युगाद्याक-थनं । संक्रान्तिनिरूपणं । मलमासक्षयमासादिविवेकः । अशौचनिरूपणं । अङ्गास्पृश्यत्वादि-निरूपणं । दत्तकाशौचादिनिरूपणं । अशौचाभावकथनं । सहमरणानुमरणविधिकथनं । देशान्तरमृतस्य प्रे ाद्यवधारणविधिकथनं । पर्णनरदाहविधिः । उत्तरक्रियाधिकारिनिरू-पणं । अशौचान्तदिने कृत्यादिनिरूपणं । वृषोत्सर्गादिविधिः । चन्दनधेनुदानादिविधिः । सपि-ण्डीकरणादिकालनिरूपणं । पार्व्वणादिविधिकथनं । तीर्थश्राद्धादिकालनिरूपणं । अष्टकादि-श्राद्धकालनिरूपणादिकं । श्राद्धे विहिताविहितद्रव्यनिरूपणं । अद्भुतनिरूपणं । ग्रहयागादिवि-धिकथनञ्च ।

No. 2501. कालकौमुदी। Substance, country-made paper, 16 × 4 inches. Folia, 128. Lines, 9 on a page Extent, 5,143 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇághát, Zillá Nadiyá, Kálidása Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Incorrect.

Kála-kaumudí On times meet for religious rites and observances. By Gopála Bhaṭṭa, son of Harivańs'a Bhaṭṭa.

Beginning. वन्दे विश्वेश्वरं देवं भुक्तिमुक्तिप्रदायकं।
मातरं पितरं नत्वा निर्व्विघ्नेप्सितसिद्धये॥
श्रीमद्गोपालभट्टेन द्रविड़क्ष्मासुपर्व्वणा।
क्रियते विदुषां प्रीत्यै रम्या समयकौमुदी॥

अथ कालविवेचनं। तत्र कालो नित्यानित्यभेदेन द्विविधः। नित्यस्तु भगवदंशरूपतया अतिरिक्तकालवादिभिः स्मर्य्यते। तथा च विष्णुपुराणं। कालस्वरूपं रूपं तद्विष्णोर्म्मैत्रेय वर्त्तते। तथा, अनादिरेष भगवान् कालोऽनन्तोऽजरोऽमरः। इति—इत्यादि।

End. इति वचनाद् गुरुशिष्ययोरन्तरागमने अहोरात्रमनध्याय इति।

Colophon. इति हरिवंशभट्टचरणशरणगोपालभट्टकृता कालकौमुदी समाप्ता।

विषयः। नित्यानित्यभेदेन द्विविधकालनिरूपणं। प्रातःकृत्यादिकालनिरूपणं। तर्पणसन्ध्यावन्दनबलिकर्म्मभोजनादिकालनिरूपणं। शयनादिकालनिरूपणं। गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणपर्य्यङ्कारोपणदुग्धपाननिष्क्रमणरव्यवलोकनभूम्युपवेशनान्नप्राशनविद्यारम्भचूड़ोपनयनसमावर्त्तनविवाहकालनिरूपणं। समयाशुद्धिविवेचनं। मलमासादिविवेचनं। तिथिद्वैधव्यवस्थाकथनं। शुक्लप्रतिपदादिदर्शान्ततिथिविशेषे प्रत्येकं व्यवस्थानिरूपणं। हरिशयनादिकालनिरूपणं। नक्तव्रतादिकालनिरूपणं। एकभक्तादिव्रतकालनिरूपणं। उपाकर्म्मकालनिरूपणं। नवरात्रपूजाकालविवेचनं। श्राद्धकालविवेचनं। महालयापरपक्षश्राद्धादिकालनिरूपणं। एकोद्दिष्टसपिण्डीकरणादिकालनिरूपणं। जन्माष्टम्यादिकालनिरूपणं। एकादश्याद्युपवासतत्कारणादिकालनिरूपणं। द्वादशमासीयव्रतकालनिरूपणं। वापीकूपतड़ागाद्युत्सर्गकालनिरूपणं। भगवन्मूर्त्त्यादिप्रतिष्ठाकालः। संक्रान्तिनिरूपणं। ग्रहणकालनिरूपणं। अर्द्धोदयादियोगकथनं। नवोदकनवान्नादिकालनिरूपणं। कृषिकर्षणवीजवपनवाणिज्यादिकालकथनं। भाविवृष्टिज्ञानोपायकथनं। दीक्षाकालकथनं। अनध्यायकालकथनञ्च।

No. 2502 साहित्यदर्पणविवृतिः। Substance, country-made paper, 18 × 4 inches. Folia, 225. Lines, 7—8 on a page. Extent, 8,227 ślokas. Character, Bengali. Date, ? Place of deposit, Sántipur, Rámanátha

Takkaratna; another copy at Ulá Post Ráṇághát, Zillá Nadiyá, Paṇḍit Gopívallabha Bhaṭṭáchárya. Appearance, fresh. Prose. Incorrect.

Sáhitya-darpaṇa-vivṛiti. A commentary on the Sáhitya-darpaṇa, a treatise on rhetoric. By Rámacharaṇa.

Beginning. वागीश्वरीसरसगीतगुणप्रवाहं
सरस्वतीसततसेवितपादपद्मं ।
हेमाद्रिमारकतशेखरकान्तमीशं ।
वन्दे खगेन्द्रभूजमौलिगतं मुकुन्दं ॥
श्रीविश्वनाथकविराजकृतिप्रणीतं
साहित्यदर्पणमतिस्थगितप्रमेयं ।
श्रीमद्विधाय चरणं शरणं (गुरूणां) कवीनां
यत्नेन रामचरणो विवृणोति विप्रः ॥
यः परः परगुणप्रकाशने लब्धवर्णनिकरो जयत्यसौ ।
दोषगानरचिताघसञ्चयो यात्वधः पिशुनराजिरञ्जसा ॥

समग्रसिद्धान्तशब्दशमनसामनभिमते प्रकटदोषप्रकरविघटितादरकाव्यादिनिरूपणे सत्यपि अलङ्कारग्रन्थनिकरे तेषामभीष्टमदुष्टकाव्यादिनिरूपणमव्याहतराद्धान्तसन्तानमलङ्कारग्रन्थमारभमाणः प्रथमकारिकायाः सरस्वत्याराधनप्रयुक्तस्वार्थनिर्व्वाहप्रयुक्तिपरतां प्रकाशयितुमवतरणिकां स्वयमेवाह,—ग्रन्थारम्भ—इत्यादि ।

End. यथा वा,—मनोविद्धं सरोजाक्षीस्मरशक्त्या सुनिर्भरं ।
साचेद्वि+ + ते गाढ़ं स्वाश्रमालम्ब्यते लघु ॥
इत्युदाहरणमुन्नेयमिति ।

Colophon. इति साहित्यदर्पणविवृतौ दशमः प्रकाशः ।
अचिपचरसचन्द्रसम्मिते
हायने शकवसुन्धरापतेः ।
श्रीलरामचरणाग्रजन्मना
दर्पणस्य विवृतिः प्रकाशिता ॥
दोषं कश्चन वीक्ष्य सूक्ष्ममतयो+धाशपन्त्यच चेत्-
तन्मां स व्यथयेद्गुरोरपि गिरोनिर्दूषणा दुर्लभाः ।
छात्राणां मतिमादधाति यदसौ गूढ़ार्थसन्दीपना-
दानन्दं वितनोति यद्गुणविदां तेनास्म्यमोघश्रमः ॥

विषयः । विश्वनाथकविराजकृतसाहित्यदर्पणनामकालङ्कारशास्त्रस्य व्याख्यानम् ।

No. 2503. प्रायश्चित्तचन्द्रिका। Substance, palm-leaf, 13 × 2¼ inches. Folia, 181. Lines, 4—5 on a page. Extent, 2,075 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇághát, Zillá Nadiyá, Gopívallabha Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Incorrect.

Práyaśchitta-chandriká. On expiations for religious offences, accidents, or interruptions in course of religious observances. By Ramápati, of the Bhaiyála race.

Beginning. रघुनाथपदद्वन्द्वं निधाय हृदि मङ्गलं।
गणेशस्य प्रसादेन निर्व्विघ्नाः कार्य्यसम्पदः॥
रमापतिकृता ह्येषा प्रायश्चित्तस्य चन्द्रिका।
विमत्सराणां विदुषां मुदं वितनुतां सदा॥
तत्र प्रायश्चित्तस्वरूपमाह,—हारीतः। इत्यादि।

End. यथार्णवस्य रत्नानि मेरोस्तु कनकोपलाः।
संख्यातुं नैव शक्यन्ते भागीरथ्यास्तथा गुणाः॥

Colophon. इति भैयालकुलपङ्कजसहस्ररश्मिश्रीमद्रमापतिकृता प्रायश्चित्तचन्द्रिका परिपूर्णा।

विषयः। प्रायश्चित्तस्वरूपविवेचनं। बालवृद्धादिभेदेन प्रायश्चित्तस्य लाघवादिकथनं। तन्त्रप्रसङ्गविवेचनं। प्रायश्चित्तदिनतिथ्यादिनिरूपणं। प्रायश्चित्ताभावकथनं। यथाकालं प्रायश्चित्ताकरणे आधिक्यकथनं। ब्राह्मणादिवर्णभेदेन प्रायश्चित्ततारतम्यकथनं। महापातकातिपातकादिनिरूपणं। जन्मान्तरीयमहापातकादिचिह्नविवेककथनं। तत्र तत्र सामान्यतः प्रायश्चित्तकथनं। मुख्याशक्तौ अनुकल्पविधानं। गोमूल्यादिनिरूपणं। अतिपातकादौ अभ्यासे अनुकल्पाभावकथनं। पराककृच्छ्रादिलक्षणकथनं। ज्ञानाज्ञानकृतविशेषकथनं। प्रत्येकं वर्णविशेषस्य ब्रह्महत्याप्रायश्चित्तनिरूपणं। सुरापानप्रायश्चित्तकथनं। मद्यविशेषपाने क्षत्रियादीनां प्रायश्चित्ताभावकथनं। आपदि सुवर्णचौर्य्यादीनां प्रायश्चित्ताभावकथनं। गुर्व्वङ्गनानिरूपणं। अगम्यागमनादिप्रायश्चित्तकथनं। व्यभिचारप्रायश्चित्तकथनं। अभक्ष्यभक्षणप्रायश्चित्तं। अभक्ष्यनिरूपणं। दूषितान्नादिनिरूपणं। उच्छिष्टभोजनादिप्रायश्चित्तं। चण्डालादिस्पृष्टजलादिपानप्रायश्चित्तं। आपदि प्रायश्चित्ताभावकथनं। निरर्थकपशुहिंसादिप्रायश्चित्तं। वैधहिंसाविवेचनं। पलाण्डुलशुनादिभक्षणप्रायश्चित्तं। प्रकीर्णकप्रायश्चित्तकथनं। गोबधादिप्रायश्चित्तं। तदपवादकथनञ्च।

No. 2504. तीर्थकौमुदी। Substance, palm-leaf, 13 × 2 inches. Folia, 112. Lines, 8 on a page. Extent, 2,830 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭ, Zillá Nadiyá, Gopívallabha Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct

Tírtha-kaumudí. On the duties and rites to be observed during pilgrimages and notices of certain noted places of pilgrimage. By Sañkara, son of Vallála.

Beginning. नत्वा विघ्नेश्वरं देवं शङ्करेण विनन्यते।
मुदा पुराणविख्याता रम्येयं तीर्थकौमुदी॥

अथ तीर्थनिरूपणं। तीर्थचिन्तामणिधृतं गरुड़पुराणं। सर्व्वतीर्थानि वक्ष्यामि इत्यादि।

End. अनेन विधिना कुर्व्वन् सर्व्वं भवति चाक्षयमिति॥

Colophon. इति श्रीवल्लालसूनुशङ्करविरचिता तीर्थकौमुदी समाप्ता।

विषयः। तीर्थनिरूपणं। गङ्गामाहात्म्यकीर्त्तनं। गङ्गागर्भनिरूपणं। तीर्थयात्रायां कर्त्तव्यानि। तीर्थेषु वर्ज्जनीयकथनं। तीर्थयात्राधिकारिनिरूपणं। समयाशुद्धिविवेचनं। यात्रादिने नान्दीश्राद्धविधिकथनं। तीर्थस्नानविधिकथनं। तर्पणविधिकथनं। तत्र दानादिमाहात्म्यकथनं। प्रतिग्रहादौ दोषकथनं। तीर्थवासविधिकथनं। ग्रहणादौ गङ्गास्नानादिविधिकथनं। अर्द्धोदयादियोगकथनं। काश्यादितीर्थयात्राविधिः। उपवासविधिकथनं। मुण्डनादिविधिविवेचनञ्च। गयादितीर्थयात्राविधिकथनं। प्रयागादितीर्थयात्राविधिकथनं। काश्यादिमरणे मुक्तिलाभकथनं। साधारणतः सकलतीर्थयात्राविधिकथनं। यात्रादिप्रयोगकथनञ्च॥

No. 2505. विद्वन्मोदिनी। Substance, palm-leaf, 14 × 2¼ inches. Folia, 158. Lines, 5 on a page. Extent, 4,331 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭ, Zillá Nadiyá, Gopívallabha Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Vidvanmodiní. A commentary on the Raghuvañs'a of Kálidása. By Rámabhadra Nyáyálañkára, Bhaṭṭáchárya.

Beginning. विनायकं नमस्कृत्य सर्व्वविघ्नविनाशनं।
रघुवंशमहाकाव्यटीकां कर्त्तुं समारभे॥
व्याख्यायते यथाशक्ति निर्म्मत्सरधिया मया।
एतेन प्रीयतां नित्यं परात्मा रघुनन्दनः॥

इह खलु महाकविः कालिदासः प्रारिप्सितस्य महाकाव्यस्य निर्व्विघ्नपरिसमाप्त्यर्थं आशीर्न्नमस्क्रियावस्तुनिर्द्देशो वापि तन्मुखमित्याद्यालङ्कारिकशिष्टाचारपरिपालनाय च देवतानति-

रूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतोमङ्गलाय च निबध्नाति।—वागर्था-विति। अहं पार्व्वतीपरमेश्वरौ वन्दे अभिवादये। किम्भुतौ, वागर्थाविव सम्पृक्तौ नित्यसम्बद्धौ। एतच्च मीमांसकमतेन, तथाहि,—जैमिनिसूत्रं। औत्पत्तिकस्तु शब्दार्थयोः सम्बन्ध इति। इत्यादि।

End. रविसुतसहितेन सुग्रीवयुक्तेन सलक्ष्मणेन विभीषणेन अनुगतः सन्। प्रतस्थ इत्यत्र समवप्रविभ्यः स्थ इत्यात्मनेपदविधानं।

Colophon. इति महामहोपाध्यायश्रीरामभद्रन्यायालङ्कारभट्टाचार्य्यविरचितायां विद्वन्मोदिन्यां रघुवंशटीकायां द्वादशः सर्गः।

विषयः। कालिदासकृतरघुवंशाभिधान महाकाव्यस्य द्वादशसर्गान्तं व्याख्यानम्।

No. 2506. द्रव्यानुयोगतर्कणाटीका। Substance, foolscap-paper, 13 × 4 inches. Folia, 88. Lines, 9—10 on a page. Extent, 2,181 ślokas. Character, Bengali. Date, Sм. 1282. Place of deposit, Varhámpur. Bábu Rámadása Sen. Appearance, new. Prose. Incorrect.

Dravyánuyoga-tarkaṇá-ṭíká. A commentary on a Jain metaphysical work entitled 'Dravyánuyoga-tarkaṇá.' By Bhoja. The work belongs to the Svetámbara sect of the Jains.

Beginning. श्रियां निवासं निखिलार्थवेदकं
सुरेन्द्रसंसेवितमन्तरा + +।
प्रमाणयन्त्या + नय प्रदर्शकं
नमामि जैनं जगदीश्वरं महः॥
यदीयगोभिर्भुवनोदरस्थितं
कुवादभूच्छाय + + निवार्य्यते।
द्रव्यादियाथार्थ्यमपि प्रकाश्यते
जयत्यधीशः स जिनस्त्रयीतनुः।
वन्दे वीरपरम्परा+ + दहनार्थं सनाथं श्रिया
गाम्भीर्य्यादिगुणावलीप्रविलसद्रत्नौघरत्नाकर।
विद्यादेवपुरोहितप्रतिनिधिश्रीमत्तपागच्छपं
प्रख्यातं विजयाद्ययागुणधरं द्रव्यानुयोगेश्वरं॥
श्रीभावसागरं नत्वा श्रीविनीतादिसागरं।
प्रबन्धे तत्प्रसादेन किञ्चिद्व्याख्या प्र+यते॥

End. तेषां विनेयलेशेन भोजेन रचितोक्तिभिः ।
परस्वात्मप्रबोधार्थं द्रव्यानुयोगतर्कणा ॥

Colophon. इति श्रीद्रव्यानुयोगतर्कणायां पञ्चदशोऽध्यायः । १५ । १२८१ । १७ पौष ।
विषयः । द्रव्यानुयोगतर्कणाभिधानश्वेताम्बरजैनसम्प्रदायग्रन्थस्य व्याख्यानं ।

No. 2507. सङ्गीतदर्पणः । Substance, foolscap-paper, 12⅓ × 4 inches. Folia, 120. Lines, 5 on a page. Extent, 1,605 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Prose and verse. Generally correct.

Sañgíta-darpaṇa. A comprehensive treatise on music. By Dámodara, son of Lakshmídhara. The work is divided into 7 chapters, and treats successively of (1) Voice and the philosophy of music, *Gíta.* (2) Musical modes or tunes, *Rága.* (3) to (5) Variations of notes in singing with reference to the kind of feeling required to be excited by particular classes of songs, *A'lápa.* (6) Musical times or measures, and various modes of measuring or regulating them by musical instruments, *Tála.* (7) Dancing and acting.

Beginning. प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
सङ्गीतशास्त्रसंक्षेपसारभागो मयोच्यते ॥
भरतादिमतं सम्यगालोच्यातिप्रयत्नतः ।
श्रीमता हरिभट्टेन सज्जनानन्दहेतुना ॥
प्रचुररूपसङ्गीतिसारोद्धारो विधीयते ।
गीतं वाद्यं नर्त्तनञ्च चयं सङ्गीतमुच्यते ॥

End. गौण्डल्यामण्डलं प्रोक्तं तज्ज्ञैः कर्णाटदेशजं ॥
इति गौण्डली ॥

Colophon. इति श्रीमत्पण्डितलक्ष्मीधरसुतचतुरदामोदरविरचिते सङ्गीतदर्पणे नृत्याध्यायः सप्तमः सम्पूर्णः । समाप्तश्चायं सङ्गीतदर्पणः ।

विषयः । १ प्रथमाध्याये,—त्रिविधगीतकथनं । मार्गसङ्गीतलक्षणं । देशिलक्षणं । रागोत्पादनप्रकारः । नादमहिमा । नादकारणनिरूपणं । तत्र शारीरविवेककीर्त्तणं । अत्र हनूमद्विज्ञानेश्वरयोर्मतकीर्त्तनं । ब्रह्मग्रन्थिलक्षणं । श्रुतिलक्षणं । द्वाविंशप्रकारश्रुतिकथनं । स्वरशुस्वरादिलक्षणं । ग्रामलक्षणं । तद्भेदादिकथनं । मूर्च्छनालक्षणं । तद्भेदादिकथनं । शुद्धतानविवेकः । कूटतानविवेकः । खण्डमेरुनष्टोद्दिष्टप्रकरणं । अत्र संस्थानरूपं । साधारणस्वरनिरूपणं । स्थाय्यादिवर्णलक्षणं । ग्रहस्वरकथनं । न्यासस्वरकथनं । अलङ्कारप्रस्तारः । स्वरभेदनिरूपणञ्च ।

२ये,—रागविवेकः। रागाङ्गनिरूपणं। क्रियाङ्गनिरूपणं। उपाङ्गनिरूपणं। काण्डारण्यनिरूपणं। अत्र मतङ्ग-हनूमद्-भरतमतकथनं। उपरागनिरूपणं। रागरागिण्यालापसमयकथनं। अत्र इन्द्रप्रणीयमतं। हनूमन्मतं। रागार्णवमतञ्च। रागादीनामुदाहरणं।

३ये, ४र्थे, ५मे, च—आलापनप्रकारकीर्त्तनं। गमकनिरूपणं। गायनदोषकीर्त्तनं। रूपककथनं। प्रबन्धादिकीर्त्तनं। मगणादीनां देवतादिनिरूपणं। ध्रुवादिलक्षणं। तालादिभेदकथनं। तेषां लक्षणञ्च। रसविशेषे तालविशेषनियमनादिकं। रासकलक्षणादिकथनं। चतुरङ्गलक्षणं। शरभलीललक्षणं। सूर्य्यप्रकाशलक्षणं। चन्द्रप्रकाशलक्षणं। रणरङ्गलक्षणं। नन्दनलक्षणं। नवरत्नप्रबन्धलक्षणं। सङ्गीतगुणदोषविवेचनञ्च। तत-सुषिर-अवनद्ध-घनभेदाद् वाद्ययन्त्रस्य चातुर्व्विध्यनिरूपणं। वीणाभेदनिरूपणं। वंशमुरलिकादिलक्षणं। पटहादिकथनं। कांस्यतालादिकथनं। वामदेवोद्भवतालवर्णकथनं। एवं अघोरोद्भवस्य ईशानोद्भवस्य च ज्ञेयं।

६ अध्याये,—तालनिष्पत्तिकथनं। तालस्य दशप्राणनिरूपणं। अत्र हनूमदादिमतकथनं। मार्गभेदकथनं। क्रियाकथनं। अङ्गनिरूपणं। ग्रहनिरूपणं। जातिकथनं। कलानिरूपणं। लयनिरूपणं। यतिनिरूपणं। प्रस्तारकथनं। चच्चत्पुटादितालक्षणं। देशीतालनिरूपणं। चर्च्चर्य्यादीनां लक्षणं। मतान्तरेण चित्रतालादिकथनं। द्रुतमेरुनिरूपणं। सर्व्वमेरुसंख्यानादिकं। गुरुमेरुकथनं। लघुमेरुकथनं। संयोगमेरुकथनं। खण्डप्रस्तारकथनादिकं।

७मे अध्याये,—नृत्यनिरूपणं। तत्र छन्दादिलक्षणं। समपाद-संहतपाद लता करादिलक्षणं। नन्द्यावर्त्तलक्षणं। बर्द्धमानलक्षणं। सौष्ठव-पुष्पपुटप्रभृतिलक्षणञ्च। नर्त्तनभेदनिरूपणं। तत्र प्रसङ्गात् रसलक्षणं। स्थायिभावादिनिरूपणं। आङ्गिक-वाचिकाद्यभिनयलक्षणं। कटाक्षभेदलक्षणादिकं। लोकधर्म्मकथनं। वाद्यधर्म्मकथनं। नृत्यमुद्रादिकथनं। गमनकरविक्षेपादिप्रकारनामादिकथनं। नान्दीलक्षणं। नटनर्त्तकादीनां लक्षणं। यतिनृत्यलक्षणं। वर्णनृत्यं। शब्दनृत्यं। विवर्त्तननृत्यं। चमत्कारनृत्यं। गीतनृत्यं। रागाभिनयप्रकारकीर्त्तनं। ध्रुवगीतनृत्यं। देशीनृत्यविधिः। ऐरणीनृत्यकथनं। गौण्डलीनृत्यकथनञ्च।

No. 2508. वेदानध्यायः। Substance, country-made paper, 8 × 3 inches. Folium, 1. Lines, 14. Extent, 11 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, fresh. Prose. Incorrect.

Vedánadhyáya. A summary of the days when the Vedas should not be read as a scholastic duty. Anonymous.

Beginning. वेदे अनध्यायः। + + अमावास्यायामिति सर्व्वानध्यायः, श्राद्धाशन चोल्काविद्युज्र्झञ्झूमिचलनाग्न्युत्पाते।

End. इति त्रिरात्रं सद्योच्य विप्रतिष्ठेरन्।

Colophon. इति वेदानध्यायः सम्पूर्णः।

विषयः। यस्मिन् यस्मिन्नहनि वेदाध्ययनं निषिद्धं तन्निरूपणं।

No. 2509. रागमाला। Substance, country-made paper, 7 × 4½ inches. Folia, 10. Lines, 10 on a page. Extent, 146 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Incorrect.

Rágamálá. A treatise on the various musical modes recognised by the Hindus and their mutual relations and alliances. By Jívarája Díkshita.

Beginning. आनन्दैकमयो मनःसुखकरो यो भुक्तिमुक्तिप्रदो
नादात्मा सकलेन्द्रियापहरणो दुःखस्य विध्वंसनः।
भद्रः पञ्चशरागद्भुत उशतीं लक्ष्मीं दधानो यश-
स्वान्वानो बलपुष्टितुष्टिकरणो रागः शिवायास्तु वः॥

End. ता एकैकस्यापि रागस्य पञ्चमस्यापि योषितः।
क्रमेण कोविदैर्ज्ञेया मुनीनां वचनादिमाः॥
जीवराजस्वकारैर्नां राघवस्यानुशासनात्।
रागमालान्तु तस्यैव मनोरञ्जनहेतवे॥

Colophon. इति श्रीमज्जीवराजदीक्षितविरचिता रागमाला समाप्ता।

विषयः। रागाणां लक्षणं। तेषां पत्न्यादिनिरूपणं। तासामवान्तरभेदकथनं। आलापसमयकीर्त्तनञ्च।

No. 2510. विवेकशतकम्। Substance, country-made paper, 13 × 4 inches. Folia, 6. Lines, 13 on a page. Extent, 180 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, old. Verse. Correct.

Viveka-śataka. A century of verses on dispassion or indifference to worldly attractions, for the sake of devotion to Kṛishṇa. By Prabodhánanda Sarasvatí.

Beginning. देहः प्राप्ता विरसजरसं चीणमायुर्ममाभूत्
खञ्जा शक्तिर्विषमविषयग्राहिणी चेन्द्रियाणां।

दूरे वृन्दावनतटभुवः खेदभेदप्रदायाः
किं कुर्व्वेऽहं व्रतकुलशिरोरत्न + + न वेद्मि ॥

End. श्रीकुण्डलमण्डिताननविधौ दन्तप्रभाकौमुदी-
विध्वस्तव्रजवल्लभाषितमपि प्रोत्फुल्लवक्त्राम्बुजे ।
वंशीनादविमोहिताखिलजगज्जन्तौ किशोराकृतौ
श्रीकृष्णे रतिरस्तु मे प्रति + + प्रेमाब्धिसंबन्धिनी ॥

Colophon. इति श्रीप्रबोधानन्दसरस्वतीविरचितं विवेकशतकं समाप्तं ।

विषयः । निर्व्वेदोदयात् उपरतस्पृहस्य श्रीकृष्णसमीपे स्वप्रेमभक्तिप्रार्थनं ।

No. 2511. नाममाला । Substance, country-made paper, 10 × 4 inches. Folia, 155. Lines, 18 on a page. Extent, 10,081 ślokas. Character, old Nágara. Date, Sm. 1120. Place of deposit, Bahrámpur, Bábu Ráma-dása Sen. Appearance, old. Prose. Correct.

Námamálá. A commentary on his own Sanskrit dictionary named 'Abhidhánachintámaṇi.' By Hemachandra S'uri.

अर्हते नमः ।

Beginning. धर्म्मतीर्थकृतां वाचं नत्वा तत्त्वाभिधायिनीं ।
+ + + नाममालाख्यां विवृतिं विदधाम्यहं ॥
श्रेयोऽर्थमयमारम्भः किं तथात्मविकत्थनैः ।
परात्मनिन्दा + + हि नाद्रियन्ते मनीषिणः ॥
प्रामाण्यं वासुकेर्व्याड़ेर्व्युत्पत्तिर्धनपालतः ।
प्रपञ्चश्च वाचस्पतिप्रभृतेरिह लभ्यतां ॥
तत्रायमादिश्लोकः,—प्रणिपत्यार्हतः —इत्यादि ।

End. इयन्त—इति संख्यानं निपातानां न विद्यते ।
प्रयोजनवशादेते निपात्यन्ते पदेषु च ॥

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचितायां + + + भिधानचिन्तामणिनाममालाटीकायां सामान्यकाण्डः षष्ठः । समाप्ता चेयमभिधानचिन्तामणेर्नाममालाख्या टीका । ११ १० । संवत्सरे ।

विषयः । स्वकृत्यभिधानचिन्तामण्यभिधानकोषस्य व्याख्यानं ।

No. 2512. लिङ्गानुशासनटिप्पनी । Substance, country-made paper, 15 × 5½ inches. Folia, 181. Lines, 10 on a page. Extent, 8,550 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, old. Prose. Correct.

Liṅgánuśásana-ṭippaní. Glossarial notes on Amara Siñha's Náma-liṅgánuśásana. By S'rírama S'armá.

Beginning. यत्पादपद्मं प्रणिपत्य धाता
भूतानि चक्रे तमहं प्रणम्य ।
सलिङ्गनाम्नोरनुशासनस्य
टीकामिमां बालधिये तनोमि ॥

इह विघ्नविघाताय उचिते+ देवसेवां कुर्व्वन् शिष्यशिक्षायै आदौ निबध्नाति यस्येति ।

End. किन्तु सन्तः परोत्कर्षं प्रकाशयन्तः तद्गुणान्
काव्यग्रन्थगुणान् तन्वन्ति विस्तारयन्तीत्यर्थः ।
लिङ्गसङ्ग्रहवर्गस्य टिप्पनी बहुसम्मता ।
श्रीरामशर्म्मणाकारि सुमतिप्रतिपत्तये ॥

विषयः । अमरसिंहकृतनामलिङ्गानुशासनकोषस्य व्याख्यानं ।

No. 2513. ऐश्वर्य्यकादम्बिनी । Substance, country-made paper, 11 × 3½ inches. Folia, 15. Lines, 8 on a page. Extent, 224 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Correct.

Aiśvarya-kádambiní. A poem in praise of Kṛishṇa's career at Vṛindávana and Gokula. By Bidyábhúshaṇa.

Beginning. कृष्णाभिधायै कनकाम्बरायै
श्यामोरुतन्वै सरसीरुहाक्ष्यै ।
नित्यश्रियै नित्यगुणव्रजायै
नमोऽस्तु तस्यै परदेवतायै ॥
सनातनं रूपमिहोपदर्शय-
न्नानन्दसिन्धुं परितः प्रवर्द्धयन् ।
अन्तस्तमस्तोमहरः स राजतां
चैतन्यरूपो विधुरङ्गतोदयः ॥

End. षिद्याभूषणभणितं हरिचरितं चित्सुखात्मकं ह्येतत् ।
परिगीतं शुकमुनिना सद्भिः सेव्यं स्वरूपमिव ॥
ऐश्वर्य्यपूर्व्वंयमपूर्व्वपर्व्वा
कादम्बिनी नन्दसुतावलम्बा ।
भूयाद्दियत्सिन्धुशशाङ्कसंख्या
सतां प्रिया तच्चरणाश्रितानां ।

Colophon. इतैश्वर्य्यकादम्बिन्यां श्रीगोकुलगमनाद्युत्तरलीलावर्णनं सप्तमी इष्टिः ।

विषयः । श्रीकृष्णस्य त्रिपाद्विभूतिवर्णनं । एकपाद्विभूतिगतभगवत्स्वरूपाद्याविर्भावस्याविर्भावक्रमवर्णनं । वसुदेवनन्दादीनां इष्णिवंशोद्भवत्वादिवर्णनं । राधिकाया जन्मकथनं । नन्दनृपराजधानीवर्णनं । सपरिकरश्रीकृष्णजन्मोत्सववर्णनं । कंसबधान्त श्रीकृष्णस्य बाल्यकैशोरादिलीलावर्णनं । मुनिगणकृतश्रीकृष्णस्तोत्रं । गोकुलगमनाद्युत्तरलीलावर्णनं ।

No. 2514. गोवर्द्धनभट्टाष्टकम् । Substance, country-made yellow paper, 11 × 5 inches. Folium, 1. Lines, 18. Extent, 18 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Correct.

Govardhana-bhaṭṭáshṭaka. A hymn in eight stanzas, in praise of Kṛishṇa as the lifter of the Govardhana Hill. By Gavardhana Bhaṭṭa.

Beginning. व्याप्तं सर्व्वदिशासु शीतलतरं मोहाभयध्वंसनं
पीत्वा यस्य यशोऽमृतं भुवि जना मुह्यन्ति शोधस्पृहां ।
तं धीमन्तमनन्तसद्गुणयुतं भक्तिप्रभाभाजितं
श्रीगोवर्द्धननामधेयभगवत्प्रेष्ठं मदिष्टं भजे ॥

End. एतत् स्तोत्रमगण्यसद्गुणमहारत्नाकरस्योल्लसन्
श्रीगोवर्द्धननामधेयमहतो भट्टस्य यो वै पठेत् ।
तं श्रीनन्दसुतो निजाङ्घ्रिकमले भक्तिं ददन्निर्म्मलां
प्रीत्या साधुजनं सदा सुखयताद्गोवर्द्धनैकप्रियः ॥

Colophon. इति गोवर्द्धनभट्टाष्टकं सम्पूर्ण' ।

विषयः । भगवद्रूपस्य गोवर्द्धनगिरेः स्तवनं ।

No. 2515. काव्यालङ्कारसूत्रवृत्तिः । Substance, country-made paper, 13 × 5 inches. Folia, 37. Lines, 10 on a page. Extent, 900 ślokas. Character,

Nágara. Date, SM. 1898. Place of deposit, Bahrámpur, Bábu Rámadása Sen; another copy at Bráhmanapur, Zillá Nadiyá, Rájívalochana Gañgopádhyáya. Appearance, new. Prose and verse. Generally correct.

Kávyálañkára-sútra-vṛitti. An elaborate treatise on poetry and rhetoric. By Vámana A'chárya.

Beginning. प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते ॥
काव्यं ग्राह्यमलङ्कारात् । काव्यं खलु ग्राह्यमुपादेयं भवति अलङ्कारात् ।

End. सदसन्तो मया शब्दा विविच्याल्पेन दर्शिताः ।
अनयैव दिशा कार्य्यं शेषाणामप्यवेक्षणम् ॥

Colophon. इति काव्यालङ्कारसूत्रवृत्तौ प्रायोगिके पञ्चमेऽधिकरणे द्वितीयोऽध्यायः । समाप्तं प्रायोगिकं नाम पञ्चममधिकरणं । इति वामनाचार्य्यकृता काव्यालङ्कारसूत्रवृत्तिः समाप्ता । संवत् १८९८ ।

विषयः । प्रथमाधिकरणे—काव्यस्योपादेयत्वादिनिरूपणं । अधिकारिनिरूपणं । रीतेः काव्यात्मत्वकथनं । वैदर्भी । गोड़ी । पाञ्चाली । काव्यहेतुनिरूपणं । गद्यपद्यभेदेन काव्यस्य द्वैविध्यं निरूपणं । दशरूपकप्रशंसा । काव्याङ्गनिरूपणं ।

२ये अधिकरणे—दोषनिरूपणं । असाधु-कष्ट-ग्राम्य-अप्रतीत-अनर्थकरूपपञ्चविधपद-दोषकथनं । अन्याय-नेयार्थ-गूढ़ार्थ-अश्लील-क्लिष्टरूपपञ्चविधपदार्थदोषकथनं । भिन्नवृत्त-यति-भ्रष्ट-विसन्धिरूपत्रिविधवाक्यदोषनिरूपणं । व्यर्थ-एकार्थ-सन्दिग्ध-अयुक्त-अपक्रम-लोकविरुद्ध-विद्याविरुद्धरूपसप्तविधवाक्यार्थदोषनिरूपणं ।

३ये अधिकरणे,—गुणनिरूपणं । ओजः प्रसाद-श्लेष-समता-समाधि-माधुर्य्य-सौकुमार्य्य-उदारता-अर्थव्यक्ति-कान्तिरूपदशविधशब्दगुणनिरूपणं । एवमर्थगुणकथनं ।

४र्थे अधिकरणे,—अलङ्कारनिरूपणं । यमकानुप्रासरूपद्विविधशब्दालङ्कारनिरूपणं । उपमानिरूपणं । तद्दोषकथनादिकं । प्रतिवस्तूपमा । समासोक्तिः । अप्रस्तुतप्रशंसा । अपह्नुतिः । रूपकं । श्लेषः । वक्रोक्तिः । उत्प्रेक्षा । अतिशयोक्तिः । ससन्देहः । विरोधाभासः । विभावना । अनन्वयः । उपमेयोपमा । परिवृत्तिः । क्रमः । दीपकं । निदर्शनं । अर्थान्तरन्यासः । व्यतिरेकः । विशेषोक्तिः । व्याजस्तुतिः । व्याजोक्तिः । तुल्ययोगिता । आक्षेपः । सहोक्तिः । समाहितं । संसृष्टिः ।

५मे अधिकरणे,—कविसमयः । शब्दशुद्धिः ।

No. 2516. द्रव्यानुयोगतर्कणा । Substance, foolscap paper, 13 × 4 inches. Folia, 19. Lines, 7 on a page. Extent, 322 ślokas, Character,

Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Incorrect.

Dravyanuyoga-tarkaṇá. On the metaphysics of the 'Svetámbara Jains. Anonymous.

Beginning. श्रीयुगादिजिनं नत्वा कृत्वा श्रीगुरुवन्दनं।
आत्मोपकृतये कुर्व्वे द्रव्यानुयोगतर्कणां॥
विना द्रव्यानुयोगोऽहं चरणकरणाख्ययोः।
साव+ति कृतिप्रेष्ठं निर्द्दिष्टं सम्मतौ स्फुटं॥

End. खद्योतप्रतिमा क्रिया तु ज्ञानन्तु भानूपम-
मित्येतन्महदन्तरं कलियुगे कश्चिद्बुधो विन्दति।
वाह्याभ्यासविनिर्म्मितो हि दुरितक्षेपो भवेद्दर-
क्षुरक्षोदकणोपमं किमपरं वाक्यं बुधा ब्रूमहे॥

विषयः। शुक्लाम्बरजैनसम्प्रदायानुमतषट्पदार्थविवेचनं। तत्र द्रव्यस्वरूपकीर्त्तनं। गुणलक्षणं। सामान्यकथनं। तिर्य्यक्सामान्यलक्षणं। शक्तिरूपद्रव्यकथनं। दिगम्बरनयेन शक्तिरूपगुणकथनं। केषां चित् द्रव्याणां चौन्द्रियग्राह्यत्वकथनं। गुणपर्य्यायाणां एकेन्द्रियग्राह्यत्वकथनं। संज्ञानिरूपणं। द्रव्यगुणपर्य्यायाणां पारमार्थिकभेदवादनिरसनं। योगाचारमतखण्डनं। नैयायिक कापिलमताक्षेपः। भेदाभेदवादव्यवस्थापनं। सप्तभङ्गिन्यायनिरूपणं। घटपटादिवदेकार्थस्यापि जीवादेस्त्रिरूपत्वनिरूपणं। दिगम्बरनयेन नवविधन्यायादिकथनं। द्रव्यार्थिकस्य दशविधभेदप्रदर्शनं। पर्य्यायार्थिकस्य षड्विधत्वनिरूपणं। त्रिविधनैगमनयनिरूपणं। द्विविधसङ्ग्रहनयविवरणं। द्विविधव्यवहारनयविरूपणं। द्विविध ऋजुसूत्रनयविवेचनं। एकविधशब्दनयनिरूपणं। एकविधसमभिरूढ़नयकथनं। एकविधभूतनयकीर्त्तनं। त्रिविधोपनयनिरूपणं। असद्भूतव्यवहारस्य त्रिविधत्वनिरूपणं। नवविधोपचारनिरूपणं। द्विविधनिश्चयकथनं। द्विविधव्यवहारकथनं। तत्र तत्र अवान्तरभेदकथनञ्च। अत्र दिगम्बरदेवसेनकृतनयचक्रग्रन्थसंवादकथनं। श्वेताम्बरदिगम्बरयोः समानतन्त्रत्वकथनं। नयावतारकाणामाचार्य्याणां नामकथनं। अन्यान्यनयवादिमतखण्डनं। पदार्थस्य उत्पाद-ध्रुव-विनाशरूपत्रिविधलक्षणकीर्त्तणं। क्षणिकवादिबौद्धमतखण्डनं। उत्पादविनाशादिप्रकारकथनं। धर्म्माधर्म्मादिषड्विधद्रव्यनिरूपणं धर्म्मास्तिकायलक्षणं। अधर्म्मास्तिकायलक्षणं। आकाशास्तिकायलक्षणं। कालनिरूपणं। अत्र दिगम्बरमतदूषणं। पुद्गलास्तिकायलक्षणं। जीवास्तिकायलक्षणादिकं। सामान्यतोदशविधगुणकथनं। आत्मादीनां विशेषगुणकथनं। पारिणामिकस्वभावनिरूपणं। आत्मस्वरूपनिरूपणं। जीवस्वभावकथनं। चैतन्यस्वरूपकथनं। पर्य्यायभेदनिरूपणञ्च।

No. 2517. साध्यसाधनकौमुदी। Substance, country-made yellow paper, 11 × 4½ inches. Folia, 27. Lines, 6 on a page. Extent, 497 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen; another copy at Ráṇágháṭa, Bábu Surendranáth Pála Chaudhuri. Appearance, new. Prose and verse. Correct.

Sádhya-sádhana-kaumudí. On worship and the object of worship, a treatise on Bhakti or devotion to Krishṇa as god, as a friend, as a mistress, &c., &c. By Vis'vanátha Chakravarti.

Beginning. गुरुकृष्णवैष्णवानां प्रसादलवलाभतः।
साध्यसाधनविस्तारं कथयामि यथामति॥

End. शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक्।

इति श्रीभागवते,—भक्त्या सञ्जातया भक्त्या विभ्रत्युत्पुलकां तनुं। इति साध्यसाधनकौमुद्यां साधनभक्तिनिरूपणात्मके चतुर्थांके भक्तसमूहप्रफुल्लकुमुदश्चतुर्थः।

Colophon. इति श्रीविश्वनाथचक्रवर्त्तिना विरचितः साध्यसाधनकौमुदीग्रन्थः समाप्तः।

विषयः। १प्रथम कुमुदे,—भक्तानां दशाभेदनिरूपणं। शान्तिरतिकथनं। दास्यरतिकथनं। सख्यरतिकथनं। वात्सल्यरतिकथनं। माधुर्य्यरतिकथनं। निष्ठा-सेवा-निःसम्भ्रमता-स्नेह-शृङ्गारभेदेन माधुर्य्यस्य पञ्चगुणत्वकथनं। सिद्धभक्तलक्षणं। सम्प्राप्तसिद्धलक्षणं। नित्यसिद्धलक्षणं। साधनसिद्धलक्षणं। कृपासिद्धादिलक्षणं। साधकभक्तलक्षणं। साधन-भाव-प्रेमभेदेन रतेस्त्रैविध्यकथनं। वैधीकथनं। रागानुगाकथनं। भावलक्षणं। अस्य अवान्तरभेदनिरूपणं। क्षान्तिमानशून्यतासमुत्कण्ठादेर्लक्षणं। प्रेमलक्षणं। सान्द्रानन्दविशेषात्मा। श्रीकृष्णाकर्षिणी भक्तेः रसत्वनिरूपणं।

२द्वितीये कुमुदे,—साध्यवस्तुनिरूपणं। विषयसम्बन्धाभिमानस्वरूपादीनां लक्षणं। विलासावेशप्रकाशादिनिरूपणं। साधारणी-समाञ्जसा-समर्थाभेदेन रतेः पुनस्त्रैविध्यकथन प्रेमोत्पत्तिप्रकारः। प्रौढमध्यमन्दभेदात् प्रेम्नस्त्रैविध्यनिरूपणं। पूर्व्वरागादिभेदकथनं। महाभावलक्षणादिकं।

३ये कुमुदे,—सखीलक्षणं। नित्यसखी। प्राणसखी। प्रियसखी। परमप्रेष्ठसखी। ललितायाः स्वभावनिर्णयः। एवं विशाखायाः। चित्रायाः। चम्पकलतायाः। तुङ्गविद्यायाः। इन्दुरेखायाः। रङ्गदेव्याः सुदेव्याः। सखीनां क्रियानिरूपणं।

४र्थे कुमुदे—साधनवस्तुनिरूपणं। चतुःषष्टिसाधनाङ्गनिरूपणं। वैधीभक्तिनिरूपणं। रागानुगाभक्तिलक्षणं। कामरूपाभक्तिकथनं। सम्बन्धरूपाभक्तिनिरूपणं। अधिकारिलक्षणं।

No. 2518. गणोद्देशदीपिका। Substance, country-made yellow paper, 12 × 4½ inches. Folia, 15. Lines, 8 on a page. Extent, 262 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Incorrect.

Gaṇoddeśa-dípiká. Brief notices of the mistresses, followers, friends, and associates of Kṛishṇa during his sojourn at Vrindávana and Gokula. Anonymous.

Beginning. ये विश्रुताः परीवारा राधामाधवयोरिह।
तन्नियोगाश्च लीलाश्च तथा परिकरादयः॥
मथुरामण्डले लोके ग्रन्थेषु विविधेषु च।
पुराणे चागमादौ च तद्भक्तेषु च साधुषू॥
ते समासाद्विलिख्यन्ते स्वसुहृत्परितुष्टये।
आनुपूर्व्वीविधानेन रतिप्रथितवर्त्मना॥

End. कलावती रसवती श्रीमती च सुधामुखी।
विशाखा कौमुदी माध्वी शारदा चाष्टमी स्मृता॥
इति ग्रन्थकृते रत्नप्रभायाः कथने पुनः।
भक्तानां सुखरूपः श्रीरूपो नित्यं व्रजं ययौ॥

Colophon. इति गणोद्देशदीपिका समाप्ता।

विषयः। श्रीकृष्णस्य परीवारनिरूपणं। तत्र पशुपाल-वैश्याभीर-गुर्जरादीनां लक्षणं। नन्दादीनां जन्मादिकथनं। यशोदाया रूपवर्णनं। तस्या नामावलीकथनं। रोहिणीसुनन्द-प्रभृतीनां विवरणं। जटिलाकुटिलादीनां रूपादिकथनं। परिचयकीर्त्तनञ्च। गोकुलस्यब्राह्म-णानां विवरणं। यूथलक्षणादिकथनं। तत्र ललिताविशाखाचम्पकलताचित्रादीनां रूपवर्णनं। पत्यादिकथनञ्च। वरसमाजस्थानां कलावती-शुभाङ्गदा-हिरण्याक्षी-रत्नलेखाप्रभृतीनां रूपव-र्णनं। पत्यादिकथनञ्च। वयस्यानां सामान्यकर्म्माणि। पुष्पेषु मण्डलकथनं। बालपाशालक्षणं। कर्णपूरलक्षणं तद्भेदकथनञ्च। एवं कुण्डल-पुष्पिका-कर्णिकाङ्गद-चन्द्रातपादीनां लक्षणं। वि-शाखायाः स्वभावकार्य्यादिवर्णनं। एवं चम्पकलतादीनां। पिण्डकेलि-वितण्डिका-पुण्डरीकादीनां विवरणं। दूतीनिरूपणादिकं। ललिताविशाखाचम्पकलतादीनां प्रियसहचरीकथनं।

No. 2519. श्रीकृष्णभावनामृतम्। Substance, country-made paper, 15½ × 5 inches. Folia, 104. Lines, 7 on a page. Extent, 2,929 ślokas. Character, Bengali. Date, Sk. 1762. Place of deposit Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Generally correct.

S'ríkṛishṇa-bhávanámṛita. An epic poem on the career of Kṛishṇa in Gokula and Vrindávana.

Beginning. मूलस्य,—

श्रीकृष्णचैतन्यघनं प्रपद्ये
सपद्यपध्वस्ततमःप्रपञ्चं ।
पार्श्वेषुकोट्यर्व्वुदकान्तिधारा
परम्पराप्यायितसर्व्वविश्वं ॥

End. सोऽयं श्रीलोकनाथः स्फुरितपुरुकृपाराशिभिः स्वैः समुद्यन्।
उद्धृत्योद्धृत्य यो नः प्रचुरतमतमःकूपतोः दीपिताभिः ।
दृग्भिः स्वप्रेमवीथ्या दिशमदिशदहो यां श्रिता दिव्यलीला
रत्नाढ्यां विन्दमाना वयमपि निभृतं श्रीलगोबर्द्धनं स्मः ॥

Colophon. इति श्रीकृष्णभावनामृते महाकाव्ये नक्तान्तनलीलास्वादनो नाम विंशतितमः सर्गः ।

विश्वाकाशविकारसम्मितशके वारे गुरोः फाल्गुने
विश्वानन्दिनि पूर्णिमाप्रतिपदोः सन्धौ सरस्योस्तटे ।
गान्धर्व्वागिरिधारिणोः सरभसं दोलाधिरूढाङ्गयोः
श्रीचैतन्यदिने तदेतदुदगात्काव्यं भजत्पूर्णतां ॥

— — — — — — —।

समाप्तश्चायं श्रीकृष्णभावनामृतग्रन्थः। शाक १७९१ ।

विषयः। १ प्रथमसर्गे,—राधाकृष्णयोः शय्योत्थानकौतुकवर्णनं। तत्र प्रभातवर्णनं। शुकशारिकयोरालापवर्णनञ्च । २ये,—तयोः प्राभातिकचरितवर्णनं। अन्तरितानामालीनां विलासमाकलयन्तीनामन्योन्यमालापवर्णनं। परिहासवर्णनञ्च। ३ये,—तासां मन्दिरशोभावर्णनं। अनुरागातिशयेन राधायाः श्याम्यायाः पुरतः नैशविलासविवरणकीर्त्तनं। रसोद्गारवर्णनं। ४र्थे,—राधायाः दन्तधावन केशरञ्जन-स्नान-विलेपन-वसनपरिधानादिकालीनशोभावर्णनं वेणीबन्धन तिलकरचन-भूषणधारणादिसमये सखीनां व्यङ्गोक्तिवर्णनं। अलङ्कारशोभावर्णनञ्च। ५मे,—नन्दालयगमनार्थं राधिकामभ्यर्थयन्त्या कुन्दवल्ल्या सह कलङ्कशङ्काकुलितायाः राधिकाया आलापवर्णनं। अत्र जटिलायाः प्रातिकूल्यवर्णनं। राधायाः नन्दालयगमनसमये सखीनां परिहासवर्णनं। राधाकृष्णयोरन्योन्यं दर्शनोत्सववर्णनं। तत्र राधाया अन्नादिपाकप्रक्रियावर्णनञ्च। ६सर्गे,—श्रीकृष्णस्य शुकशावकपाठनवर्णनं। मल्लस्थलीषु वयस्यैः सार्द्धं क्रीड़नवर्णनञ्च। तस्य स्नानभोजनादिवर्णनं। तत्र ब्राह्मणवटोः कौतुकवर्णनं। वयस्यानां वक्रोक्तिवर्णनञ्च। ७सर्ग—निजगृहस्थितानां सहचराणां श्रीकृष्णनिकटगमनार्थमुत्कण्ठा-

वर्णनं। गोचारनार्थं श्रीकृष्णस्य वनगमनकाले पुरवासिनामवस्थावर्णनं। ८सर्गे,—राधाया मूर्च्छादिवर्णनं। सखीभिः श्रीकृष्णस्य पुरतः तस्याः वैधुर्य्यवर्णनं। सूर्य्यपूजनमिषेण तस्या विपिनप्रयाणवर्णनं। अभिसारवर्णनञ्च। ९सर्गे—राधाकृष्णयोरन्योन्यं वक्रोक्तिवर्णनं। वञ्जुल-कुञ्जे सह सहचरीभिः तयोः नर्म्मविलासवर्णनञ्च। १०सर्गे,—तत्र षड़्ऋतुशोभावर्णनं। चातुर्य्यप्रकटनाय राधाकृष्णयोरन्योन्यं वेशादिपरिवर्त्तनादलक्षितपूर्व्वरूपतया मुग्धानां सखीनां कौतुकवर्णनं। ११सर्गे,—राधाकृष्णयोः सौन्दर्य्येण विमुग्धानां चक्रवाक-कोकिल-मयूरादीनां चेष्टादिवर्णनं। कदम्बकुञ्जे हिन्दोलोत्सववर्णनं वर्षावर्णनञ्च। १२सर्गे, शरत्कालीनवृन्दावन-शोभावर्णनं। राधाकृष्णयोः परस्परं स्त्रीपुरुषजात्युपालम्भवर्णनं। शुकोक्तश्रीकृष्णरूपवर्णनं। योगपीठारोहणसमये अष्टसखीनां यथायोग्यस्थानावस्थानवर्णनं। कल्पतरुतललीलावर्णनञ्च। १३,१४सर्गे—हेमन्तवर्णनं। शिशिरवर्णनं। वसन्तवर्णनं। मधुपानमहोत्सववर्णनं। ‘अहमेव रसिकः नान्यः’ इति कथयता मधुमङ्गलेन सह श्रीकृष्णस्य नर्म्मवर्णनं। राधाकुण्डवर्णणं। तत्र जलविहारवर्णनञ्च। १५,१६ सर्गे,—राधाकृष्णयोरक्षक्रीड़ावर्णनं। मुरलीहरणकौतुकवर्णनं। वासगृहात् श्रीकृष्णे प्रवसति राधायाः चिन्ताविषादादिवर्णनं। अपराह्णसमये प्रेममुग्धया गृहीतनेपथ्यया राधया सह ललितायाः परिहासवर्णनं। १७सर्गे,—श्रीकृष्णस्य गोष्ठप्रवेश-समये सुरसुन्दरीणां परस्परमालापवर्णनं। सूर्य्यास्तमयवर्णनं। श्रीकृष्णरूपमाधुर्य्यवर्णनं। सायन्तनलीलावर्णनञ्च। १८सर्गे,—प्रदोषवर्णनं। व्रजराजमन्दिरे वयस्यैः सह श्रीकृष्णस्य भोजनवर्णनं। कृताभिसारायाः राधायाः भ्रान्त्यादिवर्णनं। प्रादोषिकलीलावर्णनं। १९सर्गे,—अभिन्नहृदयतया सखीनामपि श्रीकृष्णेन सह सम्भोगार्थं राधिकायाः युक्तिवर्णनं। महारासोत्सववर्णनं। तत्र आलीनां प्राहेलिकालापवर्णनं। यमुनापुलिनवर्णनं। नृत्यगीतवाद्यादिवर्णनञ्च। २०सर्गे—पर्य्यङ्के शयानयोस्तयोः सखीभिः पादसंवाहनादिवर्णनं। तत्र परस्परमधर-ताम्बूलदानादिवर्णनं। प्रेमवैचित्त्यवर्णनं। कर्म्मिज्ञानिप्रभृतीनां गतिनिरूपणञ्च।

No. 2520. भावनामृतटीका। Substance, country-made paper, $15\frac{1}{3} \times 5$ inches. Folia, 104. Lines, 8 on a page. Extent, 4,914 ślokas. Character, Bengali, Date, Sk. 1762. Place of deposit, Bahrámpur, Rábu Rámadása Sen. Appearance, new. Prose. Generally correct.

Bhávanámṛita-tíká. A commentary on the poem noticed under the next preceding No.

Beginning. टीकाया,—

वृन्दाटवीश्वरसभाजनराजमान-
श्रीविश्वनाथगुणसूचककाव्यरत्नं।

मच्चित्तसम्पुटमलङ्कुरुतां तदीत्ता-
सौभाग्यभाजमपि श्रीप्रमम् विधत्तां ॥
अथ प्रारिप्सितग्रन्थसमाप्तिपरिपन्थिप्रत्यूहव्यूहविध्वंसपटीयसीं श्रीभगवत्प्रतिपत्तिं ग्रन्थकारचूड़ामणिः मङ्गलाचरणत्वेन निबध्नाति श्रीकृष्णेति ।

End. टीकाया,—

शाके चेलिकोत्सवे दोलाधिरूढाङ्कयोः राधाकृष्णयोः सरस्योः राधाकृष्णकुण्डयोः तटे श्रीचैतन्यस्य जन्मदिने काव्यं पूर्णतां भजत्वत् उदगात् ॥

विषयः । श्रीकृष्णभावनामृतव्याख्या ।

No. 2521. भाट्टदीपिका । Substance, country-made paper, 12 × 4 inches. Folia, 112. Lines, 10 on a page. Extent, 4,717 ślokas, Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhíkáprasáda Sen. Appearance, new. Prose. Correct.

Bháṭṭa-dípiká. The first part of the work noticed under No. 1583, (IV. 156).

Beginning. विश्वेश्वरं नमस्कृत्य खण्डदेवः सतां मुदे ।
तनुते तत्प्रसादेन संचिप्तां भाट्टदीपिकां ॥
आम्नायस्या वायुर्वै चेपिष्ठा देवता वायुमेव स्वेन भागधेयेन उपधावति स एवैनं भूतिं गमयति ।

End. तदेवं श्रुत्यादिषट्प्रमाणकमङ्गत्वं निरूपितं । अतः परं प्रयोज्यत्वं निरूपयिष्यते ।

Colophon. इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां तृतीयस्याष्टमः पादः ।

विषयः । जैमिनिसूत्रस्य प्रथमाध्यायद्वितीयपादादारभ्य तृतीयाध्यायस्य अष्टमपादान्तं व्याख्यानं ।

No. 2522. उपासनातत्त्वम् । Substance, country-made yellow paper, 12 × 5 inches. Folia, 82. Lines, 9 on a page. Extent, 1,822 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrampur, Bábu Rámadása Sen. Appearance, new. Verse. Generally correct.

Upásaná-tattva. A treatise establishing that in the present Kali age, the only object of worship is Chaitanya, and laying down rules for the mode in which he should be worshipped. By Nityánanda S'armá.

Beginning. नत्वा गुरुपदद्वन्द्वं श्रीनित्यानन्दशर्म्मणा ।
भक्तानां परितोषायोपासनातत्त्वमुच्यते ॥

End. निखिलभुवननाथं साधुपीयूषधारा-
तरलितमनुवीजं नौमि कृष्णप्रकाशं ॥

Colophon. इति श्रीवायुपुराणे गौतमशतानन्दसंवादे श्रीचैतन्यप्रादुर्भावो नाम अष्टादशोऽध्यायः ।

इति श्रीउपासनातत्त्वे गुरुशिष्यसंवादे श्रीकृष्णचैतन्यावतारप्रकटप्रमाणं दशमः प्रसङ्गः ।

विषयः । कलौ श्रीकृष्ण एव साङ्गोपाङ्गः गौराङ्गरूपेण आविर्वभूवेति पुराणतन्त्रादि-वचनैर्य्यवस्थापनं ।

No. 2523. अव्ययानि । Substance, country-made paper, 10 × 5½ inches. Folia, 6. Lines, 9 on a page. Extent, 112 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Generally correct.

Avyayáni. The Sanskrit indeclinables, their meanings and uses. Anonymous.

Beginning. श्रीगणेशाय नमः ।
स्वरादिनिपातमव्ययं । स्वरादयश्च निपाताश्चेति । समाहारद्वन्द्वः । स्वरिति स्वर्गे परलोके च । अन्तरिति मध्ये ; प्रातर् प्रत्यूषे ।

End. वगाह इति आदिमाकारो लुप्यते । नान्यः अपिना साहचर्य्यात् ।

Colophon. इत्यव्ययानि समाप्तानि ॥

विषयः । अव्ययानामर्थनिरूपणं ।

No. 2524. मध्यसिद्धान्तकौमुदी । Substance, country-made paper, 10½ × 5 inches. Folia, 195. Lines, 9 on a page. Extent, 371 ślokas. Character, Nágara. Date Sk. 1739. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Correct.

Madhya-siddhánta-kaumudí. An abridgment of the Sanskrit grammar of Páṇiní: not so elaborate as the Siddhánta-kaumudí nor quite so condensed as Laghu-kaumudí. By Varadarája.

Beginning. नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीं ॥
अइ उण् । ऋ लृक् । ए ओङ् । इत्यादि ।

End. अत्र इकारस्य उदात्तता। इत्यादिप्रयोगमनुसृत्य अन्वाख्यातव्यं। इति स्वरप्रक्रिया।

एषा वरदराजेन बालानामुपकारिका।
अकारि पाणिनीयानां मध्यसिद्धान्तकौमुदी॥
कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी।
तस्याः संख्या तु विज्ञेया खवाणकरवह्निभिः।

Colophon. इति श्रीचरित्रिकिष्डिवरदराजभट्टकृता मध्यसिद्धान्तकौमुदी समाप्ता। शाके। १७३९।

विषयः। व्याकरणशास्त्रप्रतिपाद्यकथनं।

No. 2525. गरुड़पुराणम्। Substance, country-made yellow paper, 15½ × 5 inches. Folia, 209. Lines, 10 on a page. Extent, 7,568 ślokas. Character, Bengali. Date, Sm. 1267. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose and verse. Incorrect.

Garuda-puráṇa. One of the 18 leading Puráṇas. The codex is complete, though incorrect.

Beginning. अजमजरमनन्तं ज्ञानरूपं महान्तं
शिवममलमनादिं भूतदेहादि हीनं।
सकलकरणहीनं सर्व्वभूतस्थितं तं
हरिममलममायं सर्व्वगं वन्द एकं॥
नमस्यामि हरिं रुद्रं ब्रह्माणञ्च गणाधिपं।
देवीं सरस्वतीञ्चैव मनोवाक्कर्म्मभिः सदा॥
सूतं पौराणिकं शान्तं सर्व्वशास्त्रविशारदं।
विष्णुभक्तं महात्मानं नैमिषारण्यमागतं॥
तीर्थयात्राप्रसङ्गेन उपविष्टं शुभासने।
ध्यायन्तं विष्णुमनघं तमभ्यर्च्यास्तुवन् कविं॥
शौनकाद्या महाभागा नैमिषीयास्तपोधनाः।
मुनयो रविसङ्काशा शान्ता यज्ञपरायणाः॥
ऋषय ऊचुः।
सूत जानासि सर्व्वं त्वं पृच्छामस्त्वामतो वयं।
देवतानां हि को देव ईश्वरः पूज्य एव कः॥

को ध्येयः को जगत्स्रष्टा जगत्कः पाति हन्ति कः ।
कस्मात् प्रवर्त्तते धर्म्मो दुष्टहन्ता च कः स्मृतः ।
तस्य देवस्य किं रूपं जगत्सर्गः कथं मतः ॥
कैर्व्रतैः स तु तुष्टः स्यात् केन योगेन वाप्यते ।
अवताराश्च के तस्य कथं वंशादिसम्भवः ।
वर्णाश्रमादिधर्म्माणां कः पाता कः प्रवर्त्तकः ॥
एतत्सर्व्वं तथान्यच्च ब्रूहि सूत महामते ।
नारायणकथाः सर्व्वाः कथयास्माकमुत्तमाः ॥

सूत उवाच ।

पुराणं गारुड़ं वक्ष्ये सारं विष्णुकथाश्रयं ।
गरुड़ोक्तं कश्यपाय पुरा व्यासाच्छ्रुतं मया ॥

हरिरुवाच ।

End. पुराणं गारुड़ं प्रोक्तं विधिनापि मया ततः ।
यः पठेत् शृणुयाद्वापि स हि मोक्षमवाप्नुयात् ॥

Colophon. इत्यादिमहापुराणं गारुड़ं समाप्तं। ॐतत् सत् । १२६७ साल। ता २१ चैत्र ॥

विषयः । १,२,३ अध्याये,—वासुदेवस्य परब्रह्मत्वकीर्त्तनं। कुमारादिकल्किपर्य्यन्तं भगवतः चतुर्विंशत्यवतारकथनं। ब्रह्मणः सकाशात् व्यासस्य गरुड़पुराणाधिगमविवरणं। तत्र शिवब्रह्मसंवादेन भगवद्विभूतिवर्णनं। गरुड़स्य पुराणरचनाविवरणं। ४, ५, ६, ७अध्याये,—वासुदेवात् अव्यक्तमहत्तत्त्वादिक्रमेण जगत्सृष्टिप्रक्रियाकीर्त्तनं। विरूपादिकौमारान्तनवविधसृष्टिभेदकथनं। विधातृकृतसृष्टिविवरणं। धर्म्मरुद्रमनुप्रभृतीनां ब्रह्मणो मानसपुत्रत्वकथनपूर्व्वकं तेषां पत्नीपुत्रादिकीर्त्तनं। सूर्य्यादिवंशवर्णनं। सूर्य्यपूजनविधानादिकीर्त्तनं। ८, ९, १०, ११, १२, १३, १४, १५, १६ अध्याये —विष्णुपूजनविधिः। देवपूजाविधिः। मुद्रादिकथनं। सामान्यतः पूजानुक्रमकीर्त्तनं। विष्णुपञ्जरस्तोत्रकीर्त्तनं। योगप्रकरणं। विष्णोर्नामसहस्रस्तोत्रकथनं। पुनर्विष्णोर्ध्यानादिनिरूपणं। अन्यविधसूर्य्यार्च्चनविधिः। १७, १८, १९, २०, २१, २२, २३, २४, २५, २६, २७, २८ अध्याये—मृत्युञ्जयार्च्चनविधानं। अमृतेशपूजनविधिः। प्राणेश्वरपूजनविधिः। पाश-कार्म्मुक-चक्र-मुद्गरादिक्षेपणमन्त्रादिनिरूपणं। पञ्चवक्त्रपूजनपद्धतिकथनं। शिवार्च्चनपद्धतिकथनं। गणेशादिपूजाविधानं। त्रिपुरादिपूजाविधानं। आसनपूजाविधिः। कुब्जिकापूजाविधिः। सर्व्वनागादिविषहरणमन्त्रकथनं। गोपालपूजाविधिः। त्रैलोक्यमोहिनीपूजनविधिः। २९. ३०, ३१, ३२, ३३, ३४, ३५, ३६, ३७, ३८ अध्याये,—विस्तरेण विष्णुपूजनविधिः। पञ्चतत्त्वार्च्चनपूजनपद्धतिकीर्त्तनं। सुदर्शनचक्रपूजा-

विधानं। न्यासादिप्रकारकीर्त्तनं। सन्ध्याविधिः। गायत्रीमाहात्म्यकीर्त्तनं। मङ्गलाविजयादीनामर्च्चनविधानं। अन्यविधविष्णुपूजाविधानं। ३९, ४०, ४१, ४२, ४३, ४४, ४५, ४६, ४७, ४८, ४९, ५० अध्याये,—माहेश्वरीपूजनविधानं। कालरात्रिपूजाविधिः। नानाविद्याकथनं। पवित्रारोहणविधिः। ब्रह्मणो मूर्त्तिध्यानकथनं। वासुदेवमूर्त्तयः। गृहनिर्म्माणादौ वास्तुलक्षणकथनं। प्रासादलक्षणतन्निर्म्माणादिप्रकारकथनं। सर्व्वदेवप्रतिष्ठाविधिः। ब्राह्मणक्षत्रियादीनां कर्म्मादिनिरूपणं। अष्टाङ्गयोगकथनं। प्रातःकृत्य-स्नान-तर्पण-वैश्वदेवादिविधिकीर्त्तनं। ५१, ५२, ५३, ५४ ५५, ५६, ५७, ५८, ५९ अध्याये,—दानधर्म्मकथनं। तिथिविशेषे द्रव्यविशेषदानफलकीर्त्तनं। प्रायश्चित्तविधानं। पद्म-महापद्म-मकर-कच्छपादिचिह्नलक्षितपुरुषाणां प्रकृतिनिरूपणं। प्रियव्रतोपाख्यानकथनादिकं। तद्वंशवर्णनं। भूगोलकथनं। पातालवर्णनं। सूर्य्यादीनां संस्थानपरिमाणादिकथनं। ज्योतिश्चक्रनिरूपणं। तत्र नक्षत्रादीनां देवतादिनिरूपणं। ६०, ६१, ६२, ६३, ६४, ६५, ६६, ६७, ६८, ६९, ७० अध्याये,— फलितज्योतिषकथनं। विवाहयोग्यकन्यालक्षणकीर्त्तनं। विशेषेण सामुद्रिकशास्त्रकथनं। स्वरोदयशास्त्रकीर्त्तनं। तत्र नाड़ीनां संस्थानादिकीर्त्तनं। परविजयादिज्ञानं। रत्नानामुत्पत्तिवृत्तान्तकथनं। तेषां परीक्षाप्रकारकथनं। तत्र मुक्ताफलपरीक्षा। पद्मरागादिपरीक्षा। मरकतेन्द्रनीलादिपरीक्षणञ्च। ७१, ७२,-७३, ७४, ७५, ७६, ७७, ७८, ७९, ८० अध्याये,— वैदूर्य्य-पुष्पराग-कर्कैतन-पुलक-रुधिराक्ष-स्फटिकादिपरीक्षादिप्रकारकीर्त्तनं। सर्व्वतीर्थमाहात्म्यकीर्त्तनं। तत्र विशेषेण गयामाहात्म्यकथनं। स्वायम्भुवमन्वन्तरकथनं। अन्यान्यमन्वन्तरकथनञ्च। ८१, ८२, ८३, ८४, ८५, ८६, ८७, ८८, ८९, ९०, ९१, ९२, ९३ अध्याये,—रुचिना सह पितृणांसंवादकथनप्रसङ्गेन पितृलोकमाहात्म्यकीर्त्तनं। क्रोष्टुकिन उपाख्यानं। पितृस्तोत्रकीर्त्तनं। परमात्मनो ध्याननिरूपणं। पुनरन्यविधविष्णुध्यानकथनं। याज्ञवल्क्येन सह वसिष्ठदक्षसम्बर्त्तादीनां संवादेन वर्णाश्रमाचारधर्म्मनिरूपणं। तत्र वेदाध्ययनाचमनप्राणायामादिप्रकारकथनं। नैष्ठिकादिब्रह्मचारिणां नियमादिकथनं। गार्हस्थ्यधर्म्मनिरूपणं। सङ्करजातिनिरूपणं। ९४, ९५, ९६, ९७, ९८, ९९, १०० १०१, १०२, १०३, १०४ अध्याये,—द्रव्यशुद्धिकथनं। दानविधिः। श्राद्धविधिकीर्त्तनं। तत्र इतिकर्त्तव्यताकीर्त्तनं। विनायकोपसृष्टस्य लक्षणं। तत् शान्त्युपायकथनं। ग्रहयज्ञविधानं। वनस्थधर्म्मकथनं। भिक्षुधर्म्मनिरूपणं। कर्म्मविपाकनिरूपणं। विशेषेण प्रायश्चित्तनिरूपणं। प्रेतशौचनिरूपणं। पराशरोक्तधर्म्मशास्त्रकीर्त्तनं। १०५, १०६, १०७, १०८, १०९, ११०, १११, ११२, ११३, ११४, ११५, ११६, ११७ अध्याये —नीतिसारकीर्त्तनं। अत्र विशेषेण धर्म्मनीतिकीर्त्तनं। राजनीतिकीर्त्तनञ्च। एकभक्तव्रतव्यवस्थाकथनं। अनङ्गत्रयोदशीव्रतविधानकथनं। अखण्डद्वादशी व्रतविधानं। अगस्त्यार्घदानव्रतविधानं। रम्भातृतीयाव्रतविधानं। चातुर्मास्यव्रतविधानं। ११८, ११९, १२०, १२१, १२२, १२३, १२४, १२५, १२६, १२७, १२८, १२९, १३० अध्याये,—मासोपवासाख्यव्रतविधानं। कार्त्तिकमासव्रतविधानं। शिवरात्रिव्रतविधानं। एकादशीव्रतमा-

हात्म्यकीर्त्तनं। भीमैकादशीमाहात्म्यकथनं। व्रतपरिभाषाकथनं। प्रतिपदादिव्रतविधानं। पुष्पद्वारोत्सवव्रतविधानं। मदनकादिपूजाविधानं। फाल्गुनतृतीयायां लवणपरित्यागफलकथनं। दष्टोद्धरणव्रतविधानं। सप्तमीव्रतविधानं। जन्माष्टमीव्रतविधानं। रम्भाष्टमीव्रतविधानं। अशोकाष्टमीव्रतविधिः। दुर्गानवमीव्रतविधानं। (अतः परमध्यायाङ्को नास्ति।) वीरनवमीव्रतविधानं। दिग्दशमीव्रतकथनं। श्रवणद्वादशीव्रतविवरणं। मदनत्रयोदशीव्रतं। सर्व्वतीर्थव्रतकथनं। सूर्य्यवंशवर्णनं। चन्द्रवंशवर्णनं। विष्णोर्दशावतारकथाप्रसङ्गेन सीताया माहात्म्यकीर्त्तनं। संक्षेपेण रामायणकथाकीर्त्तनं। संक्षेपेण हरिवंशकथाकीर्त्तनं। संक्षेपेण महाभारतकथाकीर्त्तनञ्च। धन्वन्तरिणा सह सुश्रुतस्य संवादेन रोगाणां निदानपूर्व्वरूपादिकथनं। ज्वररोगस्य निदानचिकित्सादिकथनं। एवमम्लपित्त-क्षय-कास-श्वास-हिक्का-ऽरोचक-तृष्णा-मदात्ययादिरोगाणां ज्ञेयं। नाड़ीव्रणादिरोगाणां चिकित्साकथनं। कुष्ठादिचिकित्साकथनं। स्त्रीरोगचिकित्साकीर्त्तनं। मधुरादिवर्गगुणकथनं। घृततैलादिगुणकथनं। मूषिकमक्षिकामशकादिनाशनधूपादिकथनं। वशीकरणौषधकथनं। गर्भधारणोपायकथनं। अग्निस्तम्भनादिविधानकथनं। वृश्चिकादिविषनाशनौषधकथनं। सुखप्रसवौषधकथनं। स्नानविधिकथनं। तर्पणविधिकथनं। वैश्वदेवविधिकीर्त्तनं। सन्ध्याविधिः। पार्व्वणश्राद्धपद्धतिकीर्त्तनं। नित्यश्राद्धपद्धतिकथनं। सपिण्डनश्राद्धविधिः। धर्म्मसारकथनं। शौचाशौचनिरूपणं। तत्र विशेषेण द्रव्यशुद्धिकथनं। चतुर्युगधर्म्मकीर्त्तनं। पुराणादीनां नामकथनं। नैमित्तिकप्रलयवर्णनं। कर्म्मविपाकनिरूपणं। अष्टाङ्गयोगकथनं। भगद्भक्तिमाहात्म्यादिकीर्त्तनं। विष्णुध्यानस्तोत्रमाहात्म्यादिकथनं। नरसिंहस्तोत्रकीर्त्तनं। तत्त्वज्ञानोपायकथनं। तत्त्वाष्टकस्तोत्रं। अर्चनास्तोत्रकथनं। ब्रह्मज्ञाननिरूपणं। आत्मज्ञानोपदेशः॥

No. 2526. दिव्यसूरिचरितम्। Substance, country-made paper. Folia, 81. Lines, 10—11 on a page. Extent, 2,280 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, fresh. Prose. Incorrect.

Divyasúri-charita. Story of a devout Vaishṇava, illustrating the effect of devotion to Krishṇa. By S'ríniväsa Kavi *alias* Rañgagaruḍavádana *alias* Vaidya-purandara.

Beginning. प्रभार्काविव संसक्तौ भवभीतिनिवृत्तये।
रचितारौ त्रिजगतां लक्ष्मीनारायणौ भजे॥
क्व दिव्यसूरिचरितं क्व च मे मन्दशेमुषी।
नियन्तुकामोऽस्मि गजं साहसाद्विसतन्तुना॥

प्राचां प्रशस्तिं प्राज्ञानां प्रार्थये प्राकृताग्रणीः ।
पिपासोरग+ग्रस्थं चौद्रं पङ्गोः समोऽस्म्यहं ॥
पूर्व्वाचार्य्यादृतं वृत्तं सूरीणामाद्रियेऽप्यहं ।
द्युमणिद्योतितापि द्यौः खद्योतेनापि भासते ॥
प्राचीनवाचां विषयं चरितं वर्णयाम्यहं ।
गजेन प्रस्थिते मार्गे किं न याति पिपीलिका ॥
दोषाश्लिष्टापि मत्सूक्तिर्विद्वद्भ्यो रोचते भृशं ।
चन्द्रिकेव चकोरेभ्यः सर्व्वाशान्तरचारिणी ॥
सतामेव तु मद्वाणी चपलापि मुदे परं ।
शिशोरव्यक्तवचनं गुरुभ्यः किन्न रोचते ॥

End. इत्याशास्य स वः शठान्तकमुखश्रीदिव्यसूरिः कृती
रचांसेस्य (?) च तत् प्रबन्धनिवहैः सार्द्धं प्रतिष्ठाप्य सः ।
श्रीरङ्गादिमधामसु स्वयमभूच्छ्रीदिव्यसूरिव्रजै-
स्तैः साकं परमं पदं जिगमिषूरामानुजाख्योमुनिः ॥

Colophon. इति श्रीकाश्यपकुलतिलकस्य रङ्गाधिपारोग्यशालावल्लभस्य कविवैद्यपुर-न्दरापरनामधेयस्य श्रीरङ्गगरुड़वादनपण्डितस्य श्रीनिवासकवेः कृतौ दिव्यसूरिचरिते महाकाव्ये अष्टादशःसर्गः। श्रीदिव्यसूरिचरितं सम्पूर्णं । ग्रन्थसंख्या २४०० ।

विषयः । १प्रथमे सर्गे,—वैकुण्ठवर्णनं । तत्र अयोध्याया अवस्थानसंस्थानादिकथनं । एकदा समुदितकरुणया वरुणालयदुहित्रा भगवन् भरतरामकृष्णादिरूपेणापहृतो भूमेर्भारः । अधुना तु लोकानां मोक्षोपायं कर्त्तुमर्हतीति सादरमभ्यर्थितो भगवान् श्रीरङ्गपत्तने निजसान्निध्यमकल्पयत् इति वर्णनं। मुक्ता अपि दिव्यसूरयस्तत्र पार्षदरूपेण अवतेरुरितिकथनं । २सर्गे,—काञ्चीनगरवर्णनं । मल्लप्रपूरपुरादिषु भूतनाम-लतिकाक्रादीनां जन्मादिकथनं । तैः सार्द्धं भगवत्संवादकथनं । महीदारग्रामे भार्गवमहर्षेस्तपोवनवर्णनं । तन्मोहनार्थं सुरेन्द्र-प्रेरितानामप्सरसां विभ्रमचेष्टितादिवर्णनं । सफलप्रयत्नायां तस्यां वेत्रगर्त्ते भ्रुणमुत्सृज्य स्वस्थानं गतवत्यां भगवदनुग्रहेण वेत्रजीविभिः तत्परिपालनादिवर्णनं। तस्मै पयः प्रदानेन शूद्रमिथुनस्य कणिकृष्णनामकपुत्रलाभवर्णनं । वेत्रजीविपालितस्य भार्गवस्य भगवद्दर्शनलाभेन भक्ति-सारेतिनामप्राप्तिकथनं । तपस्यतस्तस्मात् पार्व्वतीसहचरस्य शिवस्य पराभवप्राप्तिकथनं ।

३सर्गे,—भार्गवेण सह तरक्षुवाहनस्य कोङ्कणमुनेः समागमादिवर्णनं। मयूरनामकनगरे ब्रह्मणा सह तस्य संवादकथनं । फणिसमागमकथनञ्च । तदनुग्रहेण वृद्धाया यौवनप्राप्तिकथनादिकं । चोलराज्ये भक्तिसारेण सह विष्णुपादनामककोविदस्य संवादः ।

४, ५ सग,—कुरङ्गेशप्रसादेन अधिगततत्त्वज्ञानस्य कारिपुत्रस्य आषोड़शाब्दं कुरुकनगरे मौनभावेन अवस्थानादिकथनं। कुमुदनामकदिव्यसूरेः जन्मादिकथनं। तेन सह कारिपुत्रस्य समागमकथनं। पराङ्कुशाभिधानात् कारिपुत्रात् द्रामिड़ीसूत्यादेः उत्पत्तिकथनं।

६ सर्गं,—केरलदेशे कौस्तुभात्मनः कुलशेखरनृपतेरुपाख्यानं। भट्टनाथस्य जन्मादिकथनं। गरुड़ात्मनो विष्णुचित्तस्य चरित्रवर्णनं। पाण्डेश्वरस्य वल्लभदेवस्य चरित्रवर्णनं। वनमालांशस्य नारायणद्विजस्य चरित्रकथनं। तेन गणिकायाः संवादकथनञ्च।

७, ८ सर्गं,—भगवदर्च्चारूपस्य रङ्गेश्वरस्य प्रसङ्गात् निचुलेश्वरतनयायाः कमलायाः गर्भे पुत्रोत्पत्तिकथनं। पुरुषोत्तमकार्म्मुकावतारस्य नीलस्य चरित्रवर्णनं। अत्र अयोनिजायाः कन्याया उपाख्यानं। तामुद्वहन्तं परकालमभियोधयितुं चोलभूपतेः प्रयाणादिवर्णनं।

९, १०, ११, १२ सर्गं,—तुलसीकानने कामपि वालिकामधिगच्छता विष्णुचित्तस्य तत्परिपालनादिवर्णनं। तस्या वाल्यलीलावर्णनं। तारुण्योद्भेदवर्णनञ्च। अष्टोत्तरशतसंख्यकवैष्णवधामकथनं। विष्णुचित्तदुहितुः गोदायाः पूर्व्वरागवर्णनं। स्वयम्बरसभायां गोदायाः रङ्गेश्वरकण्ठे माल्यदानकथनं।

१३, १४, १५ सर्गं,—तया सह रङ्गेश्वरस्य विवाहोत्सववर्णनं। तत्र पुरसुन्दरीणां विभ्रमादिवर्णनं। प्रभातवर्णनं। परकालस्य वेङ्काद्रिहिमालयगमनादिविवरणं। तत्कृतसुवर्णमयबुद्धप्रतिमाहरणविवरणं। निचुलाधिपतेः साहाय्यात् तस्य बौद्धदलपराजयकथनं। वसन्तवर्णनं। रङ्गराजस्य जलविहारवर्णनं। सन्ध्यावर्णनं। वर्षादिवर्णनञ्च।

१६ सर्गं,—वीरनारायणदेवस्य आज्ञया नाथमुनेरधीश्वरमुनेश्च सर्व्ववैष्णवधामपर्य्यटनपूर्व्वकं यमुनापुलिनमधितिष्ठतोस्तयोः समीपात् पुण्डरीकाक्ष-कुरुकाधिपयोः सङ्गीताध्ययन कथनं। यामुनेयस्य जन्मादिकथनं। लब्धराज्येन तेन सह राममिश्रस्य संवादकथनं।

१७, १८ सर्गं,—रामानुजस्य जीवनचरितकीर्त्तनं। तेन सह लक्ष्मणार्य्य-यामुनेययोः संवादकथनं। कस्यचिदेकदण्डिनः रामानुजेन सह विचारकथनं। रामानुजस्य दिग्विजयकथनं। तीर्थयात्राप्रसङ्गेन तेन सह विष्णुचित्तादीनां संवादकथनं। रामानुजेन बौधायनमतमवलम्ब्य ब्रह्मसूत्रभाष्यरचनकथनं। तत्कृतभगवदर्च्चास्थापनादिकथनञ्च।

No. 2527. वराहसंहिता। Substance, country-made paper, 7½ × 4½ inches. Folia, 25. Lines, 9 on a page. Extent, 405 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Verse. Correct.

Varáha-sañhitá. A large collection of stories illustrating the life of Kṛishṇa during his sojourn at Gokula and Vṛindávana. The

work belongs to a distinct class of Vaishṇava composition, of which there are several extant. They constitute a series closely similar to the Puráṇas.

Beginning. पृथिव्युवाच ।

अनन्तकोटिब्रह्माण्डे तद्वाह्यान्तरसंस्थितं ।
विष्णुः स्थानं परं तेषां प्रधानं प्रियमुत्तमं ॥
यत्परं नास्ति कृष्णस्य प्रियं स्थानं महाद्भुतं ।
तदहं श्रोतुमिच्छामि कथयस्व महाप्रभो ॥
श्रीभगवान् वराह उवाच ।

End. कृष्णवर्णं चतुर्व्वाङ्गं शङ्खचक्रादिभूषितं ।
दक्षिणे द्वारपालञ्च श्रीविष्णुं कृष्णवर्णकम् ॥

Colophon. इति श्रीवराहसंहितायां धरणीवराहसंवादे पञ्चमं पटलं सम्पूर्णं ॥

विषयः । धरणीवराहयोः संवादेन श्रीकृष्णस्य वृन्दावनमेव गोलोकादिभ्यः प्रियतमं स्थानमितिनिरूपणं । तत्रापि मथुरायाः प्राधान्यकथनं । तत्र भद्रश्रीलोहभाण्डीरमहातालव-दरवकुलादिद्वादशमहावनवर्णनं । उपवनादिवर्णनञ्च । मथुरां पद्मत्वेन रूपयित्वा तत्र देश-विशेषेषु रासस्थलादिवर्णनं । वृन्दावनमाहात्म्यवर्णनं । शोभावर्णनञ्च । वृन्दावनविहारेषु कृष्णस्य कैशोरविग्रहत्वं नान्यचेतिकथनं । श्रीकृष्णस्य ध्यानप्रकारादिकीर्त्तनं । श्रीकृष्णस्य ऐश्व-र्य्यादिवर्णनं । गोपीनां सौन्दर्य्यादिवर्णनं । रासस्थलीशोभावर्णनं । सखीनां नामकथनपूर्व्वकं प्रत्येकं राधाकृष्णयोः सेवनप्रकारादिकथनं । सर्व्वेषां वैष्णवमन्त्राणां श्रीकृष्णमन्त्रमूलत्व-कीर्त्तनम् ।

No. 2528. दानकेलिचिन्तामणिः । Substance, country made paper, 12½ × 4½ inches. Folia, 15. Lines, 7 on a page. Extent, 323 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Verse. Correct.

Dánakeli-chintámaṇi. A poem describing the amours, and recreations of Kṛishṇa at Vṛindávana. By Kṛishṇa-chaitanya-chandra.

Beginning. कुर्व्वाणैः शतमाशिषां निजनिजप्रेयोजयायोत्सुकैः
स्वीयस्वीयगणैः स्फुटं कुटिलया वाचातितुङ्गीकृतः ।
गव्यानां नवदानकल्पनकृते प्रौढ़ं मिथः स्पर्द्धिनो-
र्गान्धर्व्वा गिरिधारिणोर्गिरितटे केलीकलिः पातु वः ॥

उद्दामनर्म्मरसरङ्गतरङ्गकान्तं
राधासरिद्गिरिधरार्णवसङ्गमोत्थं ।
श्रीरूपचारुचरणाब्जरजःप्रभावा-
दन्धोऽपि दाननवकेलिमणिं चिनोमि ॥

End. राधामाधवयोर्द्दानकेलिचिन्तामणिर्गिरौ ।
+ + + + —— —— —— —— ।
आददानस्तृणं दन्तैरिदं याचे पुनः पुनः ।
श्रीमद्रूपपदाम्भोजधूलिर्भूयाम्भवे भवे ॥

Colophon. इति श्रीदानकेलिचिन्तामणिर्नाम प्रबन्धः सम्पूर्णः ।

Subject. विषयः । आमुक्तमदनवेशयोः राधाकृष्णयोः गिरिवरपरिसरे मिलितयोरन्योन्यं सौन्दर्य्यदर्शनेन मुग्धयोः रूपवर्णनादिकं । एकदा शिरसि निहितगव्यकलशाभिः सह सहचरीभिः यज्ञभूमिं गच्छन्तीं राधिकां पथि निरुध्य दानं देहीति कथयता श्रीकृष्णेन सार्द्धं तासां परिहासादि व्याजेन लीलावर्णनं ।

No. 2529. राधासौन्दर्य्यमञ्जरी । Substance, country-made paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 3. Lines, 11 on a page. Extent, 170 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Verse. Incorrect.

Rádhásaundarya-manjarí. Poems descriptive of the personal beauty of Rádhá. By Subala-chandra A'chárya.

Beginning. सौन्दर्य्याम्भोधिरूपा प्रवरगुणमणिस्रग्धरा मीननेत्रा
(नाभीघूर्णातरुणिमसुधयाभासभाग्भोगिसुभ्रूः ।)
श्रीकृष्णस्नेहचन्द्रद्युतिभिरनुदिनं बर्द्धिलावण्यवन्या ।
कान्ता स्वान्तान्तरस्था प्रभवतु सततं कापि गौरी किशोरी ॥

End. गत्या हीना कनकलतिका चञ्चला सा
नित्यं शोभां न हि कलयते फुल्लचाम्पेयपुष्पं ।
हेमाम्भोजं रजनिमलिनं कुङ्कुमं मूर्त्तिहीनं
दीपो वातैर्निहत इति राधिकाभां विधत्ते ॥

Colophon. इति श्रीसुवलचन्द्राचार्य्यविरचिता श्रीलराधासौन्दर्य्यमञ्जरी समाप्ता ।

Subject. विषयः । विविधालङ्करणैरलङ्कृतायाः राधायाः रूपशोभादिवर्णनं ।

No. 2530. सहृदयम्, वा सदाचारस्मृतिः । Substance, country-made paper, 13 × 3 inches. Folia, 235. Lines, 7—8 on a page. Extent, 5,058 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose and verse. Correct.

Sahṛidaya ALIAS **Sadáchára-smṛiti**. A digest of the Smṛiti rules regarding A'chára, or duty. Author's name not made out.

Beginning. पञ्चात्मकं द्विरूपञ्च साधने बहुरूपकम्।

आनन्ददायकं कृष्णं ब्रह्मरूपं परं नुमः ।
अ++ मेव निखिलैरपि वेदवाक्यै
रामायणैः सहितभारतपञ्चरात्रैः।
अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रै
र्निर्णीयते सहृदयं हरिणा सदैव ॥

इह खलु भगवद्वचनाद्यवगतस्वर्गाद्यल्पफलेतरफलतात्पर्य्यकाणां । इत्यादि ।

End. विष्णोः सर्व्वात्मत्वे तैत्तिरीयश्रुतिमपि प्रमाणयति। वेदाहमेतं पुरुषं महान्तं। आदित्यवर्णं तमसस्तु पारे। सर्व्वाणिरूपाणि विचित्य धीरः। नामानि + + इतः परं खण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्ति।

विषयः। विष्णुस्मरणं विना कृतस्य कर्म्मण आसुरत्वकथनं। विष्णुभक्तिरहितस्य फलाभावकथनं। ग्रन्थस्य विषयप्रयोजनादिनिरूपणप्रसङ्गेन विचारावतरणं। सिद्धासिद्धभेदेन द्विविधकरणनिरूपणं। भगवद्दर्शनसाधनो भगवदनुग्रह एव इति निरूपणं। श्रवणमननादिभिः भगवद्भक्तिप्राप्तिक्रमकीर्त्तनं। मुक्त्यधिकारिणः। अधिकारनिरूपणं। सदाचारस्मृतिकरणे हेतुकथनं। तत्र आचारशब्दार्थनिरूपणं। सच्छब्दार्थकथनं। वैष्णवानां वाह्यलक्षणकथनं। आन्तरलक्षणकथनञ्च। निर्गुणभक्तिलक्षणं। यमनियमादिलक्षणं। तत्तद्भेदकथनञ्च। जैमिनिमतेन धर्म्मलक्षणकथनपूर्व्वकं 'विष्णुप्रीतिकरो धर्म्मः' इति वैष्णवमतेन धर्म्मलक्षणकीर्त्तनं। साधारणधर्म्मनिरूपणं। वर्णधर्म्मविवेचनं। असाधारणधर्म्मकथनं। कलियुगे वर्ज्जनीयकथनं। तत्र (दत्ताचतायाः कन्यायाः पुनर्दानं वरस्य च ।) इति वचनं याज्ञवल्क्यीयमितिकथनं। राज्ञां धर्म्मनिरूपणं। तत्त्वमन्त्रादीनां लक्षणतत्कृत्यादिकथनं। राज्ञो भोजनविषये विषादिपरीक्षाप्रकारकथनं। वेदायुक्तकर्म्मकर्त्तव्यता। फलदानसमर्थस्यापि भगवतः स्वेच्छया कर्म्मकरणानन्तरमेव फलदाने कारणकथनं। मोक्षेऽपि कर्म्मणां कर्त्तव्यत्वकथनं। कर्म्मणां भगवत्प्राप्तिहेतुत्वकथनं। पञ्चकालनिरूपणं। तत्र योगाधिक्यसंशयपरिहारः। कालाधिक्यसंशयपरिहारः। पञ्चकालानां परिमाणकथनञ्च। अष्टकालोक्तकर्म्मणां सामान्येन उद्देशः। एवं पञ्चकालोक्तकर्म्मणां ज्ञेयम्। सदाचारस्मृतिप्रामाण्यसाधनोपोद्घातकथनं। मन्वादिस्मृतिकर्त्तृपरिगणनं। मनोराप्तत्वं प्रति-

पादयतो वेदवाक्यस्य व्याख्यानं। सदाचारस्मृतेः प्रामाण्यप्रतिपादनं। आह्निककृत्यनिरूपणं। विष्णोः सर्व्वकर्म्मदेवतात्वप्रतिपादनं। प्राणशब्दवाच्यस्य परमात्मनः सर्व्वशब्दवाच्यत्वनिरूपणं। सप्तर्षीणां परात्मचक्षुष्ट्वनिरूपणं। प्रलयेऽपि वेदानां विष्णुपरत्वप्रतिपादनं। ब्राह्ममुहूर्त्तलक्षणं। प्रातःस्मरणविधिः। उत्सर्गविधिः। शौचविधिः। आचमनविधिः। दन्तधावनविधिः। ध्यानार्थं ध्यानाङ्गनिरूपणं। ध्यानप्रकारकीर्त्तनं। पातञ्जलोक्तासनादिलक्षणानि। योगाङ्गस्थानकथनं। कुशविधानं। शिखाबन्धनविधिः। यज्ञोपवीतविधिः। प्रातःस्नानादौ मन्त्रविधानादिकं। तर्पणादिविधिः। तैलाभ्यङ्गविधिः। कूपादिषु स्नानप्रकारः। वस्त्रपरिधानादिनियमकथनं। राजदर्शनादौ वस्त्रभेदकथनं। तिलकविधिः। मुद्राधारणादिविधिः। चक्रादिचिह्नधारणावश्यकता। तुलसीमालाधारणावश्यकता। प्रातःसन्ध्याविधिः। प्राणायामप्रकारः। मध्याह्नसन्ध्यादौ विशेषकथनं। सूतकादौ सुस्थेनापि सन्ध्योपासनं न कार्य्यमितिनिरूपणं। सन्ध्याप्रयोगः। प्रकारान्तरेण कात्यायनोक्तसन्ध्याप्रयोगः। निर्म्माल्यविसर्ज्जनविधिः। होमविधिः। जपप्रकारकथनं। गुरुनमस्कारादिनिरूपणं। तत्त्वन्यासादिविधानं। मातृकाव्याहृत्यादिमन्त्रकथनं। चतुर्व्विंशतिमूर्त्तीनां शङ्खादिनियमे अवशिष्टानां चक्रादीनां स्थानादिकथनं। पुरुषसूक्तप्रयोगः। ब्रह्मयज्ञेतिकर्त्तव्यता। तर्पणविचारः। माङ्गलिकदर्शनादौ अभिवादनादिविधिः। गुरुलक्षणतन्माहात्म्यादिकथनं। वेदाभ्यासतदर्थज्ञानादिफलकथनं। अनध्यायनिरूपणं। ध्यानरूपोपासनाप्रकरणं। वर्णानां वृत्तिनिरूपणं। आपदि प्रतिग्रहादिविधानादिकं। क्षत्रियादीनां वृत्तिनिरूपणं। कुसीदव्यवहारनिरूपणं। आपद्वृत्तिनिरूपणं। सर्व्वोत्तमत्वेन विष्णुरेव पूजनीय इति निरूपणम्। पूजासम्भारादिकथनं। तत्र पुष्पादिनिरूपणं। पात्रासादनविधिः। देवयज्ञविधिः। भोजनविधिः। तदुत्तरकालकर्त्तव्यनिर्द्देशः। शयने स्त्रीसम्बन्धविधिः। व्यवायविधिः। उदक्याव्रतनिरूपण। वैश्वदेवविधिः। सन्न्यासिनां कृत्यादिनिरूपणं। सन्न्यासग्रहणे शूद्रस्य अनधिकारकथनं। ब्रह्मचर्य्यादिनियमकथनञ्च।

No. 2531. काव्यकल्पलता, वा कविशिक्षा। Substance, country-made paper, 13 × 5 inches. Folia, 236. Lines, 7 on a page. Extent, 4,018 ślokas. Character, Nágara. Date, Sm. 1897. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose and verse. Generally correct.

Kávya-kalpalatá alias **Kaviśikshá**. A hand book for poets, containing a number of rules regarding versification, rhetoric, use of words, &c., &c. By Amarachandra, disciple of Jinudatta-suri.

Beginning. विस्तय वाङ्मयं ज्योतिरसरेण यतीन्दुना।
काव्यकल्पलताख्येयं कविशिक्षा प्रतन्यते॥

सारस्वतामृतमहार्णवपूर्णिमेन्दो-
र्मत्वारिसिंहसुकवेः कवितारहस्यम्।
किञ्चिच तद्रचितमात्मकृतञ्च किञ्चिद्-
व्याख्यास्यते त्वरितकाव्यकृतेऽत्र सूत्रम्॥

शास्त्रारम्भे शास्त्रकारः समुचितेष्टदेवतानमस्कारपूर्व्वं शास्त्रस्याद्यां प्रेक्षावत्प्रवृत्त्यङ्गप्रयोजनयुक्तमभिधेयञ्चाह।

वाचं नत्वा महानन्दकरसत्काव्यसम्पदे।
कविशिक्षामिमां वच्मि काव्यकल्पलताह्वयां॥

End. एवमौचित्येन तद्गुणाधिकत्वमारोप्यम्।

इति श्रीजिनदत्तसूरिशिष्यमहाकविपण्डितश्रीमदमरचन्द्रविरचितायां काव्यलताकविशिक्षावृत्तौ अर्थसिद्धिप्रताने तुर्य्ये समस्यास्तवकः सप्तमः। सम्पूर्णश्चायमर्थसिद्धिप्रतानश्चतुर्थः।

श्रीमद्वायेटगच्छवारिधिविधोः पादारविन्दद्वये
येन श्रीजिनदत्तसूरिसुगुरोः षट्पदारम्भे[?]ङ्गायितम्।
स श्वेताम्बरमौलिरत्नममरः श्रीवीरतीर्थङ्करः
प्रज्ञात्मा कृतकाव्यकल्पलतिकावृत्तिं सतां सम्मतां।
सिक्तेयमुद्धृतैः शास्त्राब्धिभ्यः सारसुधारसैः।
काव्यकल्पलताकल्पं तनोतु सुमनोमुदम्॥
काव्यमेव परब्रह्म स्वादसोदरशर्म्मदम्।
आलोकं पालयामास कालिदासकवेर्यशः॥
वाल्मीकिव्यासयोर्विश्वे विश्वदिङ्मृत्यकूलगा।
कल्पान्तोल्लङ्घिनी कीर्त्तिः काव्यादेव विजृम्भते॥
काव्यकल्पलतावृत्तौ सङ्ख्यायामनुष्टुभाम्ः
त्रिसहस्री त्रिशती च सप्तपञ्चाशदुत्तरा॥
ग्रन्थाः। मूलतः। ३३५७।

Colophon. इति श्रीजिनदत्तसूरिशिष्यमहाकविपण्डितश्रीमदमरचन्द्रविरचिताकाव्यकल्पालताकविशिक्षावृत्तिः समाप्ता। संवत् १८९७।

विषयः। १ प्रथम प्रताने,—छन्दोऽभ्यासप्रकारकीर्त्तनं। तत्र पदसन्निवेशप्रणालीकथनं। वर्णनीयः पदार्थः आकारेण आधारेण परिवारादिभिश्च सविशेषणः वर्णनीय इति निरूपणादिकं। तुल्यार्थशब्दयोजनाप्रकारकीर्त्तनं। छन्दोनिरूपणं। यतिशिक्षोपायकथनं। छन्दःपूरणाय सामान्यशब्दनिरूपणं। अनायासेन श्लोकरचनार्थं छन्दःसु प्रत्येकमेकाक्षरद्व्यक्षरादिशब्दमालाकथनं।

शब्दशिक्षाप्रकारकथनं। सानुप्रासशब्दसमूहनिरूपणं। प्रशंसाहेतुशब्दनिरूपणं। परगर्हणा-प्रकारकथनं। कुलशास्त्रादिसंप्रश्नप्रकारकथनं। राज्ञो विद्यालय-शक्ति-बल-प्रजाशासन-प्रजानुरागादीनां वर्णनीयत्वकथनं। एवं मन्त्रि-पुरोहित-नृपवधू-कुमार-सैन्य-ग्राम-पुरी-सरोवर-समुद्र-सरिदुद्यान-रणप्रयाण-मृगया-विरह-स्वयंवरविवाहादिषु वर्णनीयनिरूपणं। कविसमय-निरूपणं।

२ये प्रताने.—रूढ़शब्दनिरूपणं। यौगिकशब्दनिरूपणं। स्वस्वामित्व-जन्यजनकभाव-धार्य्यधारकभाव-भोज्यभोजकभाव-दाम्पत्यभाव-सख्यादिसम्बन्धयुक्तशब्दमालाकथनं। मिश्रशब्द-निरूपणं। यौगिकनाममालाकथनं। अनुप्रासोपायकीर्त्तनं। अनुप्रासानयनाय उपायान्तरक-थनं। मुख्यशब्दनिरूपणं। लक्षकशब्दनिरूपणं। अत्र लक्षणाविचारस्तद्भेदकथनञ्च। लक्षणार्ह-शब्दमालाकथनं। व्यञ्जनाकथनं।

३ये प्रताने,—श्लेषव्युत्पादनं। तदुपयोगिशब्दमालाकीर्त्तनं। श्वेतवर्णादिवर्णनप्रकारकथनं। श्वेतवर्णकथनं। एवं रक्तपीतश्यामादिवर्णकथनं। स्वर्ग-व्योम-भूमि-पाताल-शैलाधारनिरूपणं। आकारक्रियादिशब्दकथनं। उद्दिष्टवर्णनप्रकारकथनं। तत्र श्वेतपीतरक्तश्यामादिवस्तुकथनं। अद्भुतविधिः। स्वराणां मिथःश्लेषोपायकथनं। यमकोपायकीर्त्तनं। चित्रकाव्यरचनाप्रकारक-थनं। तदुपायकथनं। ककारादिक्रमेण एकाक्षरद्व्यक्षरादितदुपयोगिशब्दकथनं। अनेकार्था-व्ययशब्दसङ्ग्रहः। एकाक्षरधातुकथनं। एवं परस्मैपद्यात्मनेपद्यदादि-दिवादि-स्वादि-तुदादि-प्रभृतिधातुनिरूपणं। द्व्यक्षरत्र्यक्षरादिशब्दकथनं। अकण्ठ्यादिशब्दकथनं। तुरगपदरीत्या श्लोकाक्षराङ्कन्यासप्रकारकथनं। अनुलोमप्रतिलोमशब्दकथनं। एकार्थत्वे अनुलोमविलोमशब्द-कथनं। खड्गबन्धादिकथनं। च्युताक्षरादिकथनं।

४र्थे प्रताने,—अर्थालङ्कारनिरूपणं। उपमाप्रपञ्चः। सादृश्यवाचकशब्दकथनं। स्त्रीणां वेण्यादीनामुपमेयानामुपमानकीर्त्तनं। एवं पुरुषस्य ज्ञेयं। रूपकानन्वयादिनिरूपणं। उत्प्रेक्षा-द्योतकशब्दनिरूपणं। भेद्यरूपकप्रकारकथनं। ताप्यरूपककथनं। आधाररूपककथनं। आधेय-रूपककथनं। आरोप्याईगुणकथनं। दोषकथनञ्च। रूपकनिर्व्वाहप्रकारकथनं। अर्थोत्पत्ति-प्रकारकथनं। शुक्लकृष्णादिवस्तूनां वर्णनीयत्वप्रकारकथनं। श्वेतरक्तादिसारसङ्ग्रहः। प्रलम्ब-चतुरस्रपदार्थसङ्ग्रहः। हृत्तपदार्थसङ्ग्रहः। एवमर्हहृत्तादिसङ्ग्रहः। क्रियादिवर्णनेन दृष्टानिष्टार्थ-प्राप्तिकथनं। आधारपरिवारादिभ्य दृष्टानिष्टार्थप्राप्तिकथनं। एवमन्यविधेनापि ज्ञेयं। माङ्गल्या-माङ्गल्यादिनिरूपणं। एवं सुगन्ध-दुर्गन्ध-मृदु-कठिनादिपदार्थनिरूपणं। अङ्काभिधानकथनं। समस्यापूरणविधिकीर्त्तनं। वर्णविपर्य्ययनिरूपणं।

No. 2532. भाट्टदीपिकाप्रभावली। Substance, country-made paper, 10 × 5 inches. Folia, 117. Lines, 12 on a page. Extent, 3,322

ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose. Correct.

Bháṭṭa-dípiká-prabhávalí. A commentary on Khaṇḍadeva's Bháṭṭa-dipiká, on the Mímáṅs'á doctrine. The work extends from the 3rd section of chapter 1 to the close of the 4th chapter, of the original text. By Sambhu Bhaṭṭa, son of Bálakṛishṇa Bhaṭṭa.

Beginning. अथातो धर्म्मजिज्ञासेति शास्त्रारम्भसूत्रेणाधर्म्मधर्म्मस्वरूपजिज्ञासाप्रतिज्ञाया इव तद्विषयकप्रमाणमात्रजिज्ञासाप्रतिज्ञाया अपि कृतत्वात् प्रथमेऽध्याये प्रमाणमात्रमात्रे निरूपणार्थे प्राधान्यात् प्रथमतस्तत्प्रमाणभूतचोदनायाः प्रथमे पादे प्रामाण्यं निरूप्यते ।

End. सामर्थ्यसद्भावेऽपि विधिरेव स्रुवादीनामवदानादिसाधनत्वं बोधयंस्तद-न्यथानुपपत्त्या + वादिविषयत्वात् ।

Colophon. इति श्रीमत्पूर्व्वोत्तरमीमांसापारावारीणश्रीखण्डदेवान्तेवासिकविमण्ड-नबालकृष्णभट्टसुतशम्भुभट्टविरचितायां भाट्टदीपिकाप्रभावल्यां प्रथमाध्यायस्य चतुर्थपादः ।

विषयः । खण्डदेवकृतभाट्टदीपिकाभिधानाया मीमांसासूत्रव्याख्यायाः प्रथमाध्यायस्य तृतीयपादादारभ्य चतुर्थपादपर्य्यन्तं प्रतिव्याख्यानं ।

No. 2533. निम्बार्कनामसहस्रम् । Substance, country-made paper, 7½ × 4 inches. Folia, 27. Lines, 7 on a page. Extent, 284 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Verse. Incorrect.

Nimbárka-náma-sahasra. A hymn in praise of Nimbárka. It professes to be an extract from one of the minor Puráṇas.

Beginning. अनिरुद्धः सदा त्राता निम्बार्कः पुरुषार्थवित् ।
कृपासारसुधादृष्ट्या निगमौघप्रवर्त्तकः ।
त्रेतायुगे गतप्राये नैमिषारण्यवासिनः ।
आराधनाय कृष्णस्य विप्रा गौरमुखादयः ॥
बहुकालं तपस्तप्त्वा नारायणपरायणाः ।
ध्रुवमध्वरमाराध्यारेभिरे ते मखान्तरं ॥

End. अखिल + मवतीर्णं विष्णुहस्तस्यमेव
हरिविधिहरपार्श्वे सर्व्वतो विद्यमानं ।
व्रजपतिसुत + श्रीरङ्गदेव्याकृति त
मित + + + मये निम्बार्कमाचार्य्यवर्य्यं ॥

Colophon. इति श्रीनैमिषखण्डे श्रीनिम्बार्कनामसहस्रं सम्पूर्णं ।

विषयः । सुदर्शनावतारस्य भगवतो निम्बार्कस्य स्तोत्रं ।

No. 2534. छन्दोमञ्जरीटीका । Substance, country-made paper, 11 × 5½ inches. Folia, 23. Lines, 9 on a page. Extent, 519 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose. Incorrect.

Chhandomanjarí-ṭíká. A commentary on the 'Chhandomanjarí,' a treatise on versification. By Vaṅśídhara.

Beginning. स्वर्गापवर्गदौ पुंसां भक्तिकल्पद्रुमावपि ।
श्रीकृष्णचरणौ वन्दे सन्देहवनपावकौ ॥
पञ्चवरहितायां सदर्थसन्देहकन्दलाढ्यायां ।
वंशीवदनस्योक्तौ श्रद्धां किल साधवो दधतु ॥
ग्रन्थारम्भे विशिष्टदेवताप्रणामरूपं मङ्गलं शिष्यशिक्षार्थं प्रतिजानीते देवमिति ।

End. अथ पूर्व्वोक्तानां गणानां शुभाशुभफलमाह समुदायसंज्ञाग्रहणादेकवचनं तचादौ मगणफलं ।

Colophon. इति । समाप्तेयं छन्दोमञ्जरीटीका ।

विषयः । गङ्गादासकृतछन्दोमञ्जरीग्रन्थस्य व्याख्यानम् ।

No. 2535. सारकौमुदी । Substance, country-made paper, 11 × 5 inches. Folia, 192. Lines, 12 on a page. Extent, 4,740 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, old. Verse. Incorrect.

Sára-kaumudí. A treatise on pathology and therapeutics. Author's name not made out.

Beginning. प्रणम्य परमानन्दद्वन्द्वकन्दं गुरोः पदम् ।
मन्दधीसाधुबोधाय साध्यते सारकौमुदी ॥
धर्म्मार्थकाममोक्षाणामारोग्यं फलमुत्तमं ।
रोगास्तस्यापहर्त्तारः श्रेयसो जीवितस्य च ।
क्वचिद्धर्म्मः क्वचित्कर्म्म क्वचिन्मित्रं क्वचित् + सः
कर्म्माभ्यासः क्वचिन्नित्यं चिकित्सा नास्ति निष्फला

व्याधेस्तत्त्व परिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं × + + + + + + + ॥
यावत्कण्ठगताः प्राणा यावन्नास्ति निरिन्द्रियः ।
तावच्चिकित्सा कर्त्तव्या कालस्य कुटिला गतिः । इत्यादि ।

End. दशाङ्गमगदं पीत्वा सर्व्वकीटविषं जयेत् ।
कीटदत्तक्रियाः सर्व्वाः समानाः स्युरनेकशः ॥

Colophon. इति सारकौमुद्यां विषाधिकारपरिच्छेदः ।

विषयः । ज्वरादिविषाधिकारपर्य्यन्तं सर्व्वेषां रोगाणां चिकित्सानिरूपणम् । भैषज्यव्यवस्था च ।

No. 2536. धातुपाठः । Substance, country-made paper, 10 × 5½ inches. Folia, 21. Lines, 9 on a page. Extent, 405 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhiká-prasáda Sen. Appearance, fresh. Prose. Correct.

Dhátu-pátha. On Sanskṛit conjugation and paradigms of verbs. By Bhímadása.

Beginning. भू सत्तायामुदात्तः परस्मैभाषः । अथ कखान्ताः षट्त्रिंशदनुदात्तेतः । एध वृद्धौ स्पर्द्ध सङ्घर्षे ।

End. तरण गतौ पयस् प्रसृतौ सम्भूयस् प्रभूतभावे अम्बर सम्बर सम्भरणे ।

Colophon. इति कण्ड्वादिगणो धातुपाठः भीमसेनकृतः सम्पूर्णतामाप ।

विषयः । चुरादि-क्र्यादि-रुधादिगणक्रमेण धातूनामर्थकथनं । आत्मनेपदादिनिरूपणञ्च ।

No. 2537. शातपथानुवाकसंख्या । Substance, country-made paper, 9 × 5 inches. Folia, 12. Lines, 11 on a page. Extent, 264 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose. Correct.

S'átapathánuváka-saṅkhyá. An Index to the Anuvákas of the S'atapatha Bráhmaṇa of tha Mádhyandiní S'ákhá. By Dámodara.

Beginning. (द्वे पत्रे न स्तः) अपं वै प्राज्ञापां पंपवते । समग्रं वा एते प्रजयति । यद्राक्षाके । दीर्घसत्र इवा । इत्यादि ।

End. एवं चतुर्द्दशकाण्डे सप्तपञ्चाशत्षष्ठवत्युत्तरसप्तशतं । ७ । ५० । ९६ । १४ ।
यजुर्व्वेदसमाम्नाये द्युम्निम् माध्यन्दिनीयके ।

चतुर्द्दशैव काण्डानि प्रोक्तानि मुनिसत्तमैः ॥
अष्टषष्टिप्रपाठाश्च अध्यायाः शतमेव च ।
ब्राह्मणानान्तु चत्वारि शतानि कीर्त्तितान्यपि ॥
अष्टत्रिंशत् तथान्यानि समुद्दिष्टान्यसंशयं ।
कण्डिकानामियं संख्या सप्तसाहस्रषट्शती ॥
चतुर्विंशतिरेवाथ प्रोक्ता + मुनिसत्तमैः ।
श्रीमद्दामोदरेणायं कृतोऽत्र सत्परिश्रमः ॥
परार्थमेव तत्सन्तः परार्थैकफलाश्रयाः ।

Colophon. इति श्रीउपाध्यायषड्दर्शनव्याख्यातृनागरज्योतिस्तिलकश्रीदामोदरकृता शतपथानुवाकसंख्या ।

विषयः । शुक्लयजुर्वेदीयमाध्यन्दिनीशाखायाः अनुवाकपरिगणनं ।

No. 2538. योगचिन्तामणिः । Substance, country-made paper, 13 × 5 inches. Folia, 60. Lines, 10 on a page. Extent, 1,875 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose and verse. Incorrect.

Yoga-chintámaṇi. On the mystical rites of the Yoga system. By S'ivánanda Sarasvatí, disciple of Rámachandra Sadánanda Sarasvatí.

Beginning + + + + + + + + + + का योनिसम्भवः ।
यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ।
प्राणाग्निविन्दुनादानां सावित्री सा सरस्वती ॥
मूलाधाराग्रकोणस्था सुषुम्ना ब्रह्मरन्ध्रगा । इत्यादि ।

End. येनाराधि महादेवो गौरी ब्रह्माथ वा हरिः ।
लम्बोदरो रविर्वापि स योगात् सिद्धिमाप्नुयात् ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीरामचन्द्रसदानन्दसरस्वतीशिष्य शिवानन्दसरस्वतीविरचितयोगचिन्तामणौ चतुर्थपरिच्छेदः समाप्तः ।

विषयः । षट्चक्रसंस्थानादिकथनं । कस्यचिन्मतेन मूलाधारस्वाधिष्ठानचक्रयोरभेदकथनं । दशाग्निस्थानकथनं । भ्राजक-रञ्जक-वातक-श्लेष्मक-पावक-रेचक-दाहक-शोषक-पोषक-बन्धकरूपदशविधदैहिकवह्निस्थानादिनिरूपणम् । षोड़शविधाधारनिरूपणम् । विसर्गमण्डलादीनां संस्थानादिकथनं । योनिमुद्रानिरूपणम् । ब्रह्मचक्राद्यष्टविधचक्रनिरूपणम् । मतान्तरेण अन्यान्यचक्रनिरूपणादिकं । अत्र ध्यानप्रकारादिकथनं । शरीरस्थकैलाससंज्ञकस्थानादि

कथनं। हठयोगप्रक्रियायां धौतीकरणप्रकारादिकथनं। वस्तीकर्म्मकथनं। नेतीकर्म्मकथनं। त्राटककर्म्मकथनं। नौलीकर्म्मकथनं कपालभातीकर्म्मनिरूपणञ्च। महामुद्रा-महाबन्ध-महावेधप्रभृतिनवविधमुद्रानिरूपणं। तत्तत्साधनप्रकारफलादिकथनं। अभ्यासप्रक्रियाकथनञ्च। योगाङ्गनिरूपणम्। दशविधयमलक्षणकथनं। नियमकथनं। तपः-सन्तोष-आस्तिक्यादीनां लक्षणं। आसननिरूपणं। पद्म-स्वस्तिकार्द्धचन्द्रासनाञ्जलिका-दण्ड-पीठ-पर्य्यङ्क-योगपट्टासन-योगसिद्धिद-कूर्म्म-अर्द्धगोमुख-वीरसिंह भद्र-मुक्त-मयूर-कुक्कुट-धनुः-पश्चिमतानप्रभृतीनामासनानां लक्षणादिकथनं। योगसाधनस्थानादिकथनं। नाड़ीशुद्धिप्रकारकथनं। प्राणायामप्रक्रियाकथनं। तत्र प्रथमाभ्यासादौ शिरःकम्पादिलक्षणकीर्त्तनं। पूरककुम्भकरेचकेषु ध्यानजपविशेषकीर्त्तनं। सगर्भप्राणायामनिरूपणं। विगर्भप्राणायामादिकथनं। स्त्रीशूद्रादिषु प्राणायमविशेषकथनं। प्राणायामस्य चरमावस्थायां भ्रमरीवेगोद्वोषादिभवकथनं। प्राणजयोपायकथनं। रोगदशायां योगाभ्यासनिषेधकथनं। वायोः कुण्डलिनीस्थानप्रेरणप्रक्रियाकथनं। प्रथमयोगाभ्यासप्रक्रियाकथनं। तत्र तत्र चिह्नादिकथनञ्च। पक्वयोगस्य लक्षणादिकथनं। प्रत्याहारलक्षणं। तत् प्रक्रियाकथनं। धारणालक्षणं। देहे पादादिजानुपर्य्यन्तं पृथिवीस्थानमितिकथनं। आजानुपायुपर्य्यन्तं जलस्थानकथनं। एवं वह्निस्थानादिनिरूपणं। पञ्चविधधारणाप्रकारकीर्त्तनं। तत्र फलकथनञ्च। ध्यानस्वरूपकथनादिकं। निर्गुणध्यानप्रकारकथनं। सगुणध्यानप्रक्रियाकथनं। समाधिनिरूपणं। योगप्रतिबन्धकभ्रमोपसर्गादिनिरूपणं। योगाभ्यासात् परमेश्वरानुगृहीतस्य निर्व्विघ्नं साङ्गयोगमातिष्ठतो योगिनो विश्वासार्थं परीक्षार्थञ्च क्रमेण मोक्षावान्तरफलरूपजन्मौषधिमन्त्रतप आदिसिद्धिजननकथनं। कल्पितसाधनोद्भवभेदात् द्विविधसिद्धिकथनं। योगसिद्धिलक्षणं। अणिमादिसिद्धिलक्षणं। प्रलयेऽपि योगिनः सर्व्वसुखभोक्तृत्वकथनं। क्षिप्तमूढविक्षिप्तरूपचित्तभूमिनिरूपणं। अन्तःकरणजयप्रक्रियाकथनं। कैवल्यनिरूपणं। आयुर्ज्ञानप्रकारकथनं। आसन्नमृत्युलक्षणं।

No. 2539. आचारपद्धतिः। Substance, country-made paper, 7½ × 5 inches. Folia, 80. Lines, 7 on a page. Extent, 1,050 ślokas. Character, Nágara. Date, Sm. 1855. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose and verse. Correct.

A'chára-paddhati. A digest of the Smriti rules regarding A'chára. By S'rídhara Súrí.

Beginning. सन्ध्या + + दर्शयितुं जनाना-
माचारसारत्नमिवाष्टमूर्त्तिः।
भानोः करोत्यञ्जलिमष्टमूर्त्तिः
पायादपायात्स सदाशिवो वः॥

कात्यायनाद्यैर्मुनिभिर्यत्कर्म्मोक्तं द्विजन्मनां ।
आह्निकं तत्समुच्चित्य श्रीधरेणात्र लिख्यते ॥

End. एकादश्यष्टमी चैव पक्षयोश्च चतुर्द्दशी ।
आद्यामुपवसेन्नित्यं नानद्यादनयोर्द्दिवा ॥

Colophon. इति श्रीश्रीधरसूरिविरचितायामाचारपद्धतौ योगप्रसङ्गविधिः । श्रीसदाचारपद्धतावष्टत्रिंशद्विषयः समाप्ताः । संवत् १८५५ ।
आश्विनेऽपरपक्षे वै पञ्चम्यां रविवासरे ।
पृथ्वीधरेण नैपाले आह्निकं लिखितं मया ॥

विषयः ; आचारस्तुतिः । सुप्रभातविधिकीर्त्तनं । मूत्रोत्सर्गादिविधिः । शौचविधिः । आचमनविधिः । शूद्राधिकारे विशेषकथनं । ब्राह्मणस्य ताम्बूलभक्षणादौ उच्छिष्टाभावकथनादिकं । दन्तधावनविधिः । तत्र दन्तकाष्ठनिरूपणादिकं । यज्ञोपवीतविधिः । नवसूत्राणां देवताकथनं । दर्भविधिः । अवस्थाभेदेन दर्भस्य दर्भ-कुश-कुतप-तृणादिनामभेदनिरूपणं । पवित्रादीनां लक्षणं । शिखाबन्धनविधिः । प्रातःस्नानविधिः । तत्र तीर्थपरिकल्पन-जलाभिमन्त्रणादिकथनं । अनाविलजले स्नानादिफलकीर्त्तनं । स्थावरजले स्नानाशक्तौ दिव्यवायव्यादिस्नाननिरूपणं । वस्त्रपरिधानविधिः । एकश्चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयीतेति निरूपणम् । तिलकविधिः । सन्ध्योपासनविधिः । प्रातःसन्ध्याप्रयोगः । अभिवादनविधिः । अनभिवादननिरूपणं । अध्ययनविधिः । योगक्षेमविधिः । आपत्काले द्विजस्य कुशीद-कृषि-वाणिज्याद्यनुष्ठाने दोषाभावकथनं । नैमित्तिकस्नानविधिः । काम्यस्नानविधिः । क्रियास्नानविधिः । गङ्गास्नानमन्त्रकथनं । एवं करतोया-कौशिकी-गङ्गासागर-नर्म्मदा-गोमती-गौतम्यादिषु स्नानविधिकथनं । मलापकर्षणविधिः । मृत्तिकाप्रार्थनाविधिः । गोमयप्रार्थनाविधिः । अभिषेकविधिः । तर्पणविधिः । दिनविशेषे तिलतर्पणनिषेधः । मध्याह्नसन्ध्याविधिः । ब्रह्मयज्ञविधिः । स्थले तर्पणविधिः । सामान्यतोदेवार्च्चनविधिः । जलदेवतार्च्चनविधिः । प्रोक्षणाम्भोविधिः । गृहदेवार्च्चनविधिः । वैश्वदेवविधिः । वैश्वदेवबलिमन्त्रकथनं । गोग्रासमन्त्रकथनं । नित्यश्राद्धविधिः । अतिथिपूजनविधिः । तत्र अपूजने दोषकथनं । भोजनविधिः । सायंसन्ध्याविधिः । शयनविधिः । स्त्रीसेवनविधिः । गृहस्थधर्म्मविधिः । संक्षेपेण योगविधिकीर्त्तनं । शिवार्च्चनमाहात्म्यकथनञ्च ।

No. 2540. यजुर्व्वेदमन्त्रभाष्यम् । Substance, country-made paper, 10 × 4 inches. Folia, 362. Lines, 11 on a page. Extent, 9,926 ślokas. Character, old Nágara. Date, Sm. 1507. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose. Correct.

Yajurveda-mantra-bháshya. A commentary on the Mantras of the White Yajur Veda. By Uäṭa, otherwise and more frequently called Uvaṭa.

Beginning. हृदयं दक्षिणस्याक्षिमण्डलं याधितस्य यः ।
वेष्टते तमहं नौमि ऋग्यजुःसामविग्रहं ॥
आदित्या + + वान् यस्य शाखाः पञ्चदशापराः ।
तं याज्ञवल्क्यं वन्देऽहं मन्त्रभाष्यप्रसिद्धये ॥
गुरुतस्तु के + + व तथा शतपथश्रुतेः ।
ऋषीन् वक्ष्यामि मन्त्राणां देवताश्छन्दसश्च यत् ॥
ऋचो यजूंषि सामानि तथार्थः पदवाक्ययोः ।
श्रुतयश्चात्र याः प्रोक्ता योऽर्थवादश्च कर्म्मणः ॥

तत्र पूर्व्वस्मिन् कल्पे विशिष्टकर्म्मजनितस्मृतिसंस्कारसन्तानानुच्छित्तिधर्म्माणः सुप्तप्रतिबुद्धन्यायेन हिरण्यगर्भप्रभृतय इत्यादि ।

End. आकाशशब्देनैवैतद्रूपं ब्रह्माभिहितं स्यादित्यर्थः । अयमेव च ब्रह्माभिहितं स्यात् इति । अयमेव ब्रह्मवित् ॥

Colophon. इति ऊ अटकृतौ मन्त्रभाष्ये चत्वारिंशत्तमोऽध्यायः समाप्तः ।
आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना ।
मन्त्रभाष्यमिदं कृत्स्नं पदवाक्यैः सुनिश्चितैः ॥ संवत् १५०७ ।

विषयः । शुक्लयजुर्व्वेदीयमन्त्राणां व्याख्यानं ।

No. 2541. भागवताष्टकम् । Substance, country-made paper, 6 × 4 inches. Folia, 2. Lines, 9 on a page. Extent, 22 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhiká-prasáda Sen. Appearance, fresh. Verse. Correct.

Bhágavatáshṭaka. A eulogium on the *Bhágavata-puráṇa*, in 8 stanzas. By Rasikendra Deva.

Beginning. श्रीगोविन्दपदारविन्दमधुपानन्याभिलाषोन्वितान्
पूर्णप्रेमरसोत्सवोज्ज्वलमनोहृत्तिप्रसन्नाननान् ।
शश्वत्कृष्णकथामहामृतमये शौरा मुदा खेलतो
वन्दे भागवतानिमान् + + + + मूर्द्धा निपत्य क्षितौ ॥

End. एतद्भागवताष्टकं पठति यः श्रद्धान्वितः चेमदं

भक्त्युद्रकविवर्द्धनं प्रतिपदं प्रेमप्रमोदप्रदं ।
प्रेमाणं परमं ध्रुवं स लभते वृन्दावने स्वात्मसु
नित्यं भागवतेच्छयैव वसगो (वसति) गोपाङ्गनावल्लभः ॥

Colophon. श्रीमद्रसिकेन्द्रदेवेन विरचितं श्रीभागवताष्टकं समाप्तं ।

विषयः । श्रीमद्भागवतस्य स्तोत्रं ।

No. 2542. तीर्थरत्नाकरः । Substance, country-made paper, 11 × 4 inches. Folia, 303. Lines, 10 on a page. Extent, 7,927 ślokas. Character, Nágara. Date, Sm. 1690. Place of deposit, Bahrámpur, Bábu Rádhiká-prasáda Sen. Appearance, old. Prose and verse. Correct.

Tírtharatnákara alias **Rámaprasáda.** A digest of the rules regarding pilgrimages and descriptions of a large number of the more renowned places of pilgrimage. By Rámakṛishṇa Bhaṭṭa, son of Mádhava, of the Parásara gotra.

Beginning. आनन्दाञ्चितवक्त्रपङ्कजमिलन्नीलाम्बुदश्यामलं
मूलोत्खातसमस्तराक्षसकुलं कारुण्यपाथोनिधिं ।
ब्रह्मेन्द्रादिसमर्च्चिताङ्घ्रिकमलं तीर्थास्पदं सत्यदं
सीतालक्ष्मणसेवितं रघुवरं श्रीरामचन्द्रं भजे ॥
भूमौ विद्याविनयविमलः सुप्रसिद्धोऽस्ति वंशः
कर्म्मब्रह्मप्रवणमतयः सर्व्वे एव द्विजेन्द्राः ।
गोत्रं वक्ति प्रवरसहितं यत्र पाराशराख्यं
भक्तिर्विष्णोर्भुवनजननी देवता+ पुरा च ॥
शिवदासाभिधस्तत्र वंशे सर्व्वगुणान्विते ।
वेदशास्त्रार्थसम्पन्नः सदाचारपरोऽभवत् ॥
तत्पुत्रोऽभून्मित्रशर्म्मा द्विजेन्द्रो
मित्रः साक्षाद् ब्राह्मतेजोविशेषैः ।
विद्वद्वृन्दैः पूजितः सर्व्वशास्त्र
व्याख्याशिष्योद्गीतकीर्त्तिः पृथिव्याम् ॥
जनार्द्दनस्तस्य सुतो मनीषी
जनार्द्दनार्च्चानिरतो बभूव ।
उद्दामविद्वज्जनगीतकीर्त्ति
र्म्महीपतीन्द्रार्च्चितरम्यमूर्त्तिः ॥

तस्माज्जातो वेदशास्त्रेष्वधीती
गङ्गादेव्या भैरवाख्यो द्विजेन्द्रः ।
कीर्त्तिर्येनोपार्ज्जिता विश्ववन्द्या
वृत्तिस्थाग्रा भूपतेः शेषवंश्यात् ॥
समुत्पन्नस्तस्मादतिविमलकीर्त्तिर्द्विजवरः
कृती सूनादेव्यायुधसदसि नारायण इति ।
प्रसिद्धः शास्त्रेषु क्षितिपतिसमूहार्च्चितपदः
परब्रह्मानन्दामृतरससमास्वादनपटः ॥
तस्मादभूद्धर्म्मतनूरथार्य्यः
श्रीमाधवः पुण्यपवित्रकीर्त्तिः ।
वेदान्त वि + + भवप्रवृत्तिः
श्रीरामचन्द्रार्प्पितचित्तवृत्तिः ॥
तस्माज्जातः प्रभावा + रामकृष्णाभिधः सुधीः ।
पितृभक्तिपरः काश्यां सर्व्वशास्त्रविशारदः ॥
तत्तद्ग्रन्थविनिर्म्माणात् स्वविद्या प्रकटीकृता ।
पृथिव्यां येन कीर्त्तिश्च पूर्व्वापरसमुद्रयोः ॥
राजराजाभिधश्रीमद्गोपीनाथद्विजोत्तमात् ।
विद्वन्नागरवृन्देषु प्राप्तं भट्टपदं स्थिरं ॥
गजपतिसदासि + सा पदवी बलभद्रराजगुरोः ।
पण्डितशिरोमणिरिति प्रतापमार्त्तण्डनिर्म्माणात् ॥
सोऽयं निबन्धानालोच्य पुराणानि च यत्नतः ।
रामप्रसादात् कुरुते कृती तीर्थनिरूपणम् ॥
अथ तीर्थमाहात्म्य । वायुपुराणे ।

End. श्रीरामप्रसादनिष्पन्नतीर्थरत्नाकरो मया ।
तत्पादपद्मयुगले काश्यां भक्त्या निवेदितः ॥

Colophon. श्रीमत्पाराशरसगोत्रसकलशास्त्रविशारदश्रीमाधवात्मजरामकृष्णभट्टविरचिते श्रीरामप्रसादाख्ये तीर्थरत्नाकरे मध्यदेशस्थतीर्थमाहात्म्यं समाप्तं ॥ समाप्तोऽयं ग्रन्थः । संवत् १९९० । वैशाखवदि ।

विषयः । सामान्यतः तीर्थमाहात्म्यवर्णनं । तीर्थस्वरूपनिरूपणं । स्वयम्भूतदेवनिर्म्मितभेदेन द्विविधतीर्थकथनं । विन्ध्याश्रिततीर्थनिरूपणं । हिमालयाश्रिततीर्थकथनं । सत्य-क्षमादिमानसतीर्थनिरूपणं । तीर्थयात्राविधानकथनं । पार्व्वणादिविधानं । चौरादिविधानं । तत्र

तीर्थस्नानादीनां प्रायश्चित्तत्वनिरूपणं। तीर्थविशेषे यानारोहणादिना गमने दोषनिरूपणं। तीर्थाधिकारिनिरूपणं। गृहस्थस्य स्त्रीसहितस्यैव अधिकार इति निरूपणं। कालशुद्धिकीर्त्तनं। तीर्थप्रवेशदिने कर्त्तव्यनिरूपणं। तत्र उपवासविधिः। मुण्डनविधिः। सधवानां मुण्डनप्रतिषेधकथनं। सामान्यतः तीर्थश्राद्धविधिकीर्त्तनं। तत्र अधिकारिनिरूपणम्। प्रसङ्गाद्धर्म्मनिर्णये अधिकारिनिरूपणम्। गङ्गादीनां माहात्म्यकथनं। सरस्वत्या उपाख्यानं। कुरुक्षेत्रमाहात्म्यं। पृथूदकमाहात्म्यं। पुष्करमाहात्म्यं। प्रभासमाहात्म्यं। अनन्तनरकतीर्थमाहात्म्यं। नर्म्मदामाहात्म्यं। तत्र स्नानविधिः। नर्म्मदास्तोत्रकीर्त्तनं। तत्र दानादिफलकीर्त्तनं। मणिकर्णिकाया उत्पत्तिकथनादिकं। काशीमाहात्म्यं। मुक्तिधामनिरूपणं। तुङ्गभद्राया माहात्म्यकथनं। देवदारुवनमाहात्म्यं। मातृतीर्थमाहात्म्यं। द्वारकामाहात्म्यं। गोदावरीमाहात्म्यं। सेतुबन्धमाहात्म्यं। तापीमाहात्म्यं। उज्जयिनीमाहात्म्यं। पाकपुण्डवर्द्धनादिनानाविधतीर्थमाहात्म्यं। सप्तकोटीश्वरमाहात्म्यं। वस्त्रापथमाहात्म्यं। रामेश्वरमाहात्म्यं। कृत्तिवासेश्वरमाहात्म्यं। सप्तगङ्गादितीर्थकाहात्म्यं। गङ्गोद्भेदतीर्थमाहात्म्यं। कोकामुखमाहात्म्यं। यमुनामाहात्म्यं। भागीरथ्या उत्पत्तिकथनं। तज्जलमरणादिफलकीर्त्तनं। शालग्राममाहात्म्यं। विरजाक्षेत्रमाहात्म्यं। गङ्गासागरसमीपे कपिलदर्शनफलकथनं। नैमिषारण्यमाहात्म्यं। वदरिकाश्रममाहात्म्यं। मथुरामाहात्म्यं। सरस्वतीमाहात्म्यं। विशेषेण काशीमाहात्म्यकथनं। गङ्गापूजनविधानं। गिरिदामोदरमाहात्म्यं। दक्षिणगोकर्णमाहात्म्यं। प्रभासतीर्थमाहात्म्यं। तत्र यात्राक्रमनिरूपणं। कालञ्जरमाहात्म्यं। कोणादित्यमाहात्म्यं। प्रयागमाहात्म्यं। गयामाहात्म्यं। प्रयागे माघस्नानफलकथनं। पञ्चक्रोशीयात्राविधिः। विशेषेण प्रभासमाहात्म्यकथनं। कालेश्वरमाहात्म्यकथनं। ओङ्कारेश्वरमाहात्म्यं। कपालमोचनमाहात्म्यं। कृत्तिवासेश्वरमाहात्म्यं। रेवातीर्थमाहात्म्यं। द्वारकामाहात्म्यं। आवन्तीमाहात्म्यं। कोटितीर्थमाहा ्यं। अङ्कपादमाहात्म्यं। समुद्रस्नानविधिकीर्त्तनं। एकपादमाहात्म्यं। अयोध्यामाहात्म्यं। गोदावरीमाहात्म्यं। समुद्रसङ्गममाहात्म्यं। रामतीर्थमाहात्म्यं। गौतमीमाहात्म्यं। गोदावरीतीरस्थतीर्थविवरणं। शुक्लतीर्थमाहात्म्यं। रामेश्वरोत्पत्तिकथनं। मणिकर्णिकापरिमाणादिनिरूपणं। काशीस्मरणादिफलकीर्त्तनं। पञ्चतीर्थविधिकीर्त्तनं। शङ्खोद्धारमाहात्म्यं। तीर्थे प्रतिग्रहादिनियमकथनं। पुरुषोत्तममाहात्म्यं। स्नानयात्रादिविधिकथनं। महानागतीर्थमहिमादिकीर्त्तनञ्च।

No. 2543. बालबोधः। Substance, country-made paper, 11 × 5½ inches. Folia, 32. Lines, 8 on a page. Extent, 666 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose. Generally correct.

Bála-bodha. An elementary grammar of the Sañskṛit language, containing a paraphrase of the well-known Sárasvata Vyákaraṇa.

By Mohanalála, son of Hirádhara. *Cf.* My Catalogue of Sanskrit Grammars, p. 151.

Beginning. प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।
सारस्वतीमृजुं कुर्व्वे प्रक्रियां नातिविस्तरां।
इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम्॥
अ इ उ ऋ लृ ए ऐ ओ औ, ह य व र ल, ञ ण न म, इत्यादि।

End. यूनः तिः। युवतिः। इति स्त्रीप्रत्ययाः। लोकात् शेषस्य सिद्धिः।
श्रीहीराधरसूनोर्मोहनलालस्य कान्यकुब्जस्य कृतिरातनोतु + + + मेधाया वृतमियं वृद्धिं।

Colophon. इति श्रीसीतापतिवागीशभट्टाचार्यपण्डितराज+श्रीहीराधरात्मजमिश्र-मोहनलालविरचितो बालबोधः समाप्तः। संवत् १८१०। माघशुद्धौ।

विषयः। व्याकरणप्रक्रियाकथनं।

No. 2544. मनोरमावृत्तिः। Substance, country-made paper, 11 × 5 inches. Folia, 29. Lines, 11 on a page. Extent, 840 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose. Incorrect.

Manoramá-vṛitti. A commentary on Vararuchí's grammar of the Prákṛit language. By Bhámaha. Printed in Professor Cowell's excellent edition of the text.

Beginning. संसारतारकमुणां + न्नरेन्द्रवन्द्या-
मज्ञानजं + तमसो द्विषमुग्रशक्तिं।
पार्श्वं प्रणम्य भुवनत्रयभूषयन्तं
प्रारभ्यते + + + + मध्यायनश्च पश्चात्॥
दग्धाम्बरा + चरणद्वयमूलमुष्टि
+ तीरमम्बुधिमिवा + पकाररक्तां
सिद्धार्थसूनुमचलं विराजमुच्चैः
+ रं नमामि गत + ममलं स्वसिद्धै॥
+ + + + + + + + + + + आदेरतः। अधिकारोऽयं। यदित ऊर्द्धमनुक्र-मिष्यामः। आदेरत्स्थाने तद्भवति। इत्यादि।

End. अ+ रर्थे आत्तो निपात्यते। अत्तोसी अलं कलाश्चं।

Colophon. इति श्रीमिश्रवररुचिकृते प्राकृतप्रकाशे मनोरमायां वृत्तौ अष्टमः परिच्छेदः सम्पूर्णः।

विषयः। वररुचिकृतप्राकृतसूत्रस्य विवरणम्।

No. 2545. अद्वैतानन्दसागरः। Substance, country-made paper, 13 × 5 inches. Folia, 477. Lines, 7 on a page. Extent, 8,538 ślokas. Character, Nágara. Date, Sm. 1894. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose and verse. Correct.

Advaitánanda-ságara. An elaborate dissertation on the adual system of the Vedánta doctrine. By Raghúttama Tírtha, disciple of Purushottama Tírtha and Svayamprakása Tírtha.

Beginning. यत्पादपद्मरजसा शिरसा धृतेन
जीवाधमोऽपि हि रघूत्तमतां गतोऽहम्।
अद्वैतसौख्यवपुषे पुरुषोत्तमाय
तस्मै नमोऽस्तु गुरवे करुणामयाय॥
अद्वैतं सच्चिदानन्दं ससीतं रघुनन्दनम्।
समस्तसिद्धिदं देवं सोऽहमस्मीति चिन्तये॥
आस्ते तव यदि लिप्सा निष्प्रत्यूहं सुदुर्लभेऽप्यर्थे।
हेरम्बपादपद्मं हे लम्बस्व द्रुतं चेतः॥
भेदभक्तान् मोहयन्तं सेव्यसेवकलीलया।
स्वभूस्वयम्भूशम्भ्वाख्यं भगवन्तमहं भजे॥
लोकसङ्ग्रहमिषेोऽतिभक्तयः
शार्ङ्गिशूलिविधिसूर्य्यशक्तयः।
साधितप्रणतसर्व्वसिद्धयः
सन्तु मे हृदि सदैकबुद्धयः॥
+ + + + + + + +
नृणां संसारकान्तारदावसन्तापसङ्कुलाः।
गाहन्तां चित्तमातङ्गा अद्वैतानन्दसागरं॥

End. या वाणी विधिसन्निधौ जलधिजा या शार्ङ्गिणः सङ्गिनी
येशानार्द्धशरीरिणी धरणिजा या रामचन्द्रप्रिया।
किं ब्रूमो जगदेकदैवतमिदं यन्नामरूपात्मकं
मूलाधारसमुत्थितोपनिषदी सा पातु नो वैखरी॥

Colophon. इति श्रीमदद्वैतानन्दसागरे तृतीयविभागे सरस्वत्यद्वैतभक्तिलहरी समाप्ता। इति श्रीमदद्वैतानन्दसागरे परमहंसपरिव्राजकाचार्य्यश्रीपुरुषोत्तमतीर्थश्रीस्वयंप्रकाशतीर्थशिष्यश्रीरघूत्तमतीर्थकृते तृतीयो विभागः समाप्तः। संवत् १८९४। श्रावणकृष्णनवम्यां। ग्रन्थसंख्या ९७५०।

विषयः। १ प्रथमे विभागे,--विवेकनिरूपणं। अविवेकलक्षणं। उभयोर्गुणदोषनिरूपणं विवेकोपायकथनं। साधुलक्षणं। असाधुलक्षणं। पाषण्डलक्षणं। सत्सङ्गफलकीर्त्तनं। भक्तिलक्षणादिकथनं। गुरवः। मूर्त्तामूर्त्तभेदेन हरेर्द्विविधध्यानकथनादिकं। गुरुभक्तिमाहात्म्यकीर्त्तनं। अद्वैतभक्तिदस्य गुरुत्वनिरूपणं। शास्त्रमन्त्रोपदेशे ब्राह्मणस्यैव अधिकार इति निरूपणं। आचार्य्यलक्षणं। सदाचारलक्षणादिकथनं। शूद्रकृतपुराणपाठादौ दोषकथनं। ब्राह्मणमाहात्म्यकीर्त्तनं। गुर्व्वादिवन्दनप्रकारादिकथनं। शास्त्रलक्षणं। हिताहितलक्षणं। परापरविद्यानिरूपणं। अङ्गोपाङ्गादिविद्यानिरूपणं। उपवेदकथनं। वेदलक्षणं। मन्त्रब्राह्मणादिलक्षणं। विधिभेदनिरूपणादिकं। अर्थवादनिरूपणं। प्रामाण्यवादः। प्रयोजनभेदेन वेदभेदकथनं। शिक्षाप्रयोजनादिकीर्त्तनं। निरुक्तशास्त्रप्रयोजनादिकीर्त्तनं। छन्दोज्योतिषादीनां प्रयोजनादिकथनं। उपाङ्गानां प्रयोजनादिकीर्त्तनं। महापुराणोपपुराणानां लक्षणं तत्तन्नामकीर्त्तनञ्च। द्विविधन्यायभेदकीर्त्तनादिकं। मीमांसाशास्त्रभेदप्रयोजनादिकथनं। एवं धर्म्मशास्त्र-सांख्य-पातञ्जल-पाशुपत-वैष्णवशास्त्राणां तात्पर्य्यादिनिरूपणं। उपवेदभेदकथनं। तत्र आयुर्व्वेदविषयकथनं। धनुर्व्वेदविषयादिनिरूपणं। गान्धर्व्ववेदविषयादिकथनं। अत्र काव्यशास्त्रकीर्त्तनं। अर्थशास्त्रस्य नीतितुरङ्गादि-स्त्रीपुरुषलक्षण-रत्नशास्त्र-पाकशास्त्र-मल्लशास्त्रादिभेदैः बहुविधत्वकथनं। आरम्भवाद-परिणामवाद-विवर्त्तवादभेदेन प्रस्थानस्य त्रैविध्यकथनं। तत्र कणादजैमिनिगौतमदर्शनेषु आरम्भवादनिरूपणमितिकथनं। एवं वैष्णव-सांख्य-पातञ्जल-पाशुपातपरिणामवादकथनं। वेदान्तेषु विवर्त्तवादकथनञ्च। त्रिविधवादानां स्वरूपनिरूपणं। राजधर्म्मनिरूपणं। तत्र राजकृत्यनिरूपणं। चतुर्व्वर्गनिरूपणं। तत्र धर्म्मलक्षणं। तदुपायनिरूपणादिकं। तन्माहात्म्यकथनञ्च। सन्ध्योपासनादिकर्त्तव्यता। स्वधर्म्मपरित्यागे दोषकथनं। भगवदुपासनावश्यकता। आश्रमोचितकर्म्मानुष्ठानकर्त्तव्यता। विष्णुशिवादीनामभेदनिरूपणं। दुर्गाकृष्णयोरभेदकथनं। पञ्चयज्ञविहीनस्य पातित्यनिरूपणं। शास्त्रेषु परमेश्वरदृष्ट्या भक्तिः कर्त्तव्येतिनिरूपणं। परमधर्म्मनिरूपणं। वेदवत्पुराणस्यापि अभ्यर्हितत्वमितिनिरूपणं। पुराणस्य सर्गप्रतिसर्गादिपञ्चलक्षणस्वरूपनिरूपणं। तस्य पञ्चवर्णककथनं। पञ्चाङ्गकीर्त्तनञ्च। जगत्स्रष्टुः विधातुरपि संसारित्वकथनं। एकविंशतिविधदुःखनिरूपणादिकं। मोक्षलक्षणं। श्रीमद्भागवतस्य दशविधलक्षणलक्षितत्वकथनं। ब्रह्मलक्षणनिरूपणं। श्रीमद्भागवतस्य सर्व्वपुराणशिरोमणित्वनिरूपणं। ब्राह्मादिपुराणानां प्रत्येकं विशेषलक्षणकीर्त्तनं। श्रीमद्भागवतं वोपदेवकृतत्वेन मन्यमानानां मतखण्डनादिकं। प्रत्येकमुपपुराणस्य विशेषलक्षणकीर्त्तनं। शास्त्रस्य ब्रह्मस्वरूपत्वकथनं। सात्त्विक-

राजसतामसपुराणभेदकीर्त्तनं। मन्वादिस्मृतीनां सात्त्विकादिभेदनिरूपणं। पुरा किल सत्ययुगादौ वेदादिशास्त्रमेकैकमासीत्। द्वापरादौ तु शास्त्राणि खण्डितानीतिनिरूपणं।

२ द्वितीये विभागे,—शरीरत्रयधारी शिवदुर्गागणेशाख्यः परमात्मा मायया नटवत् भक्तानुग्रहार्थं पितृमातृपुत्ररूपेण अवतीर्ण इतिकीर्त्तनं। सर्व्वत्र आदौ गणेशपूजाविधानं। आत्मना सह अभिन्नत्वेन परात्मचिन्तनकर्त्तव्यता। हरिहरगणेशादीनां सात्त्विकतामसत्त्वादिनिरूपणं। अत्र विविधवादकीर्त्तनं। लीलानिरूपणादिकं। देवानां सात्त्विकादिभावनिरूपणं। गणेशपूजनविधानं। रुद्रस्य परब्रह्मत्वनिरूपणं। परमेश्वरस्य स्वातन्त्र्येण परोपकारायैव शरीरग्रहणं न तु पारतन्त्र्येण कर्म्मवश्यतया स्वभोगार्थमितिनिरूपणं। ब्रह्मा विष्णुरीश्वर इत्यनादिमादिभेदेन त्रयो जीवा महेश्वरस्य अधिकारिपुरुषा इत्यादिनिरूपणं। रुद्रभक्तलक्षणकीर्त्तनं। कोटिलिङ्गाभिधानतीर्थविवरणं। हरस्य पिनाकधारणकारणकथनं। तस्य ब्रह्मपुत्रत्वहेतुकथनं। पितामहस्य जन्मकथनं। व्यावहारिकपारमार्थिकभेदेन द्विविधतत्त्वनिरूपणादिकं। शिवमाहात्म्यकीर्त्तनं। कलौ शिवमन्त्रविहीनस्य पापभागित्वकथनं। लिङ्गपूजाया नित्यत्वकथनं। त्रिपुण्ड्रमालिकादिधारणावश्यकता। तिलकरचनादौ अङ्गुल्यादिनियमः। रुद्राक्षादीनां माहात्म्यकथनं। तदुत्पत्तिकथनं। लिङ्गपूजाविधिः। निर्म्माल्यग्रहणविचारः। दुर्गायाः भगवच्छक्तित्वनिरूपणं। आराधनालक्षणं। दुर्गाभक्तिमाहात्म्यकीर्त्तनं। सांवत्सरिकदुर्गापूजाविधानं। देव्याः जगत्प्रकृतित्वनिरूपणादिकं। तत्र विविधवादकीर्त्तनं। जीवस्वरूपकीर्त्तनं। मेनकाहिमालययोः पुरतः देव्या ऐश्वररूपप्रदर्शनकथनं। शाक्तसम्प्रदाये मतभेदकथनं। श्रवणमननादीनां स्वरूपनिरूपणं। दुर्गानामकीर्त्तनमाहात्म्यं दुर्गादर्शनफलकथनं। एवं स्मरणादीनां फलकथनं। दुर्गायाः प्रियस्थाननिरूपणं। पीठमालाकीर्त्तनं। दुर्गासहस्रनामस्तोत्रकीर्त्तनं। विष्णुस्वरूपनिरूपणं। अवतारप्रयोजनादिकीर्त्तनं। स्वतन्त्रस्य भगवतो रघुवंशादौ जन्मग्रहणकारणनिरूपणं। सर्व्वभूतसङ्गिनः तस्य कथं निर्व्विकारत्वमितिनिरूपणं। भगवन्मूर्त्तिनिरूपणं। चतुर्व्व्यूहस्वरूपकथनं। न केवलया भक्त्या ईश्वरतत्त्वं वेदितुं शक्यं किन्तु विचारेणैवेतिनिरूपणं। शोकक्रोधादिरूपद्वादशविधमानसमलकथनं। अविद्यास्मितादिपञ्चक्लेशनिरूपणं। भक्तेः दशविधगुणनिरूपणं। भक्तिभेदकीर्त्तनं। अकामेन हरिभजनकर्त्तव्यता। मूर्त्तामूर्त्तभेदेन हरेर्द्विविधरूपकथनं। वासुदेवादिनाममाहात्म्यकीर्त्तनं। ब्रह्मपदशक्यतावच्छेदकनिरूपणं। सगुणभावकानां तामसादिभक्तानामिव निर्गुणभावकानां परमभागवतानाञ्च भगवन्नामकीर्त्तनं कर्त्तव्यमिति निरूप ं। प्रवृत्तिमार्गादिनिरूपणं। विष्णुपूजाविधानं। पापभेदेन नरकयातनाभोगप्रकारकीर्त्तनं। आध्यात्मिकादित्रिविधदुःखैकान्तपरित्यागोपायकथनं। सूर्य्यस्य परब्रह्मत्वनिरूपणं। तद्भक्तिमाहात्म्यकीर्त्तनं। तदर्चनाविधानं।

३ तृतीये विभागे,—वह्नेरुत्पत्तिकथनं। तस्य त्रिपुत्रविवरणं। तत्र जनपञ्चाशद्वह्निकथनं। स्वधासुतयोः मेनावैतरण्योर्जन्मकथनं। हिमालयेन सह मेनायाः विवाहकथनं। गङ्गायाः गौ-

थ्यैश्च जन्मादिककीर्त्तनञ्च। रुद्रस्य वक्र्यात्मकत्वकथनं। एकस्यैव वह्नेः नानाविधत्वकीर्त्तनं। अग्निचरित्रवर्णनं। सांख्ययोगप्रवर्त्तकस्य कपिलस्य अग्न्यवतारत्वकथनं। मनोरपि तदवतारत्वकीर्त्तनं। अन्तर्यामिनो भगवतो गायत्रीव्याख्यानव्यपदेशेन वक्र्यादिसर्व्वदेवमयावतारस्य स्तोत्रादिकीर्त्तनं। गणेशावतारवह्निस्तोत्रकथनं। सूर्य्यावतारवक्र्यन्तर्यामिस्तोत्रं। रामकृष्णावतारान्तर्यामिवह्निस्तोत्रं। बलभद्रान्तर्यामिवह्निस्तोत्रं। कालाग्निरुद्रनामाग्निस्तोत्रं। दुर्गास्तोत्रामृतफलं। विधातुः परमात्मत्वनिरूपणं। ब्रह्म-स्वयम्भूप्रभृतिनामनिर्व्वचनं। ब्रह्मणः पूजाप्रकारादिकथनं। धर्म्मसंस्थापनार्थं रामकृष्णादिचतुर्व्विग्रहरामलक्ष्मणादिचतुर्व्यूहरूपावतारधारी नित्यसिद्धज्ञानशक्तिक्रियाशक्तिमानेक एव परमात्मा सर्व्वज्ञः भक्तानामनुग्रहार्थं नट इव क्रीड़तीति श्रुतिपुराणादिभिः प्रतिपादनं। जगन्नाथदेवस्य महिमादिवर्णनं। विशेषेण श्रीरामनाममाहात्म्यादिककथनं। तापनीयोक्तश्रीरामस्तोत्रकथनं। लक्ष्म्या भगवच्छक्तित्वनिरूपणं। एवं दुर्गादीनां ज्ञेयं। परमेश्वरलीलावगमस्तु भगवत्कृपयैव भवति नान्यथेतिनिरूपणं। दुर्गाकृष्णयोरभेदप्रतिपादनं। महालक्ष्मीस्तोत्रं। गङ्गाया माहात्म्यादिकीर्त्तनं। दशविधपापहरदशहरागङ्गास्तोत्रकीर्त्तनं। सरस्वत्या जन्मादिकथनं। तस्या माहात्म्यकीर्त्तनं। तस्याः स्तोत्रादिकीर्त्तनञ्च।

No. 2546. वैद्यविनोदः। Substance, country-made paper, 9 × 6 inches. Folia, 88. Lines, 11 on a page. Extent, 2,092 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose and verse. Correct.

Vaidya-vinoda. Dissertations on various topics connected with the practice of medicine. By Bhaṭṭa S'aṅkara, son of Ananta Bhaṭṭa. Compiled by order of Rájá Ráma Siṅha, son of Rájá Jaya Siṅha, of Amber.

Beginning. सकलसुखनिधानं भुक्तिमुक्तिप्रदं यज्जयति जगति सिद्धैः सर्व्वदोपास्यमानं।
करकलितवराज्ञाभीतिखड्गं प्रसन्नं दिशतु फलमभीष्टं श्यामधामाम्बिकायाः॥
अनन्तनामा हि दिगन्तकीर्त्तिः श्रीगौड़वंशः प्रथितप्रभावः।
तदात्मजः शङ्करनामधेयः शास्त्रेषु काव्येषु परं प्रवीणः॥
राजाधिराजो जयसिंहवीरः ख्यातः पृथिव्यां महनीयकीर्त्तिः।
प्रतीपभूपालनिवारणेन प्रतापपुञ्जज्वलदग्निकल्पः॥
तदात्मजो रामसमानसारो नाम्ना चिरायुर्न्नृपरामसिंहः।
रूपेण दानेन पराक्रमेण तिरस्कृतानङ्गसुरद्रुमेन्द्रः॥
दानं यदीयं परिकल्पितं यद्दृष्ट्वैव मेषं सुरपादपाद्याः।
मानं परित्यज्य विमृश्य बुद्ध्या स्थितिः श्लाभा नेति दिवं प्रयाता॥

क्षेमस्य योगस्य च मे विधातुः तस्याज्ञया ग्रन्थकृतादरेण ।
ये ये प्रयोगा बहुशोऽनुभूता स्ते ते मया संलिखिता विमृश्य ॥
प्रणम्य मान्यान् विनिवेदयामि ग्रन्थं मुदा पश्यत सावधानाः ।
दृष्टे यदस्मिन् परमः प्रमोदः भवेत्तथा सिद्धिरपि प्रकृष्टा ॥
हारीतपाराशरसुश्रुतानां संगृह्य सारं विधिवत्समासात् ।
सौख्याय रोगार्दितमानवानां विधीयते वैद्यविनोद एषः ॥

End. भट्टानन्दात्मजस्येयं शङ्करस्य कृतिः सतां ।
आनन्दयतु चित्तानि चिकित्सा सिद्धिदायिनी ॥
श्रीमद्भूपतिरामसिंहवचनाद्ग्रन्थो मया निर्म्मितो-
यस्मिन् रोगविनिश्चयश्च कथितो + + चिकित्सा क्रमात् ।
योगो ह्यष्यतमो रसायनविधिः संशोधनादेर्विधि-
रस्ति + वनधूमपानकवलो व्योषादिसंज्ञास्तथा ॥

Colophon. इति श्रीमदनन्तभट्टात्मजभट्टशङ्करविरचिते वैद्यविनोदे निदानचिकित्साहृष्यरसायनजलयोगविरेचनादियुक्तायुक्तविचारो नाम दशमोल्लासः १० ॥

विषयः । रोगविशेषे नाड़ीगतिविशेषनिरूपणं । मरणकालज्ञानकथनं । इच्छाप्रमाणपरिकीर्त्तितवामदेवस्मासात् ज्वरोत्पत्तिकथनं । प्राधान्येन अष्टविधज्वरकथनं । तत्र वातज्वरचिकित्सानिदानादिकथनं । पित्तज्वरचिकित्सानिदानादिकथनं । कफज्वरचिकित्सानिदानादिकथनं । वातपित्तज्वरचिकित्सानिदानं । वातकफज्वरचिकित्सानिदानं । कफपित्तज्वरचिकित्सानिदानं । सन्निपातज्वरचिकित्सानिदानं । तत्र दाह-शीत-पित्तभ्रम-विभुग्ननेत्रत्व-रक्तष्ठीवनादिचिकित्साकथनं । त्रयोदशविधसन्निपातचिकित्साकथनं । विषमज्वरचिकित्सानिदानादिकथनं । जीर्णज्वरचिकित्सानिदानादिकथनं । अतीसारलक्षणनिदानचिकित्सादिकथनं । तत्र वातातीसार-पित्तातीसार-कफातीसारादीनां लक्षणचिकित्सादिकथनं । एवमामरक्तातीसारादीनां चिकित्सादिकथनं । ग्रहणीरोगनिदानचिकित्सादिकथनं । अर्शोरोगनिदानचिकित्सादिकथनं । अजीर्णरोगनिदानचिकित्सादिकथनं । कृमिलक्षणनिदानचिकित्सादिकथनं । पाण्डुरोगनिदानचिकित्सादिकथनं । पित्तनिदानचिकित्सादिकथनं । राजयक्ष्मनिदानचिकित्सादिकथनं । क्षयरोगनिदानचिकित्सादिकथनं । कासरोगनिदानचिकित्सादिकथनं । हिक्कानिदानचिकित्सादिकथनं । श्वासरोगनिदानचिकित्सादिकथनं । स्वरभेदनिदानचिकित्सादिकथनं । अरोचकनिदानचिकित्सादिकथनं । छर्द्दिनिदानचिकित्सादिकथनं । तृष्णानिदानचिकित्सादिकथनं । मूर्च्छारोगनिदानचिकित्सादिकथनं । मदात्ययनिदानचिकित्सादिकथनं । दाहरोगनिदानचिकित्सादिकथनं । उन्मादनिदानचिकित्सादिकथनं । अपस्मारनिदानचिकित्सादिकथनं । वातरक्तनिदानचिकित्सादिकथनं । गृध्रसीनिदानचिकित्सादिकथनं । वातव्याधिनिदानचि-

कित्सितादिकथनं। आमवातनिदानचिकित्सादिकथनं। शूलरोगनिदानचिकित्सादिकथनं। उदावर्त्तादिनिदानचिकित्सादिकथनं। गुल्मनिदानचिकित्सादिकथनं। आनाहनिदानचिकित्सादिकथनं। हृद्रोगनिदानचिचित्सादिकथनं। मूत्रकृच्छ्रनिदानचिकित्सादिकथनं। मूत्राघातनिदानचिकित्सादिकथनं। अश्मरीनिदानचिकित्सादिकथनं। प्रमेहनिदानचिकित्सादिकथनं। मेदोनिदानचिकित्सादिकथनं। उदरनिदानचिकित्सादिकथनं। शोथनिदानचिकित्सादिकथनं। श्लीपदनिदानचिकित्सादिकथनं। विद्रधिनिदानचिकित्सादिकथनं। सद्योव्रणादिनिदानचिकित्सादिकथनं। गलगण्डमालादीनां निदानचिकित्सादिकथनं। भग्ननिदानचिकित्सादिकथनं। उपदंशनिदानचिकित्सादिकथनं। लिङ्गार्शोनिदानचिकित्साकथनं। शूकदोषनिदानचिकित्सादिकथनं। श्वेतकुष्ठनिदानचिकित्सादिकथनं। पादस्फोटनिदानादिकथनं। कुष्ठनिदानचिकित्सादिकथनं। अम्लपित्तनिदानचिकित्सादिकथनं। विसर्पनिदानचिकित्सादिकथनं। विस्फोटनिदानचिकित्सादिकथनं। स्नायुकनिदानचिकित्सादिकथनं। मसूरिकानिदानचिकित्सादिकथनं। क्षुद्ररोगनिदानचिकित्सादिकथनं। जिह्वारोगचिकित्सा। कण्ठरोगचिकित्सा। मुखरोगनिदानचिकित्सा। कर्णरोगनिदानचिकित्सा। प्रतिश्यायनिदानचिकित्सा। अञ्जनविधिः। नेत्ररोगनिदानचिकित्सा। शिरोरोगनिदानचिकित्साकथनं। ऋत्वभिगमनादिनियमाः। गर्भिणीकृत्यकथनं। गर्भरक्षाद्युपायकथनं। स्तन्यामयादिचिकित्सा। सूतिकारोगनिदानचिकित्सादिकथनं। स्त्रीरोगनिदानचिकित्सादिकथनं। बालरोगचिकित्साकथनं। सुखनिद्रोपायकथनं। वाजीकरणकीर्त्तनं। हरीतकीयोगकथनं। रसायनविधिः। वमनविरेचनादिविधिः। केशकृष्णीकरणादिविधानञ्च।

No. 2547. श्वेताश्वतरोपनिषद्विवरणम्। Substance, country-made paper, 12 × 6 inches. Folia, 49. Lines, 13 on a page. Extent, 2,184 ślokas. Character, Nágara. Date, Sm. 1898. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose. Correct.

S'vetásvataropanishad-vivaraṇa. A summary of the meaning and philosophy of the S'vetásvatara Upanishad. By Vijṇánátma, disciple of Jṉánottama.

Beginning. अवच्छेदत्रयातीतनिर्म्मलज्ञानमूर्त्तये।
नमो गिरां विदूराय दक्षिणामूर्त्तये नमः॥
निगमान्तप्रदीपाय निःसङ्गसुखसंविदे।
संसारातपनोदाय विद्याश्रीपतये नमः॥
प्रत्यस्ताखिलभेदाय जगद्विभ्रमसाक्षिणे।
ज्ञानोत्तममुनीन्द्राय नमः प्रत्यक्सुखात्मने॥

नमः परमऋषिभ्यो नमो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो ब्रह्मवादिन इति। इदं ब्राह्मण-वाक्यं वादिनो वदनशीलाः। इत्यादि।

End. अस्यामुपनिषदि भगवता श्वेताश्वतरेण एते कथिताः उपदिष्टाः। हि यस्मा-दर्थाः प्रकाशन्ते यथावत् प्रकाशन्ते महात्मनो महानुभावस्य नान्यस्येति यस्मात् तस्माद्विद्यार्थिभि-र्देवतागुरुविषया निरुपाधिका भक्तिः कर्त्तव्येति अभिप्रायः। द्विर्वचनमध्यायपरिसमाप्तिद्योत-नार्थमादरार्थञ्च।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्ज्ञानोत्तमपूज्यपादशिष्यश्री-मद्विज्ञानात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे षष्ठोऽध्यायः। संवत् १८९८।

विषयः। श्वेताश्वतरोपनिषदः व्याख्यानम्।

No. 2548. आनन्दनिधिः। Substance, country-made paper, 12 × 6 inches. Folia, 32. Lines, 12 on a page. Extent, 1,255 ślokas. Character, Nágara. Date, Sm. 1899. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose. Incorrect.

A'nanda-nidhi. A commentary on the Rámatápaní Upanishad. By Nandana.

Beginning. श्रीगणेशाय नमः।

मातृवद्यावती श्रीरामतापनीयोपनिषत् मध्यमोत्तमाधिकारितारतम्यात् सगुणनिर्गुणो-पासनप्रकाशकपूर्व्वोत्तरभागाभ्यां प्रवर्त्तते। तत्र मन्दाधिकारिभिः सगुणोपासनयैव निर्गुणस्य उपेयत्वात् पञ्चभिः श्लोकैः आदौ सगुणपरतया रामनाम्नो निरुक्तिं कृत्वा षष्ठश्लोकेन निर्गुण-परतया निरुक्तिमाह,—चिन्मयेऽस्मिन्नित्यादिना।

End. पश्यत्यस्तत्त्वमेति मोक्षं गच्छति प्राप्नोति ग्रन्थसमाप्तिं दर्शयति। + + +
विश्वेशपादपद्मो+मकरन्दा+बिन्दुभिः।
रञ्जितायां सदा काश्यां टीकेयं नन्दनैः कृता॥
यस्योपदेश + + ना तारकं ब्रह्म काशते।
काश्यां काशीनिवासाय नमस्तस्मै पिनाकिने॥

Colophon. इति श्रीरामोत्तरतापनीयोपनिषद आनन्दनिधिनाम्नी टीका समाप्ता। संवत् १८९९।

विषयः। रामतापनीयोपनिषदः व्याख्यानम्।

No. 2549. कर्म्मविपाकसारः। Substance, country-made paper, 10 × 5 inches. Folia, 120. Lines, 12 on a page. Extent, 2,509 ślokas. Character, Nágara. Date, ? Place of deposit, Barhámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose and verse. Incorrect.

Karmavipáka-sára. A summary of the retributions which have to be borne in a subsequent life for sins committed in one life, as ordained in the Smṛitis. By Dinakara Bhaṭṭa, son of Rámakamala, grandson of Náráyaṇa, and great-grandson of Rámes'vara Súri.

Beginning. प्राद्धतोमा प्रसूयं तनयमिह पिता रामकृष्णश्च सोऽयं
प्रायश्चित्तेषु सारं दिनकरविबुधं शान्तिकानाञ्च सारं।
कृत्वाथो कर्म्मपाकेष्वखिलबुधमुदे सारमेतत् तनोति
श्रीरामाङ्घ्रिप्रसादादयमपि भजतां ख्यातिमुच्चैर्धरायां॥

ननु अनिष्टहरत्वाविशेषात् शान्तिककर्म्मविपाकयोः को भेदः उच्यते,—भाव्यनिष्टहरत्वं शान्तित्वं। भूतभाव्यनिष्टहरत्वं कर्म्मविपाकत्वमिति तयोर्भेदात्।

End. मनसः काममाकूतिं वाचः सत्यम+ महि।
पशूनां रू+ +न्नस्य मपि श्रीः श्रयतां यशः॥
कर्द्दमेन+जा भूतामपि सम्भ्रमकर्द्दमः।
+ + + + + + यं वा स्वयमेक+ मातरम्॥

Colophon. इति श्रीमद्रामेश्वरसूरिसूनुश्रीमन्नारायणसुतश्रीमद्रामकमलात्मजश्रीदिनकरभट्टकृते कर्म्मविपाकसारः समाप्तः।

विषयः। कर्म्मविपाकलक्षणं। प्रायश्चित्तावश्यकता। कृच्छ्रातिकृच्छ्रादीनां लक्षणं। रोगनिदानेषु महापातकादिषु प्रायश्चित्तनिरूपणं। तत्र प्रायश्चित्तविधिः। तत् प्रयोगकथनञ्च। भस्मस्नानादिमन्त्रकथनं। गोदानमन्त्रादिकथनं। परिभाषाकथनं। कुष्माण्डहोमविधानं। वेदपारायणविधिकथनं। सर्व्वरोगनिवर्हणनिरूपणं। सर्व्वरोगहरदक्षिणामूर्त्तिदानविधानं। आरोग्यदानकथनं। अश्वत्थसेवनविधिः। असाध्यरोगहरमहार्णवदानविधिः। अत्र ऋग्विधानोक्तसूक्तविधानं। कालपुरुषदानविधानं। अश्विनीकुमारदानविधिः। सैारद+ +चार्घ्यदानविधिः। अत्र प्रयोगकथनं। मृत्युञ्जयविधिः। कालचक्रदानविधिः। रोगघ्नतुलाविधिः। अपामार्ज्जनस्तोत्रकीर्त्तनं। सर्व्वरोगहरप्रतिमादानविधिकथनञ्च।

सामान्यतो रोगाणां त्रिविधत्वनिरूपणं। तत्रादो क्षयरोगे कदलीदानविधिकथनं। सोवर्णपद्मदानविधिः। क्षयप्रतिकृतिदानविधिः। गुड़धेनुदानविधानं। चन्द्रक्षयकथाश्रवणविधिः। ज्वरे,—विविधशमनोपायकथनं। ज्वरतर्पणविधिः। ज्वरप्रतिकृतिदानविधिः। ज्वर-

बलिदानप्रकारकथनञ्च । अपस्मारे,—विनायकदानविधिः । अत्र बलिदानप्रकारादिकथनं । दुर्गन्धाङ्गत्वहरप्रक्रियादिकथनं । एवं उन्मादवायुहरस्य । सूर्य्यमूर्त्तिदानविधिः । रुद्रमूर्त्तिदानविधिः । पाण्डुरोगादिकर्म्मविपाककथनादिकं । पृथिवीदानविधिः । कामलारोगे गरुड़दानविधिः । कामलारोगप्रतिमादानविधिः । वातरोगे मृगदानविधिः । वातरक्ते लक्ष्मीनारायणदानविधिः । वातरोगप्रतिमादानविधिः । शोथहरवस्त्रदानविधिः । कुष्ठहरसूर्य्यदानविधिः । वृषदानविधिः । कुष्ठरोगप्रतिमादानविधिः । दद्रुहर-उमामहेश्वरदानविधिः । विसर्पहरनागदानविधिः । व्रणघ्नरत्नदानविधिः । अश्वत्थदानविधिः । शिरोरोगघ्नयज्ञोपवीतदानविधिः । नेत्ररोगप्रतिमादानविधिः । मूकत्वहरतिलदानविधिः । कण्ठरोगहरप्रतिमादानविधिः । मूकत्वहरसरस्वतीदानविधिः । जिह्वारोगहरप्रतिमादानविधिः । गण्डमालारोगहरप्रतिमादानविधिः । श्वासरोगहरध्वजपाशदानविधिः । श्वासकासमूर्त्तिदानविधिः । शूलरोगहरत्रिशूलदानविधिः । गुल्महरविनायकदानविधिः । गुल्मप्रतिमादानविधिः । प्लीहप्रतिमादानविधिः । जलोदरहरमकरदानविधिः । अन्त्रवृद्धिहरनारायणदानविधिः । बहुमूत्रहरप्रतिमादानविधिः । अर्शोरोगहरप्रतिमादानविधिः । प्रमेहहरसुवर्णधेनुदानविधिः । प्रमेहप्रतिरूपकदानविधिः । बन्ध्यात्वहररुद्रस्नानविधिः । सुवर्णधेनुदानविधिः । दारिद्र्यहरकुवेरप्रतिमादाननिधिः । किञ्च सर्व्वत्र रोगे कर्म्मविपाककथनञ्च ।

No. 2550. त्रिकण्डिकासूत्रविवरणम् । Substance, country-made paper, 9 × 3 inches. Folia, 14. Lines, 8 on a page. Extent, 260 ślokas. Character, Nágara. Date, Sᴍ. 1895. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Correct.

Trikaṇḍiká-sútra-vivaraṇa. A summary of the daily religious duties of householders as enjoined severally in the Káṇva, the Mádhyandiní, and the Vájasaneya, or the three leading schools of the White Yajur Veda.

Beginning. अहन्यहनि कर्त्तव्यं द्विजानां मन्नियोगतः ।
तदत्र लिख्यते स्पष्टं महादेवद्विवेदिना ॥

अथ भगवता कात्यायनेन सर्व्वाः श्रुतीरवधार्य्य माध्यन्दिनानामनुष्ठानार्थमथातोऽधिकार इत्यारभ्य स्वाध्यायदर्शनादित्यन्तं निराकाङ्क्षं यथा सूत्रमुपनिबद्धं तथैव सूतेर्निराकाङ्क्षं नित्यस्नानमुपनिबध्यते । अथातो नित्यस्नानं ।

End. एष स्नानविधिरेष स्नानविधिः विहित इति शेषः । काण्वमाध्यन्दिनानामेष पठितो मध्याह्नस्नानविधिः । अभ्यासः समाप्तिज्ञापनार्थः ।

Colophon. इति सहस्रोदीच्यज्ञातीयद्विवेदिमहादेवकृतं त्रिकण्डिकासूत्रविवरणं समाप्तं । संवत् १८९५ । शकाब्दाः १७६० । श्रावणमास ।

विषयः । शुक्लयजुर्व्वेदीयकाण्वमाध्यन्दिनकात्यायनकृतसूत्रीयस्नानतर्पणप्रकरणव्याख्यानं ।

No. 2551. शङ्खचक्रविधिः । Substance, country-made paper, 10 × 4 inches. Folia, 4. Lines, 10 on a page. Extent, 135 ślokas. Character, Nágara. Date, Sm. 1894. Place of deposit, Bahrámpur, Bábu Rádhiká-prasáda Sen. Appearance, new. Prose. Correct.

S'aṅkhachakra-vidhi. Rules for stamping the person with marks of the conch-shell, the discus and other emblems of Vishṇu, according to the school of Rámánuja.

Beginning. शुभे मुहूर्त्ते परीक्षितं शिष्यमाचार्य्यः पञ्चसंस्कारकर्म्मणा संस्करिष्यमाण-शिष्येण साकं महातीर्थे स्नानं कृत्वा कृतकर्म्मा गृहमागत्य भगवदाराधनं कृत्वा आचार्य्यः शिष्येण इत्यादि ।

End. श्रीरामानुजभगवदाराधनरूपं नाम दत्त्वा शिष्यदक्षिणकर्णे रहस्यत्रयञ्च उपदिशेत् । अथ शिष्यानुष्ठानक्रममुपदिश्य भगवदाराधनत्वमुपदिशेत् ।

Colophon. इति शङ्खचक्रविधिः सम्पूर्णः । संवत् १८९४ माघमास ।

विषयः । रामानुजसम्प्रदायानुसारेण शङ्खचक्रादिचिह्नधारणपद्धतिकथनं ।

No. 2552. दानमयूखः । Substance, country-made paper, 10 × 6 inches. Folia, 151. Lines, 14 on a page. Extent, 4,987 ślokas. Character, Nágara. Date, Sm. 1876. Place of deposit, Bahrámpur, Bábu Rádhiká-prasáda Sen, Appearance, new. Prose and verse. Correct.

Dánamayúkha. A digest of the Smṛiti rules regarding religious gifts and their consecration. By Nilkaṇṭha Bhaṭṭa, son of Sañkara Bhaṭṭa, and grandson of Bhaṭṭa Náráyaṇa. The work professes to be a part of an elaborate digest of the Smṛiti, entitled Bhagavadbháskhara.

Beginning. यो लीलया सन्तनुतेऽत्र विश्वं तत्पालयत्यात्मनि विश्वरूपं ।
क्षयं नयत्याशु च पूर्णरूपः शिवं तनोत्वाशु रविर्म्महासौ ॥
श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तत्तन्निबन्धानपि सन्निबन्धान् ।
श्रीशङ्करस्यात्मज एष दाने श्रीनीलकण्ठो विदधाति कृत्यं ॥

परस्वत्वोत्पत्त्यन्तो द्रव्यत्यागो दानं । इत्यादि ।

End. मात्स्ये,—

कपिले सर्व्वभूतानां पूजनीयासि रोहिणि ।
सर्व्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

Colophon. इति श्रीजगद्गुरुभट्टनारायणसूरिसूनुपण्डितशिरोरत्नमीमांसकशङ्कर-भट्टात्मजभट्टनीलकण्ठकृते भगवद्भास्करे दानमयूखः समाप्तः। संवत् १८७९। आषाढ़।

विषयः। दानलक्षणविचारः। देयादेयनिरूपणम्। यत्यादिभ्यो हेमादिदाननिषेधः। दानयोग्यकालनिरूपणं। पुण्यदेशनिरूपणं। अग्राह्यद्रव्यकथनं। दानकृत्यनिरूपणं। समर्थस्य अनुकल्पकरणे दोषकथनं। पात्रासन्निधाने दानविधानं। प्रतिग्रहीतृकृत्यनिरूपणं। अप्रत्याख्येयनिरूपणं। द्रव्यदेवतानिरूपणं। परिभाषाकीर्त्तनं। तत्र प्रतिनिध्यादिविधानं। नवरत्नपञ्चपल्लवादिकथनं। दूर्व्वादिनवकौतुककथनं। दशाङ्गादिधूपकथनं। प्रतिमालक्षणादिकथनं। विष्णुलक्षणं। दक्षिणादिनिरूपणं। द्रव्यमानकथनं। धान्यादिमानकथनं। भूमिमानकथनं। मण्डपादिलक्षणं। कुण्डलक्षणादिकथनं। षोड़शारचक्रनिर्म्माणकथनं। ग्रहपूजाप्रकारकीर्त्तनं। तत्र तदधिदेवताकथनं। प्रत्यधिदेवताकथनं। विनायकादिलक्षणं। लोकपालादिरूपकथनं। पूजाप्रकारकथनं। ग्रहपूजाविधिः। पुन्याहवाचनविधिः। नीराजनविधिकथनं। अभिषेकविधिकथनं। वास्तुपूजाविधिः। द्वारपूजाविधिः। होमविधिः। नवग्रहसूक्तकथनं। अधिदेवतालोकपालादिसूक्तकथनं। जप्यसूक्तादिकथनं। यजुर्व्वेदिनां कुशण्डिकानन्तरं प्रधानहोममन्त्रकथनं। एवं सामगादीनां ज्ञेयम्। इति परिभाषा। तुलापुरुष-हिरण्यगर्भ-ब्रह्माण्डादिषोड़शमहादानकथनं। तुलापुरुषदानप्रयोगः। रजतादितुलाविधिः। नानारोगघ्नलोहादितुलाविधिः। घृतादितुलाविधिः। अत्र साम्प्रदायिकप्रयोगकथनं। हिरण्यगर्भदानविधिः। अत्र प्रयोगकथनं। ब्रह्माण्डदानविधिः। अत्र प्रयोगकथनं। एवं परत्र ज्ञेयं। कल्पतरुदानविधिः। गोसहस्रदानविधिः। हिरण्यकामधेनुदानविधिः। हिरण्याश्वदानविधिः। हिरण्याश्वरथदानविधिः। हेमहस्तिरथदानविधिः। पञ्चलाङ्गलदानविधिः। धरादानविधिः। विश्वचक्रदानविधिः। कल्पलतादानविधिः। सागरदानविधिः। रत्नधेनुदानविधिः। महाभूतघटदानविधिः। अन्यविधमहादानकथनं। तत्र सुवर्णदानविधिः। रजतदानविधिः। अश्वदानविधिः। शतमानदानविधिः। श्वेताश्वदानविधिः। तिलदानविधिः। महातिलपात्रदानविधिः। मार्त्तण्डापकरणतिलपूर्णकांस्यपात्रदानविधिः। तिलकुम्भदानविधिः। तिलकरकदानविधिः। गजदानविधिः। दासीदानविधिः। रथदानविधिः। महीदानविधिः। गृहदानविधिः। ग्रहशान्तिप्रयोगकथनं। प्रतिश्रय (धर्म्मशाला) दानविधिः। कन्यादानविधिः। कपिलादानविधिः। दशधेनुदानविधिः। घृतधेनुदानविधिः। जलधेनुदानविधिः। क्षीरधेनुदानविधिः। दधिधेनुदानविधिः। मधुधेनुदानविधिः। रसधेनुदानविधिः। शर्कराधेनुदानविधिः। कार्पासधेनुदानविधिः। लवणधेनुदानविधिः। सुवर्णधेनुदानविधिः। स्वरूपतो गोदानविधिः। वैतरणी-

गोदानविधिः। महिषीदानविधिः। मेषीदानविधिः। अजादानविधिः। मेषदानविधिः। अचलदानविधिः। धान्यादिशैलदानविधिः। लवणाचलदानविधिः। गुड़पर्व्वतदानविधिः। सुवर्णाचलदानविधिः। तिलपर्व्वतदानविधिः। कार्पासाचलदानविधिः। घृताचलदानविधिः। रत्नाचलदानविधिः। रौप्याचलदानविधिः। शर्कराचलदानविधिः। शिखरदानविधिः। भद्रनिधिदानविधिः। आनन्दनिधिदानविधिः। दशावतारदानविधिः। त्रिमूर्त्तिदानविधिः। द्वादशादित्यदानविधिः। चन्द्रादित्यदानविधिः। लोकपालाष्टकदानविधिः। नवग्रहदानविधिः। वारदानविधिः। स्थूलदानविधिः। आत्मप्रतिकृतिदानविधिः। धनदमूर्त्तिदानविधिः। शालग्रामदानविधिः। कालपुरुषदानविधिः। कालचक्रदानविधिः। यमदानविधिः। पुष्करदानविधिः। आयुस्करदानविधिः। सम्पत्करदानविधिः। कृष्णाजिनदानविधिः। शय्यादानविधिः। वस्त्रदानविधिः। भाजनदानविधिः। स्थालीदानविधिः। पाकदानविधिः। विद्यादानविधिः। वेददानविधिः। पुस्तकदानविधिः। छत्रादिदानविधिः। अन्नदानविधिः। वर्षाशनदानविधिः। ताम्बूलदानविधिः। गन्धद्रव्यदानविधिः। रत्नदानविधिः। प्रपादानविधिः। उदकदानविधिः। धर्म्मघटदानविधिः। यज्ञोपवीतदानविधिः। यष्टिदानविधिः। धनदानविधिः। दीपदानविधिः। अभयदानविधिः। द्वादशमासेषु दानविधिः। अश्वत्थसेचनविधिः। पान्योण्ण्गारविधिः। गोपरिचर्य्याविधिः। धान्य-तण्डुल-गोधूम-यव-मुद्ग चणक-पायसान्नादिदानविधिः। गणेशप्रतिमादानविधिः। सूर्य्यप्रतिमादानविधिः। उमामहेश्वरमूर्त्तिदानविधिः। स्वर्णाभरणादिदानविधिः। स्वर्णपात्रादिदानविधिः। फलदानादिविधिकीर्त्तनञ्च।

CLASSIFICATION.

I.—Veda S'a'stra.
- *a.* Sañhitá (hymns).
- *b.* Bráhmaṇa (ceremonicals).
- *c.* A'raṇyaka (do. appropriate for forest life).
- *d.* Upaṇishad (theology).
- *e.* Vaidika (Sútra, rituals, phonetics, &c.)

II.—Aitiha'sika S'a'stra.
- *a.* Itihása (history).
- *b.* Puráṇa (ancient legends).

III.—Ka'vya S'a'stra.
- *a.* Kávya (poems).
- *b.* Náṭaka (drama).
- *c.* Champú (poetico-prose compositions).
- *d.* Kosha (miscellaneous poetical collections).
- *e.* Upákhyána (tales and romances).

IV.—A'bhidha'na S'a'stra (lexicography).

V.—Vya'karaṇa S'a'stra (grammar).

VI.—Chhandah S'a'stra (versification).

VII.—Alañka'ra S'a'stra (rhetoric).

VIII.—Jyotisha S'a'stra (astronomy and astrology).

IX.—Smṛiti S'a'stra (law, civil and canonical).

X.—Sañgita S'a'stra (music).

XI.—S'ilpa S'a'stra (arts).

XII.—Ka'ma S'a'sta (economics).

XIII.—Dars'ana S'a'stra (philosophy).
- *a.* Dárs'anika (general philosophy).
- *b.* Sáñkhya (hylotheistic).
- *c.* Yoga (theocratic).
- *d.* Nyáya (dialectic).
- *e.* Vais'eshika (physical).
- *f.* Mímáñsá (ritualistic).
- *g.* Vedánta (monotheistic).
- *h.* Aparadárs'anika (minor systems of philosophy.)

XIV.—BHAKTI S'A'STRA (faith).

XV.—TANTRA S'A'STRA (mysticism).

XVI.—VAIDYAKA S'A'STRA (medicine).

XVII.—JAINA S'A'STRA (Jaina religion).

XVIII.—BAUDDHA S'A'STRA (Bauddha religion).

XIX.—ANIRDHISHṬA (miscellaneous).

CLASSIFIED INDEX.

I.—Veda S'a'stra.

a. *Sañhitá.*

b. *Bráhmaṇa.*

c. *A'raṇyaka.*

d. *Upanishad.*

e. *Vaidika.*

II.—Aitiha'sika S'a'stra.

a. Itihása.

---

b. Puráṇa.

III.—Ka'vya S'a'stra.

a. Kávya.

b. Náṭaka.

c. *Champú.*

d. *Kosha.*

e. *Upákhyána.*

IV.—Abhidha'na.

V.—Vyákaraṇa.

VI.—Chhandah.

VII.—Alankára.

VIII.—Jyotisha.

IX.—Smṛiti.

X.—Sangita S'ástra.

XI.—S'ilpa S'ástra.

XII.—Káma S'ástra.

XIII.—Darsana S'ástra.

---

a. Darsana.

---

b. Sáñkhya.

---

c. Yoga.

---

d. Nyáya.

---

e. Vais'eshika.

---

f. Mímáṅsá.

g. Vedánta.

h. Aparadársanika.

XIV.—Bhakti S'ástra.

XV.—Tantra S'ástra.

XVI.—Vaidyaka S'ástra.

XVII.—Jaina S'ástra.

XVIII.—Bauddha S'a'stra.

XIX.—Anirdishta.

NOTICES

OF

SANSKRIT MSS.

BY

RA'JENDRALA'LA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German and of the American Oriental Societies, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME VII.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

1884.

INDEX TO VOLUME VII.